॥ समाप्तं त्वेतद्ब्रह्ममहापुराणम् । अतःपरं गौतमीमाहात्म्यम् ॥

सविनयं मूच्यते ।

अनुगृह्णन्तु पौराणिकाः पुरोलिखितविषयोपरि कृपाकटाक्षदानेन ।

अस्माभिर्ब्रह्ममहापुराणं पुरातनानि लिखितानि चत्वारि पुस्तकान्युपलभ्य तत्रैकं पुस्तक संशोध्य मुद्रितं सज्जागर्ति । प्रथमोपलब्धपुस्तकेषु तेषु न कुत्रापि गौतमीमाहात्म्यं निर्दिष्टं किंतु पश्चादुपलब्धानंदाश्रममुद्रितपुस्तक एवेदं गौतमीमाहात्म्यमुपलभ्य ततोऽन्यतः समानीतस्य केवलगौतमीमाहात्म्यस्यैतदन्तर्गतत्वमा त्रपर्यालोचनेन "आगन्तूनामन्ते निवेशः" इति न्यायेन पुराणान्त एतन्माहात्म्यनिवेशः कृतः ।

आनंदाश्रममुद्रितपुस्तके मध्ये गौतमीमाहात्म्यनिवेशपरिपाटी तु न विबुधबुद्धिसमाधानायालं भवति ।

पुरुषोत्तममाहात्म्यमध्ये एतन्माहात्म्याध्यायारंभे ११ एकादशश्लोकोत्तरं १२ द्वादशं श्लोकमारभ्यैव शाके १७९४ अंगिरानामसंवत्सरे "ज्ञानदीपक" मुद्रणालये मुद्रितस्य गौतमीमाहात्म्यस्य केवलस्य दर्शनात्, अस्मिंश्च पुरुषोत्तममाहात्म्यलेशस्यापि दर्शनाभावात्, ब्रह्मर्षिसंवादात्मके पूर्वार्धे नारदब्रह्मसंवादनिवे शस्याशक्यत्वात्पागग्रे च पुरुषोत्तममाहात्म्ये तत्पुस्तकेऽपि ब्रह्मर्षिसंवादस्यैव दर्शनात्, मध्ये गौतमीमाहात्म्येऽपि ब्रह्मर्षिसंवादस्यैव योग्यत्वेपि तद्व्यतिरेकेण नारद ब्रह्मसंवादस्य दर्शनं पूर्वापरसंदर्भविरुद्धमिति पुरुषोत्तममाहात्म्यमध्ये गौतमीमाहात्म्यसन्निवेशनस्याप्रामाणिकत्वं तर्कयामः । पुरुषोत्तममाहात्म्यानंतरं पुराणश्रव णफलाध्यायात्पाग्वा एतन्निवेशस्य कर्तुशक्यत्वेऽपि विनिगमनाविरहेण सन्निवेशस्थानविषये संदिहानैः कालान्तरे प्राचीनलिखितपुस्तकान्तरमुपलभ्य स्थाननि श्चयपूर्वकं गौतमीमाहात्म्यसन्निवेशेनालंकृत्य पुनरपि पुराणमिदं निवेदयिष्याम इति शम् ॥

श्रीगणेशाय नमः ॥ अथ गौतमीमाहात्म्यम् ॥ मुनय ऊचुः ॥ नहि नस्तृप्तिरस्तीह शृण्वतां तीर्थविस्तरम् ॥ पुनरेव परं गुह्यं वक्तुमर्हस्यशेषतः ॥ परं तीर्थस्य माहात्म्यं सर्वतीर्थोत्तमोत्तमम् ॥ १ ॥ ब्रह्मोवाच ॥ इममेव पुरा प्रश्नं पृष्टोऽहं द्विजसत्तमाः ॥ नारदेन प्रयत्नेन तदा तं प्रोक्तवानहम् ॥२॥ ॥ नारद उवाच ॥ तपसो यज्ञदानानां तीर्थसेवनमुत्तमम् ॥ इति श्रुतं मया त्वत्तो जगद्योने जगत्प्रभो ॥ ३ ॥ दैवानि मुनिशार्दूल आसुराण्यार्षाणि च ॥ कियद्भेदानि तीर्थानि किंफलानि सुरेश्वर ॥ सर्वेषामेव तीर्थानां सर्वदा किं विशिष्यते ॥ ४ ॥ ॥ ब्रह्मोवाच ॥ चतुर्विधानि तीर्थानि स्वर्गे मर्त्ये रसातले ॥ दैवानि मुनिशार्दूल आसुराण्यार्षाणि च ॥ ५ ॥ मानुषाणि त्रिलोकेषु विख्यातानिं सुरादिभिः ॥ मानुषेभ्यश्च तीर्थेभ्य आर्षिकं सार्वकामिकम् ॥ ६ ॥ आर्षिकेभ्यस्तु तीर्थेभ्य आसुरं बहुपुण्यदम् ॥ आसुरेभ्यस्तथा पुत्र दैवं तत्सार्वकामिकम् ॥ ७ ॥ ब्रह्मविष्णुमहेशाद्यैर्निर्मितं दैवमुच्यते ॥ त्रिभ्यो यदेकं जायेत तस्मान्नातः परं विदुः ॥ ८ ॥ त्रयाणामपि लोकानां तीर्थं मर्त्यमुदाहृतम् ॥ तत्रापि जाम्ववं द्वीपं तीर्थं बहुगुणोत्तमम् ॥ ९ ॥ जाम्बवे भारतं वर्षं तीर्थं श्रुतिषु विश्रुतम् ॥ भारते दण्डकारण्यं सर्वतीर्थमनुत्तमम् ॥ कर्मभूमिर्यतः पुत्र तस्मात्तीर्थं तदुच्यते ॥ १० ॥ तत्रैव सर्वतीर्थानि यान्युक्तानि मया तव ॥ तेषां नामानि संक्षेपात्कथ्यमानानि मे शृणु ॥ ११ ॥ दैवानि चासुरार्षाणि मानुषाणीतिभेदतः ॥ हिमवद्विन्ध्ययोर्मध्ये षण्नद्यो देवसंभवाः ॥ १२ ॥ तथैव देवजा ब्रह्मन्दक्षिणार्णवविन्ध्ययोः ॥ एता द्वादश नद्यस्तु प्राधान्येन प्रकीर्तिताः ॥ १३ ॥ अभिसंपूजितं यस्माद्भारतं बहुपुण्यदम् ॥ कर्मभूमिरतो देवैर्वर्षं तस्मात्प्रकीर्तितम् ॥ १४ ॥ पार्वतानि च तीर्थानि देवजानि क्वचित्क्वचित् ॥ असुरैराकृतं यत्तु तदेवाऽऽसुरमुच्यते ॥ १५ ॥ दैवेष्वेव प्रदेशेषु तपस्तप्त्वा महर्षयः ॥ दैवप्रभावात्तपसं आर्षाण्यपि च तान्यपि ॥ ॥ १६ ॥ आत्मनः श्रेयसे मुक्त्यै पूजायै भूतयेऽथवा ॥ आत्मनः फलभूत्यर्थं यशसोऽवाप्तये पुनः ॥ १७ ॥ मानुषैः कारितान्याहुर्मानुषाणीति नारद ॥ एवं चतुर्विधो भेदस्तीर्थानां मुनिसत्तम ॥ १८ ॥ भेदं न कश्चिज्जानाति श्रोतुं युक्तोऽसि नारद ॥ बहवः पण्डितंमन्याः शृण्वन्ति कथयन्ति च ॥ सुकृती कोऽपि जानाति वक्तुं श्रोतुं निजैर्गुणैः ॥ १९ ॥ ॥ नारद उवाच ॥ तेषां स्वरूपं भेदं च श्रोतुमिच्छामि तत्त्वतः ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुक्तिर्भवति शाश्वती ॥ २० ॥ ब्रह्मन्कृतयुगस्यादौ ह्युपायोऽन्यो न विद्यते ॥ तीर्थसेवां विना स्वल्पायासेनाभीष्टदायिनीम् ॥ २१ ॥ न त्वया सदृशो धातर्वक्ता ज्ञाताऽथवा क्वचित् ॥ त्वं नाभिकमले विष्णोः संजातोऽखिलपूर्वजः ॥ २२ ॥ ॥ ब्रह्मोवाच ॥ गोदावरी भीमरथी तुङ्गभद्रा च वेणिका ॥ तापी पयोष्णी विन्ध्यस्य दक्षिणे तु प्रकीर्तिताः ॥ २३ ॥ भागीरथी नर्मदा तु यमुना च सरस्वती ॥ विशोका च वितस्ता

च हिमवत्पर्वताश्रिताः ॥ २४ ॥ एता नद्यः पुण्यतमा देवतीर्थान्युदाहृताः ॥ गयः कोलासुरो वृत्रस्त्रिपुरो ह्यन्धकस्तथा ॥ २५ ॥ हयमूर्धा च
लवणो नमुचिः शृङ्गकस्तथा ॥ यमः पातालकेतुश्च मधुः पुष्कर एव च ॥ २६ ॥ एतैरावृततीर्थानि आसुराणि शुभानि च ॥ प्रभासो भार्गवोऽ
गास्तिर्नरनारायणौ तथा ॥ २७ ॥ वसिष्ठश्च भरद्वाजो गौतमः कश्यपो मनुः ॥ इत्यादिमुनिजुष्टानि ऋषितीर्थानि नारद ॥ २८ ॥ अम्बरीषो हरि
श्चन्द्रो नहुषो राम एव च ॥ कुरुः कनखलश्चैव भरतः सगरस्तथा ॥ २९ ॥ अश्वयूपो नाचिकेता वृषाकपिरारिंदमः ॥ इत्यादिमानुषैर्विप्र निर्मितानि
शुभानि च ॥ ३० ॥ यशसः फलभूत्यर्थं निर्मितानीह नारद ॥ स्वतोद्भूतानि दैवानि यत्र क्वापि जगत्त्रये ॥ ३१ ॥ पुण्यतीर्थानि तान्याहुस्तीर्थभेदो
मयोदितः ॥ यत्र स्नातं तु केनापि देवस्नातं तदुच्यते ॥ ३२ ॥ संक्षेपेणोदितोऽयं ते तीर्थभेदो मया मुने ॥ मुच्यते सर्वपापेभ्यो नरो यज्ज्ञानमा
त्रतः ॥ ३३ ॥ ॥ इति श्रीब्रह्मपुराणगत गौतमीमाहात्म्ये स्वयंभुनारदसंवादे तीर्थभेदवर्णनं नाम प्रथमोऽध्यायः ॥ १ ॥ ॥ नारद उवाच ॥ त्रिदै
वत्यं तु यत्तीर्थं सर्वेभ्यो ह्युत्तमोत्तमम् ॥ तस्य स्वरूपं भेदं च विस्तरेण ब्रवीतु मे ॥ १ ॥ ब्रह्मोवाच ॥ तावदन्यानि तीर्थानि तावत्ताः पुण्यभूमयः ॥
तावद्यज्ञादयो यावत्त्रिदैवत्यं न दृश्यते ॥ २ ॥ व्रतोपवासकृच्छ्रेभ्यो गङ्गासेवा महाफला ॥ कृच्छ्रकाः सर्वतीर्थेषु दृश्यन्ते तेषु देहिनाम् ॥ ३ ॥
द्रव्यात्ममातृजनकाद्या शुद्धिर्देहिनां मुने ॥ त्रिदैवत्य विहायेह कथं पापक्षयो भवेत् ॥ स्मृता दृष्टाऽथवा स्पृष्टा या सर्वाकाङ्क्षितप्रदा ॥ ४ ॥
गङ्गेयं सरितां श्रेष्ठा सर्वकामप्रदायिनी ॥ त्रिदैवत्या मुनिश्रेष्ठ तदुत्पत्तिमितः शृणु ॥ ५ ॥ वर्षाणामयुतात्पूर्वं देवकार्य उपस्थिते ॥ तारको
बलवानासीन्मद्ररादतिगर्वितः ॥ ६ ॥ देवानां परमैश्वर्यं हृतं तेन बलीयसा ॥ ततस्ते शरणं जग्मुर्देवाः सेन्द्रपुरोगमाः ॥ ७ ॥
क्षीरोदशायिनं देवं जगतां प्रपितामहम् ॥ कृताञ्जलिपुटा देवा विष्णुमूचुरनन्यगाः ॥ ८ ॥ ॥ देवा ऊचुः ॥ त्वं त्राता जगतां नाथ देवानां
कीर्तिवर्धन ॥ सर्वेश्वर जगद्योने त्रयीमूर्ते नमोऽस्तु ते ॥ ९ ॥ लोकस्रष्टाऽसुरान्हन्ता त्वमेव जगतां पतिः ॥ स्थित्युत्पत्तिविनाशानां कारणं त्वं
जगन्मय ॥ १० ॥ त्राता न कोप्यस्ति जगत्त्रयेऽपि शरीरिणां सर्वविपद्गतानाम् ॥ त्वया विना वारिजपत्रनेत्र तापत्रयाणां शमनं न चान्यत् ॥ ११ ॥
पिता च माता जगतोऽखिलस्य त्वमेव सेवासुलभोऽसि देव ॥ प्रसीद पाहीश महाभयेभ्योऽस्मदार्तिहन्ता वद कस्त्वदन्यः ॥ १२ ॥ आदिकर्ता
वराहस्त्वं मत्स्यः कूर्मस्तथैव च ॥ इत्यादिरूपभेदैर्नो रक्षसे भय आगते ॥ १३ ॥ हृतस्वाम्यान्सुरगणान्हृतदारान्हृतस्थलान् ॥ कस्मान्न रक्षसे
देव अनन्यशरणान्हरे ॥ १४ ॥ ॥ ब्रह्मोवाच ॥ ततः प्रोवाच भगवाञ्च्छेषशायी श्रियः पतिः ॥ कस्माद्वो भयमापन्नं तद्ब्रुवन्तु गतज्वराः ॥ ततः

श्रियः पतिं प्राहुस्तं तारकवधं प्रति ॥ १५ ॥ ॥ देवा ऊचुः ॥ तारकाद्भयमापन्नं भीषणं रोमहर्षणम् ॥ न युद्धैस्तपसा शापैर्हन्तुमेनं क्षमा वयम् ॥ १६ ॥ अर्वाग्दशाहाद्यो बालस्तस्मान्मृत्युमवाप्स्यति ॥ तस्मादेव न चान्येभ्यस्तत्र नीतिर्विधीयताम् ॥ १७ ॥ ॥ ब्रह्मोवाच ॥ पुनर्नो रायणः प्राह नाहं बलोत्कटः सुरैः ॥ न मत्तो मदपत्याच्च न देवेभ्यो वधो भवेत् ॥ १८ ॥ ईश्वराद्यत्तु जायेत ह्यपत्यं बहुशक्तिमत् ॥ तस्माद्वधम वाप्नोति तारको लोकतापनः ॥ १९ ॥ तद्गच्छामः सुराः सर्वे यतितुमृषिभिः सह ॥ भार्यार्थं प्रथमो यत्नः कर्तव्यः प्रभविष्णुभिः ॥ २० ॥ तथेत्युक्त्वा सुरगणा जग्मुस्सर्वे नगोत्तमम् ॥ हिमवन्तं रत्नमयं मेनां च हिमवत्प्रियाम् ॥ २१ ॥ इदमूचुः सर्व एव सभार्यं तुहिनं गिरिम् ॥ २२ ॥ ॥ देवा ऊचुः ॥ दाक्षायणी लोकमाता या शक्तिः संस्थिता शिवा ॥ बुद्धिः प्रज्ञा धृतिर्मेधा लज्जा पुष्टिः सरस्वती ॥ २३ ॥ एवं त्वनेकधा लोके या स्थिता लोकपावनी ॥ देवानां कार्यसिद्ध्यर्थं युवयोर्गर्भमाविशत् ॥ २४ ॥ सातूत्पन्ना जगन्माता शंभोः पत्नी भविष्यति ॥ अस्माकं भवतां चापि पालनी च भविष्यति ॥ २५ ॥ ॥ ब्रह्मोवाच ॥ हिमवानपि तद्वाक्यं सुराणामभिनन्द्य च ॥ मेना चापि महोत्साहा अस्त्वित्येवं वचोऽ ब्रवीत् ॥ २६ ॥ तदोत्पन्ना जगद्धात्री गौरी हिमवतो गृहे ॥ शिवध्यानरता नित्यं तत्प्रिया तत्परायणा ॥ २७ ॥ तां च प्रोचुः सुरगणा ईशार्थे तप आविश ॥ ततो हिमवतः पृष्ठे गौरी तेपे तपो महत् ॥ २८ ॥ पुनः संमन्त्रयामासुरीशो ध्यायति तां कथम् ॥ आत्मानं वा तथाऽन्यद्वा न जानीमः कथं भवः ॥ २९ ॥ मेनकायाः सुतायां तु चित्तं दध्यात्सुरेश्वरः ॥ तत्र नीतिर्विधातव्या ततः श्रेष्ठ्यमवाप्स्यथ ॥ ततः प्राह महाबुद्धि र्वाचस्पतिरुदारधीः ॥ ३० ॥ ॥ बृहस्पतिरुवाच ॥ यस्त्वसौ मदनो धीमान्कन्दर्पः पुष्पचापधृक् ॥ स विध्यतु शिवं शान्तं बाणैः पुष्पमयैः शुभैः ॥ ३१ ॥ तेन विद्धस्त्रिनेत्रोऽपि ईशायां बुद्धिमादधेत् ॥ परिणेष्यत्यसौ नूनं तदा तां गिरिजां हरः ॥ ३२ ॥ जयिनः पञ्चबाणस्य न बाणाः क्वापि कुण्ठिताः ॥ तथोढायां जगद्धात्र्यां शंभोः पुत्रो भविष्यति ॥ ३३ ॥ जातः पुत्रस्त्रिनेत्रस्य तारकं स हनिष्यति ॥ वसन्तं च सहायार्थं शोभिष्ठं कुसुमाकरम् ॥ ३४ ॥ आह्वादनं च मनसा कामायैनं प्रयच्छथ ॥ ३५ ॥ ॥ ब्रह्मोवाच ॥ तथेत्युक्त्वा सुरगणा मदनं कुसुमाकरम् ॥ प्रेषयामासुरव्यग्राः शिवान्तिकमरिंदमाः ॥ ३६ ॥ स जगाम त्वरा कामो धृतचापो समाधवः ॥ रत्या च सहितः कामः कर्तुं कर्म सुदुष्करम् ॥ ३७ ॥ गृहीत्वा सशरं चापमीश्वरस्य पुरोभवत् ॥ मया वेध्यस्त्ववेध्यो वै शंभुर्लोकगुरुः प्रभुः ॥ ३८ ॥ त्रैलोक्यजयिनो बाणाः शंभौ मे किं दृढा न वा ॥ तेनासौ चाग्निनेत्रेण भस्मशेषस्तदा कृतः ॥ ३९ ॥ तदेव कर्म सुदृढमीक्षितुं सुरसत्तमाः ॥ आजग्मुस्तत्र यद्वृत्तं शृणु विस्मयकारकम् ॥ ४० ॥

शंभुं दृष्ट्वा सुरगणा यावत्पश्यन्ति मन्मथम् ॥ तावच्च भस्मसाद्भूतं कामं दृष्ट्वा भयातुराः ॥ तुष्टुवुस्त्रिदशेशानं कृताञ्जलिपुटाः सुराः ॥ ४१ ॥ ॥ देवा ऊचुः ॥ तारकाद्भयमापन्नं कुरु पत्नीं गिरेः सुताम् ॥ ॥ ब्रह्मोवाच ॥ विद्धचित्तो हरोऽप्याशु मेने वाक्यं सुरोदितम् ॥४२॥ गणयन्ति महात्मा नः परार्थं न हिताहितम् ॥ अरुन्धतीं वसिष्ठं च मां तु चक्रधरं तथा ॥ ४३ ॥ प्रेषयामासुरमरा विवाहाय परस्परम् ॥ संबन्धोऽपि तथाऽप्यासीद्धिमवल्लोकनाथयोः ॥४४॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये स्वयंभुनारदसंवादे गंगोत्पत्तौ शंभुविवाहसंभवो नाम द्वितीयोऽध्यायः ॥ २ ॥ ब्रह्मोवाच ॥ हिमवत्पर्वते श्रेष्ठे नानारत्नविचित्रिते ॥ नानावृक्षलताकीर्णे नानाद्विजनिषेविते ॥ १ ॥ नदीनदसरःकूपतडागादिभिरावृते ॥ देवगन्धर्व यक्षादिसिद्धचारणसेविते ॥ २ ॥ शुभमारुतसंपन्ने हर्षोत्कर्षैककारणे ॥ मेरुमन्दरकैलासमैनाकादिनगैर्वृते ॥ ३ ॥ वसिष्ठागस्त्यपौलस्त्यलोमशादिभिरावृते ॥ महोत्सवे वर्तमाने विवाहः समजायत ॥ ४ ॥ तत्र वेदी रत्नमयी सूत्रता स्वर्णभूषिता ॥ रचिता मण्डपे दिव्ये मनोज्ञा विश्वकर्मणा ॥ वज्रमाणिक्यवैदूर्यतन्मयस्तम्भशोभिता ॥ ५ ॥ जयालक्ष्मीशुभाक्षान्तिकीर्तिपुष्ट्यादिसंवृता ॥ मेरुमन्दरकैलासैस्वतैः परिशोभितैः ॥ ॥ ६ ॥ पूजितो लोकनाथेन विष्णुना प्रभविष्णुना ॥ मैनाकः पर्वतश्रेष्ठो रेजे तत्र हिरण्मयः ॥ ७ ॥ ऋषयो लोकपालाश्च आदित्याः समरुद्गणाः ॥ विवाहे वेदिकां चक्रुर्देवदेवस्य शूलिनः ॥ ८ ॥ विश्वकर्मा स्वयं त्वष्टा वेदीं चक्रे सतोरणाम् ॥ सुरभिर्नन्दिनी नन्दा सुनन्दा कामदोहिनी ॥ ९ ॥ आभिस्तु शोभिते कान्ते विवाहः समजायत ॥ समुद्राः सरितो नागा ऋषयो लोकमातरः ॥ १० ॥ सवनस्पतिबीजाश्च सर्वे तत्र समाययुः ॥ भुवः कर्म इला चक्रे ओषध्यस्त्वन्नकर्म च ॥११॥ वरुणः पानकर्माणि दानकर्म धनाधिपः ॥ अग्निश्चकार यच्चेष्टं हिमवल्लोकनाथयोः ॥ १२ ॥ तत्र तत्र पृथक्पूजां चक्रे विष्णुः सनातनः ॥ वेदाश्च सरहस्या वै गायन्ति च वदन्ति च ॥ १३ ॥ नृत्यन्त्यप्सरसः सर्वा जगुर्गन्धर्वकिंनराः ॥ लाजाधृक्चापि मैनाको बभूव मुनिसत्तम ॥ १४ ॥ पुण्याहवाचनं वृत्तमन्तर्वेश्मनि नारद ॥ वेदिकायामुपाविष्टौ दंपती सुरसत्तमौ ॥ १५ ॥ अग्निं प्रज्वाल्य विधिवदश्मानं चापि पुत्रक ॥ हुत्वा लाजांश्च विधिवत्प्रदक्षिणमथाकरोत् ॥ १६ ॥ अश्मनः स्पर्शहेतोश्च देव्यङ्गुष्ठं करेऽस्पृशत् ॥ विष्णुना प्रेरितः शंभुर्दक्षिणस्य पदस्य च ॥ १७ ॥ तामदर्शमहं तत्र होमं कुर्वन्हरान्तिके ॥ दृष्टेऽङ्गुष्ठे दुष्टबुद्ध्या वीर्यं सुस्राव मे तदा ॥ १८ ॥ विडम्बितो न कामेन कोऽप्यस्मिन्भुवनत्रये ॥ लज्जया कलुषीभूतः स्कन्नं वीर्यमचूर्णयम् ॥ १९ ॥ मद्वीर्याच्चूर्णितात्सु क्ष्माद्बालखिल्याः प्रजज्ञिरे ॥ ततो महानभूत्तत्र हाहाकारः सुरोदितः ॥ लज्जया परिभूतोऽहं निर्गतस्तु तदाऽऽश्रमात् ॥२०॥ पश्यत्सु देवसंघेषु तूष्णीं

भूतेषु नारद ॥ गच्छन्तं मां महादेवो दृष्ट्वा नन्दिनमब्रवीत् ॥ २१ ॥ ॥ शिव उवाच ॥ ब्रह्माणमाह्वयस्वेह गतपापं करोम्यहम् ॥ कृतापराधेऽपि
जने सन्तः सकृपमानसाः ॥ मोहयन्त्यपि विद्वांसं विषयाणामियं स्थितिः ॥ २२ ॥ ॥ ब्रह्मोवाच ॥ एवमुक्त्वा स भगवानुमया सहितो हरः ॥
ममानुकम्पया चैव लोकानां हितकाम्यया ॥ २३ ॥ एतच्चकार लोकेशः शृणु नारद यत्नतः ॥ पापिनां पापमोक्षाय भूमिरापो भविष्यति ॥ २४ ॥
तयोश्च सारसर्वस्वमाहरिष्यामि पावनम् ॥ एवं निश्चित्य भगवांस्तयोः सारं समाहरत् ॥ २५ ॥ भूमिं कमण्डलुं कृत्वा तत्रापः संनिवेश्य च ॥
पावमान्यादिभिः सूक्तैरभिमंत्र्य च यत्नतः ॥ २६ ॥ त्रिजगत्पावनीं शक्तिं तत्र सस्मार पापहा ॥ मामुवाचाथ लोकेशो गृहाणेमं कमण्डलुम् ॥
॥ २७ ॥ आपो वै मातरो देव्यो भूमिर्माता तथाऽपरा ॥ स्थित्युत्पत्तिविनाशानां हेतुत्वमुभयोः स्थितम् ॥ २८ ॥ अत्र प्रतिष्ठितो धर्मो ह्यत्र यज्ञः
सनातनः ॥ अत्र भुक्तिश्च मुक्तिश्च स्थावरं जङ्गमं च यत् ॥ २९ ॥ स्मरणान्मानसं पापं वंदनाद्वाचिकं तथा ॥ स्नानपानाभिषेकाच्च विनश्यत्यपि
कायिकम् ॥ ३० ॥ एतदेवामृतं लोके नैतस्मात्पावनं परम् ॥ मयाऽभिमन्त्रितं ब्रह्मन्गृहाणेमं कमण्डलुम् ॥ ३१ ॥ अत्रस्थं वारि यः कश्चित्स्मरेदपि
पिबेदपि ॥ स सर्वकामानाप्नोति गृहाणेमं कमण्डलुम् ॥ ३२ ॥ भूतेभ्यश्चापि पञ्चभ्य आपो भूतं महोदयम् ॥ तासामुत्कृष्टमेतस्माद्गृहाणेमं कमण्ड
लुम् ॥ ३३ ॥ अत्र यद्वारि शोभिष्टं पुण्यं पावनमेव च ॥ स्पृष्ट्वा स्मृत्वा च दृष्ट्वा वा ब्रह्मन्पापाद्विमोक्ष्यसे ॥ ३४ ॥ एवमुक्त्वा महादेवः प्रादान्मम
कमण्डलुम् ॥ ततः सुरगणाः सर्वे मुदा प्रोचुः सुरेश्वरम् ॥ आह्लादश्च महांस्तत्र जयशब्दो व्यवर्तत ॥ ३५ ॥ देवोत्स्वे मातुरहं पदाग्रं समीक्ष्य
पापात्पतितत्वमाप ॥ प्रादात्कृपालुः स्मरणात्पवित्रां गङ्गां पिता पुण्यकमण्डलुस्थाम् ॥ ३६ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये स्वयंभुनारद
संवादे गङ्गोत्पत्तौ ब्रह्मकमण्डलुदानं नाम तृतीयोऽध्यायः ॥ ३ ॥ ॥ नारद उवाच ॥ कमण्डलुस्थिता देवी तव पुण्यविवर्धिनी ॥ यथा मर्त्यं गता
नाथ तन्मे विस्तरतो वद ॥ १ ॥ ॥ ब्रह्मोवाच ॥ बलिर्नाम महादैत्यो देवारिरपराजितः ॥ धर्मेण यशसा चैव प्रजासंरक्षणेन च ॥ २ ॥ गुरुभक्त्या
च सत्येन वीर्येण च बलेन च ॥ त्यागेन क्षमया चैव त्रैलोक्ये नोपमीयते ॥ ३ ॥ तस्यर्द्धिमुन्नतां दृष्ट्वा देवाश्चिन्तापरायणाः ॥ मिथः समूचुरमरा
जेष्यामो वै कथं बलिम् ॥ ४ ॥ तस्मिञ्शासति राज्यं तु त्रैलोक्यं हतकण्टकम् ॥ नारयो व्याधयो वाऽपि नाऽऽधयो वा कथंचन ॥ ५ ॥
अनावृष्टिरधर्मो वा नास्तिशब्दो न दुर्जनः ॥ ॥ स्वप्नेऽपि नैव दृश्येत बलौ राज्यं प्रशासति ॥ ६ ॥ तस्योन्नतिशरैर्भग्नाः कीर्तिखड्गद्विधाकृताः ॥
तस्याऽऽज्ञाशक्तिभिन्नाङ्गा देवाः शर्म न लेभिरे ॥ ७ ॥ ततः संमन्त्र्यामासुः कृत्वा मात्सर्यमग्रतः ॥ तद्यशोऽग्निप्रदीप्ताङ्गा विष्णुं जग्मुः सुवि

ह्वलाः ॥ ८ ॥ ॥ देवा ऊचुः ॥ आर्ताः स्म जगतामीश शङ्खचक्रगदाधर ॥ अस्मदर्थे भवान्नित्यमायुधानि बिभर्ति च ॥ ९ ॥ त्वयि नाथे जगन्नाथाप्यस्माकं दुःखमीदृशम् ॥ त्वां वै प्रणमतां शीर्ष कथं दैत्यं नमस्यति ॥ १० ॥ मनसा कर्मणा वाचा त्वामेव शरणं गताः ॥ त्वदङ्घ्रिशरणाः सन्तः कथं दैत्यं नमेमहि ॥ ११ ॥ यजामस्त्वां महायज्ञैर्वेदामो वाग्भिरच्युत ॥ त्वदेकशरणाः सन्तः कथं दैत्यं नमेमहि ॥ १२ ॥ त्वद्वीर्यमाश्रिता नित्यं देवाः सेन्द्रपुरोगमाः ॥ त्वया दत्तं पदं प्राप्य कथं दैत्यं नमेमहि ॥ १३ ॥ स्रष्टा त्वं ब्रह्ममूर्त्या तु विष्णुर्भूत्वा तु रक्षसि ॥ संहर्ता रुद्रशक्त्या त्वं कथं दैत्यं नमेमहि ॥ १४ ॥ ऐश्वर्यं कारणं लोके विनैश्वर्यं तु निष्फलम् ॥ हतैश्वर्याः सुरेशान कथं दैत्यं नमेमहि ॥ १५ ॥ अनादिस्त्वं जगद्धातरनन्तस्त्वं जगद्गुरुः ॥ अन्तवन्तमसुं शत्रुं कथं दैत्यं नमेमहि ॥ १६ ॥ तवैश्वर्येण पुष्टाङ्गा जित्वा त्रैलोक्यमोजसा ॥ स्थिराः स्यामः सुरेशान कथं दैत्यं नमेमहि ॥ १७ ॥ ॥ ब्रह्मोवाच ॥ इत्येतद्देववचनं श्रुत्वा दैतेयसूदनः ॥ उवाच सर्वानमरान्देवानां कार्यसिद्धये ॥ १८ ॥ वासुदेव उवाच ॥ मद्भक्तोऽसौ बलिर्दैत्यो ह्यजयोऽसौ सुरासुरैः ॥ यथा भवन्तो मत्पोष्यास्तथा पोष्यो बलिर्मम ॥ १९ ॥ विना च संगरं देवा हृत्वा राज्यं त्रिविष्टपम् ॥ बलिं निबध्य मन्त्रोक्त्या राज्यं वः प्रददाम्यहम् ॥ २० ॥ ॥ ब्रह्मोवाच ॥ तथेत्युक्त्वा सुरगणाः संजग्मुर्दिवमेव च ॥ भगवानपि देवेशो ह्यादित्या गर्भमाविशत् ॥ २१ ॥ तस्मिन्नुत्पद्यमाने तु उत्सवाश्च बभूविरे ॥ जातोऽसौ वामनो ब्रह्मन्यज्ञेशो यज्ञपूरुषः ॥ ॥ २२ ॥ एतस्मिन्नन्तरे ब्रह्मन्हयमेधाय दीक्षितः ॥ बलिर्बलवतां श्रेष्ठ ऋषिमुख्यैः समाहितः ॥ २३ ॥ पुरोधसा च शुक्रेण वेदवेदाङ्गवेदिना ॥ मखे तस्मिन्वर्तमाने यजमाने बलौ तथा ॥ २४ ॥ आर्त्विज्य ऋषिमुख्ये तु शुक्रे तत्र पुरोधसि ॥ हविर्भागार्थमासीने देवगन्धर्वपन्नगे ॥ २५ ॥ दीयतां भुज्यतां पूजा क्रियतां च पृथक्पृथक् ॥ परिपूर्णं पुनः पूर्णमेवं वाक्ये प्रवर्तति ॥ २६ ॥ शनैस्तद्देशमभ्यागाद्वामनः सामगायनः ॥ यज्ञवाटमनुप्राप्तो वामनश्छत्रकुण्डलः ॥ २७ ॥ प्रशंसमानस्तं यज्ञं वामनं प्रेक्ष्य भार्गवः ॥ ब्रह्मरूपधरं देवं वामनं दैत्यसूदनम् ॥ २८ ॥ दातारं यज्ञतपसां निहन्तारं च रक्षसाम् ॥ ज्ञात्वा त्वरन्नथोवाच राजानं भूरितेजसम् ॥ २९ ॥ जेतारं क्षत्रधर्मेण दातारं भक्तितो धनम् ॥ बलिं बलवतां श्रेष्ठं सभार्यं दीक्षितं मखे ॥ ३० ॥ ध्यायन्तं यज्ञपुरुषमुत्सृजन्तं हविः पृथक् ॥ तमाह भृगुशार्दूलः शुक्रः परमबुद्धिमान् ॥ ३१ ॥ ॥ शुक्र उवाच ॥ योऽसौ तव मखं प्राप्तो ब्राह्मणो वामनाकृतिः ॥ नासौ विप्रो बले सत्यं यज्ञेशो यज्ञभावनः ॥ ३२ ॥ स तु त्वां याचितुं प्राप्तो यः परः परतः पुमान् ॥ मया च सह संमन्त्र्य पश्चादेयं त्वया प्रभो ॥ ३३ ॥ ॥ ब्रह्मोवाच ॥ बलिस्तु भार्गवं प्राह पुरोधसमरिंदमः ॥ ३४ ॥

॥ बलिरुवाच ॥ धन्योऽहं मम यज्ञेशो गृहमायात्यचिन्तितः ॥ आगत्य याचते किंचित्किं विचार्य ममाधुना ॥ ३५ ॥ ॥ ब्रह्मोवाच ॥ एवमुक्तः
सभार्योऽसौ शुक्रेण च पुरोधसा ॥ जगाम यत्र विप्रेन्द्रो वामनोऽदितिनन्दनः ॥ ३६ ॥ कृताञ्जलिपुटो भूत्वा किमर्थं त्वं तु तद्वद ॥ वामनोऽपि
तदा प्राह पदत्रयमितां भुवम् ॥ ३७ ॥ निवेशनाय संदेया नान्यदिच्छामि किंचन ॥ तथेत्युक्त्वा तु कलशान्नानारत्नविभूषितात् ॥ ३८ ॥
वारिधारां पुरस्कृत्य वामनाय भुवं ददौ ॥ पश्यत्सु ऋषिमुख्येषु शुक्रे चैव पुरोधसि ॥ ३९ ॥ पश्यत्सु देवमुख्येषु वामनाय भुवं ददौ ॥ पश्यत्सु
दैत्यसंघेषु जयशब्दो व्यवर्तत ॥ ४० ॥ शनैस्तु वामनः प्राह स्वस्ति राजन्सुखी भव ॥ देहि मे संमितां भूमिं त्रिपदं यत्प्रतिश्रुतम् ॥ ४१ ॥
गृह्यतामुक्तमात्रे तु यद्दत्तं तन्निशामय ॥ तथेत्युवाच दैत्येशो यावत्पश्यति वामनम् ॥ ४२ ॥ ववृधे यज्ञपुरुषश्चन्द्रादित्यौ स्तनान्तरे ॥ यथा
स्यातां सुरा मूर्ध्नि ववृधे विक्रमाकृतिः ॥४३॥ अनन्तश्चाच्युतो देवो लोककर्ता जगन्मयः ॥ तं दृष्ट्वा दैत्यराट् प्राह सभार्यो विनयान्वितः ॥ ४४ ॥
॥ बलिरुवाच ॥ क्रमस्व विष्णो लोकेश यावच्छक्ति जगन्मय ॥ जितं मया सुरेशान सर्वभावेन विश्वकृत् ॥ ४५ ॥ तद्वाक्यसमकालं च शुक्रो
प्याह भृशं तदा ॥ निर्वापितोसि राजेन्द्र मया बुध्या यतः पुरा ॥ तद्वाक्यसमकालं तु विष्णुः प्राह महाक्रतुः ॥ ४६ ॥ ॥ विष्णुरुवाच ॥ दैत्येश्वर
महाबाहो क्रमिष्ये पश्य दैत्यराट् ॥ एवं वदन्तं स प्राह क्रम विष्णो पुनः पुनः ॥ ४७ ॥ ॥ ब्रह्मोवाच ॥ कूर्मपृष्ठे पदं न्यस्य बलियज्ञे पदं
न्यसत् ॥ द्वितीयं तु पदं प्रादान्मम लोके सनातनम् ॥ ४८ ॥ तृतीयस्य पदस्यात्र स्थानं नास्त्यसुरेश्वर ॥ क्व क्रमिष्ये भुव्रं देहि बलिं तं हरिरब्र
वीत् ॥ विहस्य बलिरप्याह सभार्यः स कृताञ्जलिः ॥ ४९ ॥ ॥ बलिरुवाच ॥ त्वया सृष्टं जगत्सर्वं न स्रष्टाऽहं सुरेश्वर ॥ त्वदोषादल्पमभवत्कि
करोमि जगन्मय ॥ ५० ॥ तथाऽपि नानृतं पूर्वं कदाचिद्वच्मि केशव ॥ सत्यवाक्यं च मां कुर्वन्मत्पृष्ठे हि पदं न्यस ॥ ५१ ॥ ततः प्रसन्नो भगवां
स्त्रयीमूर्तिः सुरार्चितः ॥ वरं वृणीष्व भद्रं ते भक्त्या प्रीतोऽस्मि दैत्यराट् ॥ ५२ ॥ ॥ ब्रह्मोवाच ॥ स तु प्राह जगन्नाथं न याचे त्वां त्रिविक्रम ॥
स तु प्रादात्स्वयं विष्णुः प्रीतः सन्मनसेप्सितम्॥५३॥रसातलपतित्वं च भावि चेन्द्रपदं पुनः ॥ आत्माधिपत्यं च हरिरविनाशि यशो बहु ॥५४॥
एवं दत्त्वा बलेः सर्वं ससुतं भार्ययाऽन्वितम् ॥ रसातले हरिः स्थाप्य बलिं त्वमरवैरिणम् ॥५५ ॥ शतक्रतोस्तथा प्रादात्सुरराज्यं यथाभवम् ॥ एत
स्मिन्नन्तरे तत्र पदं प्रागात्सुरार्चितम्॥५६॥द्वितीयं तत्पदं विष्णोः पितुर्मम महामते ॥ यत्पदं समनुप्राप्तं गृहं दृष्ट्वाऽप्यचिन्तयम् ॥ ५७ ॥ किं कृत्यं
यच्छुभं मे स्यात्पदे विष्णोः समागते ॥ सर्वस्वं च समालोक्य श्रेष्ठो मे स्यात्कमण्डलुः ॥५८॥ तद्वारि यत्पुण्यतमं दत्तं च त्रिपुरारिणा ॥ वरं वरेण्यं

वरदं शान्तं शान्तिकरं परम् ॥ ५९ ॥ शुभं च शुभदं नित्यं भुक्तिमुक्तिप्रदायकम् ॥ मातृस्वरूपं लोकानाममृतं भेषजं शुचि ॥ ६० ॥ पवित्रं पावनं पूज्यं ज्येष्ठं श्रेष्ठं शुभावहम् ॥ स्मरणादेव लोकानां पावनं किं नु दर्शनात् ॥ ६१ ॥ तादृग्वारि शुचिर्भूत्वा कल्पयेऽर्घाय मे पितुः ॥ इति संचिन्त्य तद्वारि गृहीत्वाऽर्घाय कल्पितम्॥६२॥विष्णोः पादे तु पतितमर्घवारि सुमन्त्रितम् ॥ तद्वारि पतितं मेरौ चतुर्धा व्यगमद्द्रुतम्॥६३॥पूर्वं तु दक्षिणे चैव पश्चिमे चोत्तरे तथा ॥ दक्षिणे यत्तु पतितं जटाभिः शंकरो मुने ॥६४॥ जग्राह पश्चिमे यत्तु पुनः प्रायात्कमण्डलुम् ॥ उत्तरे पतितं यत्तु विष्णुर्जग्राह तज्जलम्॥६५॥पूर्वस्मिन्नृषयो देवाः पितरो लोकपालकाः ॥ जगृहुः शुभदं वारि तस्माच्छ्रेष्ठं तदुच्यते॥६६॥या दक्षिणां दिशं प्राप्ता आपो वै लोकमातरः ॥ विष्णुपादप्रसूतास्ता ब्रह्मण्या लोकमातरः॥६७॥ महेश्वरजटासंस्था एवं जाताः शुभोदयाः ॥ तासां प्रभावस्मरणात्सर्वकामानवाप्नुयात् ॥६८॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये स्वयंभुनारदसंवादे तीर्थमाहात्म्ये गंगाया महेश्वरजटागमननिरूपणं नाम चतुर्थोऽध्यायः ॥४॥ ॥ नारद उवाच ॥ कमण्डलुस्थिता देवी महेश्वरजटागता ॥ श्रुता देव यथा मर्त्यमागता तद्ब्रवीतु मे ॥१॥ ॥ ब्रह्मोवाच ॥ ॥ महेश्वरजटास्था या आपो देव्यो महामते ॥ तासां च द्विविधो भेद आहर्तुर्द्वयकारणात् ॥ २ ॥ एकांशो ब्राह्मणेनात्र व्रतदानसमाधिना ॥ गौतमेन शिवं पूज्य आहृतो लोकविश्रुतः ॥ ३ ॥ अपरस्तु महाप्राज्ञ क्षत्रियेण बलीयसा ॥ आराध्य शंकरं देवं तपोभिर्नियमैस्तथा ॥ ४ ॥ भगीरथेन भूपेन आहृतोऽशोऽपरस्तथा ॥ एवं द्वैरूप्यमभवद्गङ्गाया मुनिसत्तम ॥ ५ ॥ ॥ नारद उवाच ॥ महेश्वरजटास्थाया हेतुना केन गौतमः ॥ आहर्ता क्षत्रियेणापि आहृता केन तद्वद ॥ ६ ॥ ॥ ब्रह्मोवाच ॥ यथाऽऽनीता पुरा वत्स ब्राह्मणेनेतरेण वा ॥ तत्सर्वं विस्तरेणाहं वदिष्ये प्रीतये तव ॥ ७ ॥ यस्मिन्काले सुरेशस्य उमा पत्न्यभवत्प्रिया ॥ तस्मिन्नेवाभवद्गङ्गा प्रिया शंभोर्महाद्युते ॥ ८ ॥ मम दोषापनुत्त्यर्थं चिन्तयानः शिवस्तदा ॥ उमया सहितः श्रीमान्देवीं प्रेक्ष्य त्रिशेषतः ॥ ९ ॥ रसवृत्तौ स्थितो यस्मान्निर्ममे रसमुत्तमम् ॥ रसिकत्वात्प्रियत्वाच्च स्त्रैणत्वात्पावनत्वतः ॥ १० ॥ सर्वाभ्यो ह्यधिकप्रीतिर्गङ्गाऽभूद्विजसत्तम ॥ आत्मनो मस्तके गङ्गां जानात्येव उमेति वै ॥ तामेव चिन्तयानोऽसौ सर्वदाऽऽस्ते महेश्वरः ॥ ११ ॥ सैवोद्भूता जटामार्गात्कस्मिंश्चित्कारणान्तरे ॥ स तु संगोपयामास गङ्गां शंभुर्जटागताम् ॥ १२ ॥ शिरसा विधृतां ज्ञात्वा न शशाक उमा तदा ॥ सोढुं ब्रह्मजटाजूटे स्थितां दृष्ट्वा पुनः पुनः ॥ १३ ॥ अमर्षेण भवं गौरी प्राहिणस्वेत्यभाषत ॥ नैवासौ प्राहिणोच्छंभू रसिको रसमुत्तमम् ॥ १४ ॥ उमा उवाच तदुःखाद नाथास्मीति वै तदा ॥ जटास्वेव तदा देवीं गोपायन्तं विमृश्य सा ॥ त्रिनायकं जयां स्कन्दं रहो वचनमब्रवीत् ॥ १५ ॥ नैवायं त्रिदशेशानो गङ्गां

त्यजति कामुकः ॥१६॥ साऽपि प्रिया शिवस्याद्य कथं त्यजति तां प्रियाम् ॥ एवं विमृश्य बहुशो गौरी चाऽऽह विनायकम् ॥१७॥ पार्वत्युवाच ॥ न देवैर्वासुरैर्यक्षैर्न सिद्धैर्भवताऽपि च ॥ न च भूपैरथान्यैर्वा स गङ्गां त्यजति प्रभुः ॥ १८ ॥ पुनस्तप्स्यामि वा गत्वा हिमवन्तं नगोत्तमम् ॥ अथवा ब्राह्मणैः पुण्यैस्तपोभिर्हतकल्मषैः ॥ १९ ॥ तैर्वा जटास्थिता गङ्गा प्रार्थिता भुवमाप्नुयात् ॥ २० ॥ ॥ ब्रह्मोवाच ॥ एतच्छ्रुत्वा मातृवाक्यं मातरं प्राह विघ्नराट् ॥ भ्रात्रा स्कन्देन जयया संमन्त्र्येह च युज्यते ॥ २१ ॥ तत्कुर्मो मस्तकाद्गङ्गां यथा त्यजति मे पिता ॥ एतस्मिन्नन्तरे ब्रह्मन्ननावृष्टिरजायत ॥ २२ ॥ द्विर्द्वादश समा मर्त्ये सर्वप्राणिभयावहा ॥ ततो विनष्टमभवज्जगत्स्थावरजङ्गमम् ॥ २३ ॥ विना तु गौतमं पुण्यमाश्रमं सर्वकामदम् ॥ स्रष्टुकामः पुरा पुत्र स्थावरं जङ्गमं तथा ॥ २४ ॥ कृतो यज्ञो मया पूर्वं स देवयजनो गिरिः ॥ मन्नामा तत्र विख्यातस्ततो ब्रह्मगिरिः सदा ॥ २५ ॥ तमाश्रित्य नगश्रेष्ठं सर्वदाऽऽस्ते स गौतमः ॥ तस्याऽऽश्रमे महापुण्ये श्रेष्ठे ब्रह्मगिरौ शुभे ॥ २६ ॥ आधयो व्याधयो वाऽपि दुर्भिक्षं चाऽप्यवर्षणम् ॥ भयशोकौ च दारिद्र्यं न श्रूयन्ते कदाचन ॥ २७ ॥ तदाश्रमं विनाऽन्यत्र हव्यं वा कव्यमेव वा ॥ नास्ति पुत्र तथा दाता होता यष्टा तथैव च ॥ २८ ॥ यदैव गौतमो विप्रो ददाति च जुहोति च ॥ तदैवाप्यायनं स्वर्गे सुराणामपि नान्यथा ॥ २९ ॥ देवलोकेऽपि मर्त्ये वा श्रूयते गौतमो मुनिः ॥ स एव दाता भोक्ता च स एवेति विदुर्जनाः ॥ ३० ॥ तच्छ्रुत्वा मुनयः सर्वे नानाश्रमनिवासिनः ॥ गौतमाश्रममापृच्छन्नागच्छन्ति तपोधनाः ॥ ३१ ॥ तथा मुनीनां सर्वेषामागतानां स गौतमः ॥ शिष्यवत्पुत्रवद्भक्त्या पितृवत्पोषकोऽभवत् ॥ ॥ ३२ ॥ यस्य यच्चेप्सितं कामं यथायोग्यं यथाक्रमम् ॥ यथानुरूपं सर्वेषां शुश्रूषामकरोन्मुनिः ॥ ३३ ॥ आज्ञया गौतमस्याऽऽसन्नोषध्यो लोकमातरः ॥ आराधिताः पुनस्तेन ब्रह्मविष्णुमहेश्वराः ॥ ३४ ॥ अजायन्त तदोषध्यो भुज्यन्ते च तदैव हि ॥ संकल्प्यन्ते तदोप्यन्ते गौतमस्य तपोबलात् ॥ ३५ ॥ सर्वाः समृद्धयस्तस्य संसिध्यन्ते मनोगताः ॥ प्रत्यहं वक्ति विनयाद्गौतमस्त्वागतान्मुनीन् ॥ ३६ ॥ पुत्रवच्छिष्यवच्चैव प्रेष्यवत्करवाणि किम् ॥ पितृवत्पोषयामास संवत्सरगणान्बहून् ॥ ३७ ॥ एवं स गौतमः पुत्र ख्यातिं प्राप्तो महत्तराम् ॥ ततो विनायकः प्राह मातरं भ्रातरं जयाम् ॥ ३८ ॥ ॥ विनायक उवाच ॥ देवानां सदने मातर्गीयते गौतमो द्विजः ॥ यत्नसाध्यं सुरगणैर्गौतमः कृतवानिति ॥ ॥ ३९ ॥ एवं श्रुतं मया देवि ब्राह्मणस्य तपोबलम् ॥ स विप्रश्चालयेदेनां मातर्गङ्गां जटागताम् ॥ ४० ॥ तपसा वाऽन्यतो वाऽपि पूजयित्वा त्रिलोचनम् ॥ स एव याचयेदेनां जटास्थां मे पितृप्रियाम् ॥ ४१ ॥ तत्र नीतिर्विधातव्या तां विप्रो याचयेद्यथा ॥ तत्प्रभावात्सरिच्छ्रेष्ठा

शिरसोऽवतरिष्यति ॥ ४२ ॥ ॥ ब्रह्मोवाच ॥ इत्युक्त्वा मातरं भ्रात्रा जयया सह विघ्नराट् ॥ जगाम गौतमो यत्र ब्रह्मसूत्रधरः कृशः ॥ ४३ ॥
वसन्कतिपयाहःसु गौतमाश्रममण्डले ॥ उवाच ब्राह्मणान्सर्वान्नात्र स्थेयं च विघ्नराट् ॥ ४४ ॥ गच्छामः स्वमधिष्ठानमाश्रमाणि शुचीनि च ॥
पुष्टाः स्म गौतमान्नेन पृच्छामो गौतमं मुनिम् ॥ ४५ ॥ इति संमन्त्र्य पृच्छन्ति मुनयो मुनिसत्तमाः ॥ स तान्निवारयामास स्नेहबुद्ध्या मुनीन्पृ
थक् ॥ ४६ ॥ ॥ गौतम उवाच ॥ कृताञ्जलिः सविनयमासध्वमिह चैव हि ॥ युष्मच्चरणशुश्रूषां करोमि मुनिपुंगवाः ॥ ४७ ॥ शुश्रूषौ पुत्रवन्नित्यं
मयि तिष्ठति नोचितम् ॥ भवतां भूमिदेवानामाश्रमान्तरसेवनम् ॥ ४८ ॥ अयमेवाऽऽश्रमः पुण्यः सर्वेषामिति मे मतिः ॥ अलमन्येन मुनय
आश्रमेण गतेन वा ॥ ४९ ॥ ॥ ब्रह्मोवाच ॥ इति श्रुत्वा मुनेर्वाक्यं विघ्नकृत्यमनुस्मरन् ॥ उवाच प्राञ्जलिर्भूत्वा ब्राह्मणान्स गणाधिपः ॥ ५० ॥
॥ गणाधिप उवाच ॥ अन्नक्रीता वयं किं नो निवारयति गौतमः ॥ साम्ना नैव वयं शक्ता गन्तुं स्वं स्वं निवेशनम् ॥ ५१ ॥ नायमर्हति दण्डं वा
उपकारी द्विजोत्तमः ॥ तस्माद् बुद्ध्या व्यवस्यामि तत्सर्वैरनुमन्यताम् ॥ ५२ ॥ ॥ ब्रह्मोवाच ॥ ततः सर्वे द्विजश्रेष्ठाः क्रियतामित्यनुब्रुवन् ॥
एतस्य तूपकाराय लोकानां हितकाम्यया ॥ ५३ ॥ ब्राह्मणानां च सर्वेषां श्रेयो यत्स्यात्तथा कुरु॥ ब्राह्मणानां वचः श्रुत्वा मेने वाक्यं गणाधिपः ॥
॥ ५४ ॥ विनायक उवाच ॥ क्रियते गुणरूपं यद्गौतमस्य विशेषतः ॥५५॥ ब्रह्मोवाच ॥ अनुमान्य द्विजान्सर्वान्पुनः पुनरुदारधीः ॥ स्वयं च ब्राह्म
णो भूत्वा प्रणम्य ब्राह्मणान्पुनः ॥ मातुर्मते स्थितो विद्वाञ्जयां प्राह गणेश्वरः ॥ ५६ ॥ ॥ विनायक उवाच ॥ यथा नान्यो विजानीते तथा कुरु शुभा
नने ॥ गोरूपधारिणी गच्छ गौतमो यत्र तिष्ठति ॥ ५७ ॥ शालीन्खाद विनाश्याथ विकारं कुरु भामिनि ॥ कृते प्रहारे हुंकारे प्रेक्षिते चापि
किंचन ॥ उच्चैस्तत्र स्वनं कृत्वा न म्रियस्व न जीव च ॥ ५८ ॥ ॥ ब्रह्मोवाच ॥ तथा चकार विजया विघ्नेश्वरमते स्थिता ॥ यत्राऽऽसीद्गौतमो
विप्रो जया गोरूपधारिणी ॥ ५९ ॥ जगाम शालीन्खादन्ती तां ददर्श स गौतमः ॥ गां दृष्ट्वा विकृतां विप्रस्तां तृणेन न्यवारयत् ॥ ६० ॥
निवार्यमाणा सा तेन स्वनं कृत्वा पपात गौः ॥ तस्यां तु पतितायां च हाहाकारो महानभूत् ॥ ६१ ॥ स्वनं श्रुत्वा च दृष्ट्वा च गौतमस्य विचेष्टि
तम् ॥ व्यथिता ब्राह्मणाः प्राहुर्विघ्नराजपुरस्कृताः ॥ ६२ ॥ ॥ब्राह्मणा ऊचुः ॥ इतो गच्छामहे सर्वे न स्थातव्यं तवाऽऽश्रमे ॥ पुत्रवत्पोषिताः
सर्वे पृष्टोऽसि मुनिपुंगव ॥ ६३ ॥ ॥ ब्रह्मोवाच ॥ इति श्रुत्वा मुनिर्वाक्यं विप्राणां गच्छतां तदा॥ वज्राहत इवाऽऽसीत्स विप्राणां पुरतोऽपतत् ॥६४॥
तमूचुर्ब्राह्मणाः सर्वे पश्येमां पतितां भुवि ॥ रुद्राणां मातरं देवीं जगतां पावनीं प्रियाम् ॥ ६५ ॥ तीर्थदेवस्वरूपिण्यामस्यां गवि विधेर्बलात् ॥

पतितायां मुनिश्रेष्ठ गन्तव्यमवशिष्यते ॥ ६६ ॥ चीर्णं व्रतं क्षयं याति यथा वासस्त्वदाश्रमे ॥ वयं नान्यधना ब्रह्मन्केवलं तु तपोधनाः ॥ ६७ ॥
॥ ब्रह्मोवाच ॥ विप्राणां पुरतः स्थित्वा विनीतः प्राह गौतमः ॥ ६८ ॥ ॥ गौतम उवाच ॥ भवन्त एव शरणं पूतं मां कर्तुमर्हथ ॥ ६९ ॥
॥ ब्रह्मोवाच ॥ ततः प्रोवाच भगवान्विघ्नकृद्ब्राह्मणैर्वृतः ॥ ७० ॥ ॥ विघ्नराज उवाच ॥ नैवेयं म्रियते तत्र नैव जीवति तत्र किम् ॥ वदामोऽस्मिन्सु
संदिग्धे निष्कृतिं गतिमेव वा ॥७१॥ ॥ गौतम उवाच ॥ न च मूर्च्छिष्यतीयं गौर्मरिष्यति न संशयः ॥ कथमुत्थास्यतीयं गौरथ चास्मिंश्च निष्कृ
तिम् ॥ वक्तुमर्हथ तत्सर्वं करिष्येऽहमसंशयम् ॥ ७२ ॥ ब्राह्मणा ऊचुः ॥ सर्वेषां च मतेनायं वदिष्यति च बुद्धिमान् ॥ एतद्वाक्यमथास्माकं प्रमाणं
तव गौतम ॥ ७३ ॥ ॥ ब्रह्मोवाच ॥ ब्राह्मणैः प्रेर्यमाणोऽसौ गौतमेन बलीयसा ॥ विघ्नकृद्ब्रह्मवपुषा प्राह सर्वानिदं वचः ॥ ७४ ॥ ॥ विघ्नराज
उवाच ॥ सर्वेषां च मतेनाहं वदिष्यामि यथार्थवत् ॥ अनुमन्यन्तु मुनयो मद्वाक्यं गौतमोऽपि च ॥ ७५ ॥ महेश्वरजटाजूटे ब्रह्मणोऽव्यक्तजन्मनः ॥
कमण्डलुस्थितं वारि तिष्ठतीति हि शुश्रुम ॥ ७६ ॥ तदानयस्व तरसा तपसा नियमेन च ॥ तेनाभिषिञ्च गामेतां भगवन्भुवमाश्रिताम् ॥ ततो
वत्स्यामहे सर्वे पूर्ववत्तव वेश्मनि ॥ ७७ ॥ ॥ ब्रह्मोवाच ॥ इत्युक्तवति विप्रेन्द्रे ब्राह्मणानां च संसदि ॥ तत्रापतत्पुष्पवृष्टिर्जयशब्दो व्यवर्धत॥ततः
कृताञ्जलिर्नम्रो गौतमो वाक्यमब्रवीत्॥७८॥गौतम उवाच॥तपसाऽग्निप्रसादेन देवब्रह्मप्रसादतः॥भवतां च प्रसादेन मत्संकल्पोऽनुसिध्यताम् ॥ ७९ ॥
॥ ब्रह्मोवाच॥ एवमस्त्विति तं विप्रा आपृच्छ्य मुनिपुंगवम् ॥ स्वानि स्थानानि ते जग्मुः सृष्टान्यन्नवारिभिः॥८०॥गतेषु तेषु विप्रेषु भ्रात्रा सह गणे
श्वरः ॥ जयया सह सुप्रीतः कृतकृत्यो न्यवर्तत ॥ ८१ ॥ गतेषु ब्रह्मवृन्देषु गणेशे च गते तथा ॥ गौतमोऽपि मुनिश्रेष्ठस्तपसा हतकल्मषः ॥ ८२ ॥
ध्यायंस्तदर्थं स मुनिः किमिदं मम संस्थितम् ॥ इत्येवं बहुशो ध्यायञ्ज्ञानेन ज्ञातवान्द्विजः ॥ ८३ ॥ निश्चित्य देवकार्यार्थमात्मनः किल्बिषां
गतिम् ॥ लोकानामुपकारं च शंभोः प्रीणनमेव च ॥ ८४ ॥ उमायाः प्रीणनं चापि गङ्गानयनमेव च ॥ सर्वं श्रेयस्करं मन्ये मयि नैव च किल्बि
षम् ॥ ८५ ॥ इत्येवं मनसा ध्यायन्सुप्रीतोऽभूद्द्विजोत्तमः ॥ भार्यया सह संमन्त्र्य इदमाह द्विजोत्तमः ॥ आराध्य जगतामीशं त्रिनेत्रं वृषभध्व
जम् ॥ ८६ ॥ आनयिष्ये सरिच्छ्रेष्ठां प्रीणयिष्ये गिरेः सुताम् ॥ सपत्नी जगदम्बाया महेश्वरजटास्थिता ॥ ८७ ॥ एवं हि संकल्प्य मुनिप्रवीरः
स गौतमो ब्रह्मगिरेर्जगाम ॥ कैलासमाधिष्ठितमुग्रवर्चसं सुरार्चितं प्रीणयितुं हि शंभुम् ॥ ८८ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये स्वयंभुनारद
संवादे तीर्थमाहात्म्ये विनायकगौतमव्यापारनिरूपणं नाम पञ्चमोऽध्यायः ॥ ५ ॥ ॥ नारद उवाच ॥ कैलासशिखरे गत्वा गौतमो भगवानृषिः ॥

किं चकार तपो वाऽपि कां चक्रे स्तुतिमुत्तमाम् ॥ १ ॥ ॥ ब्रह्मोवाच ॥ गिरिं गत्वा ततो वत्स वाचं संयम्य गौतमः ॥ आस्तीर्य स कुशान्प्राज्ञः कैलासे पर्वतोत्तमे ॥ २ ॥ उपविश्य शुचिर्भूत्वा स्तोत्रं चेदं ततो जगौ ॥ अपतत्पुष्पवृष्टिश्च स्तूयमाने महेश्वरे ॥ ३ ॥ ॥ गौतम उवाच ॥ भोगार्थिनां भोगमभीप्सितं च दातुं महान्त्यष्टवपूंषि धत्ते ॥ सोमो जनानां गुणवन्ति नित्यं देवं महादेवमिति स्तुवन्ति ॥ ४ ॥ कर्तुं स्वकीयैर्विषयैः सुखानि भर्तुं समस्तं सचराचरं च ॥ संपत्तये ह्यस्य विवृद्धये च महीमयं रूपमितीश्वरस्य ॥ ५ ॥ सृष्टेः स्थितेः संहरणाय भूमेराधारमाधातुमपां स्वरूपम् ॥ भेजे शिवः शान्ततनुर्जनानां सुखाय धर्माय जगत्प्रतिष्ठितम् ॥ ६ ॥ कालप्रतिष्ठाममृतस्रवं च जीवस्थितिं सृष्टिमथो विनाशनम् ॥ मुदं प्रजानां सुखमुन्नतिं च चक्रेऽर्कचन्द्राग्निमयं शरीरम् ॥ ७ ॥ वृद्धिं गतिं शक्तिमथाक्षराणि जीवव्यवस्थां मुदमप्यनेकाम् ॥ स्रष्टुं कृतं वायुरितीशरूपं त्वं वेत्सि नूनं भगवन्भवन्तम् ॥ ८ ॥ भेदैर्विना नैव कृतिर्न धर्मो नाऽऽत्मीयमन्यन्न दिशोऽन्तरिक्षम् ॥ द्यावापृथिव्यौ न च भुक्तिमुक्ती तस्मादिदं व्योमवपुस्तवेश ॥ ९ ॥ धर्मं व्यवस्थापयितुं विभज्य ऋक्सामशास्त्राणि यजुश्च शाखाः ॥ लोके च गाथाः स्मृतयः पुराणमित्यादिशब्दात्मकतामुपैति ॥ १० ॥ यष्टा क्रतुर्यान्यपि साधनानि ऋत्विस्वरूपं फलदेशकालाः ॥ त्वमेव शंभो परमार्थतत्त्वं वदन्ति यज्ञाङ्गमयं वपुस्ते ॥ ११ ॥ कर्ता प्रदाता प्रतिभूः प्रदानं सर्वज्ञसाक्षी पुरुषः परश्च ॥ प्रत्यात्मभूतः परमार्थरूपस्त्वमेव सर्वं किमु वाग्विलासैः ॥ १२ ॥ न वेदशास्त्रैर्गुरुभिः प्रदिष्टो न नासि बुद्ध्यादिभिरप्रधृष्यः ॥ अजोऽप्रमेयः शिवशब्दवाच्यस्त्व मेव सत्यं भगवन्नमस्ते ॥ १३ ॥ (शिवस्तुतिःसं०) आत्मैकतां स्वप्रकृतिं कदाचिदैक्षच्छिवः संपदियं ममेति ॥ पृथक्तदैवाभवदप्रतर्क्याचिन्त्यप्रभावो बहुविश्वमूर्तिः ॥ १४ ॥ भावेऽभिवृद्धा च भवे भवे च स्वकारणं कारणमास्थिता च ॥ नित्या शिवा सर्वसुलक्षणा वा विलक्षणा विश्वकरस्य शक्तिः ॥ १५ ॥ उत्पादनं संस्थितिरन्नवृद्धिलयाः सतां यत्र सनातनोर्थः ॥ एषैव भूमिर्न समास्ति किंचिदसाध्यमस्या दयिता हरस्य ॥ १६ ॥ यदर्थमन्नानि धनानि जीवा यच्छन्ति कुर्वन्ति तपांसि धर्मान् ॥ साऽपीयमम्बा जगतो जनित्री प्रिया तु सोमस्य महासुकीर्तेः ॥ १७ ॥ यदीक्षितं काङ्क्षति वासवोऽपि यन्नामतो मङ्गलमाप्नुयाच्च ॥ या व्याप्य विश्वं विमलीकरोति सोमा सदा सोमसमानरूपा ॥ १८ ॥ ब्रह्मादिजीवस्य चराचरस्य बुद्ध्यक्षिचैतन्यमनःसुखानि ॥ यस्याः प्रसादात्फलवन्ति नित्यं वागीश्वरी लोकगुरोः सुरम्या ॥ १९ ॥ चतुर्मुखस्यापि मनो मलीनं किमन्यजन्तोरिति चिन्त्यमाना ॥ गंगाऽवतारं विविधैरुपायैः सर्वं जगत्पावयितुं चकार ॥ २० ॥ श्रुतीः समालक्ष्य हरप्रभुत्वं विश्वस्य लोकः सकलैः प्रमाणैः ॥ कृत्वा च धर्मान्बुभुजे च भोगान्विभूतिरेषा तु सदा

शिवस्य ॥ २१ ॥ कार्यक्रियाकारकसाधनानां वेदोदितानामथ लौकिकानाम् ॥ यत्साध्यमुत्कृष्टतमं प्रियं च प्रोक्ता च सा सिद्धिरनादिकर्तुः ॥
॥ २२ ॥ ध्यात्वा वरं ब्रह्म परं प्रधानं यत्सारभूतं यदुपासितव्यम् ॥ यत्प्राप्य मुक्ता न पुनर्भवन्ति सद्योगिनो मुक्तिरुमापतिः सः ॥ २३ ॥
यथा यथा शंभुरमेयमायारूपाणि धत्ते जगतो हिताय ॥ तद्योगयोग्यानि तथैव धत्से पतिव्रतात्वं त्वयि मातरेवम् ॥ (देवीस्तुतिःसं०) ॥
॥ २४ ॥ ॥ ब्रह्मोवाच ॥ ॥ इत्येवं स्तुवतस्तस्य पुरस्ताद्वृषभध्वजः ॥ उमया सहितः श्रीमान्गणेशादिगणैर्वृतः ॥ २५ ॥ साक्षादा
गत्य तं शंभुः प्रसन्नो वाक्यमब्रवीत् ॥ २६ ॥ ॥ शिव उवाच ॥ किं ते गौतम दास्यामि भक्तिस्तोत्रव्रतैः शुभैः ॥ परितुष्टोऽस्मि याचस्व
देवनामपि दुर्लभम् ॥ २७ ॥ ॥ ब्रह्मोवाच ॥ इति श्रुत्वा जगन्मूर्तेर्वाक्यं वाक्यविशारदः ॥ हर्षवाष्पपरीताङ्गो गौतमः पर्यचिन्तयत् ॥ २८ ॥
अहो दैवमहो धर्मो ह्यहो वै विप्रपूजनम् ॥ अहो लोकगतिश्चित्रा अहो धातर्नमोऽस्तु ते ॥ २९ ॥ ॥ गौतम उवाच ॥ जटास्थितां शुभां गंग
देहि मे त्रिदशार्चित ॥ यदि तुष्टोऽसि देवेश त्रयीधाम नमोऽस्तु ते ॥ ३० ॥ ॥ ईश्वर उवाच ॥ त्रयाणामुपकारार्थं लोकानां याचितं त्वया ॥
आत्मनस्तूपकाराय तद्याचस्वाकुतोभयः ॥ ३१ ॥ ॥ गौतम उवाच ॥ स्तोत्रेणानेन ये भक्तास्त्वां च देवीं स्तुवन्ति वै ॥ सर्वकामसमृद्धाः स्युरे
तद्धि वरयाम्यहम् ॥ ३२ ॥ ॥ ब्रह्मोवाच ॥ एवमस्त्विति देवेशः परितुष्टोऽब्रवीद्वचः ॥ अन्यानपि वरान्मत्तो याचस्व विगतज्वरः ॥ ३३ ॥ एवमुक्त
स्तु हर्षेण गौतमः प्राह शङ्करम् ॥ ३४ ॥ ॥ गौतम उवाच ॥ इमां देवीं जटासंस्थां पावनीं लोकमातरम् ॥ तव प्रियां जगन्नाथ उत्सृज ब्रह्मणो
गिरौ ॥ ३५ ॥ सर्वासां तीर्थभूता तु यावद्गच्छति सागरम् ॥ ब्रह्महत्यादिपापानि मनोवाक्कायिकानि तु ॥ ३६ ॥ स्नानमात्रेण सर्वाणि विलयं
यान्तु शङ्कर ॥ चन्द्रसूर्योपरागे च अयने विषुवे तथा ॥३७॥ संक्रान्तौ वैधृतौ पुण्यतीर्थेष्वन्येषु यत्फलम् ॥ अस्यास्तु स्मरणादेव तत्पुण्यं जायतां
हर ॥ ३८ ॥ श्लाघ्यं कृतेषु प्रोक्तं त्रेतायां यज्ञकर्म च ॥ द्वापरे यज्ञदाने च दानमेव कलौ युगे ॥ ३९ ॥ युगधर्माश्च ये सर्वे देशधर्मास्तथैव
चं ॥ देशकालादिसंयोगे यो धर्मो यत्र शस्यते ॥ ४० ॥ यदन्यत्र कृतं पुण्यं स्नानदानादिसंयमैः ॥ अस्यास्तु स्मरणादेव तत्पुण्यं जायतां हर ॥
॥ ४१ ॥ यत्र यत्र त्वियं याति यावत्सागरगामिनी ॥ तत्र तत्र त्वया भाव्यमेष चास्तु वरो वरः ॥ ४२ ॥ योजनानां तूपरि तु दश यावच्च संख्य
या ॥ तदन्तरप्रविष्टानां महापातकिनामपि ॥ ४३ ॥ तत्पितॄणां च तेषां च स्नानायाऽऽगच्छतां शिव ॥ स्नानेनापीतरे मर्त्या मुक्तिभाजो भवन्तु
वै ॥ ४४ ॥ एकतः सर्वतीर्थानि स्वर्गमर्त्यरसातले ॥ एषा तेभ्यो विशिष्टा तु अलं शंभो नमोऽस्तु ते ॥ ४५ ॥ ॥ ब्रह्मोवाच ॥ तद्गौतमवचः

श्रुत्वा तथाऽस्त्वित्यब्रवीच्छिवः॥ अस्याः परतरं तीर्थं न भूतं न भविष्यति ॥४६॥ सत्यं सत्यं पुनः सत्यं वेदे च परिनिष्ठितम् ॥ सर्वेषां गौतमी पुण्या इत्युक्त्वाऽन्तरधीयत ॥४७॥ ततो गते भगवति लोकपूजिते तदाज्ञया पूर्णवलः स गौतमः॥ जटां समादाय सरिद्वरां तां सुरैर्वृतो ब्रह्मगिरिं विवेश॥४८॥ ततस्तु गौतमे प्राप्ते जटामादाय नारद ॥ पुष्पवृष्टिरभूत्तत्र समाजग्मुः सुरेश्वराः ॥ ४९ ॥ ऋषयश्च महाभागा ब्राह्मणाः क्षत्रियास्त था ॥ जयशब्देन तं विप्रं पूजयन्तो मुदान्विताः ॥ ५० ॥ इति श्रीब्रह्मपुराणगत गौतमीमाहात्म्ये स्वयंभुनारदसंवादे तीर्थमाहात्म्ये गौतम्यानयनं नाम षष्ठोऽध्यायः॥६॥ नारद उवाच ॥ महेश्वरजटाजूटाद्गंगामादाय गौतमः॥ आगत्य ब्रह्मणः पुण्ये ततः किमकरोद्विरौ ॥१॥ ब्रह्मोवाच ॥ आदाय गौतमो गंगां शुचिः प्रयत मानसः ॥ पूजितो देवगन्धर्वैस्तथा गिरिनिवासिभिः ॥२॥ गिरेर्मूर्ध्नि जटां स्थाप्य स्मरन्देवं त्रिलोचनम् ॥ उवाच प्राञ्जलिर्भूत्वा गंगां स द्विजसत्तमः ॥ ३ ॥ गौतम उवाच ॥ त्रिलोचनजटोद्भूते सर्वकामप्रदायिनी ॥ क्षमस्व मातः शान्ताऽसि सुखं याहि हितं कुरु ॥ ४ ॥ ॥ ब्रह्मोवाच ॥ एवमुक्ता गौतमेन गङ्गा प्रोवाच गौतमम् ॥ दिव्यरूपधरा देवी दिव्यस्रगनुलेपना ॥ ५ ॥ ॥ गङ्गोवाच ॥ गच्छेयं देवसदनमथवाऽपि कमण्डलुम् ॥ रसातलं वा गच्छेयं जातस्त्वं सत्यवागसि ॥ ६ ॥ ॥ गौतम उवाच ॥ त्रयाणामुपकारार्थं लोकानां याचिता मया ॥ शंभुना च तथा दत्ता देवि तन्नान्यथा भवेत् ॥ ७ ॥ ॥ ब्रह्मोवाच ॥ तद्गौतमवचः श्रुत्वा गङ्गा मेने द्विजेरितम् ॥ त्रेधाऽऽत्मानं विभज्याथ स्वर्गमर्त्यरसातले ॥ ८ ॥ स्वर्गे चतुर्धा व्यग मत्सप्तधा मर्त्यमण्डले ॥ रसातले चतुर्धैव सैवं पञ्चदशाकृतिः ॥ ९ ॥ सर्वत्र सर्वभूतैव सर्वपापविनाशिनी ॥ सर्वकामप्रदा नित्यं सैव वेदे प्रगी यते ॥ १० ॥ मर्त्या मर्त्यगतामेव पश्यन्ति न तलं गताम् ॥ नैव स्वर्गगतां मर्त्याः पश्यन्त्यज्ञानबुद्धयः ॥ ११ ॥ यावत्सागरगा देवी तावद्देवमयी स्मृता ॥ उत्सृष्टा गौतमेनैव प्रायात्पूर्वार्णवं प्रति ॥ १२ ॥ ततो देवर्षिभिर्जुष्टां मातरं जगतः शुभाम् ॥ गौतमो मुनिशार्दूलः प्रदक्षिणमथाकरोत् ॥ ॥ १३ ॥ त्रिलोचनं सुरेशानं प्रथमं पूज्य गौतमः ॥ उभयोस्तीरयोः स्नानं करोमीति दधे मतिम् ॥ १४ ॥ स्मृतमात्रस्तदा तत्राऽऽविरासीत्करुणार्णवः ॥ कृताञ्जलिपुटो भूत्वा भक्तिनम्रस्त्रिलोचनम् ॥ १५ ॥ तत्र स्नानं कथं सिध्येदित्येवं शर्वमब्रवीत् ॥ ॥ १६ ॥ ॥ गौतम उवाच ॥ देवदेव महेशान तीर्थस्नानविधिं मम ॥ ब्रूहि सम्यङ्महेशान लोकानां हितकाम्यया ॥ १७ ॥ शिव उवाच ॥ महर्षे शृणु सर्वं च विधिं गोदावरीभवम् ॥ पूर्वं नान्दीमुखं कृत्वा देहशुद्धिं विधाय च ॥ १८ ॥ ब्राह्मणान्भोजयित्वा च तेषामाज्ञां प्रगृह्य च ॥ ब्रह्मचर्येण गच्छन्ति पतितालापवर्जिताः ॥ १९ ॥ यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् ॥ विद्या तपश्च कीर्तिश्च स

तीर्थफलमश्नुते ॥ २० ॥ दुष्टभावं परित्यज्य स्वधर्मपरिनिष्ठितः ॥ श्रान्तसंवाहनं कुर्वन्दद्यादन्नं यथोचितम् ॥ २१ ॥ अकिंचनेभ्यः
साधुभ्यो दद्याद्वस्त्राणि कम्बलान् ॥ शृण्वन्हरिकथां दिव्यां तथा गङ्गासमुद्भवाम् ॥ २२ ॥ अनेन विधिना गच्छन्सम्यक्तीर्थफलं लभेत् ॥
त्र्यम्बकश्चापरं प्राह गौतमं मुनिभिर्वृतम् ॥ २३ ॥ द्विहस्तमात्रे तीर्थानि संभविष्यन्ति गौतम ॥ सर्वत्राहं संनिहितः सर्वकामप्रदस्तथा ॥ २४ ॥
गंगाद्वारे प्रयागे च तथा सागरसंगमे ॥ एतेषु पुण्यदा पुंसां मुक्तिदा सा भगीरथी ॥ २५ ॥ नर्मदा तु सरिच्छ्रेष्ठा पर्वतेऽमरकण्टके ॥ यमुना
संगता तत्र प्रभासे तु सरस्वती ॥ २६ ॥ कृष्णा भीमरथी चैव तुङ्गभद्रा तु नारद ॥ तिसृणां संगमो यत्र तत्तीर्थं मुक्तिदं नृणाम् ॥ २७ ॥ पयोष्णी
संगता यत्र तत्रत्या तच्च मुक्तिदम् ॥ इयं तु गौतमी वत्स यत्र कापि ममाऽऽज्ञया ॥ २८ ॥ सर्वेषां सर्वदा नृणां स्नानान्मुक्तिं प्रदास्यति ॥ किंचित्काले
पुण्यतमं किंचित्तीर्थं सुरांगमे ॥ सर्वेषां सर्वदा तीर्थं गौतमी नात्र संशयः ॥ २९ ॥ षष्टिवर्षसहस्राणि भागीरथ्यवगाहनम् ॥ सकृद्गोदावरीस्नानं
सिंहस्थे च बृहस्पतौ ॥ ३० ॥ विशेषाद्रामचरणप्रदानात्तीर्थसंश्रयात् ॥ सिंहस्थिते सुरगुरौ दुर्लभा गौतमी नृणाम् ॥ ३१ ॥ भागीरथी नर्मदा च
यमुना च सरस्वती ॥ आयान्ति भीमरथ्याद्याः स्नातुं सिंहगते रवौ ॥ ३२ ॥ विहाय गौतमीं गङ्गां तीर्थान्यन्यानि सेवितुम् ॥ ये यान्ति मूढास्ते
यान्ति निरयं सिंहगे गुरौ ॥ ३३ ॥ तिस्रः कोट्योऽर्द्धकोटी च योजनानां शतद्वये ॥ तीर्थानि मुनिशार्दूल संभविष्यन्ति गौतम ॥ इयं माहेश्वरी
गङ्गा गौतमी वैष्णवीति च ॥ ३४ ॥ ब्राह्मी गोदावरी नन्दा सुनन्दा कामदायिनी ॥ ब्रह्मतेजःसमानीता सर्वपापप्रणाशिनी ॥ ३५ ॥ स्मरणादेव
पापौघहन्त्री मम सदा प्रिया ॥ पक्षीनामपि भूतानामापः श्रेष्ठत्वमागताः ॥ ३६ ॥ तत्रापि तीर्थभूतास्तु तस्मादापः पराः स्मृताः ॥ तासां
भागीरथी श्रेष्ठा ताभ्यो या गौतमी त्वया ॥ ३७ ॥ आनीता सजटा गंगा अस्या नान्यच्छुभावहम् ॥ स्वर्गे भुवि तले वाऽपि तीर्थं सर्वार्थदं
मुने ॥ ३८ ॥ ब्रह्मोवाच ॥ इत्येतत्कथितं पुत्र गौतमाय महात्मने साक्षाद्धरेण तुष्टेन मया तव निवेदितम् ॥ ३९ ॥ एवं सा गौतमी गंगा सर्वेभ्योऽप्य
धिका मता ॥ तत्स्वरूपं च कथितं कुतोऽन्या श्रवणस्पृहा ॥ ४० ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये सप्तमोऽध्यायः ॥ ७ ॥
नारद उवाच ॥ द्विविधा सैव गदिता एकाऽपि सुरसत्तम ॥ एको भेदस्तु कथितो ब्राह्मणेनाऽऽहतो यतः ॥ १ ॥ क्षत्रियेणापरोऽप्यंशो जटास्वेव
व्यवस्थितः ॥ भवस्य देवदेवस्य आहृतस्तद्वदस्व मे ॥ २ ॥ ब्रह्मोवाच ॥ वेन्नस्वतान्वये जात इक्ष्वाकुकुलसंभवः ॥ सगरो नाम राजाऽऽसीद्यन्नाम्ना
सागरो मुने ॥ ३ ॥ यज्वा दानपरो नित्यं धर्माचारविचारवान् ॥ तस्य भार्याद्वयं चाऽऽसीत्पतिभक्तिपरायणम् ॥ ४ ॥ तस्य वै संततिर्नाभूदिति

चिन्तापरोऽभवत् ॥ वसिष्ठं गृहमाहूय संपूज्य विधिवत्ततः ॥ ५ ॥ उवाच वचनं राजा संततेः कारणं प्रति ॥ इति तद्वचनं श्रुत्वा ध्यात्वा राजानमब्रवीत् ॥ ६ ॥ वसिष्ठ उवाच ॥ सपत्नीकः सदा राजन्नृषिपूजापरो भव ॥ ७ ॥ ब्रह्मोवाच ॥ इत्युक्त्वा स मुनिर्विप्र यथास्थानं जगाम ह ॥ एकदा तस्य राजर्षेर्गृहमागात्तपोनिधिः ॥ ८ ॥ तस्यर्षेः पूजनं चक्रे स संतुष्टोऽब्रवीद्वचः ॥ वरं ब्रूहि महाभागेत्युक्ते पुत्रान्स चाऽऽवृणोत् ॥ ९ ॥ स मुनिः प्राह राजानमेकस्यां वंशधारकः ॥ पुत्रो भूयात्तथाऽन्यस्यां षष्टिसाहस्रकं सुताः ॥ १० ॥ वरं दत्त्वा मुनौ याते पुत्रा जाताः सहस्रशः ॥ स यज्ञान्सुबहूंश्चक्रे हयमेधान्सुदक्षिणान् ॥ ११ ॥ एकस्मिन्हयमेधे वै दीक्षितो विधिवन्नृपः ॥ पुत्रान्न्ययोजयद्राजा ससैन्यान्हयरक्षणे ॥ १२ ॥ क्वचिदन्तरमासाद्य हयं जह्रे शतक्रतुः ॥ मार्गमाणाश्च ते पुत्रा नैवापश्यन्हयं तदा ॥ १३ ॥ सहस्राणां तथा षष्टिर्नान्ययुद्धविशारदाः ॥ तेषु पश्यत्सु रक्षांसि पुत्रेषु सगरस्य हि ॥ १४ ॥ प्रोक्षितं तद्धयं नीत्वा ते रसातलमागमन् ॥ राक्षसान्मायया युक्तान्नैवापश्यन्त सागराः ॥ १५ ॥ न दृष्ट्वा ते हयं पुत्राः सगरस्य बलीयसः ॥ इतश्चेतश्चरन्तस्ते नैवापश्यन्हयं तदा ॥ १६ ॥ देवलोकं तदा जग्मुः पर्वतांश्च सरांसि च ॥ वनानि च विचिन्वन्तो नैवापश्यन्हयं तदा ॥ १७ ॥ कृतस्वस्त्ययनो राजा ऋत्विग्भिः कृतमंगलः ॥ अदृष्ट्वा तु पशुं रम्यं राजा चिन्तामुपेयिवान् ॥ १८ ॥ अटन्तः सागराः सर्वे देवलोकमुपागमन् ॥ हयं तमनुचिन्वन्तस्तत्रापि न हयोऽभवत् ॥ १९ ॥ ततो महीं समाजग्मुः पर्वतांश्च वनानि च ॥ तत्रापि च हयं नैव दृष्टवन्तो नृपात्मजाः ॥ २० ॥ एतस्मिन्नन्तरे तत्र दैवी वागभवत्तदा ॥ रसातले हयो बद्ध आस्ते नान्यत्र सागराः ॥ २१ ॥ इति श्रुत्वा ततो वाक्यं गन्तुकामा रसातलम् ॥ अखनन्पृथिवीं सर्वां परितः सागरास्ततः ॥ २२ ॥ ते क्षुधार्ता मृदं शुष्कां भक्षयन्तस्त्वहर्निशम् ॥ न्यखनंश्चापि जग्मुश्च सत्वरास्ते रसातलम् ॥ २३ ॥ तानागतान्भूपसुतान्सागरान्बलिनः कृतीन् ॥ श्रुत्वा रक्षांसि संत्रस्ता व्यगमन्कपिलान्तिकम् ॥ २४ ॥ कपिलोऽपि महाप्राज्ञस्तत्र शेते रसातले ॥ पुरा च साधितं तेन देवानां कार्यमुत्तमम् ॥ २५ ॥ विनिद्रेण ततः श्रान्तः सिद्धे कार्ये सुरान्प्रति ॥ अब्रवीत्कपिलः श्रीमान्निद्रास्थानं प्रयच्छथ ॥ २६ ॥ रसातलं ददुस्तस्मै पुनराह सुरान्मुनिः ॥ यो मामुत्थापयेन्मन्दो भस्मीभूयाच्च सत्वरम् ॥ २७ ॥ ततः शये तलगतो नो चेन्न स्वप्न एव हि ॥ तथेत्युक्तः सुरगणैस्तत्र शेते रसातले ॥ २८ ॥ तस्य प्रभावं ते ज्ञात्वा राक्षसा मायया युताः ॥ सागराणां च सर्वेषां वधोपायं प्रचक्रिरे ॥ २९ ॥ विना युद्धेन ते भीता राक्षसाः

प्रेक्षन्तः किं भवेदिति ॥ ३१ ॥ ततस्तु सागराः सर्वे निर्विशन्तो रसातलम् ॥ ददृशुस्ते हयं बद्धं शयानं पुरुषं तथा ॥ ३२ ॥ तं मेनिरे च हर्तारं क्रतुहन्तारमेव च ॥ एनं हत्वा महापापं नयामोऽश्वं नृपान्तिकम् ॥ ३३ ॥ केचिदूचुः पशुं बद्धं नयामोऽनेन किं फलम् ॥ तदांऽऽहुरपरे शूरा राजानः शासका वयम् ॥ ३४ ॥ उत्थाप्यैनं महापापं हन्मः क्षात्रेण वर्चसा ॥ ते तं जघ्नुर्मुनिं पादैर्बुवन्तो निष्ठुराणि च ॥ ३५ ॥ ततः कोपेन महता कपिलो मुनिसत्तमः ॥ सागरानीक्षयामास तान्कोपाद्भस्मसात्करोत् ॥ ३६ ॥ जज्वलुस्ते ततस्तत्र सागराः सर्व एव हि ॥ तत्तु सर्वं न जानाति दीक्षितः सगरो नृपः ॥ ३७ ॥ नारदः कथयामास सगराय महात्मने ॥ कपिलस्य तु संस्थानं हयस्यापि तु संस्थितिम् ॥ ३८ ॥ राक्षसानां तु विकृतिं सागराणां च नाशनम् ॥ ततश्चिन्तापरो राजा कर्तव्यं नावबुध्यत ॥ ३९ ॥ अपरोऽपि सुतश्चाऽऽसीदसमञ्जा इति श्रुतः ॥ स तु बालांस्तथा पौरान्मौर्ख्यात्क्षिपति चाम्भसि ॥ ४० ॥ सगरोऽथ विज्ञप्तः पौरैः संमिलितैस्तदा ॥ दुर्नयं तस्य तं ज्ञात्वा ततः क्रुद्धोऽब्रवीन्नृपः ॥ ४१ ॥ स्वानमात्यांस्तदा राजा देशत्यागं करोत्वयम् ॥ असमञ्जाः क्षत्रधर्मत्यागी वै बालघातकः ॥ ४२ ॥ सगरस्य तु तद्वाक्यं श्रुत्वाऽमात्यास्त्वरान्विताः ॥ तत्यजुर्नृपतेः पुत्रमसमञ्जा गतो वनम् ॥४३॥ सागरा ब्रह्मशापेन नष्टाः सर्वे रसातले ॥ एकोऽपि न वनं प्राप्त इदानीं का गतिर्मम ॥ ४४ ॥ अंशुमानिति विख्यातः पुत्रस्तस्यासमञ्जसः॥ आनाय्य बालकं राजा कार्यं तस्मै न्यवेदयत ॥४५॥ कपिलं च समाराध्य अंशुमानपि बालकः ॥ सगराय हयं प्रादात्ततः पूर्णोऽभवत्क्रतुः ॥४६॥ तस्यापि पुत्रस्तेजस्वी दिलीप इति धार्मिकः॥ तस्यापि पुत्रो मतिमान्भगीरथ इति श्रुतः ॥ ४७ ॥ पितामहानां सर्वेषां गतिं श्रुत्वा सुदुःखितः ॥ सगरं नृपशार्दूलं पप्रच्छ विनयान्वितः ॥४८॥ सागराणां तु सर्वेषां निष्कृतिस्तु कथं भवेत् ॥ भगीरथं नृपः प्राह कपिलो वेत्ति पुत्रक ॥ ४९ ॥ तस्य तद्वचनं श्रुत्वा बालः प्रायाद्रसातलम् ॥ कपिलं च नमस्कृत्वा सर्वं तस्मै न्यवेदयत् ॥ ५० ॥ स मुनिस्तु चिरं ध्यात्वा तपसाऽऽराध्य शंकरम् ॥ जटाजलेन स्वपितॄनाप्लाव्य नृपसत्तम ॥ ५१ ॥ ततः कृतार्थो भविता त्वं च ते पितरस्तथा ॥ तथा करोमीति मुनिं प्रणम्य पुनरब्रवीत् ॥ ५२ ॥ क्व गच्छेऽहं मुनिश्रेष्ठ कर्तव्यं चापि तद्वद ॥ ५३ ॥ कपिल उवाच ॥ कैलासं तं नगश्रेष्ठं गत्वा स्तुहि महेश्वरम् ॥ तपः कुरु यथाशक्ति ततस्त्वेष्टमवाप्स्यसि ॥ ५४ ॥ ब्रह्मोवाच ॥ तच्छ्रुत्वा स मुनेर्वाक्यं मुनिं नत्वा त्वगान्नगम् ॥ कैलासं स शुचिर्भूत्वा बालो बालक्रियान्वितः ॥ तपसे निश्चयं कृत्वा उवाच स भगीरथः ॥ ५५ ॥ ॥ भगीरथ उवाच ॥ बालोऽहं बालबुद्धिश्च बालचन्द्रधर प्रभो ॥ नाहं किञ्चन जानामि ततः प्रीतो भव प्रभो ॥ ५६ ॥ वाग्भिर्मनोभिः कृतिभिः कदाचिन्ममोपकुर्वन्ति हिते रता ये ॥ तेभ्यो

हितार्थं त्विह चामरेश सोमं नमस्यामि सुरादिपूज्यम् ॥ ५७ ॥ उत्पादितो यैरभिवर्धितश्च समानगोत्रश्च समानधर्मा ॥ तेषामभीष्टानि शिवः करोतु वालेन्दुमौलिं प्रणतोऽस्मि नित्यम् ॥ ५८ ॥ ॥ ब्रह्मोवाच ॥ एवं तु स्तुवतस्तस्य पुरस्तादभवच्छिवः ॥ वरेण च्छन्दयानो वै भगीरथ मुवाच ह ॥ ५९ ॥ ॥ शिव उवाच ॥ यन्न साध्यं सुरगणैर्दैयं तत्ते मया ध्रुवम् ॥ वदस्व निर्भयो भूत्वा भगीरथ महामते ॥ ६० ॥ ॥ ब्रह्मोवाच ॥ भगीरथः प्रणम्येशं हृष्टः प्रोवाच शंकरम् ॥ ६१ ॥ ॥ भगीरथ उवाच ॥ जटास्थितां पितॄणां मे पावनाय सरिद्वराम् ॥ तामेव देहि देवेश सर्वं पूर्णं ततो भवेत् ॥ ६२ ॥ ॥ ब्रह्मोवाच ॥ महेशोऽपि विहस्याथ भगीरथमुवाच ह ॥ ६३ ॥ ॥ शिव उवाच ॥ दत्ता मयेयं ते पुत्र पुनस्तां स्तुहि सुव्रत ॥ ६४ ॥ ॥ ब्रह्मोवाच ॥ तद्देववचनं श्रुत्वा तदर्थं तु तपो महत् ॥ स्तुतिं चकार गंगाया भक्त्या प्रयतमानसः ॥ ६५ ॥ तस्या अपि प्रसादं च प्राप्य बालोऽप्यबालवत् ॥ गंगां महेश्वरात्प्राप्तामादायागाद्रसातलम् ॥ ६६ ॥ न्यवेदयत्स मुनये कपिलाय महात्मने ॥ यथोदितप्रकारेण गंगां संस्थाप्य यत्नतः ॥ ६७ ॥ प्रदक्षिणमथाऽऽवर्त्य कृताञ्जलिपुटोऽब्रवीत् ॥ ६८ ॥ ॥ भगीरथ उवाच ॥ देवि मे पितरः शापात्कपिलस्य महामुनेः ॥ प्राप्तास्ते विगतिं मातस्तस्मात्त्वान्पातुमर्हसि ॥ ६९ ॥ ॥ ब्रह्मोवाच ॥ तथेत्युक्त्वा सुरनदी सर्वेषामुपकारिका ॥ लोकानामुपकारार्थं पितॄणां पावनाय च ॥ ७० ॥ अगस्त्यपीतस्याम्भोधेः पूरणाय विशेषतः ॥ स्मरणादेव पापानां नाशाय सुरनिम्नगा ॥ ७१ ॥ भगीरथोदितं चक्रे रसातलतले स्थितान् ॥ भस्मीभूतान्नृपसुतान्सागरान्ब्रह्मशापतः ॥ ७२ ॥ विनिर्दग्धानथाऽऽप्लाव्य खातपूरमथाकरोत् ॥ ततो मेरुं समाप्लाव्य स्थितां बालोऽब्रवीन्नृपः ॥ ७३ ॥ कर्मभूमौ त्वया भाव्यं तथेत्यागाद्धिमालयम् ॥ हिमवत्पर्वतात्पुण्याद्भारतं वर्षमभ्यगात् ॥ ७४ ॥ तन्मध्यतः पुण्यनदी प्रायात्पूर्वार्णवं प्रति ॥ एवमेषाऽपि ते प्रोक्ता गङ्गा क्षात्रा महामुने ॥ ७५ ॥ माहेश्वरी वैष्णवी च सैव ब्राह्मी च पावनी ॥ भागीरथी देवनदी हिमवच्छिखराश्रया ॥ ७६ ॥ महेश्वरजटावारि एवं द्वैविध्यमागतम् ॥ विन्ध्यस्य दक्षिणे गङ्गा गौतमी सा निगद्यते ॥ उत्तरे साऽपि विन्ध्यस्य भागीरथ्यभिधीयते ॥ ७७ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये स्वयंभुनारदसंवादे भागीरथ्यवतरणं नामाष्टमोऽध्यायः ॥ ८ ॥ ॥ नारद उवाच ॥ न मनस्तृप्तिमाधत्ते कथाः शृण्वत्त्वयेरिताः ॥ पृथक्तीर्थफलं श्रोतुं प्रवृत्तं मम मानसम् ॥ १ ॥ क्रमशो ब्राह्मणानीतां गंगां मे प्रथमं वद ॥ पृथक्तीर्थफलं पुण्यं सेतिहासं यथाक्रमम् ॥ २ ॥ ब्रह्मोवाच ॥ तीर्थानां च पृथग्भावं फलं माहात्म्यमेव च ॥ सर्वं वक्तुं न शक्नोमि न च त्वं श्रवणे क्षमः ॥ ३ ॥ तथाऽपि किंचिद्वक्ष्यामि शृणु नारद

यत्नतः ॥ यान्युक्तानि च तीर्थानि श्रुतिवाक्यानि यानि च ॥ ४ ॥ तानि वक्ष्यामि संक्षेपान्नमस्कृत्वा त्रिलोचनम् ॥ यत्रासौ भगवानासीत्प्रत्यक्ष
रुयम्बको मुने ॥ ५ ॥ त्र्यम्बकं नाम तत्तीर्थं भुक्तिमुक्तिप्रदायकम् ॥ वाराहमपरं तीर्थं त्रिषु लोकेषु विश्रुतम् ॥ ६ ॥ तस्य रूपं प्रवक्ष्यामि नाम
विष्णोर्यथाऽभवत् ॥ पुरा देवान्पराभूय यज्ञमादाय राक्षसः ॥ ७ ॥ रसातलमनुप्राप्तः सिन्धुसेन इति श्रुतः ॥ यज्ञे तलमनुप्राप्ते निर्यज्ञा ह्यभवन्मही
॥ ८ ॥ नायं लोकोऽस्ति न परो यज्ञे नष्टे तदाभवत् ॥ सुरास्तमेव विविशू रसातलमुद्विग्नम् ॥ ९ ॥ नाशक्नुवंस्तु तं जेतुं देवा इन्द्रपुरोगमाः ॥
विष्णुं पुराणपुरुषं गत्वा तस्मै न्यवेदयन् ॥ १० ॥ राक्षसस्य तु तत्कर्म यज्ञभ्रंशमशेषतः ॥ ततः प्रोवाच भगवान्वाराहं वपुरास्थितः ॥ ११ ॥
शङ्खचक्रगदापाणिर्गत्वा चैव रसातलम् ॥ आनयिष्ये मखं पुण्यं हत्वा राक्षसपुंगवान् ॥ १२ ॥ स्वः प्रयान्तु सुराः सर्वे व्येतु वो मानसो ज्वरः ॥
येन गंगा तलं प्राप्ता पथा तेनैव चक्रधृक् ॥ १३ ॥ जगाम तरसा पुत्र भुवं भित्त्वा रसातलम् ॥ स वराहवपुः श्रीमान्रसातलनिवासिनः ॥
॥ १४ ॥ राक्षसान्दानवान्हत्वा मुखे धृत्वा महाध्वरम् ॥ वाराहरूपी भगवान्मखमादाय यज्ञभुक् ॥ १५ ॥ येन प्राप तलं विष्णुः पथा तेनैव
शत्रुजित् ॥ मुखे न्यस्य महायज्ञं निश्चक्राम रसातलात् ॥ १६ ॥ तत्र ब्रह्मगिरौ देवाः प्रतीक्षां चक्रिरे हरेः ॥ पथस्तस्माद्विनिःसृत्य गंगास्रवणम
भ्यगात् ॥ १७ ॥ प्राक्षालयच्च स्वांगानि असृग्लिप्तानि नारद ॥ गंगाम्भसा तत्र कुण्डं वाराहमभवत्ततः ॥ १८ ॥ मुखे न्यस्तं महायज्ञं देवानां
धुरतो हरिः ॥ दत्त्वांस्त्रिदशश्रेष्ठो मुखाद्यज्ञोऽभ्यजायत ॥ १९ ॥ ततः प्रभृति यज्ञांगं प्रधानं स्रुव उच्यते ॥ वाराहरूपमभवद्देवं वै कारणान्तरात् ॥
॥ २० ॥ तस्मात्पुण्यतमं तीर्थं वाराहं सर्वकामदम् ॥ तत्र स्नानं च दानं च सर्वक्रतुफलप्रदम् ॥ २१ ॥ तत्र स्थितोऽपि यः कश्चित्पितॄन्स्मरति
पुण्यकृत् ॥ विमुक्ताः सर्वपापेभ्यः पितरः स्वर्गमाप्नुयुः ॥ २२ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये वराहतीर्थवर्णनं नाम नवमोऽ
ध्यायः ॥ ९ ॥ ॥ ब्रह्मोवाच ॥ कुशावर्तस्य माहात्म्यमहं वक्तुं न तेऽक्षमः ॥ तस्य स्मरणमात्रेण कृतकृत्यो भवेन्नरः ॥ १ ॥ कुशावर्तमिति
ख्यातं नराणां सर्वकामदम् ॥ कुशेनाऽऽवर्तितं यत्र गौतमेन महात्मना ॥ २ ॥ कुशेनाऽऽवर्तयित्वा तु आनयामास तां मुनिः ॥ तत्र स्नानं च दानं
च पितॄणां तृप्तिदायकम् ॥ ३ ॥ नीलगंगा सरिच्छ्रेष्ठा निःसृता नीलपर्वतात् ॥ तत्र स्नानादि यत्किंचित्करोति प्रयतो नरः ॥ ४ ॥ सर्वं तदक्षयं
विद्यात्पितॄणां तृप्तिदायकम् ॥ विश्रुतं त्रिषु लोकेषु कपोतं तीर्थमुत्तमम् ॥ ५ ॥ तस्य स्वरूपं वक्ष्यामि मुने शृणु महाफलम् ॥ तत्र ब्रह्मगिरौ
कश्चिद्व्याधः परमदारुणः ॥ ६ ॥ हिनस्ति ब्राह्मणान्साधून्यतीन्गोपक्षिणो मृगान् ॥ एवंभूतः स पापात्मा क्रोधनोऽनृतभाषणः ॥ ७ ॥ भीषणाकृ

तिरत्युग्रो नीलाक्षो ह्रस्ववाहुकः ॥ दन्तुरो नष्टनासाक्षो ह्रस्वपात्पृथुकुक्षिकः ॥ ८ ॥ ह्रस्वोदरो ह्रस्वभुजो विकृतो गर्दभस्वनः ॥ पाशहस्तः पाप
चित्तः पापिष्टः सघनुः सदा ॥ ९ ॥ तस्य भार्या तथाभूता अपत्यान्यपि नारद ॥ तया तु प्रेर्यमाणोऽसौ विवेश गहनं वनम् ॥ १० ॥ स जघान
मृगान्पापः पक्षिणो बहुरूपिणः ॥ पञ्जरे प्राक्षिपत्कांश्चिज्जीवमानांस्तथेतरान् ॥ ११ ॥ क्षुधया परितप्ताङ्गो विह्वलस्तृषया तथा ॥ भ्रान्तदेशो बहु
तरं न्यवर्तत गृहं प्रति ॥ १२ ॥ ततोऽपराह्णे संप्राप्ते निवृत्ते मधुमाधवे ॥ क्षणात्तडिद्वर्जितं च साभ्रं चैवाभवत्तदा ॥ १३ ॥ ववौ वायुः साश्मवर्षो
वारिधारातिभीषणः ॥ स गच्छल्लुब्धकः श्रान्तः पन्थानं नावबुध्यत ॥ १४ ॥ जलं स्थलं गर्तमथो पन्थानमथवा दिशः ॥ न बुबोध
तदा पापः श्रान्तः शरणमप्यथ ॥ १५ ॥ क्व गच्छामि क्व तिष्ठेयं किं करोमीत्यचिन्तयत् ॥ सर्वेषां प्राणिनां प्राणानाहर्ताऽहं यथाऽन्तकः ॥ १६ ॥
ममाप्यन्तकरं भूतं संप्राप्तं चाश्मवर्षणम् ॥ त्रातारं नैव पश्यामि शिलां वा वृक्षमन्तिके ॥ १७ ॥ एवं बहुविधं व्याधो विचिन्त्यापश्यदन्तिके ॥
वने वनस्पतिमिव नक्षत्राणां यथाऽत्रिजम् ॥ १८ ॥ मृगाणां च यथा सिंहमाश्रमाणां गृहाधिपम् ॥ इन्द्रियाणां मन इव त्रातारं प्राणिनां नगम् ॥
॥ १९ ॥ श्रेष्ठं विटपिनं शुभ्रं शाखापल्लवमण्डितम् ॥ तमाश्रित्योपविष्टोऽभूत्क्लिन्नवासाः स लुब्धकः ॥ २० ॥ स्मरन्भार्यामपत्यानि जीवे
युरथवा न वा ॥ एतस्मिन्नन्तरे तत्र चास्तं प्राप्तो दिवाकरः ॥ २१ ॥ तमेव नगमाश्रित्य कपोतो भार्यया सह ॥ पुत्रपौत्रैः परिवृतो
ह्यास्ते तत्र नगोत्तमे ॥ २२ ॥ सुखेन निर्भयो भूत्वा सुतृप्तः प्रीत एव च ॥ बहवो वत्सरा याता वसतस्तस्य पक्षिणः ॥ २३ ॥
पतिव्रता तस्य भार्या सुप्रीता तेन चैव हि ॥ कोटरे तन्नगे श्रेष्ठ जलवाय्वग्निवर्जिते ॥ २४ ॥ भार्यापुत्रैः परिवृतः सर्वदाऽऽस्ते कपोतकः ॥
तस्मिन्दिने दैववशात्कपोतश्च कपोतकी ॥ २५ ॥ भक्ष्यार्थं तु उभौ यातौ कपोतो नगमभ्यगात् ॥ साऽपि दैववशात्पुत्र पञ्जरस्थैव वर्तते॥२६॥
गृहीता लुब्धकेनाथ जीवमानेव वर्तते ॥ कपोतकोऽप्यपत्यानि मातृहीनान्युदीक्ष्य च ॥ २७ ॥ वर्षं च भीषणं प्राप्तमस्तं यातो दिवाकरः ॥ स्वको
टरं तथा हीनमालोक्य विललाप सः ॥ २८ ॥ तां बद्धां पञ्जरस्थां वा न बुबोध कपोतराट् ॥ अन्वारेभे कपोतो वै प्रियाया गुणकीर्तनम् ॥
॥ २९ ॥ नाद्याप्यायाति कल्याणी मम हर्षविवर्धनी ॥ मम धर्मस्य जनत्री मम देहस्य चेश्वरी ॥३०॥ धर्मार्थकाममोक्षाणां सैव नित्यं सहायिनी॥
तुष्टे हसन्ती रुष्टे च मम दुःखप्रमार्जनी ॥ ३१ ॥ सखी मन्त्रेषु सा नित्यं मम वाक्यरता सदा ॥ नाद्याप्यायाति कल्याणी संप्रयातेऽपि भास्करे ॥
॥ ३२ ॥ न जानाति व्रतं मन्त्रं दैवं धर्मार्थमेव च ॥ पतिव्रता पतिप्राणा पतिमन्त्रा पतिप्रिया ॥ ३३ ॥ नाद्याप्यायाति कल्याणी किं करोमि क्व

यामि वा ॥ किं मे गृहं काननं च तया हीनं हि दृश्यते ॥ ३४ ॥ तया युक्तं श्रिया युक्तं भीषणं वाऽपि शोभनम् ॥ नाद्याप्यायाति मे कान्ता यया
गृहमुदीरितम् ॥ ३५ ॥ विनाऽनया न जीविष्ये त्यजे वाऽपि प्रियां तनुम् ॥ किं कुर्वन्तु त्वपत्यानि लुप्तधर्मस्त्वहं पुनः ॥ ३६ ॥ एवं विलपत
स्तस्य भर्तुर्वाक्यं निशम्य वै ॥ पञ्जरस्थैव सा वाक्यं भर्तारमिदमब्रवीत् ॥ ३७ ॥ ॥ कपोतक्युवाच ॥ अत्राहमस्मि बद्धैव विवशाऽस्मि खगे
त्तम ॥ आनीताऽहं लुब्धकेन बद्धा पाशैर्महामते ॥ ३८ ॥ धन्याऽस्म्यनुगृहीताऽस्मि पतिर्वक्ति गुणान्मम ॥ सतो वाऽप्यसतो वाऽपि कृतार्थाऽहं
न संशयः ॥ ३९ ॥ तुष्टे भर्तरि नारीणां तुष्टाः स्युः सर्वदेवताः ॥ विपर्यये तु नारीणामवश्यं नाशमाप्नुयात् ॥ ४० ॥ त्वं दैवं त्वं प्रभुर्मह्यं त्वं सुहृत्त्वं
परायणम् ॥ त्वं व्रतं त्वं परं ब्रह्म स्वर्गो मोक्षस्त्वमेव च ॥ ४१ ॥ मा चिन्तां कुरु कल्याण धर्मे बुद्धिं स्थिरां कुरु ॥ त्वत्प्रसादाच्च भुक्ता हि भोगाश्च
विविधा मया ॥ ४२ ॥ अलं खेदेन मज्जेन धर्मे बुद्धिं कुरु स्थिराम् ॥ ४३ ॥ ॥ ब्रह्मोवाच ॥ इति श्रुत्वा प्रियावाक्यमुत्ततार नगोत्तमात् ॥
यत्र सा पञ्जरस्था तु कपोती वर्तते द्रुतम् ॥ ४४ ॥ तामागत्य प्रियां दृष्ट्वा मृतवच्चापि लुब्धकम् ॥ मोचयामीति तामाह निश्चेष्टो लुब्धकोऽ
धुना ॥ ४५ ॥ मा मुञ्चस्व महाभाग ज्ञात्वा संबन्धमस्थिरम् ॥ लुब्धानां खेचरा ह्यन्नं जीवो जीवस्य चाशनम् ॥ ४६ ॥ नापराधं स्मराम्यस्य
धर्मबुद्धिं स्थिरां कुरु ॥ गुरुराग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ॥ ४७ ॥ पतिरेव गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः ॥ अभ्यागतमनुप्राप्तं वचनै
स्तोषयन्ति ये ॥ ४८ ॥ तेषां वागीश्वरी देवी तृप्ता भवति निश्चितम् ॥ तस्यान्नस्य प्रदानेन शक्रस्तृप्तिमवाप्नुयात् ॥ ४९ ॥ पितरः पादशौचेन अन्न
द्येन प्रजापतिः ॥ तस्योपचाराद्वै लक्ष्मीर्विष्णुना प्रीतिमाप्नुयात् ॥ ५० ॥ शयने सर्वदेवास्तु तस्मात्पूज्यताऽमीतिःथि ॥ अभ्यागतमनुश्रान्तं
सूर्योढं गृहमागतम् ॥ तं विद्याद्देवरूपेण सर्वक्रतुफलो ह्यसौ ॥ ५१ ॥ अभ्यागतं श्रान्तमनुव्रजन्ति देवाश्च सर्वे पितरोऽग्नयश्च ॥ तस्मिन्हि तृप्ते मुद
माप्नुवन्ति गते निराशेऽपि च तें निराशाः॥५२॥तस्मात्सर्वात्मना कान्त दुःखं त्यक्त्वा शमं व्रज ॥ कृत्वा तिष्ठ शुभां बुद्धिं धर्मकृत्यं समाचर॥५३॥
उपकारोऽपकारश्च प्रवरावितिं संमतौ॥ उपकारिषु सर्वोऽपि करोत्युपकृतिं पुनः ॥ ५४ ॥ अपकारिषु यः साधुः पुण्यभाक्स उदाहृतः ॥५५॥ कपोत
उवाच ॥ आवयोरनुरूपं च त्वयोक्तं साधु मन्यसे ॥ किंतु वक्तव्यमप्यस्ति तच्छृणुष्व वरानने ॥ ५६ ॥ सहस्रं भरते कश्चिच्छतमन्यो दशापरः ॥
आत्मानं च सुखेनान्यो वयं कष्टोदरंभराः ॥ ५७॥ गतधान्यधनाः केचित्कुशूलधनिनोऽपरे ॥ चटक्षिप्तधनाः केचिच्चञ्चुक्षिप्तधना वयम् ॥ ५८ ॥
पूजयामि कथं श्रान्तमभ्यागतमिमं शुभे ॥ ५९ ॥ ॥ कपोत्युवाच ॥ अग्निरापः शुभा वाणी तृणकाष्ठादिकं च यत् ॥ एतदप्यार्थिने देयं शीतार्तो

लुब्धकस्त्वयम् ॥ ६० ॥ ॥ ब्रह्मोवाच ॥ एतच्छ्रुत्वा प्रियावाक्यं वृक्षमारुह्य पक्षिसट् ॥ आलोकयामास तदा वह्निं दूरं ददर्श ह ॥ ६१ ॥ स तं गत्वा वह्निदेशं चञ्चुनोल्मुकमाहरत् ॥ पुरोऽग्निं ज्वालयामास लुब्धकस्य कपोतकः ॥ ६२ ॥ शुष्ककाष्ठानि पर्णानि तृणानि च पुनः पुनः ॥ अग्नौ निक्षेपयामास निशीथे स कपोतराट् ॥ ६३ ॥ तमाग्निं ज्वलितं दृष्ट्वा लुब्धकः शीतदुःखितः ॥ अवशानि स्वकाङ्गानि प्रताप्य सुखमाप्तवान् ॥ ६४ ॥ क्षुधाग्निना दह्यमानं व्याधं दृष्ट्वा कपोतकी ॥ मां मुञ्चस्व महाभाग इति भर्तारमब्रवीत् ॥ ६५ ॥ स्वशरीरेण दुःखार्तं लुब्धकं प्रीणयामि तम् ॥ इष्टातिथीनां ये लोकास्तांस्त्वं प्राप्नुहि सुव्रत ॥ ६६ ॥ ॥ कपोत उवाच ॥ मयि तिष्ठति नैवायं तव धर्मो विधीयते ॥ इष्टातिथिर्भवामीह अनुजानीहि मां शुभे ॥ ६७ ॥ ॥ ब्रह्मोवाच ॥ इत्युक्त्वाऽग्निं त्रिरावर्त्य स्मरन्देवं चतुर्भुजम् ॥ विश्वात्मकं महाविष्णुं शरण्यं भक्तवत्सलम् ॥ ६८ ॥ यथासुखं जुषस्वेति वदन्नाग्निं तथाऽऽविशत् ॥ तं दृष्ट्वाऽग्नौ क्षिप्तजीवं लुब्धको वाक्यमब्रवीत् ॥ ६९ ॥ ॥ लुब्धक उवाच ॥ अहो मानुषदेहस्य धिग्जीवितमिदं मम ॥ यदिदं पक्षिराजेन मदर्थे साहसं कृतम् ॥ ७० ॥ ॥ ब्रह्मोवाच ॥ एवं ब्रुवन्तं तं लुब्धं पक्षिणी वाक्यमब्रवीत् ॥ ७१ ॥ ॥ कपोतक्युवाच ॥ मां त्वं मुञ्च महाभाग दूरं यात्येष मे पतिः ॥ ७२ ॥ ॥ ब्रह्मोवाच ॥ तस्यास्तद्वचनं श्रुत्वा पञ्जरस्थां कपोतकीम् ॥ लुब्धको मोचयामास तरसा भीतवत्तदा ॥ ७३ ॥ साऽपि प्रदक्षिणं कृत्वा पतिमग्निं तदा जगौ ॥ ७४ ॥ ॥ कपोत्युवाच ॥ स्त्रीणामयं परो धर्मो यद्भर्तुरनुवेशनम् ॥ वेदे च विहितो मार्गः सर्वलोकेषु पूजितः ॥ ७५ ॥ व्यालग्राही यथा व्यालं बिलादुद्धरते बलात् ॥ एवं त्वनुगता नारी सह भर्त्रा दिवं व्रजेत् ॥ ७६ ॥ तिस्रः कोट्योऽर्धकोटी च यानि रोमाणि मानुषे ॥ तावत्कालं वसेत्स्वर्गे भर्तारं याऽनुगच्छति ॥ ॥ ७७ ॥ नमस्कृत्वा भुवं देवान्गङ्गां चापि वनस्पतीन् ॥ आश्वास्य तान्यपत्यानि लुब्धकं वाक्यमब्रवीत् ॥ ७८ ॥ ॥ कपोत्युवाच ॥ तिस्रः कोट्यार्धकोटी च यावद्रोमाणि मानुषे ॥ तावत्कालं वसेत्स्वर्गे भर्तारं यानुगच्छति ॥ ७९ ॥ त्वत्प्रसादान्महाभाग उपपन्नं ममेदृशम् ॥ अपत्यानां क्षमस्वेह भर्त्रा यामि त्रिविष्टपम् ॥ ८० ॥ ॥ ब्रह्मोवाच ॥ इत्युक्त्वा पक्षिणी साध्वी प्रविवेश हुताशनम् ॥ प्रविष्टायां हुतवहे जयशब्दो व्यवर्तत ॥ ८१ ॥ गगने सूर्यसंकाशं विमानमतिशोभनम् ॥ तदाऽऽरूढौ सुरनिभौ दंपती ददृशे ततः ॥ ८२ ॥ हर्षेण प्रोचतुरुभौ लुब्धकं विस्मयान्वितम् ॥ ८३ ॥ दंपती ऊचतुः ॥ गच्छावस्त्रिदशस्थानमापृष्टोऽसि महामते ॥ आवयोः स्वर्गसोपानमतिथिस्त्वं नमोऽस्तु ते ॥ ८४ ॥ ॥ ब्रह्मोवाच ॥ विमानवरमारूढौ तौ दृष्ट्वा लुब्धकोऽपि सः ॥ सधनुः पञ्जरं त्यक्त्वा कृताञ्जलिरभाषत ॥ ८५ ॥ ॥ लुब्धक उवाच ॥ न त्यक्तव्यो महाभागौ देयं किंचिदजा-

नते ॥ अहमत्रातिथिर्मान्यो निष्कृतिं वक्तुमर्हथः ॥ ८६ ॥ ॥ दंपती ऊचतुः ॥ गौतमीं गच्छ भद्रं ते तस्याः पापं निवेदय ॥ तत्रैवाऽऽप्लुवनात्पक्षं
सर्वपापैर्विमोक्ष्यसे ॥ ८७ ॥ मुक्तपापः पुनस्तत्र गङ्गायामवगाहने ॥ अश्वमेधफलं पुण्यं प्राप्य पुण्यो भविष्यसि ॥ ८८ ॥ सरिद्वरायां गौतम्यां
ब्रह्मविष्ण्वीशसंभुवि ॥ पुनराप्लुवनादेव त्यक्त्वा देहं मलीमसम् ॥ ८९ ॥ विमानवरमारूढः स्वर्गं गन्ताऽस्यसंशयम् ॥ ९० ॥ ॥ ब्रह्मोवाच ॥
तच्छ्रुत्वा वचनं ताभ्यां तथा चक्रे स लुब्धकः ॥ विमानवरमारूढो दिव्यरूपधरोऽभवत् ॥ ९१ ॥ दिव्यमाल्याम्बरधरः पूज्यमानोऽप्सरोगणैः ॥
कपोतश्च कपोती च तृतीयो लुब्धकस्तथा ॥ गङ्गायाश्च प्रभावेण सर्वे वै दिवमाक्रमन् ॥ ९२ ॥ ततः प्रभृति तत्तीर्थं कापोतमिति विश्रुतम् ॥
तत्र स्नानं च दानं च पितृपूजनमेव च ॥ ९३ ॥ जपयज्ञादिकं कर्म तदानन्त्याय कल्पते ॥ ९४ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये कपो
ततीर्थवर्णनं नाम दशमोऽध्यायः ॥ १० ॥ ॥ ब्रह्मोवाच ॥ कार्तिकेयं परं तीर्थं कौमारमिति विश्रुतम् ॥ यन्नामश्रवणादेव कुलवान्रूपवान्भवेत् ॥
॥ १ ॥ निहते तारके दैत्ये स्वस्थे जाते त्रिविष्टपे ॥ कार्तिकेयं सुतं ज्येष्ठं प्रीत्या प्रोवाच पार्वती ॥ २ ॥ यथासुखं भुङ्क्ष्व भोगांस्त्रैलोक्ये
मनसः प्रियान् ॥ मयाऽऽज्ञया प्रीतमनाः पितुश्चैव प्रसादतः ॥ ३ ॥ एवमुक्तः स वै मात्रा विशाखो देवताप्रियः ॥ यथासुखं बलाद्रेमे देवपत्न्योऽ
पि रेमिरे ॥ ४ ॥ ततः संभुज्यमानासु देवपत्नीषु नारद ॥ नाशक्नुवन्वारयितुं कार्तिकेयं दिवौकसः ॥ ५ ॥ ततो निवेदयामासुः पार्वत्यै पुत्रकर्म
तत् ॥ असकृद्वार्यमाणोऽपि मात्रा देवैः स शक्तिधृक् ॥ ६ ॥ नैवासावकरोद्वाक्यं स्त्रीष्वासक्तस्तु षण्मुखः ॥ अभिशापभयाद्भीता पार्वती पर्यचिन्त
यत ॥ ७ ॥ पुत्रस्नेहात्तथैवेशा देवानां कार्यसिद्धये ॥ देवपत्न्यश्चिरं रक्ष्या इति मत्वा पुनः पुनः ॥ ८ ॥ यस्यां तु रमते स्कन्दः पार्वती त्वपि
तादृशी ॥ ९ ॥ तद्रूपमात्मनः कृत्वा वर्तयामास पार्वती ॥ इन्द्रस्य वरुणस्यापि भार्यामाहूय षण्मुखः ॥ यावत्पश्यति तस्यां तु मातृरूपमपश्यत ॥
॥ १० ॥ तामपास्य नमस्यांथ पुनरन्यामथाऽऽह्वयत् ॥ तस्यां तु मातृरूपं स प्रेक्ष्य लज्जामुपेयिवान् ॥ ११ ॥ एवं बह्वीषु तद्रूपं दृष्ट्वा मातृमयं
जगत् ॥ इति संचिन्त्य गाङ्गेयो वैराग्यमगमत्तदा ॥ १२ ॥ स तु मातृकृतं ज्ञात्वा प्रवृत्तस्य निवर्तनम् ॥ निवार्यश्चेदहं भोगात्किंतु पूर्वं प्रवर्तितः ॥
॥ १३ ॥ तस्मान्मातृकृतं सर्वं मम हास्यास्पदं त्विति ॥ लज्जया परया युक्तो गौतमीमगमत्तदा ॥ १४ ॥ इयं च मातृरूपा मे शृणोतु मम भाषि
तम् ॥ इतः स्त्रीनामधेयं यन्मम मातृसमं मतम् ॥ १५ ॥ एवं ज्ञात्वा लोकनाथः पार्वत्या सह शंकरः ॥ पुत्रं निवारयामास वृत्तमित्यब्रवीद्गुरुः॥
॥ १६ ॥ ततः सरपतिः प्रीतः किं ददामीति चिन्तयन् ॥ कृताञ्जलिपुटः स्कन्दः पितरं पुनरब्रवीत् ॥ १७ ॥ ॥ स्कन्द उवाच ॥ सेनापतिः सुर

पतिस्तव पुत्रोऽहमित्यपि ॥ अलमेतेन देवेश किं वरैः सुरपूजित ॥ १८॥ अथवा दातुकामोऽसि लोकानां हितकाम्यया ॥ याचेऽहं नाऽऽत्मना देव तदनुज्ञातुमर्हसि ॥ १९ ॥ महापातकिनः केचिद्गुरुदाराभिगामिनः ॥ अत्राऽऽप्लुवनमात्रेण धौतपापा भवन्तु ते ॥ २० ॥ आप्नुवन्तूत्तमां जातिं तिर्यञ्चोऽपि सुरेश्वर ॥ कुरूपो रूपसंपत्तिमत्र स्नानादवाप्नुयात् ॥ २१ ॥ ॥ ब्रह्मोवाच ॥ एवमस्त्विति तं शंभुः प्रत्यनन्दत्सुतेरितम् ॥ ततः प्रभृति तत्तीर्थं कार्तिकेयमिति श्रुतम् ॥ तत्र स्नानं च दानं च सर्वक्रतुफलप्रदम् ॥ २२॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये कुमारतीर्थवर्णनं नामैकादशोऽध्यायः ॥ ११ ॥ ब्रह्मोवाच ॥ यत्ख्यातं कृत्तिकातीर्थं कार्तिकेयादनन्तरम् ॥ तस्य श्रवणमात्रेण सोमपानफलं लभेत् ॥ १ ॥ पुरा तारकसंशांत्यै भवरेतोऽपिवत्कविः॥रेतोगर्भं कविं दृष्ट्वा ऋषिपत्न्योऽस्पृहन्मुने ॥ २ ॥ सप्तर्षीणामृतुस्नातां वर्जयित्वा त्वरुन्धतीम् ॥ तासु गर्भः समभवत्षट्सु स्त्रीषु तदाऽग्नितः ॥ ३ ॥ तप्यमानास्तु शोभिष्ठा ऋतुस्नातास्तु ता मुने ॥ किं कुर्मः क्व न गच्छामः किं कृत्वा सुकृतं भवेत् ॥ ४ ॥ इत्युक्त्वा ता मिथो गङ्गां व्यग्रा गत्वा व्यपीडयन् ॥ ताभ्यस्ते निःसृताः गर्भाः फेनरूपास्तदाऽम्भसि ॥५॥ अम्भसा त्वेकतां प्राप्ता वायुना सर्व एव हि॥ एकरूपस्तदा ताभ्यः षण्मुखः समजायत ॥ ६ ॥ स्रावयित्वा तु तान्गर्भान्ऋषिपत्न्यो गृहान्ययुः ॥ तासां विकृतरूपाणि दृष्ट्वा ते ऋषयोऽब्रुवन् ॥ ७ ॥ गम्यतां गम्यतां शीघ्रं स्वैरी वृत्तिर्न युज्यते ॥ स्त्रीणामिति ततो वत्स निरस्ताः पतिभिस्तु ताः ॥ ८ ॥ ततो दुःखं समाविष्टास्त्यक्ताः स्वपतिभिश्च षट् ॥ ता दृष्ट्वा नारदः प्राह कार्तिकेयो हरोद्भवः ॥ ९ ॥ गाङ्गेयोऽग्निभवश्चेति विख्यातस्तारकान्तकः ॥ तं यान्तु न चिरादेव प्रीतो भोगं प्रदास्यति ॥ १० ॥ देवर्षेर्वचनादेव समभ्येत्य च षण्मुखम् ॥ कृत्तिकाः स्वयमेवैतद्यथावृत्तं न्यवेदयन् ॥ ११ ॥ ताभ्यो वाक्यं कृत्तिकाभ्यः कार्तिकेयोऽनुमन्य च ॥ गौतमीं यान्तु सर्वाश्च स्नात्वाऽऽपूज्य महेश्वरम् ॥ १२ ॥ एष्यामि चाहं तत्रैव नेष्यामि सुरमन्दिरम् ॥ तथेत्युक्त्वा कृत्तिकाश्च स्नात्वा गङ्गां च गौतमीम् ॥ १३ ॥ देवेश्वरं च संपूज्य कार्तिकेयानुशासनात् ॥ देवेश्वरप्रसादेन प्रययुः सुरमन्दिरम् ॥ १४ ॥ ततः प्रभृति तत्तीर्थं कृत्तिकातीर्थमुच्यते ॥ कार्तिक्यां कृत्तिकायोगे तत्र यः स्नानमाचरेत् ॥ १५ ॥ सर्वक्रतुफलं प्राप्य राजा भवति धार्मिकः ॥ तत्तीर्थस्मरणं वाऽपि यः करोति शृणोति च ॥ सर्वपापविनिर्मुक्तो दीर्घमायुरवाप्नुयात् ॥ १६ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये कृत्तिकातीर्थवर्णनं नाम द्वादशोऽध्यायः ॥ १२॥ ॥ ब्रह्मोवाच ॥ दशाश्वमेधिकं तीर्थं तच्छृणुष्व महामुने ॥ यस्य श्रवणमात्रेण हयमेधफलं लभेत् ॥ १ ॥ विश्वकर्मसुतः श्रीमान्विश्वरूपो महाबलः ॥ तस्यापि प्रमतिः पुत्रस्तत्पुत्रो भौवनो विभुः ॥ २ ॥ पुरोधाः कश्यपस्तस्य सर्वज्ञानविशारदः ॥ तमपृच्छन्महाबाहुर्भौवनः सार्वभौवनः ॥ ३ ॥ यक्ष्येऽहं हयमेधैश्च युगपद्दशभिर्मुने ॥

इत्यपृच्छद्गुरुं विप्रं क्व यक्ष्यामि सुरानिति ॥ ४ ॥ सोऽवदद्देवयजनं तत्र तत्र नृपोत्तम ॥ यत्र यत्र द्विजश्रेष्ठाः प्रावर्तन्त महाक्रतून् ॥ ५ ॥ तत्रा
भवन्नृषिगणा आर्त्विज्ये मखमण्डले ॥ युगपद्दशमेधानि प्रवृत्तानि पुरोधसा ॥६॥ पूर्णतां नाऽऽययुस्तानि दृष्ट्वा चिन्तापरो नृपः ॥ विहाय देवयजनं
पुनरन्यत्र तान्क्रतून् ॥ ७ ॥ उपाक्रामत्तथा तत्र विघ्नदोषास्तमाययुः ॥ दृष्ट्वाऽपूर्णांस्ततो यज्ञान्राजा गुरुमभाषत ॥ ८ ॥ ॥ राजोवाच ॥ देशदोषा-
त्कालदोषान्मम दोषात्तवापि वा ॥ पूर्णतां नाऽऽप्नुवन्ति स्म दशमेधानि वाजिनः ॥ ९ ॥ ॥ ब्रह्मोवाच ॥ ततश्च दुःखितो राजा कश्यपेन पुरो
धसा ॥ गीष्पतेर्भ्रातरं ज्येष्ठं गत्वा संवर्तमूचतुः ॥ १० ॥ ॥ कश्यपभौवनावूचतुः ॥ भगवन्युगपत्कार्याण्यश्वमेधानि मानद ॥ दश संपूर्णतां यान्ति
तं देशं तं गुरुं वद ॥ ११ ॥ ॥ ब्रह्मोवाच ॥ ततो ध्यात्वा ऋषिश्रेष्ठः संवर्तो भौवनं तदा ॥ अब्रवीद्गच्छ ब्रह्माणं गुरुं देशं वदिष्यति ॥ १२ ॥
भौवनोऽपि महाप्राज्ञः कश्यपेन महात्मना ॥ आगत्य मामब्रवीच्च गुरुं देशादिकं च यत् ॥ १३ ॥ ततोऽहमब्रवं पुत्र भौवनं कश्यपं तथा ॥
गौतमीं गच्छ राजेन्द्र स देशः क्रतुपुण्यवान् ॥ १४ ॥ अयमेव गुरुः श्रेष्ठः कश्यपो वेदपारगः ॥ गुरोरस्य प्रसादेन गौतम्याश्च प्रसादतः ॥ १५ ॥
एकेन हयमेधेन तत्र स्नानेन वा पुनः ॥ सेत्स्यन्ति तत्र नृपते दशमेधानि वाजिनः ॥ १६ ॥ तच्छ्रुत्वा भौवनो राजा गौतमीतीरमभ्यगात् ॥
कश्यपेन सहायेन हयमेधाय दीक्षितः ॥ १७ ॥ ततः प्रवृत्ते यज्ञेशे हयमेधे महाक्रतौ ॥ संपूर्णे तु तदा राजा पृथिवीं दातुमुद्यतः ॥ १८ ॥ ततोऽन्त
रिक्षे वागुच्चैरुवाच नृपसत्तमम् ॥ पूजयित्वा स्थितं विप्रानृत्विजोऽथ सदस्पतीन् ॥ १९ ॥ ॥ आकाशवागुवाच ॥ पुरोधसे कश्यपाय सशैलवनका
नाम् ॥ पृथिवीं दातुकामेन दत्तं सर्वं त्वया नृप ॥२०॥ भूमिदानस्पृहां त्यक्त्वा अन्नं देहि महाफलम् ॥ नान्नदानसमं पुण्यं त्रिषु लोकेषु विद्यते ॥
॥ २१ ॥ विशेषतस्तु गंगायाः श्रद्धया पुलिने मुने ॥ त्वया तु हयमेधोऽयं कृतः सबहुदक्षिणः ॥ कृतकृत्योऽसि भद्रं ते नात्र कार्या विचारणा ॥
॥ २२ ॥ ॥ ब्रह्मोवाच ॥ तथाऽपि दातुकामं तं मही प्रोवाच भौवनम् ॥ २३ ॥ पृथिव्युवाच ॥ विश्वकर्मात्मज न मां त्वं देहीति पुनः पुनः ॥
गौतमीतीरमाश्रित्य ग्रासमेकं ददाति यः ॥ २४ ॥ तेनाहं सकला दत्ता किं मां दास्यसि भौवन ॥ निमज्जे जलमध्येहं तन्न मां दातुमर्हसि ॥ २५ ॥
॥ ब्रह्मोवाच ॥ ततश्च भौवनो भीतः किं देयमिति चाब्रवीत् ॥ पुनश्चोवाच सा पृथ्वी भौवनं ब्राह्मणैर्वृतम् ॥ २६ ॥ ॥ भूम्युवाच ॥ तिला
गावो धनं धान्यं यत्किंचिद्गौतमीतटे ॥ सर्वं तदक्षयं दानं किं मां भौवन दास्यसि ॥ २७ ॥ गंगातीरं समाश्रित्य ग्रासमेकं ददाति यः ॥ तेनाहं
सकला दत्ता किं मां भौवन दास्यति ॥ २८ ॥ ॥ ब्रह्मोवाच ॥ तद्भुवो वचनं श्रुत्वा भौवनः सार्वभौवनः ॥ तथेति मत्वा विप्रेभ्यो ह्यन्नं प्रादात्सुवि

स्तरम् ॥ २९ ॥ ततः प्रभृति तत्तीर्थं दशाश्वमेधिकं विदुः ॥ दशानामश्वमेधानां फलं स्नानादवाप्यते ॥ ३० ॥ इति श्रीब्रह्मपुराणगतगौतमीमा
हात्म्ये तीर्थमाहात्म्ये दशाश्वमेधतीर्थवर्णनं नाम त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ ब्रह्मोवाच ॥ पैशाचं तीर्थमपरं पूजितं ब्रह्मवादिभिः ॥ तस्य
स्वरूपं वक्ष्यामि गौतम्या दक्षिणे तटे ॥ १ ॥ गिरिर्ब्रह्मगिरेः पार्श्वे अञ्जनो नाम नारद ॥ तस्मिञ्शैले मुनिवर शापभ्रष्टा
वराप्सरा ॥ २ ॥ अञ्जना नाम तत्राऽऽसीदुत्तमांगेन वानरी ॥ केसरी नाम तद्भर्ता अद्रिकेति तथाऽपरा ॥ ३ ॥ साऽपि
केसरिणो भार्या शापभ्रष्टा वराप्सरा ॥ उत्तमाङ्गेन मार्जारी साऽप्यास्तेऽञ्जनपर्वते ॥ ४ ॥ दक्षिणार्णवमभ्यागात्केसरी लोकविश्रुतः ॥
एतस्मिन्नन्तरेऽगस्त्योऽञ्जनं पर्वतमभ्यगात् ॥ ५ ॥ अञ्जना चान्द्रिका चैव अगस्त्यमृषिसत्तमम् ॥ पूजयामासतुरुभे यथान्यायं यथासुखम् ॥ ६ ॥
ततः प्रसन्नो भगवानाहोभे ब्रियतां वरः ॥ ते आहतुरुभेऽगस्त्यं पुत्रौ देहि मुनीश्वर ॥ ७ ॥ सर्वेभ्यो बलिनौ श्रेष्ठौ सर्वलोकोपकारकौ ॥ तथेत्युक्त्वा
मुनिश्रेष्ठो जगामाऽऽशां स दक्षिणाम् ॥ ८ ॥ ततः कदाचित्ते काले अञ्जना चंद्रिका तथा ॥ गीतं नृत्यं च हास्यं च कुर्वत्यौ गिरिमूर्धनि ॥ ९ ॥
वायुश्च निर्ऋतिश्चापि ते दृष्ट्वा सस्मितौ सुरौ ॥ कामाक्रान्तधियौ चोभौ तदा सत्वरमीयतुः ॥ १० ॥ भार्ये भवेतामुभयोरावां देवौ वरप्रदौ ॥
ते अप्यूचतुरस्त्वेतद्रेमाते गिरिमूर्धनि ॥ ११ ॥ अञ्जनायां तथा वायोर्हनुमान्समजायत ॥ अद्रिकायां च निर्ऋतेरद्रिर्नाम पिशाचराट् ॥ १२ ॥
पुनस्ते आहतुरुभे पुत्रौ जातौ मुनेर्वरात् ॥ आवयोर्विकृतं रूपमुत्तमाङ्गेन दूषितम् ॥ १३ ॥ शापाच्छचीपतेस्तत्र युवामाज्ञातुमर्हथः ॥ ततः प्रोवाच
भगवान्वांयुश्च निर्ऋतिस्तथा ॥ १४ ॥ गौतम्यां स्नानकरणाच्छापमोक्षो भविष्यति ॥ इत्युक्त्वा तावुभौ प्रीतौ तत्रैवान्तरधीयताम् ॥ १५ ॥
ततोऽञ्जनां समादाय अद्रिः पैशाचमूर्तिमान् ॥ भ्रातुर्हनुमतः प्रीत्यै स्नापयामास मातरम् ॥ १६ ॥ तथैव हनुमान्गङ्गामादायाद्रिमतित्वरन् ॥
मार्जाररूपिणीं नीत्वा गौतम्यास्तीरमाप्तवान् ॥ १७ ॥ ततः प्रभृति तत्तीर्थं पैशाचं चाऽऽञ्जनं तथा ॥ ब्रह्मणो गिरिमासाद्य सर्वकामप्रदं शुभम् ॥
॥ १८ ॥ योजनानां त्रिपञ्चाशन्मार्जारं पूर्वतो भवेत् ॥ मार्जारसंज्ञितात्तस्माद्धनूमन्तं वृषाकपिम् ॥ १९ ॥ फेनासंगममाख्यातं सर्वकामप्रदं
शुभम् ॥ तस्य स्वरूपं व्युष्टिश्च तत्रैव प्रोच्यते शुभा ॥ २० ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये पैशाचतीर्थवर्णनं नाम ॥ १९५
चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ ब्रह्मोवाच ॥ क्षुधातीर्थमिति ख्यातं शृणु नारद तन्मनाः ॥ कथ्यमानं महापुण्यं सर्वकामप्रदं नृणाम् ॥ १ ॥
ऋषिरासीत्पुरा कण्वस्तपस्वी वेदवित्तमः ॥ परिभ्रमन्नाश्रमाणि क्षुधया परिपीडितः ॥ २ ॥ गौतमस्याऽऽश्रमं पुण्यं समृद्धं चान्नवारिणा ॥

आत्मानं च क्षुधायुक्तं समृद्धं चापि गौतमम् ॥ ३ ॥ वीक्ष्य कण्वोऽथ वैषम्यं वैराग्यमगमत्तदा ॥ गोतमोऽपि द्विजश्रेष्ठो ह्यहं तपसि निष्ठितः ॥ ॥ ४ ॥ समेन याच्ञाऽयुक्ता स्यात्तस्माद्गौतमवेश्मनि ॥ न भोक्ष्येऽहं क्षुधार्तोऽपि पीडितेऽपि कलेवरे ॥ ५ ॥ गच्छेयं गौतमीं गङ्गामर्जयेयं च संपदम् ॥ इति निश्चित्य मेधावी गत्वा गङ्गां च पावनीम् ॥ ६ ॥ स्नात्वा शुचिर्यतमना उपविश्य कुशासने ॥ तुष्टाव गौतमीं गङ्गां क्षुधां च परमापदम् ॥ ७ ॥ कण्व उवाच ॥ नमोऽस्तु गङ्गे परमार्तिहारिणि नमः क्षुधे सर्वजनार्तिकारिणि ॥ नमो महेशानजटोद्भवे शुभे नमो महा मृत्युमुखाद्विनिसृते ॥ ८ ॥ पुण्यात्मनां शान्तरूपे क्रोधरूपे दुरात्मनाम् ॥ सरिद्रूपेण सर्वेषां तापपापापहारिणि ॥ ९ ॥ क्षुधारूपेण सर्वेषां तापपा पप्रदे नमः ॥ नमः श्रेयस्करे देवि नमः पापप्रमर्दिनि॥नमः शान्तिकरे देवि नमो दारिद्र्यनाशिनि ॥ १० ॥ ब्रह्मोवाच ॥ इत्येवं स्तुवतस्तस्य पुरस्तादभवद्वयम् ॥ एकं गांगं मनोहारि ह्यपरं भीषणाकृति॥पुनः कृताञ्जलिर्भूत्वा नमस्कृत्वा द्विजोत्तमः ॥११ ॥ कण्व उवाच ॥ सर्वमंगलमांगल्ये ब्राह्मि माहेश्वरि शुभे॥वैष्णवि त्र्यम्बके देवि गोदावरि नमोऽस्तुते ॥ १२ ॥ त्र्यम्बकस्य जटोद्भूते गौतमस्याघनाशिनि ॥ सप्तधा सागरं यान्ति गोदावरि नमोऽस्तु ते ॥ १३ ॥ सर्वपापकृतां पापे धर्मकामार्थनाशिनि ॥ दुःखलोभमये देवि क्षुधे तुभ्यं नमो नमः ॥ १४ ॥ ॥ ब्रह्मोवाच ॥ तत्कण्ववचनं श्रुत्वा सुप्रीते आहतुर्द्विजम्॥१५॥ ॥गंगाक्षुधे ऊचतुः॥अभीष्टं वद कल्याण वरान्वरय सुव्रत॥१६॥ ॥ ब्रह्मोवाच॥प्रोवाच प्रणतो गंगां कण्वः क्षुधां यथाक्रमम्॥१७॥ ॥कण्व उवाच॥देहि देवि मनोज्ञानि कामानि विभवं मम॥आयुर्वित्तं च भुक्तिं च मुक्तिं गंगे प्रयच्छ मे॥१८॥ब्रह्मोवाच॥ इत्युक्त्वा गौतमीं गंगां क्षुधां चाऽऽहद्विजोत्तमः॥१९॥॥कण्व उवाच॥मयि मद्वंशजे चापि क्षुधे तृष्णे दरिद्रिणि॥याहि पापेतरे रूक्षे न भूयास्त्वं कदाचन ॥ २० ॥ स्तवेनानेन ये वै त्वां स्तुवन्ति क्षुधयाऽतुराः ॥ तेषां दारिद्र्यदुःखानि न भवेयुर्वरोऽपरः ॥ २१ ॥ अस्मिंस्तीर्थे महापुण्ये स्नानदानजपा दिकम् ॥ ये कुर्वन्ति नरा भक्त्वा लक्ष्मीभाजो भवन्तु ते ॥ २२ ॥ यस्त्विदं पठते स्तोत्रं तीर्थे वा यदि वा गृहे ॥ तस्य दारिद्र्यदुःखेभ्यो न भयं स्याद्वरोऽपरः ॥ २३ ॥ ॥ ब्रह्मोवाच ॥ एवमस्त्विति चोक्त्वा ते कण्वं याते स्वमालयम् ॥ ततः प्रभृति तत्तीर्थं काण्वं गांगं क्षुधाभिधम् ॥ सर्वपापहरं वत्स पितॄणां प्रीतिवर्धनम् ॥२४॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये क्षुधातीर्थवर्णनं नाम पञ्चदशोऽध्यायः ॥१५॥ ब्रह्मोवाच ॥ अहल्यासंगमं चेह तीर्थं त्रैलोक्यपावनम् ॥ शृणु सम्यङ्मुनिश्रेष्ठ तत्र वृत्तमिदं यथा ॥ १ ॥ कौतुकेनातिमहता मया पूर्वं मुनीश्वर ॥ सृष्टाः कन्या बहुविधा रूपवत्यो गुणान्विताः ॥ २ ॥ तासामेकां श्रेष्ठतमां निर्ममे शुभलक्षणाम् ॥ तां बालां चारुसर्वांगीं दृष्ट्वा रूपगु

णान्विताम ॥ ३ ॥ को वाऽस्याः पोषणे शक्त इति मे बुद्धिराविशत् ॥ न दैत्यानां सुराणां च न मुनीनां तथैव च ॥ ४ ॥ नास्त्यस्याः पोषणे शक्तिरिति मे बुद्धिरन्वभूत् ॥ गुणज्येष्ठाय विप्राय तपोयुक्ताय धीमते ॥ ५ ॥ सर्वलक्षणयुक्ताय वेदवेदाङ्गवेदिने ॥ गौतमाय महाप्राज्ञामददां पोषणाय ताम् ॥ ६ ॥ पालयस्व मुनिश्रेष्ठ यावदाप्स्यति यौवनम् ॥ यौवनस्थां पुनः साध्वीमानयेथा ममान्तिकम् ॥ ७ ॥ एवमुक्त्वा गौतमाय प्रादां कन्यां सुमध्यमाम् ॥ तामादाय मुनिश्रेष्ठस्तपसा हतकल्मषः ॥ ८ ॥ पोषयित्वा च विधिवदलंकृत्य ममान्तिकम् ॥ निर्विकारो मुनिश्रेष्ठो ह्यहल्यामानयत्तदा ॥ ९ ॥ तां दृष्ट्वा विबुधाः सर्वे शक्राग्निवरुणादयः ॥ मम देया सुरेशान इत्यूचुस्ते पृथक्पृथक् ॥ १० ॥ तथैव मुनयः साध्या दानवा यक्षराक्षसाः ॥ तान्सर्वानागतान्दृष्ट्वा कन्यार्थमथ संगतान् ॥ ११ ॥ इन्द्रस्य तु विशेषेण महांश्चाभूत्तदा ग्रहः ॥ गौतमस्य तु माहात्म्यं गाम्भीर्यं धैर्यमेव च ॥ १२ ॥ स्मृत्वा सुविस्मितो भूत्वा ममैवमभवत्सुधीः ॥ देयेयं गौतमायैव नान्ययोग्या शुभानना ॥ १३ ॥ तस्मा एव तु तां दास्ये तथा ऽप्येवमचिन्तयम् ॥ सर्वेषां च मतिर्धैर्यं मथितं बालयाऽनया ॥ १४ ॥ अहल्येति सुरैः प्रोक्तं मया च ऋषिभिस्तदा ॥ देवानृषींस्तदा वीक्ष्य मया तत्रोक्तमुच्चकैः ॥ १५ ॥ तस्मै सा दीयते सुभ्रूर्यः पृथिव्याः प्रदक्षिणाम् ॥ कृत्वोपतिष्ठते पूर्वं न चान्यस्मै पुनः पुनः ॥ १६ ॥ ततः सर्वे सुरगणाः श्रुत्वा वाक्यं मयेरितम् ॥ अहल्यार्थं सुरा जग्मुः पृथिव्याश्च प्रदक्षिणे ॥ १७ ॥ गतेषु सुरसंघेषु गौतमोऽपि मुनीश्वरः ॥ प्रयत्नमकरोत्कंचिदहल्यार्थमिमं तदा ॥ १८ ॥ एतस्मिन्नन्तरे ब्रह्मन्सुरभिः सर्वकामधुक् ॥ अर्धप्रसूता ह्यभवत्तां ददर्श स गौतमः ॥ १९ ॥ तस्याः प्रदक्षिणं चक्रे इयमुर्वीति संस्मरन् ॥ लिङ्गस्य च सुरेशस्य प्रदक्षिणमथाकरोत् ॥ २० ॥ तयोः प्रदक्षिणं कृत्वा गौतमो मुनिसत्तमः ॥ सर्वेषां चैव देवानामेकं चापि प्रदक्षिणम् ॥ २१ ॥ नैवाभवद्भुवो गन्तुः संजातं द्वितयं मम ॥ एवं निश्चित्य स मुनिर्ममान्तिकमथाभ्यगात् ॥ २२ ॥ नमस्कृत्वाऽब्रवीद्वाक्यं गौतमो मां महामतिः ॥ कमलासन विश्वात्मन्नमस्तेऽस्तु पुनः पुनः ॥ २३ ॥ प्रदक्षिणीकृता ब्रह्मन्मयेयं वसुधाऽखिला ॥ यदत्र युक्तं देवेश जानीते तद्भवान्स्वयम् ॥ २४ ॥ अहं तु ध्यानयोगेन ज्ञात्वा गौतममब्रवम् ॥ तवैव दीयते सुभ्रूः प्रदक्षिणमिदं कृतम् ॥ २५ ॥ धर्मं जानीहि विप्रर्षे दुर्ज्ञेयं निगमैरपि ॥ अर्धप्रसूता सुरभिः सप्तद्वीपवती मही ॥ २६ ॥ कृता प्रदक्षिणा तस्याः पृथिव्याः सा कृता भवेत् ॥ लिङ्गं प्रदक्षिणीकृत्य तदेव फलमाप्नुयात् ॥ २७ ॥ तस्मात्सर्वप्रयत्नेन मुने गौतम सुव्रत ॥ तुष्टोऽहं तव धैर्येण ज्ञानेन तपसा तथा ॥ २८ ॥ दत्तेयमृषिशार्दूल कन्या लोकवरा मया ॥ इत्युक्त्वाऽहं गौतमाय अहल्यामददां मुने ॥ २९ ॥ जाते

विवाहे ते देवाः कृत्वेलायाः प्रदक्षिणम् ॥ शनैः शनैरथाऽऽगत्य ददृशुः सर्व एव ते॥३०॥ तं गौतममहल्यां च दांपत्यं प्रीतिवर्धनम्॥ ते चाऽगत्याथ पश्यन्तो विस्मिताश्चाभवन्सुराः॥ ३१ ॥ अतिक्रान्ते विवाहे तु सुराः सर्वे दिवं ययुः ॥ समत्सरः शचीभर्ता तामीक्ष्य च दिवं ययौ ॥ ३२ ॥ ततः प्रीतमनास्तस्मै गौतमाय महात्मने ॥ प्रादाद्ब्रह्मगिरिं पुण्यं सर्वकामप्रदं शुभम् ॥ ३३ ॥ अहल्यायां मुनिश्रेष्ठो रेमे तत्र स गौतमः ॥ गौतमस्य कथां पुण्यां श्रुत्वा शक्रस्त्रिविष्टपे ॥ ३४ ॥ तमाश्रमं तं च मुनिं तस्य भार्यामनिन्दिताम् ॥ भूत्वा ब्राह्मणवेषेण द्रष्टुमागाच्छतक्रतुः ॥ ॥ ३५ ॥ स दृष्ट्वा भवनं तस्य भार्यां च विभवं तथा ॥ पापीयसीं मतिं कृत्वा अहल्यां समुदैक्षत ॥ ३६ ॥ नाऽऽत्मानं न परं देशं कालं शापाद्दृषेर्भयम् ॥ न बुबोध तदा वत्स कामाकृष्टः शतक्रतुः ॥ ३७ ॥ तद्ध्यानपरमो नित्यं सुरराज्येन गर्वितः ॥ संतप्ताङ्गः कथं कुर्यां प्रवेशो मे कथं भवेत् ॥ ३८ ॥ एवं वसन्विप्ररूपो नान्तरं त्वध्यगच्छत ॥ स कदाचिन्महाप्राज्ञः कृत्वा पौर्वाह्णिकीं क्रियाम् ॥ ३९ ॥ सहितो गौतमः शिष्यैर्निर्गतश्चाऽऽश्रमाद्बहिः ॥ आश्रमं गौतमीं विप्रान्धान्यानि विविधानि ॥ ४० ॥ द्रष्टुं गतो मुनिवर इन्द्रस्तं समुदैक्षत ॥ इदमन्तरमित्युक्त्वा चक्रे कार्यं मनःप्रियम् ॥ ४१ ॥ रूपं कृत्वा गौतमस्य प्रियेप्सुः स शतक्रतुः॥ तां दृष्ट्वा चारुसर्वाङ्गीमहल्यां वाक्यब्रवीत् ॥ ४२ ॥ ॥ इन्द्र उवाच ॥ आकृष्टोऽहं तव गुणै रूपं स्मृत्वा स्खलत्पदः ॥ इति ब्रुवन्हसन्हस्तमादायान्तः समाविशत् ॥ ४३ ॥ न बुबोध त्वहल्या तं जारं मेने तु गौतमम् ॥ रममाणा यथासौख्यं प्रागाच्छिष्यैः स गौतमः ॥ ४४ ॥ आगच्छन्तं नित्यमेव अहल्या प्रियवादिनी ॥ प्रतियाति प्रियं वक्ति तोषयन्ती च तं गुणैः ॥ ४५ ॥ तामदृष्ट्वा महाप्राज्ञो मेने तन्महदद्भुतम् ॥ द्वारस्थितं मुनिश्रेष्ठं सर्वे पश्यन्ति नारद ॥ ॥ ४६ ॥ अग्निहोत्रस्य शालाया रक्षिणो गृहकर्मिणः ॥ ऊचुर्मुनिवरं भीता गौतमं विस्मयान्विताः ॥ ४७ ॥ ॥ रक्षिण ऊचुः ॥ भगवन्किमिदं चित्रं बहिरन्तश्च दृश्यसे ॥ प्रियायाऽन्तः प्रविष्टोसि तथैव च बहिर्भवान् ॥ अहो तपःप्रभावोऽयं नानारूपधरो भवान् ॥ ४८ ॥ ॥ ब्रह्मोवाच ॥ तच्छ्रुत्वा विस्मितस्त्वन्तः प्रविष्टः को नु तिष्ठति ॥ प्रिये अहल्ये भवति किं मां न प्रतिभाषसे ॥ ४९ ॥ इत्यृषेर्वचनं श्रुत्वा अहल्या जारमब्रवीत् ॥ ॥ ५० ॥ अहल्योवाच ॥ को भवान्मुनिरूपेण पापं त्वं कृतवानसि ॥ इति ब्रुवंती शयनादुत्थिता सत्वरं भयात् ॥ ५१ ॥ स चापि पापकृच्छक्रो विडालोऽभून्मुनेर्भयात् ॥ अहल्यां विकृतां दृष्ट्वा धर्षितां स्वप्रियां बलात् ॥ ५२ ॥ उवाच स मुनिः कोपात्किमिदं साहसं कृतम् ॥ इति ब्रुवन्तं भर्तारं साऽपि नोवाच लज्जिता ॥ ५३ ॥ भ्रममाणं भयोद्विग्नं बिडालं ददृशे मुनिः ॥ को भवानिति तं प्राह भस्मीकुर्यां मृषावचाः

॥ ५४ ॥ इन्द्र उवाच ॥ कृताञ्जलिपुटो भूत्वा चैवमाह शचीपतिः॥ शचीभर्ता पुरां भेत्ता तपोधन पुरुष्टुतः ॥५५॥ ममेदं पापमापन्नं सत्यमुक्तं मयाऽ
नघ ॥ महद्विगर्हितं कर्म कृतवानस्म्यहं मुने ॥ ५६ ॥ स्मरसायकनिर्भिन्नहृदयाः किं न कुर्वते ॥ ब्रह्मन्मयि महापापे क्षमस्व करुणानिधे ॥ ५७ ॥
सन्तः कृतापराधेऽपि न रौक्ष्यं जातु कुर्वते ॥ निशम्य तद्वचो विप्रो हरिमाह रुषान्वितः ॥ ५८ ॥ गौतम उवाच ॥ भगप्रीत्या कृतं पापं सहस्रभग
वान्भव ॥ तामप्याह मुनिः कोपात्त्वं च शुष्कनदी भव ॥ ५९ ॥ ततः प्रसादयामास कथयन्ती तदाकृतिम् ॥ ६० ॥ अहल्योवाच ॥ मनसा
ऽप्यन्यपुरुषं पापिष्ठाः कामयन्ति याः ॥ अक्षयान्यान्ति नरकांस्तासां सर्वेऽपि पूर्वजाः ॥ ६१ ॥ भूत्वा प्रसन्नो भगवन्नवधारय मद्वचः ॥ तव रूपेण
चाऽऽगत्य मामगात्साक्षिणस्त्विमे ॥ ६२ ॥ तथेति रक्षिणः प्रोचुरहल्या सत्यवादिनी ॥ ध्यानेनापि मुनिर्ज्ञात्वा शान्तः प्राह पतिव्रताम् ॥
॥ ६३ ॥ गौतम उवाच ॥ यदा तु संगता भद्रे गौतम्या सरिदीशया ॥ नदी भूत्वा पुना रूपं प्राप्यसे प्रियकृन्मम ॥ ६४ ॥ इत्यृषेर्वचनं श्रुत्वा
तथा चक्रे पतिव्रता ॥ तया तु संगता देव्या अहल्या गौतमप्रिया ॥ ६५ ॥ पुनस्तद्रूपमभवद्यन्मया निर्भितं पुरा ॥ ततः कृताञ्जलिपुटः सुरराट्
प्राह गौतमम् ॥ ६६ ॥ इन्द्र उवाच ॥ मां पाहि मुनिशार्दूल पापिष्ठं गृहमागतम् ॥ पादयोः पतितं दृष्ट्वा कृपया प्राह गौतमः ॥ ६७ ॥
प्रसादितो देवगणैर्गौतमो मुनिसत्तमः ॥ इन्द्रस्य च शचीभर्तुः कुर्वञ्च्छापविमोक्षणम् ॥ ६८ ॥ ॥ गौतम उवाच ॥ अहल्यासंगमे तीर्थे पुण्ये
स्नात्वा शचीपते ॥ क्षणान्निर्धूतपापस्त्वं सहस्राक्षो भविष्यसि ॥ ६९ ॥ उभयं विस्मयकरं दृष्टवानस्मि नारद ॥ अहल्यायाः पुनर्भावं शचीभर्तुः
सहस्रदृक् ॥ ७० ॥ ततः प्रभृति तत्तीर्थमहल्यासंगमं शुचिः ॥ इन्द्रतीर्थमिति ख्यातं सर्वकामप्रदं नृणाम् ॥ ७१ ॥ इति श्रीब्रह्मपुराणगतगौतमी
माहात्म्ये तीर्थमाहात्म्येऽहल्यासंगमेन्द्रतीर्थवर्णनं नाम षोडशोऽध्यायः ॥ १६ ॥ ॥ ब्रह्मोवाच ॥ तस्मादप्यपरं तीर्थं जनस्थानमिति
श्रुतम् ॥ चतुर्योजनविस्तीर्णं स्मरणान्मुक्तिदं नृणाम् ॥ १ ॥ वैवस्वतान्वये जातो राजाऽभूज्जनकः पुरा ॥ सोऽपांपतेस्तु तनुजा
मुपयेमे गुणार्णवाम् ॥ २ ॥ धर्मार्थकाममोक्षाणां जनकां जनको नृपः ॥ अनुरूपगुणत्वाच्च तस्य भार्या गुणार्णवा ॥ ३ ॥ याज्ञ
वल्क्यश्च विप्रेन्द्रस्तस्य राज्ञः पुरोहितः ॥ तमपृच्छन्नृपश्रेष्ठो याज्ञवल्क्यं पुरोहितम् ॥ ४ ॥ ॥ जनक उवाच ॥ भुक्तिमुक्ती
उभे श्रेष्ठे निर्णीते मुनिसत्तमैः ॥ दासीदासेभतुरगरथाद्यैर्भुक्तिरुत्तमा ॥ ५ ॥ किंत्वन्तविरसा भुक्तिर्मुक्तिरेका निरत्यया ॥ भुक्तेर्मुक्तिः
श्रेष्ठतमा भुक्त्या मुक्तिं कथं व्रजेत् ॥ ६ ॥ सर्वसङ्गपरित्यागान्मुक्तिप्राप्तिः सुदुःखतः ॥ तद्ब्रूहि द्विजशार्दूल सुखान्मुक्तिः कथं भवेत् ॥ ७ ॥

॥ याज्ञवल्क्य उवाच ॥ अपांपतिस्तव गुरुः श्वशुरः प्रियकृत्तथा ॥ तं गत्वा पृच्छ नृपते उपदेक्ष्यति ते हितम् ॥ ८ ॥ याज्ञवल्क्यश्च जनको राजानं वरुणं तदा ॥ गत्वा चोचतुरव्यग्रौ मुक्तिमार्गं यथाक्रमम् ॥ ९ ॥ ॥ वरुण उवाच ॥ द्विधा तु संस्थिता मुक्तिः कर्मद्वारेऽप्यकर्मणि ॥ वेदे च निश्चितो मार्गः कर्म ज्यायो ह्यकर्मणः ॥ १० ॥ सर्वं च कर्मणा बद्धं पुरुषार्थचतुष्टयम् ॥ अकर्मणैवाऽऽप्ययते मुक्तिमार्गं मृषोच्यते ॥११॥ कर्मणा सर्वधान्यानि सेत्स्यन्ति नृपसत्तम ॥ तस्मात्सर्वात्मना कर्म कर्तव्यं वैदिकं नृभिः ॥ १२ ॥ तेन भुक्तिं च मुक्तिं च प्राप्नुवन्तीह मानवाः ॥ अकर्मणः कर्म पुण्यं कर्म चाप्याश्रमेषु च ॥ १३ ॥ जात्याश्रितं च राजेन्द्र तत्रापि शृणु धर्मवित् ॥ आश्रमाणि च चत्वारि कर्मद्वाराणि मानद ॥१४॥ चतुर्णामाश्रमाणां च गार्हस्थ्यं पुण्यदं स्मृतम्॥ तस्माद्भुक्तिश्च मुक्तिश्च भवतीति मतिर्मम ॥१५॥ ब्रह्मोवाच ॥ एतच्छ्रुत्वा तु जनको याज्ञवल्क्यश्च बुद्धिमान्॥ वरुणं पूजयित्वा तु पुनर्वचनमूचतुः ॥ १६ ॥ को देशः किं च तीर्थं स्याद्भुक्तिमुक्तिप्रदायकम् ॥ तद्वदस्व सुरश्रेष्ठ सर्वज्ञोऽसि नमोऽस्तु ते ॥ १७ ॥ ॥ वरुण उवाच ॥ पृथिव्यां भारतं वर्षं दण्डकं तत्र पुण्यदम् ॥ तस्मिन्क्षेत्रे कृतं कर्म भुक्तिमुक्तिप्रदं नृणाम् ॥ १८ ॥ तीर्थानां गौतमी गङ्गा श्रेष्ठा मुक्तिप्रदा नृणाम् ॥ तत्र यज्ञेन दानेन भोगान्मुक्तिमवाप्स्यति ॥ १९ ॥ ॥ ब्रह्मोवाच ॥ याज्ञवल्क्यश्च जनको वाचं श्रुत्वा ह्यपांपतेः ॥ वरुणेन ह्यनुज्ञातौ स्वपुरीं जग्मतुस्तदा ॥ २० ॥ अश्वमेधादिकं कर्म चक्रार जनको नृपः ॥ याजयामास विप्रेन्द्रो याज्ञवल्क्यश्च तं नृपम् ॥ २१ ॥ गङ्गातीरं समाश्रित्य यज्ञान्मुक्तिमवाप राट् ॥ तथा जनकराजानो बहवस्तत्र कर्मणा ॥ २२ ॥ मुक्तिं प्रापुर्महाभाग्या गौतम्याश्च प्रसादतः ॥ ततः प्रभृति तत्तीर्थं जनस्थानेति विश्रुतम् ॥ २३ ॥ जनकानां यज्ञसदो जनस्थानं प्रकीर्तितम् ॥ चतुर्योजनविस्तीर्णं स्मरणात्सर्वपापनुत् ॥ २४ ॥ तत्र स्नानेन दानेन तु पितॄणां तर्पणेन ॥ तीर्थस्य स्मरणाद्वाऽपि गमनाद्भक्तिसेवनात् ॥ २५ ॥ सर्वान्कामानवाप्नोति मुक्तिं च समवाप्नुयात् ॥ २६ ॥ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये जनस्थानतीर्थवर्णनं नाम सप्तदशोऽध्यायः ॥ १७ ॥ ब्रह्मोवाच ॥ अस्ति ब्रह्मन्महातीर्थं चक्रतीर्थमिति श्रुतम् ॥ तत्र स्नानान्नरो भक्त्या हरेर्लोकमवाप्नुयात् ॥ १ ॥ एकादश्यां तु शुक्लायामुपोष्य पृथिवीपते ॥ गणिकासंगमे स्नात्वा प्राप्नुयादक्षयं पदम् ॥ २॥ पुरा तत्र यथा वृत्तं तन्मे निगदतः शृणु ॥ आसीद्विश्वधरा नाम वैश्यो बहुधनान्वितः ॥३॥ उत्तरे वयसि श्रेष्ठस्तस्य पुत्रोऽभवद्दृषे ॥ गुणवान्रूपसंपन्नो विलासी शुभदर्शनः ॥ ४ ॥ प्रागेव्योऽपि प्रियः पुत्रः काले पञ्चत्वमागतः ॥ तथा दृष्ट्वा तु तं पुत्रं दंपती दुःखपीडितौ ॥ ५ ॥ कुर्वाते स्म तदा तेन सहैव मरणे मतिम् ॥ हा पुत्र हन्त कालेन पापेन सुदुरात्मना ॥ ६ ॥ यौवने वर्त

मानोऽपि नीतोऽसि गुणसागर ॥ आवयोश्च तथैव त्वं प्राणेभ्योऽपि सुदुर्लभः ॥ ७ ॥ इत्थं तु रुदितं श्रुत्वा दंपत्योः करुणं यमः ॥ त्यक्त्वा
निजपुरं तूर्णं कृपयाऽऽविष्टमानसः ॥ ८ ॥ गोदावर्याः शुभे तीरे स्थितो ध्यायञ्जनार्दनम् ॥ अपि स्वल्पेन कालेन प्रजा वृद्धाः समन्ततः ॥९॥
इयत्य इति मे पृथ्वी कथ्यतां केन पूरिता ॥ न कश्चिन्म्रियते जन्तुर्भाराक्रान्ता वसुंधरा ॥ १० ॥ ततो देवी गता तूर्णं वसुधा मुनिसत्तम ॥
यत्रास्ति सुरसंयुक्तः शक्रः परपुरंजयः ॥ दृष्ट्वा वसुंधरामिन्द्रः प्रणिपत्येदमब्रवीत् ॥ ११ ॥ ॥ इन्द्र उवाच ॥ किमागमनकार्यं त इति मे पृथ्वि
कथ्यताम् ॥ १२ ॥ ॥ धरोवाच ॥ भारेण गुरुणा शक्र पीडिताऽहं विना वधम् ॥ कारणं प्रष्टुमायाता किमिदं कथ्यतां मम ॥ १३ ॥ ॥ ब्रह्मो
वाच ॥ इति श्रुत्वा महीवाक्यमिन्द्रो वचनमब्रवीत् ॥ १४ ॥ ॥ इन्द्र उवाच ॥ कारणं यदि नाम स्यात्तदानीं ज्ञायते मया ॥ सुराणां हि पतिर्ये
स्मासर्वेषामचले त्वहम् ॥ १५ ॥ ॥ ब्रह्मोवाच ॥ अथ पृथ्वी तदा वाक्यं श्रुत्वा चाऽऽह शचीपतिम् ॥ यम आदिश्यतां तर्हि यथा संहरते प्रजाः ॥
॥ १६ ॥ इति श्रुत्वा वचो मह्या आदिष्टाः सिद्धकिंनराः ॥ यमस्याऽऽनयने शीघ्रं महेन्द्रेण महामुने ॥ १७ ॥ ततस्ते सत्वरं याताः सर्वे वैवस्वतं
पुरम् ॥ नैवापश्यन्यमं तत्र ते सिद्धाः सह किंनरैः ॥ तथाऽगत्य पुनर्वेगाद्वार्तां शक्रे निवेदिता ॥ १८ ॥ ॥ सिद्धकिंनरा ऊचुः ॥ यमो यमपुरे नाथ
अस्माभिर्नावलोकितः ॥ महताऽपि सुयत्नेन वीक्ष्यमाणः समन्ततः ॥ १९ ॥ ॥ ब्रह्मोवाच ॥ इति श्रुत्वा वचस्तेषां पृष्टः शक्रेण वै तदा ॥ सवि
ता स पिता तस्य यमः कुत्राऽऽस्त इत्यथ ॥ २० ॥ ॥ सूर्य उवाच ॥ शक्र गोदावरीतीरे कृतान्तो वर्ततेऽधुना ॥ चरंस्तत्र तपस्तीव्रं न जाने
किं नु कारणम् ॥ २१ ॥ ॥ ब्रह्मोवाच ॥ इति श्रुत्वा वचो भानोः शक्रः शङ्कामुपाविशत् ॥ २२ ॥ ॥ शक्र उवाच ॥ अहो कष्टं महाकष्टं नष्टा
मे सुरनाथता ॥ गोदावर्यां तपः कुर्याद्यमो वै दुष्टचेष्टितः ॥ जिघृक्षुर्मत्पदं नूनं देवा इति मतिर्मम ॥ २३ ॥ ॥ ब्रह्मोवाच ॥ इत्युक्त्वा सहसेन्द्रे
ण आहूतश्चाप्सरोगणः ॥ २४ ॥ ॥ इन्द्र उवाच ॥ काऽस्ते युष्मासु कालस्य स्थितस्य तपसि द्विषः ॥ तपःप्रणाशने शक्ता इति मे शीघ्रमुच्य
ताम् ॥ २५ ॥ ॥ ब्रह्मोवाच ॥ इति शक्रवचः श्रुत्वा नोचे काऽपि महामुने ॥ अथ शक्रः प्रकोपेन प्रत्युवाचाप्सरोगणम् ॥२६॥ ॥ इन्द्र उवाच ॥
उत्तरं नाब्रवीत्किंचिद्यामस्तर्हि वयं स्वयम् ॥ सज्जा भवन्तु विबुधाः सैन्यैरायान्तु मा चिरम् ॥ घातयामो वयं शत्रुं तपसा स्वर्गकामुकम् ॥ २७ ॥ ॥ १९८॥
ब्रह्मोवाच ॥ इत्युक्ते सति देवानां सेना प्रादुर्बभूव ह ॥ इतीन्द्रहृदयं ज्ञात्वा हरिणा लोकधारिणा ॥ २८ ॥ प्रेषितं चक्रिणा चक्रं रक्षणाय यमस्य
हि ॥ चक्रं यत्राभवत्तत्र चक्रतीर्थमनुत्तमम् ॥ २९ ॥ अथेन्द्रं मेनका प्राह शङ्कितेति वचस्तदा॥३०॥ मेनकोवाच॥कालावलोकने नालं काचिदस्ति

सुरेश्वर ॥ मरणं च वरं देव भक्तो न यमात्पुनः ॥ ३१ ॥ रूपयौवनमत्तेयं गणिका याचनं प्रभो ॥ प्रेषणं तत्प्रयच्छैषा स्वामित्वं मन्यते त्वया ॥ ॥ ३२ ॥ ॥ ब्रह्मोवाच ॥ इति श्रुत्वा वचस्तस्याः शक्रः सुरवरेश्वरः ॥ आदिदेशाबलां श्यामां सत्कृत्य गणिकां तथा ॥ ३३ ॥ शक्र उवाच ॥ गणिके गच्छ मे कार्यं कुरु सुन्दरि मा चिरम् ॥ कृतकृत्याऽऽगता भूयो वल्लभा मे यथा शची ॥ ३४ ॥ ब्रह्मोवाच ॥ इत्याकर्ण्य वचः शक्रादुत्पत्य गणिका दिशः ॥ क्षणेन यमसंनिध्यमायाता चारुरूपिणी ॥ ३५ ॥ यमान्तिकमनुप्राप्ता द्योतयन्ती दिशो दश ॥ सलीलं ललितं बाला जगौ हिन्दोलकं कलम् ॥ ३६ ॥ ततश्चचाल कालस्य मनो लोलं चलाचलम् ॥ अथोन्मील्य यमो नेत्रे कामपावकपूरिते ॥ ३७ ॥ तस्यां व्यापारयामास श्रेयःशत्रौ महामुने ॥ ततो विलीय सा सद्यः सरित्त्वमगमत्तदा ॥ ३८ ॥ गौतम्यां तु समागम्य गणिकागणकिंकरैः ॥ गीयमाना गता स्वर्गं ततस्तीर्थप्रभावतः ॥ ३९ ॥ गच्छन्तीं गणिकां दृष्ट्वा विमानस्थां दिवं प्रति ॥ विस्मयं परमं प्राप्तः कालस्तरललोचनः ॥ अथाऽऽदित्येन चाऽऽगत्य एवमुक्तो यमस्तदा ॥ ४० ॥ ॥ सूर्य उवाच ॥ कुरु पुत्र निजं कर्म प्रजानां त्वं यमिन्यम् ॥ पश्य वातं सदा वान्तं सृजन्तं वेधसं प्रजाः ॥ पर्यटन्तं त्रिलोकीं मां वहन्तीं वसुधां प्रजाः ॥ ४१ ॥ ॥ ब्रह्मोवाच ॥ इति श्रुत्वा यमो वाक्यं पितुर्वचनमब्रवीत् ॥ ४२ ॥ ॥ यम उवाच ॥ एतन्न गर्हितं कर्म कुर्यामहमिदं ध्रुवम् ॥ कर्मण्यस्मिन्महाक्रूरे समादेष्टुं न चार्हसि ॥ ॥ ४३ ॥ इति श्रुत्वा च तद्वाक्यं भानुर्वचनमब्रवीत् ॥ किं नाम गर्हितं कर्म तव कर्तुमलं यम ॥ ४४ ॥ किं न दृष्टा त्वया भान्ती गणिका सगणकिंकरैः ॥ गीयमाना दिवं सद्यो गौतमीतोयमाप्लुता ॥ ४५ ॥ त्वया चात्र तपस्तीव्रं कृतं पुत्र सुदुष्करम् ॥ नेदान्तं तस्य पश्यामि तस्माद्गच्छ निजं पुरम् ॥ ४६ ॥ इत्युक्त्वा भगवान्भानुस्तत्र स्नात्वा गतो दिवम् ॥ यमोऽपि संगमे स्नात्वा तदो निजपुरं ययौ ॥ ॥ ४७ ॥ मृतहाऽपि ततः शङ्खां तत्याज च महामुने ॥ तथा दृष्ट्वा यमं यान्तं चक्रे चक्रं प्रयाणकम् ॥ ४८ ॥ भगवान्यत्र गोविन्दो वनमालाविभूषितः ॥ इति यः शृणुयान्मर्त्यः पठेद्वाऽपि समाहितः ॥ आपदस्तस्य नश्यन्ति दीर्घमायुरवाप्नुयात् ॥ ४९ ॥ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये चक्रतीर्थगणिकासंगमवर्णनं नामाष्टादशोऽध्यायः ॥ १८ ॥ ॥ ब्रह्मोवाच ॥ अरुणा वरुणा चैव नद्यौ पुण्यतरे शुभे ॥ तयोश्च संगमः पुण्यो गङ्गायां मुनिसत्तम ॥ १ ॥ मानसाच्च प्रयागाच्च मंदाकिन्याश्च पुण्यदे ॥ तदुत्पत्तिं शृणुष्वेह सर्वपापविनाशिनीम् ॥ कश्यपस्य सुतो ज्येष्ठ आदित्यो लोकविश्रुतः ॥ २ ॥ त्रैलोक्यचक्षुस्तीक्ष्णांशुः सप्ताश्वो

लोकपूजितः ॥ तस्य पत्नी उषा ख्याता त्वाष्ट्री त्रैलोक्यसुन्दरी ॥ ३ ॥ भर्तुः प्रतापतीव्रत्वमसहन्ती सुमध्यमा ॥ चिन्तयामास किं कृत्यं मम
स्यादिति भामिनी ॥ ४ ॥ तस्याः पुत्रो महाप्राज्ञो मनुर्वैवस्वतो यमः ॥ यमुना च नदी पुण्या शृणु विस्मयकारणम् ॥ ५ ॥ साऽकरोदात्मनश्छा
यामात्मरूपेण यत्नतः ॥ तामब्रवीत्ततश्छाया त्वं च मत्सदृशी भव ॥ ६ ॥ भर्तारं त्वमपत्यानि पालयस्व ममाऽऽज्ञया ॥ यावदागमनं मे
स्यात्पत्युस्तावत्प्रिया भव ॥ ७ ॥ नाऽऽख्यातव्यं त्वया क्वापि अपत्यानां तथा प्रिये ॥ तथेत्याह च सा छाया निर्जगाम गृहादुषा ॥ ८ ॥
इत्युक्त्वा सा जगामाऽऽशु शान्तं रूपमभीप्सती ॥ सा गत्वोषा गृहं त्वष्टुः पित्रे सर्वं न्यवेदयत् ॥ त्वष्टाऽपि चकितः प्राह तां सुतां सुतवत्सलः ॥ ९ ॥
॥ त्वष्टोवाच ॥ नैतद्युक्तं भर्तृमत्या यत्स्वैरेण प्रवर्तनम् ॥ अपत्यानां कथं वृत्तिर्भर्तुर्वा सवितुस्तव ॥ बिभेमि भद्रे शिष्टोऽहं भर्तुर्गेहं पुनर्व्रज ॥ १० ॥
॥ ब्रह्मोवाच ॥ एवमुक्ता तु पित्रा सा नेत्युक्त्वा वै पुनः पुनः ॥ उत्तरं च कुरोर्देशं जगाम तपसे तदा ॥ ११ ॥ तत्र तेपे तपस्तीव्रं वडवारूपधा
रिणी ॥ दुष्प्रेक्ष्यं तं स्वकं कान्तं ध्यायन्ती निश्चला उषा ॥ १२ ॥ एतस्मिन्नन्तरे तात छाया चोषास्वरूपिणी ॥ पत्यौ सा वर्तयामास अपत्या
न्यथ जज्ञिरे ॥ १३ ॥ सावर्णिश्च शनिश्चैव विष्टिर्या दुष्टकन्यका ॥ सा छाया वर्तयामास वैषम्येणैव नित्यशः ॥ १४ ॥ स्वेष्वपत्येषु चोषाया
यमस्तत्र चुकोप ह ॥ वैषम्येणाथ वर्तन्तीं छायां तां मातरं तदा ॥ १५ ॥ ताडयामास पादेन दक्षिणाशापतिर्यमः ॥ पुत्रदौर्जन्यसंक्षोभाच्छाया वेव
स्वंतं यमम् ॥ १६ ॥ शशाप पाप ते पादो विशीर्यतु ममाज्ञया ॥ विशीर्णचरणो दुःखाद्रुदन्पितरमभ्यगात् ॥ सवित्रे तं तु वृत्तान्तं न्यवेदयदशेषतः ॥ १७ ॥
॥ यम उवाच ॥ नेयं माता सुरश्रेष्ठ यया शप्तोऽहमीदृशः ॥ अपत्येषु विरुद्धेषु जननी नैव कुप्यति ॥ १८ ॥ यद्बाल्यादब्रवं किंचिदथवा दुष्कृतं
कृतम् ॥ नैव कुप्यति सा माता तस्मान्नेयं ममाम्बिका ॥ १९ ॥ यदपत्यकृतं किंचित्साध्वसाधु यथा तथा ॥ मात्यस्यां सर्वमप्येतत्तस्मान्मातेति
गीयते ॥ २० ॥ प्रधक्ष्यन्तीव मां तात नित्यं पश्यति चक्षुषा ॥ वक्त्यग्निकालसदृशा वाचा नेयं मदम्बिका ॥ २१ ॥ ॥ ब्रह्मोवाच ॥ तत्पुत्रव
चनं श्रुत्वा सविताऽचिन्तयत्ततः ॥ इयं छाया नास्य माता उषा माता तु साऽन्यतः ॥ २२ ॥ मम शान्तिमभीप्सन्ती देशेऽन्यस्मिंस्तप
पोरता ॥ उत्तरे च कुरौ त्वाष्ट्री वडवारूपधारिणी ॥ २३ ॥ तत्राऽऽस्ते सा इति ज्ञात्वा जगामेशो दिवाकरः ॥ यत्र सा वर्तते कान्ता अश्वरूपः
स्वयं तदा ॥ २४ ॥ तां दृष्ट्वा वडवारूपां पर्यधावद्धयाकृतिः ॥ कामातुरं हयं दृष्ट्वा श्रुत्वा वै हेषितस्वनम् ॥ २५ ॥ उषा पतिव्रतोपेता पतिध्यान
परायणा ॥ हयधर्षणसंभीता कोन्वयं चेत्यजानती ॥ २६ ॥ अपलायत्पतौ प्राप्ते दक्षिणाभिमुखी त्वरा ॥ को नु मे रक्षकोऽत्र स्यादृषयो वा

ऽथवा सुराः ॥ २७ ॥ धावन्तीं तां प्रियामश्वामश्वरूपधरः स्वयम् ॥ पर्यधावद्यतो याति उषा भानुस्ततस्ततः ॥ २८ ॥ स्मरग्रहवशो जातः को दुश्चेष्टं न चेष्टते ॥ भागीरथीं नदीश्चान्या वनान्युपवनानि च ॥ २९ ॥ नर्मदां चाथ विन्ध्यं च दक्षिणाभिमुखावुभौ ॥ अतिक्रम्य भयोद्विग्ना त्वाष्ट्रचगाच्चै वै गौतमीम् ॥ ३० ॥ त्रातारः सन्ति मुनयो जनस्थान इति श्रुतम् ॥ ऋषीणामाश्रमं साऽश्वा प्रविष्टा गौतमी तथा ॥ ३१ ॥ अनुप्रा तस्तथा चाश्वो भानुस्तद्रूपवांस्ततः ॥ अश्वं निवारयामासुर्जनस्थाननिवासिनः ॥ ततः कोपाद्बटून्पञ्च शशापोषापतिः प्रभुः ॥ ३२ ॥ ॥ भानु रुवाच ॥ निवारयथ मां यस्माद्वटा यूयं भविष्यथ ॥ ३३ ॥ ॥ ब्रह्मोवाच ॥ ज्ञानदृष्ट्या तु मुनयो मेनिरेऽश्वमुषापतिम् ॥ स्तुव न्तो देवदेवेशं भानुं तं मुनयो मुदा ॥ ३४ ॥ स्तूयमानो मुनिगणैरश्वां भानुरथागमत् ॥ वडवाया मुखे लग्नं मुखं चाश्वस्वरू पिणम् ॥ ३५ ॥ ज्ञात्वा त्वाष्ट्री च भर्तारं मुखाद्वीर्यं प्रसुस्रुवे ॥ तयोर्वीर्येण गंगायामश्विनौ समजायताम् ॥ ३६ ॥ तत्राऽऽ गच्छन्सुरगणाः सिद्धाश्च मुनयो नदाः ॥ नद्यो गावस्तथौषध्यो देवा ज्योतिर्गणास्तथा ॥ ३७ ॥ सप्ताश्वस्य रथः पुण्यो ह्यरुणो भानुसारथिः ॥ यमो मनुश्च वरुणः शनिर्वैवस्वतस्तथा ॥ ३८ ॥ यमुना च नदी पुण्या तापी चैव महानदी ॥ तत्तद्रूपं समास्थाय नद्यस्ता विस्मयान्मुने ॥ ३९ ॥ द्रष्टुं ते विस्मयाविष्टा आजग्मुः श्वशुरस्तथा ॥ अभिप्रायं विदित्वा तु श्वशुरं भानुरब्रवीत् ॥ ४० ॥ ॥ भानुरुवाच ॥ उषायाः प्रीतये त्वष्टः कुर्वत्या स्तप उत्तमम् ॥ यन्त्रारूढं च मां कृत्वा छिन्धि तेजांस्यनेकशः ॥ यावत्सौख्यं भवेदस्यास्तावच्छिन्धि प्रजापते ॥ ४१ ॥ ॥ ब्रह्मोवाच ॥ तथेत्यु क्त्वा ततस्त्वष्टा सोमनाथस्य संनिधौ ॥ तेजसां छेदनं चक्रे प्रभासं तु ततो विदुः ॥ ४२ ॥ भर्त्रा च संगता यत्र गौतम्यांमश्वरूपिणी ॥ अ श्विनोर्यत्र चोत्पत्तिरश्वतीर्थं तदुच्यते ॥ ४३ ॥ भानुतीर्थं तदाख्यातं तथा पञ्चवटाश्रमः ॥ तापी च यमुना चैव पितरं द्रष्टुमागते ॥ ४४ ॥ अरु णावरुणानद्योर्गङ्गायां संगमः शुभः ॥ देवानां तत्र तीर्थानामागतानां पृथक्पृथक् ॥ ४५ ॥ नव त्रीणि सहस्राणि तीर्थानि गुणवन्ति च ॥ तत्र स्नानं च दानं च सर्वमक्षयपुण्यदम् ॥ ४६ ॥ स्मरणात्पठनाद्वाऽपि श्रवणादपि नारद ॥ सर्वपापविनिर्मुक्तो धर्मवान्स सुखी भवेत् ॥ ॥ ४७ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्येऽरुणावरुणासंगमाश्वभानुतीर्थवर्णनं नामैकोनविंशोऽध्यायः ॥ १९ ॥ ॥ ब्रह्मो वाच ॥ गारुडं नाम यत्तीर्थं सर्वविघ्नप्रशान्तिदम् ॥ तस्य प्रभावं वक्ष्यामि शृणु नारद यत्नतः ॥ १ ॥ मणिनाग इति त्वासीच्छेषपुत्रो महाब लः ॥ गरुडस्य भयाद्भक्त्या तोषयामास शंकरम् ॥ २ ॥ ततः प्रसन्नो भगवान्परमेष्ठी महेश्वरः ॥ तमुवाच महानागं वरं वरय पन्नग ॥ ३ ॥ नागः

प्राह प्रभो मह्यं देहि मे गरुडाभयम् ॥ तथेत्याह च तं शंभुर्गरुडादभयं तव ॥ ४ ॥ निर्गतो निर्भयो नागो गरुडादरुणानुजात् ॥ क्षीरोदशायी
यत्राऽऽस्ते क्षीरार्णवसमीपतः ॥ ५ ॥ इतश्चेतश्च चरति नागोऽसौ सुखशीतले ॥ गरुडोऽपि च यत्राऽस्ते तं देशमपि यात्यसौ ॥ ६ ॥ गरुडः पन्नगं
दृष्ट्वा चरन्तं निर्भयेन तु ॥ तं गृहीत्वा महानागं प्राक्षिपत्स्वस्य वेश्मनि ॥ ७ ॥ तं बद्ध्वा गारुडैः पाशैर्गरुडो नागसत्तमम् ॥ एतस्मिन्नन्तरे
नन्दी प्रोवाचेशं जगत्प्रभुम् ॥ ८ ॥ ॥ नन्दिकेश्वर उवाच ॥ नूनं नागो न चाऽऽयाति भक्षितो बद्ध एव वा ॥ गरुडेन सुरेशान जीवन्नागो न
संव्रजेत् ॥ ९ ॥ ॥ ब्रह्मोवाच ॥ नन्दिनो वचनं श्रुत्वा ज्ञात्वा शंभुरथाब्रवीत् ॥ १० ॥ ॥ शिव उवाच ॥ गरुडस्य गृहे नागो बद्धस्तिष्ठति सत्त्व
रम् ॥ गत्वा तं जगतामीशं विष्णुं ब्रूहि जनार्दनम् ॥ ११ ॥ बद्धं नागं काश्यपेन मद्वाक्यादानय स्वयम् ॥ तत्प्रभोर्वचनं श्रुत्वा नन्दी गत्वा श्रियः
पतिम् ॥ १२ ॥ व्यज्ञापयत्स्वयं वाक्यं विष्णुं लोकपरायणम् ॥ नारायणः प्रीतमना गरुडं वाक्यमब्रवीत् ॥ १३ ॥ ॥ विष्णुरुवाच ॥ विनतात्म
त्मज मे वाक्यान्नन्दिने देहि पन्नगम् ॥ वैनतेयो विदित्वा च नेत्युवाच विहंगमः ॥ विष्णुमप्यब्रवीत्कोपात्सुपर्णो नन्दिनोऽन्तिके ॥ १४ ॥
गरुड उवाच ॥ यद्यत्प्रियतमं किंचिद्भृत्येभ्यः प्रभविष्णवः ॥ दास्यन्त्यन्ये भवान्नैव मयाऽऽनीतं हरिष्यति ॥ १५ ॥ पश्य देवं त्रिनयनं नागं मो
क्ष्यति नन्दिना ॥ मयोपपादितं नागं त्वं तु दास्यसि नन्दिने ॥ १६ ॥ त्वां वहामि सदा मागें मम देयं सदा त्वया ॥ मयोपपादितं नागं वक्तुं दे
हीति नोचितम् ॥ १७ ॥ सतां प्रभूणां नेयं स्याद्वृत्तिः सद्वृत्तिकारिणाम् ॥ सन्तो दास्यन्ति भृत्येभ्यो मदुपात्तहरो भवान् ॥ १८ ॥ दैत्याञ्जयसि
संग्रामे मद्बलेनैव केशव ॥ अहं महाबलीत्येवं मुधैव श्लाघते भवान् ॥ १९ ॥ ॥ ब्रह्मोवाच ॥ गरुडस्येति तद्वाक्यं श्रुत्वा चक्रगदाधरः ॥ वि
स्य नन्दिनः पार्श्वे पश्यद्भिर्लोकपालकैः ॥ २० ॥ इदमाह महाबुद्धिर्मा समुह्य कृशो भवान् ॥ त्वद्बलादसुरान्सर्वाञ्जेष्येऽहं खगसत्तम ॥ २१ ॥
इत्युक्त्वा श्रीपतिर्ब्रह्मञ्शान्तकोपोऽब्रवीदिदम् ॥ वहाञ्जलिं करस्याऽऽशु कनिष्ठां नन्दिनोऽन्तिके ॥ २२ ॥ गरुडस्य ततो मूर्ध्नि न्यस्येदं पुनरब्रवी
त् ॥ सत्यं मां वदसे नित्यं पश्य धर्मं विहंगम ॥ २३ ॥ न्यस्तायां च ततोऽञ्जल्यां शिरः कुक्षौ समाविशत् ॥ कुक्षिश्च चरणस्यान्तः प्राविशच्च
र्णितोऽभवत् ॥ ततः कृताञ्जलिर्दीनो व्यथितो लज्जयाऽन्वितः ॥ २४ ॥ ॥ गरुड उवाच ॥ त्राहि त्राहि जगन्नाथ भृत्यं मामपराधिनम् ॥ त्वं प्रभुः
सर्वलोकानां धर्ता धार्यस्त्वमेव च ॥ २५ ॥ अपराधसहस्राणि क्षमन्ते प्रभविष्णवः ॥ कृतापराधेऽपि जने महती यस्य वै कृपा ॥ २६ ॥ तद
न्ति मुनयः सर्वे [illegible] जगन्मातर्मामम्बुजनिवासिनि ॥ कमले बालकं दीनमार्तं तनयवत्सले ॥ २७ ॥ ॥ ब्रह्मोवाच

ततः कृपान्विता देवी श्रीरप्याह जनार्दनम् ॥ २८ ॥ ॥ कमलोवाच ॥ ॥ रक्ष नाथ स्वकं भृत्यं गरुडं विपदं गतम् ॥ जनार्दन उवाचेदं नन्दिनं शंभुकिंकरम् ॥ २९ ॥ ॥ विष्णुरुवाच ॥ नय नागं सगरुडं शंभोरन्तिकमेव च ॥ तत्प्रसादाच्च गरुडो महेश्वरनिरीक्षितः ॥ आत्मीयं च पुना रूपं गरुडः समवाप्स्यति ॥३०॥ ब्रह्मोवाच ॥ तथेत्युक्त्वा च वृषभो नागेन गरुडेन च ॥ शनैः स शंकरं गत्वा सर्वं तस्मै न्यवेदयत् ॥ शंकरोऽपि गरुत्मन्तं प्रोवाच शशिशेखरः॥३१॥ शिव उवाच ॥ याहि गङ्गां महाबाहो गौतमीं लोकपावनीम् ॥ सर्वकामप्रदां शान्तां तामाप्लुत्य पुनर्वपुः॥३२॥ प्राप्स्यसे सर्वकामांश्च शतधाऽथ सहस्रधा ॥ सर्वपापोपतप्ता ये दुर्दैवोन्मूलितोद्यमाः ॥ प्राणिनोऽभीष्टदा तेषां शरणं खग गौतमी ॥ ३३ ॥ ब्रह्मोवाच ॥ तद्वाक्यं प्रणतो भूत्वा श्रुत्वा तु गरुडोऽभ्यगात् ॥ गङ्गामाप्लुत्य गरुडः शिवं विष्णुं ननाम सः ॥ ३४ ॥ ततः स्वर्णमयः पक्षी वज्रदेहो महाबलः ॥ वेगी भवन्मुनिश्रेष्ठ पुनर्विष्णुमियात्सुधीः ॥ ३५ ॥ ततः प्रभृति तत्तीर्थं गारुडं सर्वकामदम् ॥ तत्र स्नानादि यत्किंचित्करोति प्रयतो नरः ॥ सर्वं तदक्षयं वत्स शिवविष्णुप्रियावहम् ॥ ३६ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये गरुडतीर्थवर्णनं नाम विंशोऽध्यायः ॥ ॥ २० ॥ ॥ ब्रह्मोवाच ॥ ततो गोवर्धनं तीर्थं सर्वपापप्रणाशनम् ॥ पितॄणां पुण्यजननं स्मरणादपि पापनुत् ॥ १ ॥ तस्य प्रभाव एष स्यान्मया दृष्टस्तु नारद ॥ ब्राह्मणः कर्षकः कश्चिज्जावालिरिति विश्रुतः ॥ २ ॥ न विमुञ्चत्यनड्वाहौ मध्यं यातेऽपि भास्करे ॥ प्रतोदेन प्रतुदति पृष्ठतोऽपि च पार्श्वयोः ॥ ३ ॥ तौ गावावश्रुपूर्णाक्षी दृष्ट्वा गौः कामदोहिनी ॥ सुरभिर्जगतां माता नन्दिने सर्वमब्रवीत् ॥ ४ ॥ स चापि व्यथितो भूत्वा शंभवे तन्न्यवेदयत् ॥ शंभुश्च वृषभं प्राह सर्वं सिध्यतु ते वचः ॥५॥ शिवाज्ञासहितो नन्दी गोजातं सर्वं माहरत् ॥ नष्टेषु गोषु सर्वेषु स्वर्गे मर्त्ये ततस्त्वरा ॥ ६ ॥ मामवोचन्सुरगणा विना गोभिर्न जीव्यते ॥ तानवोचं सुरान्सर्वाञ्छंकरं यात याचत ॥ ७ ॥ तथैवेशं तु ते सर्वे स्तुत्वा कार्यं न्यवेदयन् ॥ ईशोऽपि विबुधानाह जानाति वृषभो मम ॥ ८ ॥ ते वृषं प्रोचुरमरा देहि गा उपकारिणः ॥ वृषोऽपि विबुधानाह गोसवः क्रियतां क्रतुः ॥ ९ ॥ तत प्राप्स्यथ गाः सर्वा या दिव्या याश्च मानुषाः ॥ ततः प्रवर्तते यज्ञो गोसवो देवनिर्मितः ॥१०॥ गौतम्याश्च शुभे पार्श्वे गावो ववृधिरे ततः ॥ गोवर्धनं तु तत्तीर्थं देवानां प्रीतिवर्धनम् ॥ ११ ॥ तत्र स्नानं मुनिश्रेष्ठ गोसहस्रफलप्रदम् ॥ किंचिद्दानादिना यत्स्यात्फलं तत्तु न विद्महे ॥ १२ ॥ विलोक्य तं च देवेशं शंकरं गौतमेश्वरम् ॥ स्वर्गलोकमवाप्नोति यावन्मेरुश्च सर्वदा॥१३॥इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये गोवर्धनतीर्थवर्णनं नामैकविंशोऽध्यायः ॥ २१ ॥ ब्रह्मोवाच ॥ पापप्रणाशनं नाम तीर्थं पापभयापहम् ॥ नामधेयं प्रवक्ष्यामि शृणु नारद यत्नतः ॥ १ ॥ भृतव्रत इति

ख्यातो ब्राह्मणो लोकविश्रुतः ॥ तस्य भार्या मही नाम तरुणी लोकसुन्दरी ॥ २ ॥ तस्य पुत्रः सूर्यनिभः सनाज्जात इति श्रुतः ॥ धृतव्रतं तथाऽकर्ष
न्मृत्युः कालेरितो मुने ॥ ३ ॥ ततः सा बालविधवा बालपुत्रा सुरूपिणी ॥ त्रातारं नैव पश्यन्ती गालवाश्रममभ्यगात् ॥ ४ ॥ तस्मै पुत्रं निवेद्याथ
स्वैरिणी पापमोहिता ॥ सा वभ्राम बहून्देशान्पुस्कामा कामचारिणी ॥ ५ ॥ तत्पुत्रो गालवगृहे वेदवेदाङ्गपारगः ॥ जातोऽपि मातृदोषेण
वेश्येरितमतिस्त्वभूत् ॥ ६ ॥ जनस्थानमिति ख्यातं नानाजातिसमावृतम् ॥ तत्रासौ पण्यवेषेण अध्यास्ते च मही तथा ॥ ७ ॥ तत्सुतोऽपि
बहून्देशान्परिबभ्राम कामुकः ॥ सोऽपि कालवशात्तत्र जनस्थानेऽवसत्तदा ॥ ८ ॥ स्त्रियमाकाङ्क्षते वेश्यां धृतव्रतसुतो द्विजः ॥ मही चापि धनं
दातॄन्पुरुषान्समपेक्षते ॥ ९ ॥ मेने न पुत्रमात्मीयं स चापि न तु मातरम् ॥ तयोः समागमश्चाऽऽसीद्विधिना मातृपुत्रयोः ॥ १० ॥ एवं बहुतिथे
काले पुत्रे मातरि गच्छति ॥ तयोः परस्परं ज्ञानं नैवाऽऽसीन्मातृपुत्रयोः ॥ ११ ॥ एवं प्रवर्तमानस्य पितृधर्मेण सन्मतिः ॥ आसीत्तस्याप्यस
द्वृत्तेः शृणु नारद चित्रवत् ॥ १२ ॥ स्वैरस्थित्या वर्तमानो नेदं स परिहातवान् ॥ ब्राह्मीं संध्यामनुष्ठाय तदूर्ध्वं तु धनार्जनम् ॥ १३ ॥ विद्याबलेन
वित्तानि बहून्यार्ज्य ददात्यसौ ॥ तथा स प्रातरुत्थाय गङ्गां गत्वा यथाविधि ॥ १४ ॥ शोचादि स्नानसंध्यादि सर्वं कार्यं यथाक्रमम् ॥ कृत्वा तु
ब्राह्मणान्नत्वा ततोऽभ्येति ह्यकल्मषः ॥ १५ ॥ प्रातःकाले गौतमीं तु यदा याति विरूपवान् ॥ कुष्ठसर्वांगशिथिलः पूयशोणितनिःस्रवः ॥ १६ ॥
स्नात्वा तु गौतमीं गङ्गां यदा याति सुरूपधृक् ॥ शान्तः सूर्याग्निसदृशो मूर्तिमानिव भास्करः ॥ १७ ॥ एतद्रूपद्वयं स्वस्य नैव पश्यति स द्विजः ॥
गालवो यत्र भगवांस्तपोज्ञानपरायणः ॥ १८ ॥ आश्रित्य गौतमीं देवीं आस्ते च मुनिभिर्वृतः ॥ ब्राह्मणोऽपि च तत्रैव नित्यं तीर्थं समेत्य च ॥
॥ १९ ॥ गालवं च नमस्याथ ततो याति स्वमन्दिरम् ॥ गङ्गायाः सेवनात्पूर्वं सनाज्जातस्य यद्वपुः ॥ २० ॥ स्नानसंध्योत्तरे काले पुनर्यदपि
तद्विजे ॥ उभयं तस्य तद्रूपं गालवो नित्यमेव च ॥ २१ ॥ दृष्ट्वा स विस्मयो मेने किंचिदस्त्यत्र कारणम् ॥ एवं सविस्मयो भूत्वा गालवः प्राह
तं द्विजम् ॥ २२ ॥ गच्छन्तं तु नमस्याथ सनाज्जातं गुरुर्गृहम् ॥ आहूय यत्नतो धीमान्कृपया विस्मयेन च ॥ २३ ॥ ॥ गालव उवाच ॥
को भवान्क्व च गन्ताऽसि किं करोषि क्व भोक्ष्यसि ॥ किंनामा त्वं क्व शय्या ते का ते भार्या वदस्व मे ॥ २४ ॥ ॥ ब्रह्मोवाच ॥ गालवस्य
वचः श्रुत्वा ब्राह्मणोऽप्याह तं मुनिम् ॥ २५ ॥ ॥ ब्राह्मण उवाच ॥ श्वः कथ्यते मया सर्वं ज्ञात्वा कार्यविनिर्णयम् ॥ २६ ॥
॥ ब्रह्मोवाच ॥ एवमुक्त्वा गालवं तं सनाज्जातो गृहं ययौ ॥ भुक्त्वा रात्रौ तया सम्यक्शय्यामासाद्य बन्धकीम् ॥२७॥ उवाच चकितः स्मृत्वा गाल

वस्य तु यद्वचः ॥ ब्राह्मण उवाच ॥ त्वं तु सर्वगुणोपेता बन्धक्यपि पतिव्रता ॥ आवयोः सदृशी प्राप्तिर्यावज्जाव [illegible]ताम् ॥ २८ ॥ तथाऽपि किं चित्पृच्छामि किंनाम्नी त्वं क्व वा कुलम् ॥ किंनु स्थानं क्व वा बन्धुर्मम सर्वं निवेद्यताम् ॥ २९ ॥ ॥ बन्धक्युवाच ॥ धृतव्रत इति ख्यातो ब्राह्मणो दीक्षितः शुचिः ॥ तस्य भार्या मही चाहं मत्पुत्रो गालवाश्रमे ॥ ३० ॥ उत्सृष्टो मतिमान्बालः सनाज्जात इति श्रुतः ॥ अहं तु पूर्वदोषेण त्यक्त्वा धर्मं कुलागतम् ॥ स्वैरिणी त्विह वर्तेऽहं विद्धि मां ब्राह्मणीं द्विज ॥ ३१ ॥ ब्रह्मोवाच ॥ तस्यास्तद्वचनं श्रुत्वा मर्मविद्ध इवाभवत् ॥ पपात सहसा भूमौ वेश्या तं वाक्यमब्रवीत् ॥ ३२ ॥ ॥ वेश्योवाच ॥ किं नु जातं द्विजश्रेष्ठ क्व च प्रीतिर्गता तव ॥ किं तु वाक्यं मया चोक्तं तव चित्तविरोधकृत् ॥ ३३ ॥ आत्मानमात्मनाऽऽश्वास्य ब्राह्मणो वाक्यमब्रवीत् ॥ ३४ ॥ ॥ ब्राह्मण उवाच ॥ धृतव्रतः पिता विप्रस्तत्पुत्रोऽहं सनाज्जतः ॥ माता मही मम इयं मम दैवादुपागता ॥ ३५ ॥ ॥ ब्रह्मोवाच ॥ एतच्छ्रुत्वा तस्य वाक्यं साऽप्यभूदतिदुःखिता ॥ तयोस्तु शोचतोः पश्चात्प्रभाते विमले रवौ ॥ गालवं मुनिशार्दूलं गत्वा विप्रो न्यवेदयत् ॥ ३६ ॥ ब्राह्मण उवाच ॥ धृतव्रतसुतो ब्रह्मंस्त्वया पूर्वं तु पालितः ॥ उपनीतस्त्वया चैव मही माता मम प्रभो ॥ ३७ ॥ किं करोमि च किं कृत्वा निष्कृतिर्मम वै भवेत् ॥ ३८ ॥ ॥ ब्रह्मोवाच ॥ तद्विप्रवचनं श्रुत्वा कारुण्यात्प्राह गालवः ॥ तवेदं द्विविधं रूपं नित्यं पश्याम्यपूर्ववत् ॥ ३९ ॥ ततः पृष्टोऽसि वृत्तान्तं श्रुतं ज्ञातं मया यथा ॥ यत्कृत्यं तव तत्सर्वं गङ्गायां प्रत्यगात्क्षयम् ॥ ॥ ४० ॥ अस्य तीर्थस्य माहात्म्यादस्या देव्याः प्रसादतः ॥ पूतोऽसि प्रत्यहं वत्स नात्र कार्या विचारणा ॥ ४१ ॥ प्रभाते तव रूपाणि सपापानि त्वहर्निशम् ॥ पश्येऽहं पुनरप्येव रूपं तव गुणोत्तमम् ॥ ४२ ॥ आगच्छन्तं त्वागोयुक्तं गच्छन्तं त्वामनागसम् ॥ पश्यामि नित्यं तस्मात्त्वं पूतो देव्या कृतोऽधुना ॥ ४३ ॥ तस्मान्न कार्यं ते किंचिदवशिष्टं भविष्यति ॥ इयं च माता ते विप्र ज्ञाता या चैव बन्धकी ॥ ४४ ॥ पश्चात्तापं गताऽत्यन्तं निवृत्ता त्वथ पातकात् ॥ भूतानां विषये प्रीतिर्वर्त्स स्वाभाविकी यतः ॥ ४५ ॥ सत्सङ्गतो महापुण्याच्चिवृत्तिर्दैवतो भवेत् ॥ अत्यर्थमनुतप्तेयं प्रागाचरितपुण्यतः ॥ ४६ ॥ स्नानं कृत्वा चात्र तीर्थे ततः पूता भविष्यति ॥ तथा तौ चक्रतुरुभौ माता पुत्रौ च नारद ॥ ४७ ॥ स्नानाद्बभूवतुरुभौ गतपापावसंशयम् ॥ ततः प्रभृति तत्तीर्थं धौतपापं प्रचक्षते ॥ ४८ ॥ पापप्रणाशनं नाम गालवं चेति विश्रुतम् ॥ महापातकमल्पं वा तथा यच्चोपपातकम् ॥ तत्सर्वं नाशयेदेतद्धौतपापं सुपुण्यदम् ॥ ४९ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये धौतपापमाहात्म्यनिरूपणं नाम द्वाविंशोऽध्यायः ॥ २२ ॥ ॥ ब्रह्मोवाच ॥ तस्य दक्षिणतो विप्र चास्ति तीर्थं सुदुर्लभम् ॥

पितृतीर्थमितिख्यातं सर्वपापहरं शुचि ॥१॥ ब्रह्मोवाच ॥ यत्र दाशरथी रामः सीतया सहितो द्विज ॥ पितॄन्संतर्पयामास पितृतीर्थं ततो विदुः ॥२॥
तत्र स्नानं च दानं च पितॄणां तर्पणं तथा ॥ सर्वमक्षयतामेति नात्र कार्या विचारणा ॥ ३ ॥ यत्र दाशरथी रामो विश्वामित्रं महामुनिम् ॥ पूजयामास
राजेन्द्रो मुनिभिस्तत्त्वदर्शिभिः ॥ ४ ॥ विश्वामित्रं तु तत्तीर्थमृषिजुष्टं सुपुण्यदम् ॥ तत्स्वरूपं च वक्ष्यामि पठितं वेदवादिभिः ॥ ५ ॥ अनावृष्टिर
भूत्पूर्वं प्रजानामतिभीषणा ॥ विश्वामित्रो महाप्राज्ञः सशिष्यो गौतमीमगात् ॥ ६ ॥ शिष्यान्पुत्रांश्च जायां च कृशान्दृष्ट्वा क्षुधातुरान् ॥ व्यथितः
कौशिकः श्रीमाञ्च्छिष्यानिदमुवाच ह ॥ ७ ॥ ॥ विश्वामित्र उवाच ॥ यथाकथंचिद्यत्किंचिद्यत्र कापि यथा तथा ॥ आनीयतां किंतु भक्ष्यं
भोज्यं वा मा विलम्ब्यताम् ॥ इदानीमेव गन्तव्यमानेतव्यं क्षणेन तु ॥ ८ ॥ ॥ ब्रह्मोवाच ॥ ऋषे तद्व चनाच्छिष्याः क्षुधितास्त्वरया ययुः ॥ अट
माना इतश्चेतः श्वानं ददृशिरे मृतम् ॥ ९ ॥ तमादाय त्वरायुक्ता आचार्याय न्यवेदयन् ॥ सोऽपि तं भद्रमित्युक्त्वा प्रतिजग्राह पाणिना ॥ १० ॥
विशसध्वं श्वमांसं च क्षालयध्वं च वारिणा ॥ पचध्वं मन्त्रवच्चापि हुत्वाऽग्नौ तु यथाविधि ॥ ११ ॥ देवानृषीन्पितॄनन्यांस्तर्पयित्वाऽतिथीन्गुरून् ॥
सर्वे भोक्ष्यामहे शेषमित्युवाच स कौशिकः ॥ १२ ॥ विश्वामित्रवचः श्रुत्वा शिष्याश्चक्रुस्तथैव तत् ॥ पच्यमाने श्वमांसे तु देवदूतोऽग्निरभ्यगात् ॥
देवानां सदने सर्वं देवेभ्यस्तन्न्यवेदयत् ॥ १३ ॥ ॥ अग्निरुवाच ॥ देवैः श्वमांसं भोक्तव्यमापन्नमृषिकल्पितम् ॥ १४ ॥ ॥ ब्रह्मोवाच ॥ अग्नेस्तद्व
चनादिन्द्रः श्येनो भूत्वा विहायसि ॥ स्थालीमथाहरत्पूर्णां मांसेन पिहितां तदा ॥ १५ ॥ तत्कर्म दृष्ट्वा शिष्यास्ते ऋषेः श्येनं न्यवेदयन् ॥ हता
स्थाली मुनिश्रेष्ठ श्येनेनाकृतबुद्धिना ॥ १६ ॥ ततश्चुकोप भगवाञ्शप्तुकामस्तदा हरिम् ॥ ततो ज्ञात्वा सुरपतिः स्थालीं चक्रे मधुप्लुताम् ॥ १७ ॥
पुनर्निवेशयामास उल्कास्वेव खगो हरिः ॥ मधुना तु समायुक्तां विश्वामित्रश्चुकोप ह ॥ स्थालीं वीक्ष्य ततः कोपादिदमाह स कौशिकः ॥ १८ ॥
॥ विश्वामित्र उवाच ॥ श्वमांसमेव नो देहि त्वं हरामृतमुत्तमम् ॥ नो चेत्त्वां भस्मसात्कुर्यामिन्द्रो भीतस्तदाऽब्रवीत् ॥ १९ ॥ ॥ इन्द्र उवाच ॥
मधु हुत्वा यथान्यायं पिब पुत्रैः समन्वितः ॥ किमनेन श्वमांसेन अमेध्येन महामुने ॥ २० ॥ ॥ ब्रह्मोवाच ॥ विश्वामित्रोऽपि नेत्याह भुक्तेनैकेन
किं फलम् ॥ प्रजाः सर्वाश्च सीदन्ति किं तेन मधुना हरे ॥ २१ ॥ सर्वेषाममृतं चेत्स्याद्भोक्ष्येऽहममृतं शुचि ॥ अथवा देवपितरो भोक्ष्यन्तीमं
श्वमांसकम् ॥ २२ ॥ पश्चादहं तच्च मांसं भोक्ष्ये नानृतमस्ति मे ॥ ततो भीतः सहस्राक्षो मेघानाहूय तत्क्षणा[redacted] ॥ २३ ॥ ववर्ष चामृतं वारि ह्यमृते
नार्पिताः प्रजाः ॥ पश्चात्तदमृतं पुण्यं हरिदत्तं यथाविधि ॥ २४ ॥ तर्पयित्वा सुरानादौ तर्पयित्वा जगत्त्रयम् ॥ [redacted]संभुक्तवाञ्च्छिष्यैर्विश्वामित्रः

स्वभार्यया ॥ २५ ॥ ततः प्रभृति तत्तीर्थमाख्यातं चातिपुण्यदम् ॥ यत्राऽऽगतः सुरपतिर्लोकानाममृतार्पणम् ॥ २६ ॥ संजातं मांसवर्जं तु तत्तीर्थं पुण्यदं नृणाम् ॥ तत्र स्नानं च दानं च सर्वक्रतुफलप्रदम् ॥ २७ ॥ ततः प्रभृति तत्तीर्थं विश्वामित्रमिति स्मृतम् ॥ मधुतीर्थमथैन्द्रं च श्येनं पर्जन्य मेव च ॥ २८ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये स्वयंभुनारदसंवादे तीर्थमाहात्म्ये विश्वामित्रतीर्थवर्णनं नाम त्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ ब्रह्मोवाच ॥ श्वेततीर्थमिति ख्यातं त्रैलोक्ये विश्रुतं शुभम् ॥ यस्य स्मरणमात्रेण सर्वपापैः प्रमुच्यते ॥ १ ॥ श्वेतो नाम पुरा विप्रो गौतमस्य प्रियः सखा ॥ आतिथ्यपूजानिरतो गौतमीतीरमाश्रितः ॥ २ ॥ मनसा कर्मणा वाचा शिवभक्तिपरायणः ॥ ध्यायन्तं तं द्विजश्रेष्ठं पूजयन्तं सदा शिवम् ॥ ३ ॥ पूर्णायुषं द्विजवरं शिवभक्तिपरायणम् ॥ नेतुं दूताः समाजग्मुर्दक्षिणाशापतेस्तदा ॥ ४ ॥ नाशक्नुवन्गृहं तस्य प्रवेष्टुमपि नारद ॥ तदा काले व्यतिक्रान्ते चित्रको मृत्युमब्रवीत् ॥ ५ ॥ ॥ चित्रक उवाच ॥ किं नाऽऽयाति क्षीणजीवो मृत्यो श्वेतः कथंत्विति ॥ नाद्याप्यायान्ति दूतास्ते मृत्योर्नैवोचितं हि ते ॥ ६ ॥ ॥ ब्रह्मोवाच ॥ ततश्च कुपितो मृत्युः प्रायाच्छ्वेतगृहं स्वयम् ॥ बहिःस्थितांस्तदा पश्यन्मृत्युर्दूतान्भयार्दितान् ॥ प्रोवाच किमिदं दूता मृत्युमूचुश्च दूतकाः ॥ ७ ॥ ॥ दूता ऊचुः ॥ शिवेन रक्षितं श्वेतं वयं नो वीक्षितुं क्षमाः ॥ येषां प्रसन्नो गिरिशस्तेषां का नाम भीतयः ॥ ८ ॥ ॥ ब्रह्मोवाच ॥ पाशपाणिस्तदा मृत्युः प्राविशद्यत्र स द्विजः ॥ नासौ विप्रो विजानाति मृत्युं वा यमकिंकरान् ॥ ९ ॥ शिवं पूजयतो भक्त्या श्वेतस्य तु समीपतः ॥ मृत्युं पाशधरं दृष्ट्वा नन्दी प्रोवाच विस्मितः ॥ १० ॥ नन्द्युवाच ॥ किमत्र वीक्षसे मृत्यो नन्दिनं मृत्युरब्रवीत् ॥ ११ ॥ ॥ मृत्युरुवाच ॥ श्वेतं नेतुमिहाऽऽयातस्तस्माद्वीक्षे द्विजोत्तमम् ॥ १२ ॥ ॥ ब्रह्मोवाच ॥ त्वं गच्छेत्यब्रवीन्नन्दी मृत्युः पाशानथाक्षिपत् ॥ श्वेताय मुनिशार्दूल ततो नन्दी चुकोप ह ॥ १३ ॥ शिवदत्तेन दण्डेन नन्दी मृत्युमताडयत् ॥ ततः पाशधरो मृत्युः पपात धरणीतले ॥ १४ ॥ ततस्ते सत्वरं दूता हतं मृत्युमवेक्ष्य च ॥ यमाय सर्वमवदन्वधं मृत्योस्तु नन्दिना ॥ १५ ॥ ततश्च कुपितो धर्मो यमो महिषवाहनः ॥ चित्रगुप्तं च कालं च यमदण्डं च रक्षकम् ॥ १६ ॥ महिषं भूतवेतालानाधिव्याधींस्तथैव च ॥ अक्षिरोगान्कुक्षिरोगान्कर्ण शूलं तथैव च ॥ १७ ॥ ज्वरं च त्रिविधं पापं नरकाणि पृथक्पृथक् ॥ त्वरन्तामिति तानुक्त्वा जगाम त्वरितो यमः ॥ १८ ॥ एतैरन्यैः परिवृतो यत्र श्वेतो द्विजोत्तमः ॥ तमायान्तं यमं दृष्ट्वा नन्दी प्रोवाच सायुधः ॥ १९ ॥ विनायकं तथा स्कन्दं भूतनाथं तु दण्डिनम् ॥ तत्र तद्युद्धमभवत्सर्वलोकभयावहम् ॥ २० ॥ कार्तिकेयः स्वयं शक्त्या बिभेद यमकिंकरान् ॥ दक्षिणाशापतिं चापि निजघान बलान्वितम् ॥ २१ ॥ हतावशिष्टा

याम्यास्ते आदित्याय न्यवेदयन् ॥ आदित्योऽपि सुरैः सार्धं श्रुत्वा तन्महदद्भुतम् ॥ २२ ॥ लोकपालैरनुवृतो ममान्तिकमुपागमत् ॥ अहं विष्णुश्च
भगवांनिद्रोऽग्निर्वरुणस्तथा ॥ २३ ॥ चन्द्रादित्यावश्विनौ च लोकपाला मरुद्गणाः ॥ एते चान्ये च बहवो वयं याता यमान्तिकम् ॥ २४ ॥
मृत आस्ते दक्षिणेशो गङ्गातीरे बलान्वितः ॥ समुद्राश्च नदा नागा नानाभूतान्यनेकशः ॥ २५ ॥ तत्राऽऽजग्मुः सुरेशानं द्रष्टुं वैवस्वतं यमम् ॥
तं दृष्ट्वा हतसैन्यं च यमं देवा भयार्दिताः ॥ कृताञ्जलिपुटाः शंभुमूचुः सर्वं पुनः पुनः ॥ २६ ॥ ॥ देवा ऊचुः ॥ भक्तप्रियत्वं ते नित्यं दुष्टहन्तृत्वमेव
च ॥ आदिकर्तर्नमस्तुभ्यं नीलकण्ठ नमोऽस्तु ते ॥ ब्रह्मप्रिय नमस्तेऽस्तु देवप्रिय नमोऽस्तु ते ॥२७॥ श्वेतं द्विजं भक्तमनायुषं ते नेतुं यमादिः सकलो
ऽसमर्थः ॥ संतोषमाप्ताः परमं समीक्ष्य भक्तप्रियत्वं त्वयि नाथ सत्यम्॥२८॥ ये त्वां प्रपन्नाः शरणं कृपालुं नालं कृतान्तोऽप्यनुवीक्षितुं तान् ॥ एवं
विंदित्वा शिव एव सर्वं त्वामेव भक्त्या परया भजन्ते॥२९॥त्वमेव जगतां नाथस्त्वमेव जगतां पतिः ॥ त्वां विना कः समर्थोऽत्र व्यवस्थां कर्तुं मीश्वरः
॥३०॥ब्रह्मोवाच ॥ एवं तु स्तुवतां तेषां पुरस्तादभवच्छिवः ॥ किं ददामीति सानंदमिदमूचुः सुरा अपि ॥३१॥ ॥ देवा ऊचुः ॥ अयं वैवस्वतो धर्मो
नियन्ता सर्वदेहिनाम् ॥ धर्माधर्मव्यवस्थायां स्थापितो लोकपालकः ॥ ३२ ॥ नायं वधमवाप्नोति नापराधी न पापकृत् ॥ विना तेन जगद्धातुर्नैव
किंचिद्भविष्यति ॥ ३३ ॥ तस्माज्जीवय देवेश यमं सबलवाहनम् ॥ प्रार्थना सफला नाथ महत्सु न वृथा भवेत् ॥ ३४ ॥ ॥ ब्रह्मोवाच ॥ ततः प्रो
वाच भगवाञ्जीवयेयमसंशयम् ॥ यमं यदि वचो मेऽद्य अनुमन्यन्ति देवताः ॥ ३५ ॥ ततः प्रोचुः सुराः सर्वे कुर्मो वाक्यं त्वयोदितम् ॥ हरिब्रह्मा
दिसहितं वशे यस्याखिलं जगत् ॥ ३६ ॥ ततः प्रोवाच भगवानमरान्समुपागतान् ॥ मद्भक्तो न मृतिं यातु नेत्यूचुरमराः पुनः ॥ ३७ ॥ अमराः
स्युस्ततो देव सर्वलोकाश्चराचराः ॥ अमर्त्यमर्त्यभेदोऽयं न स्याद्देव जगन्मय ॥ ३८ ॥ पुनरप्याह तान्शंभुः शृण्वन्तु मम भाषितम् ॥ मद्भक्तानां
वैष्णवानां गौतमीमनुसेवताम् ॥ ३९ ॥ वयं तु स्वामिनो नित्यं न मृत्युः स्वाम्यमर्हति ॥ वार्ताऽप्येषां न कर्तव्या यमेन तु कदाचन ॥ ४० ॥
आधिव्याध्यादिभिर्जातु कार्यो नाभिभवः क्वचित ॥ ये शिवं शरणं यातास्ते मुक्तास्तत्क्षणादपि ॥ ४१ ॥ सानुगस्य यमस्यातो नमस्याः सर्व एव
ते ॥ तथेत्यूचुः सुरगणा देवदेवं शिवं प्रति ॥ ४२ ॥ ततश्च भगवान्नाथो नन्दिनं प्राह वाहनम् ॥ ४३ ॥ ॥ शिव उवाच ॥ गौतम्या उदकेन त्व
मभिषिञ्च मृतं यमम् ॥ ४४ ॥ ॥ ब्रह्मोवाच ॥ ततो यमादयः सर्वे अभिषिक्तास्तु नन्दिना ॥ उत्थिताश्च सजीवास्ते दक्षिणाशां ततो गताः ॥
॥ ४५ ॥ उत्तरे गौतमीतीरे विष्णवाद्याः सर्वदैवताः ॥ स्थिता आसन्पूजयन्तो देवदेवं महेश्वरम् ॥ ४६ ॥ तत्राऽऽसन्नयुतान्यष्ट सहस्राणि चतुर्दश ॥

तथा षट् च सहस्राणि पुनः षट् च तथैव च ॥४७॥ षड्दक्षिणे तथा तीरे तीर्थानामयुतत्रयम् ॥ पुण्यमाख्यानमेतद्धि श्वेततीर्थस्य नारद ॥ ४८ ॥ यत्रासौ पतितो मृत्युर्मृत्युतीर्थं तदुच्यते ॥ तस्य श्रवणमात्रेण सहस्रं जीवते समाः ॥ ४९ ॥ तत्र स्नानं च दानं च सर्वपापप्रणाशनम् ॥ श्रवणं पठनं चापि स्मरणं च मलापहम् ॥ करोति सर्वलोकानां भुक्तिमुक्तिप्रदायकम् ॥ ५० ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये उत्तरतीरस्थैकलक्षद्वादशसहस्रतीर्थदक्षिणतीरस्थत्रिंशत्सहस्रतीर्थवर्णनं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ ब्रह्मोवाच ॥ शुक्रतीर्थमिति ख्यातं सर्वसिद्धिकरं नृणाम् ॥ सर्वपापप्रशमनं सर्वव्याधिविनाशनम् ॥ १ ॥ अङ्गिराश्च भृगुश्चैव ऋषी परमधार्मिकौ ॥ तयोः पुत्रौ महा प्राज्ञौ रूपबुद्धिविलासिनौ ॥ २ ॥ जीवः कविरिति ख्यातौ मातापित्रोर्वशे रतौ ॥ उपनीतौ सुतौ दृष्ट्वा पितरावूचतुर्मिथः ॥ ३ ॥ ॥ ऋषी ऊचतुः ॥ आवयोरेक एवास्तु शास्ता नित्यं च पुत्रयोः ॥ तस्मादेकः शासिता स्यात्तिष्ठत्वेको यथासुखम् ॥ ४ ॥ ॥ ब्रह्मोवाच ॥ एतच्छ्रुत्वा ततः शीघ्रमङ्गिराः प्राहः भार्गवम् ॥ अध्यापयिष्ये सदृशं सुखं तिष्ठतु भार्गवः ॥ ५ ॥ एतच्छ्रुत्वा चाङ्गिरसो वाक्यं भृगुकुलोद्वहः ॥ तथेति मत्वाऽङ्गिरसे शुक्रं तस्मै न्यवेदयत् ॥ ६ ॥ उभावपि सुतौ नित्यमध्यापयति वै पृथक् ॥ वैषम्यबुद्ध्या तौ बालौ चिराच्छुक्रोऽब्रवीदिदम् ॥ ७ ॥ ॥ शुक्र उवाच ॥ वैषम्येण गुरो मां त्वमध्यापयसि नित्यशः ॥ गुरूणां नेदमुचितं वैषम्यं पुत्रशिष्ययोः ॥ ८ ॥ वैषम्येण च वर्तन्ते मूढाः शिष्येषु देशिकाः ॥ नैषा विषमबुद्धीनां संख्या पापस्य विद्यते ॥ ९ ॥ आचार्य सम्यग्ज्ञातोऽसि नमस्येऽहं पुनः पुनः ॥ गच्छेयं गुरुमन्यं वै मामनुज्ञातुमर्हसि ॥ १० ॥ गच्छेयं पितरं ब्रह्मन्यद्यसौ विषमो भवेत् ॥ ततो वाऽन्यत्र गच्छामि स्वामिन्पृष्टोऽसि गम्यते ॥ ११ ॥ ॥ ब्रह्मोवाच ॥ गुरुं बृहस्पतिं पृष्ट्वा अनुज्ञातस्त्वगात्ततः ॥ अवाप्तविद्यः पितरं गच्छेयं चेत्यचिन्तयत् ॥ १२ ॥ तस्मात्कमनुपृच्छेयमुत्कृष्टः को गुरुर्भवेत् ॥ इति स्मरन्महाप्राज्ञमपृच्छद्वृद्धगौतमम् ॥ १३ ॥ ॥ शुक्र उवाच ॥ को गुरुः स्यान्मुनिश्रेष्ठ मम ब्रूहि गुरुर्भवेत् ॥ त्र्याणामपि लोकानां यो गुरुस्तं व्रजाम्यहम् ॥ १४ ॥ ब्रह्मोवाच ॥ स प्राह जगतामीशं शंभुं देवं जगद्गुरुम् ॥ शुक्रः प्राह कथं तं वै पश्येयं त्रिदशेश्वरम् ॥ काऽऽराधयामि गिरिशमित्युक्तः प्राह गौतमः ॥१५॥ गौतम उवाच ॥ गौतम्यां तु शुचिर्भूत्वा स्तोत्रैस्तोषय शंकरम् ॥ ततस्तुष्टो जगन्नाथः स ते विद्यां प्रदास्यति ॥ १६ ॥ ॥ ब्रह्मोवाच ॥ गौतमस्य तु तद्वाक्यात्प्रागाद्गङ्गां स भार्गवः ॥ स्नात्वा भूत्वा शुचिः सम्यक्स्तुतिं चक्रे स बालकः ॥ १७ ॥ ॥ शुक्र उवाच ॥ दीनानाथैकशरणं शंभो त्वां शरणं गतः ॥ बालोऽहं बालबुद्धिश्च बालचन्द्रधर प्रभो ॥ नाहं जानामि ते किंचित्स्तुतिं कर्तुं नमोऽस्तु ते ॥ १८ ॥ परित्यक्तस्य

गुरुणा न ममास्ति सुहृत्सखा ॥ त्वं प्रभुः सर्वभावेन जगन्नाथ नमोऽस्तु ते ॥ १९ ॥ गुरुर्गुरुमतां देव महतां च महानसि ॥ अहमल्प
तरो बालो जगन्मय नमोऽस्तु ते ॥ २० ॥ किंचार्थं हि सुरेशान नाहं वेद्मि भवद्गतिम् ॥ मां त्वं च कृपया पश्य लोकसाक्षिन्नमोऽस्तु ते ॥ २१ ॥
॥ ब्रह्मोवाच ॥ एवं तु स्तुवतस्तस्य प्रसन्नोऽभूत्सुरेश्वरः ॥ २२ ॥ ॥ शिव उवाच ॥ कामं वरय भद्रं ते यच्चापि सुरदुर्लभम् ॥ २३ ॥ ॥ ब्रह्मोवाच ॥
कविरप्याह देवेशं कृताञ्जलिरुदारधीः ॥ २४ ॥ शुक्र उवाच ॥ ब्रह्मादिभिश्च ऋषिभिर्या विद्या नैव गोचरा ॥ तां विद्यां नाथ याचिष्ये त्वं गुरुर्मम
देवतम् ॥ २५ ॥ ॥ ब्रह्मोवाच ॥ मृतसंजीविनीं विद्यामज्ञातां त्रिदशैरपि ॥ तां दत्तवान्सुरश्रेष्ठस्तस्मै शुक्राय याचते ॥ २६ ॥ इतरा लौकिकी
विद्या वैदिकी चान्यगोचरा ॥ किं पुनः शंकरे तुष्टे विचार्यमवशिष्यते ॥ २७ ॥ स तु लब्ध्वा महाविद्यां प्रायात्स्वपितरं गुरुम् ॥ दैत्यानां च
गुरुश्चाऽऽसीद्विद्यया पूजितः कविः ॥ २८ ॥ ततः कदाचित्तां विद्यां कस्मिंश्चित्कारणान्तरे ॥ कचो बृहस्पतिसुतो विद्यां प्राप्तः कवेस्तु ताम् ॥
॥ २९ ॥ कचाद्बृहस्पतिश्चापि ततो देवाः पृथक्पृथक् ॥ अवापुर्महतीं विद्यां यामाहुर्मृतजीविनीम् ॥ ३० ॥ यत्र सा कविना प्राप्ता विद्याऽऽपूज्य
महेश्वरम् ॥ गौतम्या उत्तरे पारे शुक्रतीर्थं तदुच्यते ॥ ३१ ॥ मृतसंजीविनीतीर्थमायुरारोग्यवर्धनम् ॥ स्नानं दानं च यत्किंचित्सर्वमक्षयपुण्यदम् ॥
॥ ३२ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये स्वयंभुनारदसंवादे शुक्रतीर्थमृतसंजीविनीतीर्थमाहात्म्यनिरूपणं नाम पञ्चविंशोऽध्यायः ॥ २५ ॥
ब्रह्मोवाच ॥ इन्द्रतीर्थमिति ख्यातं ब्रह्महत्याविनाशनम् ॥ स्मरणादपि पापौघक्लेशसंघविनाशनम् ॥ १ ॥ पुरा वृत्रवधे वृत्ते ब्रह्महत्या तु नारद ॥
शचीपतिं चानुगताऽविभ्यद्दग्धा तु तं हरिः ॥ २ ॥ इन्द्रस्ततो वृत्रहन्ता इतश्चेतश्च धावति ॥ यत्र यत्र त्वसौ याति हत्या साऽपीन्द्रगामिनी ॥
॥ ३ ॥ स महत्सर आविश्य पद्मनालमुपागमत् ॥ तत्रासौ तन्तुवद्भूत्वा वासं चक्रे शचीपतिः ॥ ४ ॥ सरस्तीरेऽपि हत्याऽऽसीद्दिव्यं वर्षसहस्र
कम् ॥ एतस्मिन्नन्तरे देवा निरिन्द्रा ह्यभवन्मुने ॥ ५ ॥ मन्त्रयामासुरव्यग्राः कथमिन्द्रो भवेदिति ॥ तत्राहमवदं देवान्हत्यास्थानं प्रकल्प्य च ॥
॥ ६ ॥ इन्द्रस्य पावनार्थाय गौतम्यामभिषिच्यताम् ॥ यत्राभिषिक्तः पूतात्मा पुनरिन्द्रो भविष्यति ॥ ७ ॥ तथा ते निश्चयं कृत्वा गौतमीं
शीघ्रमागमन् ॥ तत्र स्नातं सुरपतिं देवाश्च ऋषयस्तथा ॥ ८ ॥ अभिषेतुकामास्ते सर्वे शचीकान्तं च तस्थिरे ॥ अभिषिच्यमानमिन्द्रं तं प्रक्षे
पाद्गौतमोऽब्रवीत् ॥ ९ ॥ ॥ गौतम उवाच ॥ अभिषेक्ष्यन्ति पापिष्ठं महेन्द्रं गुरुतल्पगम् ॥ तान्सर्वान्भस्मसात्कुर्यां शीघ्रं यान्त्वसुरालयः ॥ १० ॥
॥ ब्रह्मोवाच ॥ तद्भर्त्रेवचनं श्रुत्वा परिहृत्य च गौतमीम् ॥ नर्मदामगमन्सर्व इन्द्रमादाय सत्वराः ॥ ११ ॥ उत्तरे नर्मदातीरे अभिषेकाय तस्थिरे ॥

अभिषेक्ष्यमाणमिन्द्रं तं माण्डव्यो भगवानृषिः ॥ १२ ॥ अब्रवीद्रस्मसात्कुर्या यदि स्यादभिषेचनम् ॥ पूजयामासुरमरा माण्डव्यं युक्तिभिः स्तवैः ॥ १३ ॥ देवा ऊचुः ॥ अयमिन्द्रः सहस्राक्षो यस्मिन्देशेऽभिषिच्यते ॥ तत्रातिदारुणं विघ्नं मुने समुपजायते ॥ १४ ॥ तच्छान्तिं कुरु कल्याण प्रसीद वरदो भव ॥ मलनिर्यातनं यस्मिन्कुर्मस्तस्मिन्वरान्बहून् ॥ १५ ॥ देश दास्यामहे सर्वं तदनुज्ञातुमर्हसि ॥ यस्मिदेशे सुरेन्द्रस्य अभिषेको भविष्यति ॥ १६ ॥ स सर्वकामदः पुंसां धान्यवृक्षफलैर्युतः ॥ नानावृष्टिर्न दुर्भिक्षं भवेदत्र कदाचन ॥ १७ ॥ ॥ ब्रह्मोवाच ॥ मेने ततो मुनिश्रेष्ठो माण्डव्यो लोकपूजितः ॥ अभिषेकः कृतस्तत्र मलनिर्यातनं तथा ॥ १८ ॥ देवैस्तदोक्तो मुनिभिः स देशो मालवस्ततः ॥ अभिषिक्ते सुरपतौ जाते च विमले तदा ॥ १९ ॥ आनीय गौतमीं गङ्गां तं पुण्यायाभिषेचिरे ॥ सुराश्च ऋषयश्चैव अहं विष्णुस्तथैव च ॥ २० ॥ वसिष्ठो गौतमश्चापि अगस्त्योऽत्रिश्च कश्यपः ॥ एते चान्ये च ऋषयो देवा यक्षाः सपन्नगाः ॥ २१ ॥ स्नानं तत्पुण्यतोयेन अकुर्वन्नभिषेचनम् ॥ मया पुनः शचीभर्ता कमण्डलुभवेन च ॥ २२ ॥ वारिणाऽप्यभिषिक्तश्च तत्र पुण्याऽभवन्नदी ॥ सिक्ता चेति च तत्राऽऽसीत्ते गङ्गायां च संगते ॥ २३ ॥ संगमौ तत्र विख्यातौ सर्वदा मुनिसेवितौ ॥ ततः प्रभृति तत्तीर्थं पुण्यासंगममुच्यते ॥ २४ ॥ सिक्तायाः संगमे पुण्यमैन्द्रं तदभिधीयते ॥ तत्र सप्त सहस्राणि तीर्थान्यासञ्शुभानि च ॥ २५ ॥ तेषु स्नानं च दानं च विशेषेण तु संगमे ॥ सर्वं तदक्षयं विद्यान्नात्र कार्या विचारणा ॥ २६ ॥ यदेतत्पुण्यमाख्यानं यः पठेच्च शृणोति वा ॥ सर्वपापैः स मुच्येत मनोवाक्कायकर्मजैः ॥ २७ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये पुण्यासिक्तासंगमेन्द्रतीर्थादिसप्तसहस्रतीर्थवर्णनं नाम षड्विंशोऽध्यायः ॥ २६ ॥ ॥ ब्रह्मोवाच ॥ पौलस्त्यं तीर्थमाख्यातं सर्वसिद्धिप्रदं नृणाम् ॥ प्रभावं तस्य वक्ष्यामि भ्रष्टराज्यप्रदायकम् ॥ १ ॥ उत्तराशापतिः पूर्वमृद्धिसिद्धिसमन्वितः ॥ पुरा लङ्कापतिश्चाऽऽसीज्ज्येष्ठो विश्रवसः सुतः ॥ २ ॥ तस्यैते भ्रातरश्चाऽऽसन्बलवन्तोऽमितप्रभाः ॥ सापत्ना रावणश्चैव कुम्भकर्णो विभीषणः ॥ ३ ॥ तेऽपि विश्रवसः पुत्रा राक्षस्यां राक्षसास्तु ते ॥ पुष्पकेण विमानेन धनदो भ्रातृभिः सह ॥ ४ ॥ ममान्तिकं भक्तियुक्तो नित्यमेति तु याति च ॥ रावणस्य तु या माता कुपिता साऽब्रवीत्सुतान् ॥ ॥ ५ ॥ ॥ रावणमातोवाच ॥ मरिष्ये न च जीविष्ये पुत्रा वैरूप्यकारणात् ॥ देवाश्च दानवाश्चाऽऽसन्सापत्ना भ्रातरो मिथः ॥ ६ ॥ अन्योन्य वधमीप्सन्ते जयैश्वर्यवशानुगाः ॥ तद्भवन्तो न पुरुषा न शक्ता न जयैषिणः ॥ सापत्नं योऽनुमन्येत तस्य जीवो निरर्थकः ॥ ७ ॥ ॥ ब्रह्मोवाच ॥ तन्मातृवचनं श्रुत्वा भ्रातरस्ते त्रयो मुने ॥ जग्मुस्ते तपसेऽरण्यं कृतवन्तस्तपो महत् ॥ ८ ॥ मत्तो वरानवापुश्च त्रय एते च राक्षसाः ॥ मातुलेन मरी

चेन तथा मातामहेन तु ॥ ९ ॥ तन्मातृवचनाच्चापि ततो लङ्कामयाचत ॥ रक्षोभावान्मातृदोषाद्भ्रात्रोर्वैरमभून्महत् ॥ १० ॥ ततस्तदभवद्युद्धं देव
दानवयोरिव ॥ युद्धे जित्वाऽग्रजं शान्तं धनदं भ्रातरं तथा ॥ ११ ॥ पुष्पकं च पुरीं लङ्कां सर्वं चैव व्यपाहरत् ॥ रावणो घोषयामास त्रैलोक्ये
सचराचरे ॥ १२ ॥ यो दद्यादाश्रयं भ्रातुः स च वध्यो भवेन्मम ॥ भ्रात्रा निरस्तो वैश्रवणो नैव प्रापाऽऽश्रयं क्वचित् ॥ पितामहं पुलस्त्यं तं गत्वा
नत्वाऽब्रवीद्वचः ॥ १३ ॥ ॥ धनद उवाच ॥ भ्रात्रा निरस्तो दुष्टेन किं करोमि वदस्व मे ॥ आश्रयः शरणं यत्स्यादैवं वा तीर्थमेव च ॥ १४ ॥
॥ ब्रह्मोवाच ॥ तत्पौत्रवचनं श्रुत्वा पुलस्त्यो वाक्यमब्रवीत् ॥ १५ ॥ पुलस्त्य उवाच ॥ गौतमीं गच्छ पुत्र त्वं स्तुहि देवं महेश्वरम् ॥ तत्र नास्य
प्रवेशः स्याद्गङ्गाया जलमध्यतः ॥ १६ ॥ सिद्धिं प्राप्स्यसि कल्याणीं तथा कुरु मदाज्ञया ॥ १७ ॥ ॥ ब्रह्मोवाच ॥ तथेत्युक्त्वा जगामासौ सभार्यो
धनदस्तथा ॥ पित्रा मात्रा च वृद्धेन पुलस्त्येन धनेश्वरः ॥ १८ ॥ गत्वा तु गौतमीं गङ्गां शुचिः स्नात्वा यतव्रतः ॥ तुष्टाव देवदेवेशं भुक्तिमुक्तिप्रदं
शिवम् ॥ १९ ॥ ॥ धनद उवाच ॥ स्वामी त्वमेवास्य चराचरस्य विश्वस्य शंभो न परोऽस्ति कश्चित ॥ त्वामप्यवज्ञाय यदीह मोहात्प्रगल्भते
कोऽपि स शोच्य एव ॥ २० ॥ त्वमष्टमूर्त्या सकलं बिभर्षि त्वदाज्ञया वर्तत एव सर्वम् ॥ तथाऽपि विंदन्त्यबुधा भवन्तं न जातु विद्मन्महिमा
पुरातनम् ॥ २१ ॥ मलप्रसूतं यदवोचदम्बा हास्यात्सुतोऽयं तव देव शूरः ॥ त्वत्प्रेक्षिताद्यः स च विघ्नराजो जज्ञे त्वहो चेष्टितमीशदृष्टेः ॥ २२ ॥
अश्रुप्लुताङ्गी गिरिजा समीक्ष्य वियुक्तदांपत्यमितीशमूचे ॥ मनोभवोऽभून्मदनो रतिश्च सौभाग्यपूर्णत्वमवाप सोमात् ॥ २३ ॥ ॥ ब्रह्मोवाच ॥
इत्यादि स्तुवतस्तस्य पुरतोऽभूत्त्रिलोचनः ॥ वरेण च्छन्दयामास हर्षान्नोवाच किंचन ॥ २४ ॥ तूष्णींभूते तु धनदे पुलस्त्ये च महेश्वरे ॥ पुनः
पुनर्वरस्वेति शिवे वादिनि हर्षिते ॥ २५ ॥ एतस्मिन्नन्तरे तत्र वागुवाचाशरीरिणी ॥ प्राप्तव्यं धनपालत्वं वदन्तीदं महेश्वरम् ॥ २६ ॥ पुलस्त्यस्य
तु यच्चित्तं पितुर्वैश्रवणस्य तु ॥ विदित्वैव तदा वाणी शुभमर्थमुदीरयत् ॥ २७ ॥ भूतवद्भवितव्यं स्यादास्यमानं तु दत्तवत् ॥ प्राप्तव्यं प्राप्तवत्तत्र
दैवी वागभवच्छुभा ॥ २८ ॥ प्रभूतशत्रुः परिभूतदुःखः संपूज्य सोमेश्वरमाप लिङ्गम् ॥ दिगीश्वरत्वं द्रविणप्रभुत्वमपारदातृत्वकलत्रपुत्रान् ॥ २९ ॥
तां वाचं धनदः श्रुत्वा देवदेवं त्रिशूलिनम् ॥ एवं भवतु नामेति धनदो वाक्यमब्रवीत् ॥ ३० ॥ तथैवास्त्विति देवेशो दैवीं वाचममन्यत ॥ पुलस्त्यं
च वरैः पुण्यैस्तथा विश्रवसं मुनिम् ॥ ३१ ॥ धनपालं च देवेशो ह्यभिनन्द्य ययौ शिवः ॥ ततः प्रभृति तत्तीर्थं पौलस्त्यं धनदं विदुः ॥ ३२ ॥
तथा वैश्रवसं पुण्यं सर्वकामप्रदं शुभम् ॥ तेषु स्नानादि यत्किंचित्तत्सर्वं बहुपुण्यदम् ॥ ३३ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहा

त्म्ये पौलस्त्यतीर्थवर्णनं नाम सप्तविंशोऽध्यायः ॥ २७ ॥ ॥ ब्रह्मोवाच ॥ अग्नितीर्थमिति ख्यातं सर्वक्रतुफलप्रदम् ॥ सर्वविघ्नोपशमनं तत्तीर्थस्य फलं शृणु ॥ १ ॥ जातवेदा इति ख्यातो अग्नेर्भ्राता स हव्यवाट् ॥ हव्यं वहन्तं देवानां गौतम्यास्तीर एव तु ॥ २ ॥ ऋषीणां सत्रसदने अग्नेर्भ्रातरमुत्तमम् ॥ भ्रातुः प्रियं तथा दक्षं मधुर्दीतिसुतो वली ॥ ३ ॥ जघान ऋषिमुख्येषु पश्यत्सु च सुरेष्वपि ॥ हव्यं देवा नैव चाऽऽपुर्मृते वै जातवेदसि ॥ ४ ॥ मृते भ्रातरि स त्वाग्निः प्रिये वै जातवेदसि ॥ कोपेन महताऽऽविष्टो गाङ्गमम्भः समाविशत् ॥ ५ ॥ गङ्गाम्भसि समाविष्टे ह्यग्नौ देवाश्च मानुषाः ॥ जीवमुत्सर्जयामासुरग्निजीवा यतो मताः ॥ ६ ॥ यत्राग्निर्जलमाविष्टस्तं देशं सर्व एव ते ॥ आजग्मुर्विबुधाः सर्व ऋषयः पितरस्तथा ॥ ७ ॥ विनाऽग्निना न जीवामः स्तुवन्तोऽग्निं विशेषतः ॥ अग्निं जलगतं दृष्ट्वा प्रियं चोचुर्दिवौकसः ॥ ८ ॥ ॥ देवा ऊचुः ॥ देवाञ्जीवय हव्येन कव्येन च पितॄंस्तथा ॥ मानुषानन्नपाकेन बीजानां क्लेदनेन च ॥ ॥ ९ ॥ ॥ ब्रह्मोवाच ॥ अग्निरप्याह तान्देवाञ्शक्तो यो मे गतोऽनुजः ॥ क्रियमाणे भवत्कार्ये या मतिर्जातवेदसः ॥ १० ॥ सा वाऽपि स्यान्मम सुरा नोत्सहे कार्यसाधने ॥ कार्यं तु सर्वतस्तस्य भवतां जातवेदसः ॥ ११ ॥ इमां स्थितिमनुप्राप्तो न जाने मे कथं भवेत् ॥ इह चामुत्र च व्याप्तौ शक्तिरप्यत्र नो भवेत् ॥ १२ ॥ अथापि क्रियमाणे वै कार्ये सैव गतिर्मम ॥ देवास्तमूचुर्भावेन सर्वेण ऋषयस्तथा ॥ १३ ॥ आयुः कर्मणि च प्रीतिर्व्याप्तौ शक्तिश्च दीयते ॥ प्रयाजाननुयाजांश्च दास्यामो हव्यवाहन ॥ १४ ॥ देवानां त्वं मुखं श्रेष्ठमाहुत्यः प्रथमास्तव ॥ त्वया दत्तं तु यद्हव्यं भोक्ष्यामः सुरसत्तम ॥ १५ ॥ ॥ ब्रह्मोवाच ॥ ततस्तुष्टोऽभवद्वह्निर्देववाक्याद्यथाक्रमम् ॥ इह चामुत्र च व्याप्तौ हव्ये वा लौकिके तथा ॥ १६ ॥ सर्वत्र वह्निरभयः समर्थोऽभूत्सुराज्ञया ॥ जातवेदा बृहद्भानुः सप्तार्चिर्नीललोहितः ॥ १७ ॥ जलगर्भः शमीगर्भो यज्ञगर्भः स उच्यते ॥ जलादाकृष्य विबुधा अभिषिच्य विभावसुम् ॥ १८ ॥ उभयत्र पदे वासः सर्वगोऽग्निस्ततोऽभवत् ॥ यथागतं सुरा जग्मुर्वह्नितीर्थं तदुच्यते ॥ १९ ॥ तत्र सप्त शतान्यासंस्तीर्थानि गुणवन्ति च ॥ तेषु स्नानं च दानं च यः करोति जितात्मवान् ॥ २० ॥ अश्वमेधफलं साग्रं प्राप्नोत्यविकलं शुभम् ॥ देवतीर्थं च तत्रैव आग्नेयं जातवेदसम् ॥ २१ ॥ अग्निप्रतिष्ठितं लिङ्गं तत्राऽऽस्तेऽनेकवर्णवत् ॥ तद्देवदर्शनादेव सर्वक्रतुफलं लभेत् ॥ २२ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्येऽग्नितीर्थवर्णनं नामाष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ ब्रह्मोवाच ॥ ऋणप्रमोचनं नाम तीर्थं वेदविदो विदुः ॥ तस्य स्वरूपं वक्ष्यामि शृणु नारद तन्मनाः ॥ १ ॥ आसीत्पृथुश्रवा नाम प्रियः कक्षीवतः सुतः ॥ न दारसंग्रहं

लेभे वैराग्यान्नाग्निपूजनम् ॥ २ ॥ कनीयांस्तु समर्थोऽपि परिवित्तिभयान्मुने ॥ नाकरोद्दारकर्मादि नैवाग्नीनामुपासनम् ॥ ३ ॥ ततः प्रोचुः पितृ
गणाः पुत्रं कक्षीवतः शुभम् ॥ ज्येष्ठं चैव कनिष्ठं च पृथक्पृथगिदं वचः ॥ ४ ॥ ॥ पितर ऊचुः ॥ ऋणत्रयापनोदाय क्रियतां दारसंग्रहः ॥ ५ ॥
ब्रह्मोवाच ॥ नेत्युवाच ततो ज्येष्ठः किमृणं केन युज्यते ॥ कनीयांस्तु पितॄन्प्राह न योग्यो दारसंग्रहः ॥ ६ ॥ ज्येष्ठे सति महाप्राज्ञ परिवित्तिभया
दिति ॥ तावुभौ पुनरप्येवमूचुस्ते वै पितामहाः ॥ ७ ॥ ॥ पितर ऊचुः ॥ यातामुभौ गौतमीं तु पुण्यां कक्षीवतः सुतौ ॥ कुरुतां गौतमीस्नानं सर्वा
भीष्टप्रदायकम् ॥ ८ ॥ गच्छतां गौतमीं गङ्गां लोकत्रितयपावनीम् ॥ स्नानं च तर्पणं तस्यां कुरुतां श्रद्धयाऽन्वितौ ॥ ९ ॥ दृष्टाऽवगाहिता ध्याता
गौतमी सर्वकामदा ॥ न देशकालजात्यादिनियमोऽत्रावगाहने ॥ ज्येष्ठोऽनृणस्ततो भूयात्परिवित्तिर्न चेतरः ॥ १० ॥ ॥ ब्रह्मोवाच ॥ ततः पृथुश्रवा
ज्येष्ठः कृत्वा स्नानं सतर्पणम् ॥ त्रयाणामपि लोकानां काक्षीवतोऽनृणोऽभवत् ॥ ११ ॥ ततः प्रभृति तत्तीर्थमृणमोचनमुच्यते ॥ श्रौतस्मार्तऋणेभ्य
श्च इतरेभ्यश्च नारद ॥ तत्र स्नानेन दानेन ऋणी मुक्तः सुखी भवेत् ॥ १२ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये ऋणमोचनतीर्थ
वर्णनं नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ ब्रह्मोवाच ॥ सुपर्णासंगमं नाम काद्रवासंगमं तथा ॥ महेश्वरो यत्र देवो गङ्गापुलिनमाश्रितः ॥ १ ॥
अग्निकुण्डं च तत्रैव रौद्रं वैष्णवमेव च ॥ सौरं सौम्यं तया ब्राह्मं कौमारं वारुणं तथा ॥ २ ॥ अप्सरा च नदी यत्र संगता गङ्गया तथा ॥ तत्तीर्थस्म
रणादेव कृतकृत्यो भवेन्नरः ॥ ३ ॥ सर्वपापप्रशमनं शृणु यत्नेन नारद ॥ इन्द्रेण हिंसिताः पूर्वं वालखिल्या महर्षयः ॥ दत्तार्धतपसः सर्वे प्रोचुस्ते
काश्यपं मुनिम् ॥ ४ ॥ ॥ वालखिल्या ऊचुः ॥ पुत्रमुत्पादयानेन इन्द्रदर्पहरं शुभम् ॥ तपसोऽर्धं तु दास्यामस्तथेत्याह मुनिस्तु तान् ॥ ५ ॥
सुपर्णायां ततो गर्भमादधे स प्रजापतिः ॥ कद्रूं चैव शनैर्ब्रह्मन्सर्पाणां सर्पमातरि ॥ ६ ॥ ते गर्भिण्यावुभे आह गन्तुकामः प्रजापतिः ॥ अपराधो न
च क्वापि कार्यो गमनमेव च ॥ ७ ॥ अन्यत्र गमनाच्छापो भविष्यति न संशयः ॥ ८ ॥ ॥ ब्रह्मोवाच ॥ इत्युक्त्वा स ययौ पत्न्यौ गते भर्तरि ते
उभे ॥ तदैव जग्मतुः सत्रमृषीणां भावितात्मनाम् ॥ ९ ॥ ब्रह्मवृन्दसमाकीर्णं गंगातीरसमाश्रितम् ॥ उन्मत्ते ते उभे नित्यं वयःसंपत्तिगर्विते ॥
॥ १० ॥ निवार्यमाणे बहुशो मुनिभिस्तत्त्वदर्शिभिः ॥ विकुर्वत्यौ तत्र सत्रे समानि च हवींषि च ॥ ११ ॥ योषितां दुर्विलसितं कः संवरितुमीश्वरः ॥
ते दृष्ट्वा चुक्षुभुर्विप्रा अपमार्गरते उभे ॥ १२ ॥ अपमार्गस्थिते यस्मादापगे हि भविष्यथः ॥ सुपर्णा चैव कद्रूश्च नद्यौ ते संभवतुः ॥ १३ ॥
स कदाचिद्गृहं प्रायात्कश्यपोऽथ प्रजापतिः ॥ ऋषिभ्यस्तत्र वृत्तान्तं शापं ताभ्यां सविस्तरम् ॥ १४ ॥ श्रुत्वा तु विस्मयाविष्टः

किं करोमीत्यचिन्तयत् ॥ ऋषिभ्यः कथयामास वालखिल्या इति श्रुताः ॥ १५ ॥ त ऊचुः कश्यपं विप्रं गत्वा गंगां तु गौतमीम् ॥ तत्र स्तुहि महेशानं पुनर्भार्यें भविष्यतः ॥ १६ ॥ ब्रह्महत्याभयादेव यत्र देवो महेश्वरः ॥ गंगामध्ये सदा ह्यास्ते मध्यमेश्वरसंज्ञया ॥ १७ ॥ तथेत्युक्त्वा कश्यपोऽपि स्नात्वा गङ्गां जितव्रतः ॥ तुष्टाव स्तवनैः पुण्यैर्देवदेवं महेश्वरम् ॥ १८ ॥ कश्यप उवाच ॥ ॥ लोकत्रयैकाधिपतेर्न यस्य कुत्रापि वस्तुन्यभिमानलेशः ॥ स सिद्धनाथोऽखिलविश्वकर्ता भर्ता शिवाया भवतु प्रसन्नः ॥ १९ ॥ तापत्रयोष्णद्युतितापितानामितस्ततो वै परिधावतां च ॥ शरीरिणां स्थावरजङ्गमानां त्वमेव दुःखव्यपनोददक्षः ॥ २० ॥ सत्त्वादियोगत्रिविधोऽपि यस्य शक्रादिभिर्वक्तुमशक्य एव ॥ विचित्रवृत्तिं परिचिन्त्य सोमं सुखी सदा दानपरो वरेण्यः ॥ २१ ॥ ॥ ब्रह्मोवाच ॥ इत्यादिस्तुतिभिर्देवैः स्तुतो गौरीप्रियः शिवः ॥ प्रसन्नो ह्यददाच्छंभुः कश्यपाय वरान्बहून् ॥ २२ ॥ भार्यार्थिनं तु तं प्राह स्यातां भार्ये उभे तु ते ॥ नदीस्वरूपे पत्न्यौ ये गंगां प्राप्य सरिद्वराम् ॥ २३ ॥ तत्संगमनमात्रेण ताभ्यां भूयात्स्वकं वपुः ॥ ते गर्भिण्यौ पुनर्जाते गंगायाश्च प्रसादतः ॥ २४ ॥ ततः प्रजापतिः प्रीतो भार्ये प्राप्य महामनाः ॥ आह्वयामास तान्विप्रान्गौतमीतीरमाश्रितान् ॥ २५ ॥ सीमन्तोन्नयनं चक्रे ताभ्यां प्रीतः प्रजापतिः ॥ ब्राह्मणान्भोजयामास विधिदृष्टेन कर्मणा ॥ २६ ॥ भुक्तवत्स्वथ विप्रेषु कश्यपस्याथ मन्दिरे ॥ भर्तुः समीपे संविष्टा कद्रूर्विप्रान्निरीक्ष्य च ॥ २७ ॥ ततः कद्रू ऋषीनक्ष्णा प्राहसत्ते च चुक्षुभुः ॥ येनाक्ष्णा हसिता पापे भज्यतां तेऽक्षि पापकृत् ॥ २८ ॥ काणाऽभवत्ततः कद्रूः सर्पमातेति योच्यते ॥ ततः प्रसादयामास कश्यपो भगवानृषीन् ॥ २९ ॥ ततः प्रसन्नास्ते प्रोचुर्गौतमी सरितां वरा ॥ अपराधसहस्रेभ्यो रक्षिष्यति ति च सेवनात् ॥ ३० ॥ भार्यान्वितस्तथा चक्रे कश्यपो मुनिसत्तमः ॥ ततः प्रभृति तत्तीर्थमुभयोः संगमं विदुः ॥ ३१ ॥ कद्रूः समन्तात्पूर्वं च यावत्सौपर्णिका नदी ॥ तावज्जटाधरं तीर्थं वारणस्या यवाधिकम् ॥ ३२ ॥ सर्वपापप्रशमनं सर्वक्रतुफलप्रदम् ॥ ३३ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये स्वयंभु ऋषिसंवादे कद्रूसुपर्णासंगमतीर्थवर्णनं नाम त्रिंशोऽध्यायः ॥ ३० ॥ ॥ ब्रह्मोवाच ॥ पुरूरवसमाख्यातं तीर्थं वेदविदो विदुः ॥ स्मरणादेव पापानां नाशनं किंतु दर्शनात् ॥ १ ॥ पुरूरवा ब्रह्मसदः प्राप्य तत्र सरस्वतीम् ॥ यदृच्छया देवनदीं हसन्तीं ब्रह्मणोऽन्तिके ॥ तां दृष्ट्वा रूपसंपन्नामुर्वशीं प्राह भूपतिः ॥ २ ॥ ॥ राजोवाच ॥ केयं रूपवती साध्वी स्थितेयं ब्रह्मणोऽन्तिके ॥ सर्वासामुत्तमा योषिद्दीपयन्ती सभामिमाम् ॥ ॥ ३ ॥ ॥ ब्रह्मोवाच ॥ उर्वशी प्राह राजानमियं देवनदी शुभा ॥ सरस्वती ब्रह्मसुता नित्यमेति च याति च ॥ तच्छ्रुत्वा विस्मितो राजा आनयेमां

ममान्तिकम् ॥ ४ ॥ ॥ ब्रह्मोवाच ॥ उर्वशी पुनरप्याह राजानं भूरिदक्षिणम् ॥ ५ ॥ ॥ उर्वश्युवाच ॥ आनीयते महाराज तस्याः सर्वं निवेद्य
च ॥ ६ ॥ ॥ ब्रह्मोवाच ॥ ततस्तां प्राहिणोत्तत्र राजा प्रीत्या तदोर्वशीम् ॥ सा गत्वा राजवचनं न्यवेदयदथोर्वशी ॥ ७ ॥ सरस्वत्यापि तन्मेने
उर्वश्याय न्निवेदितम् ॥ सा तथेति प्रतिज्ञाय प्रायाद्यत्र पुरूरवाः ॥ ८ ॥ सरस्वत्यास्ततस्तीरे स रेमे बहुलाः समाः ॥ सरस्वानभवत्पुत्रो यस्य पुत्रो
बृहद्रथः ॥ ९ ॥ तां गच्छन्तीं नृपगृहं नित्यमेव सरस्वतीम् ॥ सरस्वन्तं ततो लक्ष्म ज्ञात्वाऽन्येषु तथा कृतम् ॥ १० ॥ तस्यै ददावहं शापं
मूया इति महानदी ॥ मच्छापभीता वागीशा प्रागादेवीं च गौतमीम् ॥ ११ ॥ कमण्डलुभवां पूतां मातरं लोकपावनीम् ॥ तापत्रयोपश
मनीमैहिकामुष्मिकप्रदाम् ॥ १२ ॥ सा गत्वा गौतमीं देवीं प्राह मच्छापमादितः ॥ गंगाऽपि मामुवाचेदं विशापां कर्तुमर्हसि ॥ १३ ॥ न युक्तं
मत्सरस्वत्याः शापं त्वं दत्तवानसि ॥ स्त्रीणामेष स्वभावो वै पुंस्कामा योषितो यतः ॥१४॥ स्वभावचपला ब्रह्मन्योषितः सकला अपि ॥ त्वं कथं
तु न जानीषे जगत्स्रष्टाऽम्बुजासन ॥ १५ ॥ विडम्बयति कं वा न कामो वाऽपि स्वभावतः ॥ ततो विशापमवदं दृश्याऽपि स्यात्सरस्वती ॥ १६ ॥
तस्माच्छापान्नदी मर्त्यैं दृश्याऽदृश्या सरस्वती ॥ यत्रैषा संगता देवी गङ्गायां शापविह्वला ॥ १७ ॥ तत्र प्रायान्नृपवरो धार्मिकः स पुरूरवाः ॥
तपस्तप्त्वा समाराध्य देवं सिद्धेश्वरं हरम् ॥ १८ ॥ सर्वान्कामानथावाप गङ्गायाश्च प्रसादतः ॥ ततः प्रभृति तत्तीर्थं पुरूरवसमुच्यते ॥ १९ ॥
सरस्वतीसंगमं च ब्रह्मतीर्थं तदुच्यते ॥ सिद्धेश्वरो यत्र देवः सर्वकामप्रदं तु तत् ॥ २० ॥ इति श्रीब्रह्मपुराणगत गौतमीमाहात्म्ये तीर्थमाहात्म्ये
सरस्वतीसंगमपुरूरवसब्रह्मतीर्थसिद्धेश्वरवर्णनं नामैकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ ब्रह्मोवाच ॥ सावित्री चैव गायत्री श्रद्धा मेधा सरस्वती ॥ एतानि
पञ्च तीर्थानि पुण्यानि मुनयो विदुः ॥ १ ॥ तत्र स्नात्वा च पीत्वा तु मुच्यते सर्वकल्मषात् ॥ सावित्री चैव गायत्री श्रद्धा मेधा सरस्वती ॥ २ ॥ एता
मम सुता ज्येष्ठा धर्मसंस्थानहेतवः ॥ सर्वासामुत्तमां कांचिन्निर्ममे लोकसुन्दरीम् ॥ ३ ॥ तां दृष्ट्वा विकृता बुद्धिर्ममाऽऽसीन्मुनिसत्तम ॥ गृहीतुकामं मां
बाला सा तु दृष्ट्वा पलायिता ॥४॥ मृगीभूता तु सा बाला मृगोऽहमभवं तदा ॥ मृगव्याधोऽभवच्छंभुर्धर्मसंरक्षणाय च ॥५॥ ता मद्भीताः पञ्च सुता
गङ्गा मीयुर्महानदीम् ॥ ततो महेश्वरः प्रायाद्धर्मसंरक्षणाय सः ॥६॥ धनुर्गृहीत्वा सशरमीशोऽपि मृगरूपिणम् ॥ मामुवाच वधिष्ये त्वां मृगव्याधस्तदा
हरः ॥७॥ तत्कर्मणो निवृत्तोऽहं प्रादां कन्यां विवस्वते ॥ सावित्र्याद्याः पञ्च सुता नदीरूपेण संगताः ॥८॥ ता आगताः पुनश्चापि स्वर्गं लोकं ममा
न्तिकम् ॥ यत्र ताः संगता देव्या पञ्च तीर्थानि नारद ॥ ९ ॥ संगतानि च पुण्यानि पञ्च नद्यः सरस्वती ॥ तेषु स्नानं तथा दानं यत्किंचित्कुरुते

नरः ॥१०॥ सर्वकामप्रदं तत्स्यान्नैष्कर्म्यान्मुक्तिदं स्मृतम् ॥ तत्राभवन्मृगव्याधं तीर्थं सर्वार्थदं नृणाम् ॥ स्वर्गमोक्षफलं चान्यद्ब्रह्मतीर्थफलं स्मृतम् ॥
॥११॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्येपंचतीर्थमाहात्म्यनिरूपणं नाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ ब्रह्मोवाच ॥ शमीतीर्थमिति
ख्यातं सर्वपापोपशान्तिदम् ॥ तस्याऽऽख्यानं प्रवक्ष्यामि शृणु यत्नेन नारद ॥ १ ॥ आसीत्प्रियव्रतो नाम क्षत्रियो जयतां वरः ॥ गौतम्या दक्षिणे
तीरे दीक्षां चक्रे पुरोधसा ॥ २ ॥ हयमेध उपक्रान्ते ऋत्विग्भिर्ऋषिभिर्वृते ॥ तस्य राज्ञो महाबाहोर्वसिष्ठस्तु पुरोहितः ॥ ३ ॥ तद्यज्ञवाटमगमद्दा
नवोऽथ हिरण्यकः ॥ तं दानवमभिप्रेक्ष्य देवास्त्विन्द्रपुरोगमाः ॥ ४ ॥ भीताः केचिद्दिवं जग्मुर्हव्यवाट् शमिमाविशत् ॥ अश्वत्थं विष्णुरगमद्ब्रा
नुरकं वटं शिवः ॥ ५ ॥ सोमः पलाशमगमद्गङ्गाम्भो हव्यवाहनः ॥ अश्विनौ तु हयं गृह्य वायसोऽभूद्यमः स्वयम् ॥ ६ ॥ एतस्मिन्नन्तरे तत्र
वसिष्ठो भगवानृषिः ॥ यष्टिमादाय दैतेयान्व्यवारयदथाऽऽज्ञया ॥ ७ ॥ ततः प्रवृत्तः पुनरेव यज्ञो दैत्यो गतः स्वेन बलेन युक्तः ॥
इमानि तीर्थानि ततः शुभानि दशाश्वमेधस्य फलानि दद्युः ॥ ८ ॥ प्रथमं तु शमीतीर्थं द्वितीयं वैष्णवं विदुः ॥ आर्कं शैवं च सौम्यं च वासिष्ठं
सर्वकामदम् ॥ ९ ॥ देवाश्च ऋषयः सर्वे निवृत्ते मखविस्तरे ॥ तुष्टाः प्रोचुर्वसिष्ठं तं यजमानं प्रियव्रतम् ॥ १० ॥ तांश्च वृक्षांस्तां च गङ्गां मुदा
युक्ताः पुनः पुनः ॥ हयमेधस्य निष्पत्त्यै एते याता इतस्ततः ॥ ११ ॥ हयमेधफलं दद्युस्तीर्थानीत्यवदन्सुराः ॥ तस्मात्स्नानेन दानेन तेषु तीर्थेषु
नारद ॥ हयमेधफलं पुण्यं प्राप्नोति न मृषा वचः ॥१२॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये स्वयंभुनारदसंवादे तीर्थमाहात्म्ये शम्यादितीर्थवर्णनं
नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ ब्रह्मोवाच ॥ विश्वामित्रं हरिश्चन्द्रं शुनःशेपं च रोहितम् ॥ वारुणं ब्राह्ममाग्नेयमैन्द्रमैन्दवमैश्वरम् ॥ १ ॥ मैत्रं च
वैष्णवं चैव याम्यमाश्विनमौशनम् ॥ एतेषां पुण्यतीर्थानां नामधेयं शृणुष्व मे ॥ २ ॥ हरिश्चन्द्र इति त्वासीदिक्ष्वाकुप्रभवो नृपः ॥ तस्य गेहमनु
प्राप्तौ नारदः पर्वतस्तथा ॥ कृत्वाऽऽतिथ्यं तयोः सम्यग्धरिश्चन्द्रोऽब्रवीदृषी ॥ ३ ॥ ॥ हरिश्चन्द्र उवाच ॥ पुत्रार्थं क्लिश्यते लोकः किं पुत्रेण
भविष्यति ॥ ज्ञानी वाऽप्यथवाऽज्ञानी उत्तमो मध्यमोऽथवा ॥ एतं मे संशयं नित्यं ब्रूतामृषिवरावुभौ ॥ ४ ॥ ॥ ब्रह्मोवाच ॥ तावब्रूतां हरिश्चन्द्रं
पर्वतो नारदस्तथा ॥ ५ ॥ ॥ नारदपर्वतावूचतुः ॥ एकधा दशधा राजञ्छतधा च सहस्रधा ॥ उत्तरं विद्यते सम्यक्तथाऽप्येतदुदीर्यते ॥ ६ ॥
नापुत्रस्य परो लोको विद्यते नृपसत्तम ॥ इहलोकश्च नास्त्येव तस्य दुष्कृतकर्मणः ॥ जाते पुत्रे पिता स्नानं यः करोति जनाधिप ॥ ७ ॥ दशाना
मश्वमेधानामभिषेकफलं लभेत् ॥ आत्मप्रतिष्ठा पुत्रात्स्याज्जायते चामरोत्तमः ॥ ८ ॥ अमृतेनामरा देवाः पुत्रेण ब्राह्मणादयः ॥ त्रिऋणान्मोचये

त्पुत्रः पितरं च पितामहान् ॥ ९ ॥ किंतु मूलं किमु जलं किंतु श्मश्रूणि किं तपः ॥ विना पुत्रेण राजेन्द्र स्वर्गो मुक्तिः सुतः स्मृतः ॥ १० ॥ पुत्र एव परो लोको धर्मः कामोऽर्थ एव च ॥ पुत्रो मुक्तिः परं ज्योतिस्तारकः सर्वदेहिनाम् ॥ ११ ॥ विना पुत्रेण राजेन्द्र स्वर्गमोक्षौ सुदुर्लभौ ॥ पुत्र एव परो लोके धर्मकामार्थसिद्धये ॥१२॥ विना पुत्रेण यद्दत्तं विना पुत्रेण यद्धुतम् ॥ विना पुत्रेण यज्जन्म व्यर्थं तदवभाति मे ॥ ऋणात्पुत्रेण निष्कृतिर्विरजाश्च प्रजा यतः ॥ १३ ॥ पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम् ॥ ये भोगा मानुषे लोके ये भोगाश्चांतरिक्षगाः ॥ तान्सर्वान्समवाप्नोति पिता पुत्रावलोकनात् ॥ १४ ॥ तस्मात्पुत्रसमं किंचित्काम्यं नास्ति जगत्त्रये ॥ तच्छ्रुत्वा विस्मितमनास्तावुवाच नृपः पुनः ॥ १५ ॥ ॥ हरिश्चन्द्र उवाच ॥ कथं मे स्यात्सुतो ब्रूतां यत्र क्वापि यथातथम् ॥ येन केनाप्युपायेन कृत्वा किंचित्तु पौरुषम् ॥ मन्त्रेण यागदानाभ्यामुत्पांद्योऽसौ सुतो मया ॥ ॥ १६ ॥ ॥ ब्रह्मोवाच ॥ तावूचतुर्नृपश्रेष्ठं हरिश्चन्द्रं सुतार्थिनम् ॥ ध्यात्वा क्षणं तथा सम्यग्गौतमीं याहि मानद ॥१७॥ तत्रापांपतिरुत्कृष्टं ददाति मनसि स्थितम् ॥ वरुणः सर्वदाता वै मुनिभिः परिकीर्तितः ॥ १८ ॥ स तु प्रीतः शनैः काले तव पुत्रं प्रदास्यति ॥ एतच्छ्रुत्वा नृपश्रेष्ठोमुनिवाक्यं तथाऽकरोत् ॥ १९ ॥ तोषयामास वरुणं गौतमीतीरमाश्रितः ॥ ततश्च तुष्टो वरुणो हरिश्चन्द्रमुवाच ह ॥ २० ॥ ॥ वरुण उवाच ॥ पुत्रं दास्यामि ते राजंस्त्वमपुत्रो यतव्रतः ॥ यदि यक्ष्यसि तेनैव तव पुत्रो भवेद्ध्रुवम् ॥ २१ ॥ ॥ ब्रह्मोवाच ॥ हरिश्चन्द्रोऽपि वरुणं यक्ष्ये तेनेत्यवोचत ॥ ततो गत्वा हरिश्चन्द्रश्वरुं कृत्वा तु वारुणम् ॥ २२ ॥ भार्यायै नृपतिः प्रादात्ततो जातः सुतो नृपात् ॥ जाते पुत्रे अपामीशः प्रोवाच वदतां वरः ॥ २३ ॥ वरुण उवाच ॥ अद्यैव पुत्रो यष्टव्यः स्मरसे वचनं पुरा ॥ २४ ॥ ॥ ब्रह्मोवाच ॥ हरिश्चन्द्रोऽपि वरुणं प्रोवाचेदं क्रमागतम् ॥ २५ ॥ ॥ हरिश्चन्द्र उवाच ॥ निर्दशो मेध्यतां याति पशुर्यक्ष्ये ततो ह्यहम् ॥ २६ ॥ ॥ ब्रह्मोवाच ॥ तच्छ्रुत्वा वचनं राज्ञो वरुणोऽगात्स्वमालयम् ॥ निर्दशे पुनरभ्येत्य यजस्वेत्याह तं नृपम् ॥ २७ ॥ राजाऽपि वरुणं प्राह निर्दन्तो निष्फलः पशुः ॥ पशोर्दन्तेषु जातेषु एहि गच्छाधुनाऽप्पते ॥ २८ ॥ तच्छ्रुत्वा राजवचनं पुनः प्रायादपांपतिः ॥ जातेषु चैव दन्तेषु सप्तवर्षेषु नारद ॥२९॥ पुनरप्याह राजानं यजस्वेति ततोऽब्रवीत् ॥ राजाऽपि वरुणं प्राह पत्स्यन्तीमे अपांपते ॥ ३० ॥ संपत्स्यन्ति तथा चान्ये ततो यक्ष्ये व्रजाधुना ॥ पुनः प्रायात्स वरुणः पुनर्दन्तेषु नारद ॥ यजस्वेति नृपं प्राह राजा प्राह त्वपांपतिम् ॥ ३१ ॥ ॥ राजोवाच ॥ यदा तु क्षत्रियो यज्ञे पशुर्भवति वारिप ॥ धनुर्वेदं यदा वेत्ति तदा स्यात्पशुरुत्तमः ॥ ३२ ॥ ब्रह्मोवाच ॥ तच्छ्रुत्वा राजवचनं वरुणोऽगात्स्वमालयम् ॥ यदाऽस्त्रेषु च शस्त्रेषु समर्थोऽभूत्स रोहितः ॥ ३३ ॥ सर्ववेदेषु शास्त्रेषु वेत्ताऽभूत्स त्व

रिंदमः ॥ युवराज्यमनुप्राप्ते रोहिते षोडशाब्दिके ॥ ३४ ॥ प्रीतिमानगमत्तत्र यत्र राजा सरोहितः ॥ आगत्य वरुणः प्राह यजस्वाद्य सुतं स्वकम् ॥
॥ ३५ ॥ ओमित्युक्त्वा नृपवर ऋत्विजः प्राह भूपतिः ॥ रोहितं च सुतं ज्येष्ठं शृण्वतो वरुणस्य च ॥ ३६ ॥ ॥ हरिश्चन्द्र उवाच ॥ एहि पुत्र
महावीर यक्ष्ये त्वां वरुणाय हि ॥ ३७ ॥ ॥ ब्रह्मोवाच ॥ किमेतदित्यथोवाच रोहितः पितरं प्रति ॥ पिताऽपि तद्यथावृत्तमाचचक्षे सविस्तरम् ॥
रोहितः पितरं प्राह शृण्वतो वरुणस्य च ॥ ३८ ॥ ॥ रोहित उवाच ॥ अहं पूर्वं महाराज ऋत्विग्भिः सपुरोहितः ॥ विष्णवे लोकनाथाय यक्ष्येऽहं
त्वरितं शुचिः ॥ पशुना वरुणेनाथ तदनज्ञातुमर्हसि ॥ ३९ ॥ ॥ ब्रह्मोवाच ॥ रोहितस्य तु तद्वाक्यं श्रुत्वा वारीश्वरस्तदा ॥ कोपेन महताऽऽविष्टो
जलोदरमथाकरोत् ॥ ४० ॥ हरिश्चन्द्रस्य नृपते रोहितः स वनं ययौ ॥ गृहीत्वा स धनुर्दिव्यं रथारूढो गतव्यथः ॥ ४१ ॥ यत्र चाऽऽराध्य वरुणं
हरिश्चन्द्रो जनेश्वरः ॥ गंगायां प्राप्तवान्पुत्रं तत्रागात्सोऽपि रोहितः ॥ ४२ ॥ व्यतीतान्यथ वर्षाणि पञ्च षष्ठे प्रवर्तति ॥ तत्र स्थित्वा नृपसुतः
शुश्राव नृपते रुजम् ॥ ४३ ॥ मया पुत्रेण जातेन पितुर्वै क्लेशकारिणा ॥ किं फलं किं नु कृत्यं स्यादित्येवं पर्यचिन्तयत् ॥ ४४ ॥ तस्यास्तीरे
ऋषीन्पुण्यानपश्यन्नृपतेः सुतः ॥ गङ्गातीरे चाटमानपश्यदृषिसत्तमम् ॥ ४५ ॥ अजीगर्तमिति ख्यातमृषेस्तु वयसः सुतम् ॥ त्रिभिः पुत्रैरनुवृतं
भार्यया क्षीणवृत्तिकम् ॥ तं दृष्ट्वा नृपतेः पुत्रो नमस्येदं वचोऽब्रवीत् ॥ ४६ ॥ ॥ रोहित उवाच ॥ क्षीणवृत्तिः कृशः कस्माद्दुर्मना इव लक्ष्यसे ॥
॥ ४७ ॥ ब्रह्मोवाच ॥ अजीगर्तोऽपि चोवाच रोहितं नृपतेः सुतम् ॥ ४८ ॥ ॥ अजीगर्त उवाच ॥ वर्तनं नास्ति देहस्य भोक्तारो बहवश्च मे ॥
विनाऽन्नेन मरिष्यामो ब्रूहि किं करवामहे ॥ ४९ ॥ ॥ ब्रह्मोवाच ॥ तच्छ्रुत्वा पुनरप्याह नृपपुत्र ऋषिं तदा ॥ ५० ॥ ॥ रोहित उवाच ॥ तव किं
वर्तते चित्ते तद्ब्रूहि वदतांवर ॥ ५१ ॥ ॥ अर्जीगर्त उवाच ॥ हिरण्यं रजतं गावो धान्यं वस्त्रादिकं न मे ॥ विद्यते नृपशार्दूल वर्तनं नास्ति मे
ततः ॥ ५२ ॥ सुता मे सन्ति भार्या च अहं वै पञ्चमस्तथा ॥ नैतेषां क्रतमस्यापि क्रेताऽन्नेन नृपोत्तम ॥ ५३ ॥ ॥ रोहित उवाच ॥ किं क्रीणा
सि महाबुद्धेऽजीगर्त सत्यमेव मे ॥ वद नान्यच्च वक्तव्यं विप्रा वै सत्यवादिनः ॥ ५४ ॥ ॥ अजीगर्त उवाच ॥ त्रयाणामपि पुत्राणामेकं वा मांत थै
व च ॥ भार्यां वाऽपि गृहाणेमां क्रीत्वा जीवामहे वयम् ॥ ५५ ॥ ॥ रोहित उवाच ॥ किं भार्यया महाबुद्धे किं त्वया वृद्धरूपिणा ॥ युवानं देहि
पुत्रं मे पुत्राणां यं त्वमिच्छसि ॥ ५६ ॥ ॥ अजीगर्त उवाच ॥ ज्येष्ठपुत्रं शुनःपुच्छं नाहं क्रीणामि रोहित ॥ माता कनीयसं चापि न क्रीणाति ततो
नयोः ॥ मध्यमं तु शुनःशेपं क्रीणामि वद तद्धनम् ॥ ५७ ॥ ॥ रोहित उवाच ॥ वरुणाय पशुः कल्प्यः पुरुषो गुणवत्तरः ॥ यदि क्रीणासि मूल्यं

वं वद सत्यं महामुने ॥ ५८ ॥ ॥ ब्रह्मोवाच ॥ तथेत्युक्त्वा त्वजीगर्तः पुत्रमूल्यमकल्पयत् ॥ गवां सहस्रं धान्यानां निष्काणां चापि वाससाम् ॥
राजपुत्र वरं देहि दास्यामि स्वसुतं तव ॥ ५९ ॥ ॥ ब्रह्मोवाच ॥ तथेत्युक्त्वा रोहितोऽपि प्रादात्सवसनं धनम् ॥ दत्त्वा जगाम पितरमृषि
त्रेण रोहितः ॥ पित्रे निवेदयामास क्रयक्रीतमृषेः सुतम् ॥ ६० ॥ ॥ रोहित उवाच ॥ वरुणाय यजस्व त्वं पशुना त्वमरुग्भव ॥ ६१ ॥
। ब्रह्मोवाच ॥ तदोवाच हरिश्चन्द्रः पुत्रवाक्यादनन्तरम् ॥ ६२ ॥ ॥ हरिश्चन्द्र उवाच ॥ ब्राह्मणाः क्षत्रिया वैश्या राज्ञा पाल्या इति श्रुतिः ॥ विशे
तस्तु वर्णानां गुरवो हि द्विजोत्तमाः ॥ ६३ ॥ विष्णोरपि हि ये पूज्या मादृशाः कुत एव हि ॥ अवज्ञयाऽपि येषां स्यान्नृपाणां स्वकुलक्षयः ॥
। ६४ ॥ सर्वतीर्थमया विप्राः सर्वदेवमयास्तथा ॥ नरके पततां पुंसां रक्षितारस्त एव हि ॥ ६५ ॥ तान्पशून्कृत्य कृपणं कथं रक्षितुमुत्सहे ॥
महं च ब्राह्मणं कुर्यां पशुं नैतद्धि युज्यते ॥ ६६ ॥ वरं रुजाहि मरणं न कथंचिद्विजं पशुम् ॥ करोमि तस्मात्पुत्र त्वं ब्राह्मणेन सुखं व्रज ॥ ६७ ॥
। ब्रह्मोवाच ॥ एतस्मिन्नन्तरे तत्र वागुवाचाशरीरिणी ॥ ६८ ॥ ॥ आकाशवागुवाच ॥ गौतमीं गच्छ राजेन्द्र ऋत्विग्भिः सपुरोहितः ॥ पशुना
विप्रपुत्रेण रोहितेन सुतेन च ॥ ६९ ॥ त्वयाः कार्यः क्रतुश्चैव शुनःशेपवधं विना ॥ क्रतुः पूर्णो भवेत्तत्र तस्माद्याहि महामते ॥ ७० ॥ ब्रह्मोवाच ॥
च्छुत्वा वचनं शीघ्रमगाद्गंगां नृपोत्तमः ॥ विश्वामित्रेण ऋषिणा वसिष्ठेन पुरोधसा ॥ ७१ ॥ वामदेवेन ऋषिणा तथाऽन्यैर्मुनिभिः सह ॥ प्राप्य
गङ्गां गौतमीं तां नरमेधाय दीक्षितः ॥ ७२ ॥ वेदिमण्डपकुण्डादि यूपपश्वादि चाकरोत् ॥ कृत्वा सर्वं यथान्यायं तस्मिन्यज्ञे प्रवर्तिते ॥ ७३ ॥
शुनःशेपं पशुं यूपे निबध्याथ समन्त्रकम् ॥ वारिभिः प्रोक्षितं दृष्ट्वा विश्वामित्रोऽब्रवीदिदम् ॥ ७४ ॥ विश्वामित्र उवाच ॥ देवानृषीन्हरिश्चन्द्रं
रोहितं च विशेषतः ॥ अनुजानन्त्विमं सर्वे शुनःशेपं द्विजोत्तमम् ॥ ७५ ॥ येभ्यस्त्वयं हविर्दैयो देवेभ्योऽयं पृथक्पृथक् ॥ अनुजानन्तु ते सर्वे शुन
शेपं विशेषतः ॥ ७६ ॥ वसाभिर्लोमभिस्त्वग्भिर्मांसैः सन्मन्त्रैर्मखे ॥ अग्नौ होष्यः पशुश्चायं शुनःशेपो द्विजोत्तमः ॥ ७७ ॥ वपासिताः स्युर्वि
देन्द्रास्ते सर्वे त्वनुमन्य माम् ॥ गौतमीं यान्तु विप्रेन्द्राः स्नात्वा देवान्पृथक्पृथक् ॥ ७८ ॥ मन्त्रैः स्तोत्रैः स्तुवन्तस्ते मुदं यान्तु शिवे
रताः ॥ एनं रक्षन्तु मुनयो देवाश्च हविषो भुजः ॥ ७९ ॥ ॥ ब्रह्मोवाच ॥ तथेत्यूचुश्च मुनयो मेने च नृपसत्तमः ॥ ततो गत्वा शुनःशेपो गंगां त्रैलो
क्यपावनीम् ॥ ८० ॥ स्नात्वा तुष्टाव तान्देवान्ये तत्र हविषो भुजः ॥ ततस्तुष्टाः सुरगणाः शुनःशेपं च ते मुने ॥ अवदन्त सुराः सर्वे विश्वामि
त्रस्य शृण्वतः ॥ ८१ ॥ ॥ सुरा ऊचुः ॥ क्रतुः पूर्णो भवत्वेष शुनःशेपवधं विना ॥ ८२ ॥ ॥ ब्रह्मोवाच ॥ विशेषेणाथ वरुणश्चावदन्नृपसत्त

मम् ॥ ततः पूर्णोऽभवद्राज्ञो नृमेधो लोकविश्रुतः ॥ ८३ ॥ देवानां च प्रसादेन मुनीनां च प्रसादतः ॥ तीर्थस्य तु प्रसादेन राज्ञः पूर्णोऽभव
त्क्रतुः ॥ ८४ ॥ विश्वामित्रः शुनःशेपं पूजयामास संसदि ॥ अकरोदात्मनः पुत्रं पूजयित्वा सुरान्तिके ॥ ८५ ॥ ज्येष्ठं चकार पुत्राणामात्मनः
स तु कौशिकः ॥ न मेनिरे ये च पुत्रा विश्वामित्रस्य धीमतः ॥ ८६ ॥ शुनःशेपस्य च ज्यैष्ठ्यं ताञ्शशाप स कौशिकः ॥ ज्यैष्ठ्यं ये मेनिरे
पुत्राः पूजयामास तान्सुतान् ॥ ८७ ॥ वरेण मुनिशार्दूलस्तदेतत्कथितं मया ॥ एतत्सर्वं यत्र वृत्तं गौतम्या दक्षिणे तटे ॥ ८८ ॥ तत्र तीर्थानि
पुण्यानि विख्यातानि सुरादिभिः ॥ बहूनि तेषां नामानि मत्तः शृणु महामते ॥ ८९ ॥ हरिश्चन्द्रं शुनःशेपं विश्वामित्रं सरोहितम् ॥ इत्याद्यष्ट
सहस्राणि तीर्थान्यथ चतुर्दश ॥ ९० ॥ तेषुं स्नानं च दानं च नरमेधफलप्रदम् ॥ आख्यातं चास्य माहात्म्यं तीर्थस्य मुनिसत्तम ॥ ९१ ॥ यः
पठेत्पाठयेद्वाऽपि शृणुयाद्वापि भक्तितः॥ अपुत्रः पुत्रमाप्नोति यच्चान्यन्मनसः प्रियम् ॥९२॥ इति श्रीब्रह्मपुराणगत गौतमीमाहात्म्ये स्वयंभुनारदसं
वादे तीर्थमाहात्म्ये विश्वामित्रादिद्विार्विंशतिसहस्रतीर्थवर्णनं नाम चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥ ब्रह्मोवाच ॥ सोमतीर्थमिति ख्यातं पितॄणां प्रीतिवध
नम् ॥ तत्र वृत्तं महापुण्यं शृणु यत्नेन नारद ॥ १ ॥ सोमो राजाऽमृतमयो गन्धर्वाणां पुराऽभवत् ॥ न देवानां तदा देवा मामभ्येत्येदमब्रुवन् ॥२॥
॥ देवा ऊचुः ॥ गन्धर्वैराहृतः सोमो देवानां प्राणदः पुरा ॥ तमध्यायन्सुरगणा ऋषयस्त्वतिदुःखिताः ॥ यथा स्यात्सोमो ह्यस्माकं तथा नीतिर्वि
धीयताम् ॥ ३ ॥ ॥ ब्रह्मोवाच ॥ तत्र वाग्विबुधानाह गन्धर्वाः स्त्रीषु कामुकाः ॥ तेभ्यो दत्त्वाऽथ मां देवाः सोममाहर्तुमर्हथ ॥ ४ ॥ वाचं प्रत्यू
चुरमरास्त्वां दातुं न क्षमा वयम् ॥ विना तेनापि न स्थातुं शक्यं नैव त्वया विना ॥ ५ ॥ पुनर्वागब्रवीद्देवान्पुनरेष्याम्यहं त्विह ॥ अत्र बुद्धिर्वि
धातव्या क्रियतां क्रतुरुत्तमः ॥ ६ ॥ गौतम्या दक्षिणे तीरे भवेद्देवागमो यदि ॥ मखं तु विषयं कृत्वा आयान्तु सुरसत्तमाः ॥ ७ ॥
गन्धर्वाः स्त्रीप्रिया नित्यं पणध्वं तं मया सह ॥ तथेत्युक्त्वा सुरगणाः सरस्वत्या वचःस्थिताः ॥ ८ ॥ देवदूतैः पृथग्देवान्यक्षान्ग
न्धर्वपन्नगान् ॥ आह्वानं चक्रिरे तत्र पुण्ये देवगिरौ तदा ॥ ९ ॥ ततो देवगिरिर्नाम पर्वतस्याभवन्मुने ॥ तत्राऽऽगमन्सुरगणा गन्धर्वा
यक्षराक्षसाः ॥ १० ॥ देवाः सिद्धाश्च ऋषयस्तथाऽष्टौ देवयोनयः ॥ ऋषिभिर्गौतमीतीरे क्रियमाणे महाध्वरे ॥ ११ ॥ तत्र देवैः परि
वृतः सहस्राक्षोऽभ्यभाषत ॥ १२ ॥ ॥ इन्द्र उवाच ॥ गन्धर्वानथ संपूज्य सरस्वत्याः समीपतः ॥ सरस्वत्या पणध्वं नो युष्माकममृ
तात्मना ॥ १३ ॥ ॥ ब्रह्मोवाच ॥ तच्छक्रवचनात्ते वै गन्धर्वाः स्त्रीषु कामुकाः ॥ सोमं दत्त्वा सुरेभ्यस्तु जगृहुस्तां सरस्वतीम् ॥ १४ ॥

सोमोऽभवच्चामराणां गन्धर्वाणां सरस्वती ॥ अवसत्तत्र वागीशा तथाऽपि च सुरान्तिके ॥ १५ ॥ आयाति च रहो नित्यमुपांशु क्रियतामिति ॥
अत एव हि सोमस्य क्रयो भवति नारद ॥ १६ ॥ उपांशुना वर्तितव्यं सोमक्रयण एव हि ॥ ततोऽभवद्देवतानां सोमश्चापि सरस्वती ॥ १७ ॥
गन्धर्वाणां नैव सोमो नैवाऽऽसीच्च सरस्वती ॥ तत्रागमन्सर्व एव सोमार्थं गौतमीतटम् ॥ १८ ॥ गावो देवाः पर्वता यक्षरक्षाः सिद्धाः साध्या
मुनयो गुह्यकाश्च ॥ गन्धर्वास्ते मरुतः पन्नगाश्च सर्वौषध्यो मातरो लोकपालाः ॥ रुद्रादित्या वसवश्चाश्विनौ च येऽन्ये देवा यज्ञभागस्य
योग्याः ॥ १९ ॥ पञ्चविंशतिनद्यस्तु गङ्गायां संगता मुने ॥ पूर्णाहुतिर्यत्र दत्ता पूर्णाख्यानं तदुच्यते ॥ २० ॥ गौतम्यां संगता यास्तु सर्वाश्चापि
यथोदिताः ॥ तन्नामधेयतीर्थानि संक्षेपाच्छृणु नारद ॥ २१ ॥ सोमतीर्थं च गान्धर्वं देवतीर्थमतः परम् ॥ पूर्णातीर्थं ततः शालं श्रीपर्णासंगमं
तथा ॥ २२ ॥ इलायाः संगमं पुण्यं कुसुमायाश्च संगमम् ॥ पुष्टिसंगममाख्यातं कर्णिकासंगमं शुभम् ॥ २३ ॥ वैणवीसंगमश्चैव कृशरासंगम
स्तथा ॥ वासवीसंगमश्चैव शिवशर्या तथा शिखी ॥ २४ ॥ कुसुम्भिका उपारथ्या शान्तिजा देवजा तदा ॥ अजो वृद्धः सुरो भद्रो गौतम्या
सह संगताः ॥ २५ ॥ एते चान्ये च बहवो नदीनदसहायगाः ॥ पृथिव्यां यानि तीर्थानि ह्यगमन्देवपर्वते ॥ २६ ॥ सोमार्थं वै तथा चान्येऽप्या
गमन्मखमण्डपम् ॥ तानि तीर्थानि गङ्गायां संगतानि यथाक्रमम् ॥२७॥ नदीरूपेण कान्येव नदरूपेण कानिचित् ॥ सरोरूपेण कान्यत्र स्रवरूपेण
कानिचित् ॥ २८ ॥ तान्येव सर्वतीर्थानि विख्यातानि पृथक्पृथक् ॥ तेषु स्नानं जपो होमः पितृतर्पणमेव च ॥ २९ ॥ सर्वकामप्रदं पुंसां भुक्तिदं
मुक्तिभाजनम् ॥ एतेषां पठनं चापि स्मरणं वा करोति यः ॥३०॥ सर्वपापविनिर्मुक्तो याति विष्णुपुरं जनः॥ पूर्णाप्रवरयोर्मध्ये नद्यो विंशतिरीरिताः॥
सुतास्ता देवनद्यस्तु पञ्चविंशतिरीरिताः ॥ ३१ ॥ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये स्वयंभुनारदसंवादे तीर्थमाहात्म्ये पूर्णादिपञ्च
विंशतिनदीदेवनदीनदसंगमवर्णनं नाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥ ॥ ब्रह्मोवाच ॥ प्रवरासंगमो नाम श्रेष्ठा चैव महानदी ॥ यत्र सिद्धेश्वरोदेवः सर्व
लोकोपकारकृत् ॥ १ ॥ देवानां दानवानां च संगमोऽभूत्सुदारुणः ॥ तेषां परस्परं वाऽपि प्रीतिश्चाभून्महामुने ॥ २ ॥ तेऽप्येवं मन्त्रयामासुर्देवा
वै दानवा मिथः ॥ मेरुपर्वतमासाद्य परस्पराहितैषिणः ॥ ३ ॥ ॥ देवदैत्या ऊचुः ॥ अमृतेनामरत्वं स्यादुत्पाद्यामृतमुत्तमम् ॥ पिबामः सर्व
एवैते भवामश्चामरा वयम् ॥ ४ ॥ एकीभूत्वा वयं लोकान्पालयामः सुखानि च ॥ प्राप्स्यामः संगरं हित्वा संगरो दुःखकारणम् ॥ ५ ॥ प्रीत्यो
चैवार्जितानर्थान्भोक्ष्यामो गतमत्सराः ॥ यतः स्नेहेन वृत्तिर्या साऽस्माकं सुखदा सदा ॥ ६ ॥ वैपरीत्यं तु यद्वृत्तं न स्मर्तव्यं कदाचन ॥ न च

त्रैलोक्यराज्येऽपि केवल्ये वा सुखं मनाक् ॥ तदूर्ध्वमपि वा यत्तु निर्वैरत्वादवाप्यते ॥ ७ ॥ ॥ ब्रह्मोवाच ॥ एवं परस्परं प्रीताः सन्तो देवाश्च दानवाः ॥ एकीभूताश्च सुप्रीता निर्मथ्य वरुणालयम् ॥ ८ ॥ मन्थानं मन्दरं कृत्वा रज्जुं कृत्वा तु वासुकिम् ॥ देवाश्च दानवाः सर्वे ममन्थुर्वरुणालयम् ॥ ९ ॥ उत्पन्नं च ततः पुण्यममृतं सुरवल्लभम् ॥ निष्पन्ने चामृते पुण्ये ते च प्रोचुः परस्परम् ॥ १० ॥ यामः स्वं स्वमधिष्ठानं कृतकार्याः श्रमं गताः ॥ सर्वे समं च सर्वेभ्यो यथायोग्यं विभज्यताम् ॥ ११ ॥ यदा सर्वागमो यत्र यस्मिन्नेँग्ने शुभावहे ॥ विभज्यतामिदं पुण्यममृतं सुरसत्तमाः ॥ ॥ १२ ॥ इत्युक्त्वा ते ययुः सर्वे दैत्यदानवराक्षसाः ॥ गतेषु दैत्यसंघेषु देवाः सर्वेऽन्वमन्त्रयन् ॥ १३ ॥ ॥ देवा ऊचुः ॥ गतास्ते रिपवोऽस्माकं विश्वस्यास्मास्वरिंदमाः ॥ रिपूणाममृतं नैव देयं भवति सर्वथा ॥ १४ ॥ ॥ ब्रह्मोवाच ॥ बृहस्पतिस्तथेत्याह पुनराह सुरानिदम् ॥ १५ ॥ ॥ बृहस्पतिरुवाच ॥ न जानन्ति यथा पापाः पिबध्वं च तथाऽमृतम् ॥ अयमेवोचितो मन्त्रो यच्छत्रूणां पराभवः ॥ १६ ॥ द्वेष्याः सर्वात्मना द्वेष्या इति नीतिविदो विदुः ॥ न विश्वास्या न चाऽऽख्येया नैव मन्त्र्याश्च शत्रवः ॥ १७ ॥ ...यो न देयममृतं भवेयुरमरास्ततः ॥ अमरेषु च जातेषु तेषु दैत्येषु शत्रुषु ॥ ताञ्जेतुं नैव शक्ष्यामो न देयममृतं ततः ॥ १८ ॥ ॥ ब्रह्मोवाच ॥ इति संमन्त्र्य ते देवा वाचस्पतिमथाब्रुवन् ॥ १९ ॥ ॥ देवा ऊचुः ॥ क्व यामः कुत्र मन्त्रः स्यात्क्व पिबामः क्व संस्थितिः ॥ कुर्मस्तदेव प्रथमं वद वाचस्पते तथा ॥ २० ॥ ॥ बृहस्पतिरुवाच ॥ यान्तु ब्रह्माणममराः पृच्छन्त्वत्र गतिं पराम् ॥ स तु ज्ञाता च वक्ता च दाता चैव पितामहः ॥ २१ ॥ ॥ ब्रह्मोवाच ॥ बृहस्पतेर्वचः श्रुत्वा मदन्तिकमथाऽगमन् ॥ नमस्य मां सुराः सर्वे यद्वृत्तं तन्न्यवेदयन् ॥ २२ ॥ तद्देववचनात्पुत्र तैः सुरैरगमं हरिम् ॥ विष्णवे कथितं सर्वं शंभवे विषहारिणे ॥ २३ ॥ अहं विष्णुश्च शंभुश्च देवगन्धर्वकिंनरैः ॥ मेरुकंदरमागत्य न जानन्ति यथाऽसुराः ॥ २४ ॥ रक्षकं च हरिं कृत्वा सोमपानाय तस्थिरे ॥ आदित्यस्तत्र विज्ञाता सोमभोज्यानथेतरान् ॥ २५ ॥ सोमो दाताऽमृतं भागं चक्रधृग्रक्षकस्त्वभूत् ॥ नैव जानन्ति तद्दैत्या दनुजा राक्षसास्तथा ॥ २६ ॥ विना राहुं महाप्राज्ञं सैंहिकेयं च सोमपम् ॥ कामरूपधरो राहुर्मरुतां मध्यमाविशत् ॥ २७ ॥ मरुद्रूपं समास्थाय पानपात्रधरस्तदा ॥ ज्ञात्वा दिवाकरो दैत्यं तं सोमाय न्यवेदयत् ॥ २८ ॥ तदा तदमृतं तस्मै दैत्यायादैत्यरूपिणे ॥ दत्त्वा सोमं तदा सोमो विष्णवे तन्न्यवेदयत् ॥ २९ ॥ विष्णुः पीतामृतं दैत्यं चक्रेणोद्यम्य तच्छिरः ॥ चिच्छेद तरसा वत्स तच्छिरस्त्वमरं त्वभूत् ॥ ॥ ३० ॥ शिरोमात्रविहीनं यद्देहं तदपतद्भुवि ॥ देहं तदमृतस्पृष्टं पतितं दक्षिणे तटे ॥ ३१ ॥ गौतम्या मुनिशार्दूलाकम्पयद्वसुधातलम् ॥ देहं

चाप्यमरं पुत्र तदद्भुतमिवाभवत् ॥ ३२ ॥ देहं च शिरसोऽपेक्षि शिरो देहमपेक्षते ॥ उभयं चामरं जातं दैत्यश्चायं महाबलः ॥ ३३ ॥ शिरः काये
समाविष्टं सर्वान्भक्षयते सुरान् ॥ तस्मादेहमिदं पूर्वं नाशयामो महीगतम् ॥ ततस्ते शंकरं प्राहुर्देवाः सर्वे ससंभ्रमाः ॥ ३४ ॥ ॥ देवा ऊचुः ॥
महीगतं दैत्यदेहं नाशयस्व सुरोत्तम ॥ त्वं देव करुणासिन्धुः शरणागतरक्षकः ॥ ३५ ॥ शिरसा नैव भुज्येत दैत्यदेहं तथा कुरु ॥ ३६ ॥
ब्रह्मोवाच ॥ प्रेषयामास चेशोऽपि श्रेष्ठां शक्तिं तदाऽऽत्मनः ॥ मातृभिः सहितां देवीं मातरं लोकपालिनीम् ॥ ३७ ॥ ईशायुधधरा देवी ईशशक्तिसमन्विता ॥ महीगतं यत्र देहं तत्रागाद्रक्ष्यकाङ्क्षिणी ॥ ३८ ॥ शिरोमात्रं सुराः सर्वे मेरौ तत्रैव सान्त्वयन् ॥ देहो देव्या पुनस्तत्र युयुधे बहवः
समाः ॥ ३९ ॥ राहुस्तत्र सुरानाह भित्त्वा देहं पुरा मम ॥ अत्राऽऽस्ते रसमुत्कृष्टं तदाकृष्य शरीरतः ॥ ४० ॥ पृथक्भूते रसे देहं प्रवरेऽमृतमुत्तम् ॥ भस्मीभूयात्क्षणेनैव तस्मात्कुर्वन्तु तत्पुरा ॥ ४१ ॥ ब्रह्मोवाच ॥ एतद्राहुवचः श्रुत्वा प्रीताः सर्वेऽसुरारयः ॥ अभ्यषिञ्चन्ग्रहाणां त्वं ग्रहो
भूया मुदाऽन्वितः ॥ ४२ ॥ तद्देववचनाच्छक्तिरीश्वरी या निगद्यते ॥ देहं भित्त्वा दैत्यपतेः सुरशक्तिसमन्विता ॥ ४३ ॥ आकृष्य शीघ्रमुत्कृष्टं
प्रवरं चामृतं बहिः ॥ स्थापयित्वा तु तद्देहं भक्षयामास चाम्बिका ॥ ४४ ॥ कालरात्रिर्भद्रकाली प्रोच्यते या महाबला ॥ स्थापितं रसमुत्कृष्टं
रसानां प्रवरं रसम् ॥ ४५ ॥ व्यस्रवत्स्थापितं तत्तु प्रवरा साऽभवन्नदी ॥ आकृष्टममृतं चैव स्थापितं साऽप्यभक्षयत् ॥ ४६ ॥ ततः श्रेष्ठा नदी
जाता प्रवरा चामृता शुभा ॥ राहुदेहसमुद्भूता रुद्रशक्तिसमन्विता ॥ ४७ ॥ नदीनां प्रवरा रम्या चामृता प्रेरिता तथा ॥ तत्र पञ्च सहस्राणि तीर्था
नि गुणवन्ति च ॥ ४८ ॥ तत्र शंभुः स्वयं तस्थौ सर्वदा सुरपूजितः ॥ तस्यै तुष्टाः सुराः सर्वे देव्यै नद्यै पृथक्पृथक् ॥ ४९ ॥ वरान्ददुर्मुदा युक्ता
यथा पूजामवाप्स्यति ॥ शंभुः सुरपतिर्लोके तथा पूजामवाप्स्यसि ॥ ५० ॥ निवासं कुरु देवि त्वं लोकानां हितकाम्यया ॥ सदा तिष्ठ रसेशानि
सर्वेषां सर्वसिद्धिदा ॥ ५१ ॥ स्तवनात्कीर्तनाद्ध्यानात्सर्वकामप्रदायिनी ॥ त्वां नमस्यन्ति ये भक्त्या किंचिदापेक्ष्य सर्वदा ॥ ५२ ॥ तेषां
सर्वाणि कार्याणि भवेयुर्दैवताज्ञया ॥ शिवशक्त्योर्यतस्तस्मिन्निवासोऽभूत्सनातनः ॥ ५३ ॥ अतो वदन्ति मुनयो निवासपुरमित्यदः ॥ प्रवरायाः
पुरा देवाः सुप्रीतास्ते वरान्ददुः ॥ ५४ ॥ गङ्गायाः संगमो यस्ते विख्यातः सुरवल्लभः ॥ तत्राऽऽप्लुतानां सर्वेषां भुक्तिर्वा मुक्तिरेव च ॥ ५५ ॥ यद्वाऽ
पि मनसः काम्यं देवानामपि दुर्लभम् ॥ स्यात्तेषां सर्वमेवेह एवं दत्त्वा सुरा ययुः ॥ ५६ ॥ ततः प्रभृति तत्तीर्थं प्रवरासंगमं विदुः ॥ प्रेरिता देव
देवेन शक्तिर्या प्रेरिता तु सा ॥ ५७ ॥ अमृता सैव विख्याता प्रवरैवं महानदी ॥ प्रवरासंगमे तस्मिन्स्नानदानादिकञ्च यत् ॥ सर्वं तदक्षयं विद्या

त्पितॄणां प्रीतिदायकम् ॥ ५८ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये स्वयंभुनारदसंवादे शिवप्रेरितामृतासंगमादितीर्थवर्णनं नाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥ ॥ ब्रह्मोवाच ॥वृद्धासंगममाख्यातं यत्र वृद्धेश्वरः शिवः ॥ तस्याऽऽख्यानं प्रवक्ष्यामि शृणु पापप्रणाशनम् ॥ १ ॥ गौतमो वृद्ध इत्युक्तो मुनिरासीन्महातपाः ॥ यदा पुराऽभवद्बालो गौतमस्य सुतो द्विजः ॥ २ ॥ अनासः स पुरोत्पन्नस्तस्माद्विकृतरूपधृक् ॥ स वैराग्याज्जगामाथ देशं तीर्थमितस्ततः ॥ ३ ॥ उपाध्यायेन नैवाऽऽसील्लज्जितस्य समागमः ॥ शिष्यैरन्यैः सहाध्यायो लज्जितस्य च नाभवत् ॥ ४ ॥ उपनीतः कथं चिच्च पित्रा वै गौतमेन सः ॥ एतावता गौतमोऽपि व्यगमच्चरितुं बहिः ॥ ५ ॥ एवं बहुतिथे काले ब्रह्ममात्रा धृते द्विजे ॥ नैव चाध्ययनं तस्य संजातं गौतमस्य हि ॥ ६ ॥ नैव शास्त्रस्य चाभ्यासो गौतमस्याभवत्तदा ॥ अग्निकार्यं ततश्चक्रे नित्यमेव यतव्रतः ॥ ७ ॥ गायत्र्यभ्यासमात्रेण ब्राह्मणो नामधारकः ॥ अग्न्युपासनमात्रं च गायत्र्यभ्यसनं तथा ॥ ८ ॥ एतावता ब्राह्मणत्वं गौतमस्याभवन्मुने ॥ उपासतोऽग्निं विधिवद्गायत्रीं च महात्मनः ॥ ९ ॥ तस्याऽऽयुर्ववृधे पुत्र गौतमस्य चिरायुषः ॥ न दारसंग्रहं लेभे नैव दाताऽस्ति कन्यकाम् ॥ १० ॥ तथा चरंस्तीर्थदेशे वनेषु विविधेषु च ॥ आश्रमेषु च पुण्येषु अटन्नास्ते स गौतमः ॥ ११ ॥ एवं भ्रमञ्शीतागिरिमाश्रित्याऽऽस्ते स गौतमः ॥ तत्रापश्यद्बृहां रम्यां वल्लीविटपमालिनीम् ॥ १२ ॥ तत्रोपविश्य विप्रेन्द्रो वस्तुं समकरोन्मतिम् ॥ तदन्तस्तु प्रविष्टोऽसावपश्यत्स्त्रियमुत्तमाम् ॥ १३ ॥ शिथिलाङ्गीमथ कृशां वृद्धां च तपसि स्थिताम् ॥ ब्रह्मचर्येण वर्तन्तीं कुमारीं रहसि स्थिताम् ॥ १४ ॥ स तां दृष्ट्वा मुनिश्रेष्ठो नमस्काराय तस्थिवान् ॥ नमस्यन्तं मुनिश्रेष्ठं तं गौतममवारयत् ॥ १५ ॥ ॥ वृद्धोवाच ॥ गुरुस्त्वं भविता मह्यं न मां वन्दितुमर्हसि ॥ आयुर्विद्या धनं कीर्तिर्धर्मः स्वर्गादिकं च यत् ॥ तस्य नश्यति वै सर्वं यं नमस्यति वै गुरुः ॥ १६ ॥ ॥ ब्रह्मोवाच ॥ कृताञ्जलिपुटस्तां वै गौतमः प्राह विस्मितः ॥ १७ ॥ ॥ गौतम उवाच ॥ तपस्विनी त्वं वृद्धा च गुणज्येष्ठा च भामिनी ॥ अल्पविद्यस्त्वल्पवया अहं तव गुरुः कथम् ॥ १८ ॥ ॥ वृद्धोवाच ॥ अस्मिन्नर्थे पुरावृत्तं वदामि तव सुव्रत ॥ अरिष्टेषणस्य पुत्रस्तु ऋतध्वज इति श्रुतः ॥ गुणवान्मतिमाञ्छूरः क्षत्रधर्मपरायणः ॥ १९ ॥ स कदाचिद्वनं प्रायान्मृगयाकृष्टचेतनः ॥ विश्राममकरोदस्यां गुहायां स ऋतध्वजः ॥ २० ॥ युवा स मतिमान्दक्षो बलेन महता वृतः ॥ तं विश्रान्तं नृपवरमप्सरा ददृशे ततः ॥ २१ ॥ गन्धर्वराजस्य सुता सुश्यामा इति विश्रुता ॥ तां दृष्ट्वा चकमे राजा राजानं चकमे च सा ॥ २२ ॥ रतिक्रीडा समभवत्तया राज्ञो महामते ॥ निवृत्तकामो राजेन्द्रस्तामापृच्छ्याऽऽगमद्गृहम् ॥ २३ ॥ उत्पन्नाऽहं ततस्तस्यां सुश्यामायां महामते ॥ गच्छन्ती मां

तदा माता इदमाह तपोधन ॥ २४ ॥ ॥ सुश्यामोवाच ॥ यस्त्वस्यां प्रविशेद्भद्रे स ते भर्ता भविष्यति ॥ २५ ॥ वृद्धोवाच ॥ इत्युक्त्वा सा जगामा
थ माता मम महामते ॥ तस्मादत्र प्रविष्टस्त्वं पुमान्नान्यः कदाचन ॥ २६ ॥ सहस्राणि तथाऽशीतिं कृत्वा राज्यं पिता मम ॥ अत्रैव
च तपस्तप्त्वा ततः स्वर्गमुपेयिवान् ॥ २७ ॥ स्वर्गं यातेऽपि पितरि सहस्राणि तथा दश ॥ वर्षाणि मुनिशार्दूल राज्यं
कृत्वा तथा परः ॥ २८ ॥ स्वर्गं यातो मम भ्राता अहमत्रैव संस्थिता ॥ अहं ब्रह्मन्नान्यवृता न माता न पिता मम ॥ २९ ॥
अहमात्मेश्वरी ब्रह्मन्निविष्टा क्षत्रकन्यका ॥ तस्माद्भजस्व मां ब्रह्मन्व्रतस्थां पुरुषार्थिनीम् ॥ ३० ॥ ॥ गौतम उवाच ॥ सहस्रायुरहं भद्रे मत्तस्त्वं
वयसाऽधिका ॥ अहं बालस्त्वं तु वृद्धा नैवायं घटते मिथः ॥ ३१ ॥ ॥ वृद्धोवाच ॥ त्वं भर्ता मे पुरा दिष्टो नान्यो भर्ता मतो मम ॥ धात्रा
दत्तस्ततस्त्वं मां न निराकर्तुमर्हसि ॥ ३२ ॥ अथवा नेच्छसीमां त्वमप्रदुष्टामनुव्रताम् ॥ ततस्त्यक्ष्यामि जीवं मे इदानीं तव पश्यतः ॥ ३३ ॥
अपेक्षिताप्राप्तितो हि देहिनां मरणं वरम् ॥ अनुरक्तजनत्यागे पातकान्तो न विद्यते ॥ ३४ ॥ ॥ ब्रह्मोवाच ॥ वृद्धायास्तद्वचः श्रुत्वा गौतमो वाक्य
मब्रवीत् ॥ ३५ ॥ ॥ गौतम उवाच ॥ अहं तपोविरहितो विद्याहीनो ह्यकिंचनः ॥ नाहं वरो हि योग्यस्ते कुरूपो भोगवर्जितः ॥ ३६ ॥ अनासोऽहं
किं करोमि अतपोविद्य एव च ॥ तस्मात्सुरूपं सद्विद्यामापाद्य प्रथमं शुभे ॥ पश्चात्तें वचनं कार्यं ततो वृद्धाऽब्रवीद्विजम् ॥ ३७ ॥ ॥ वृद्धोवाच ॥
मया सरस्वती देवी तोषिता तपसा द्विज ॥ तथैवाऽऽपो रूपवत्यो रूपदाताऽग्निरेव च ॥ ३८ ॥ तस्माद्वागीश्वरी देवी सा ते विद्यां प्रदास्यति ॥
अग्निश्च रूपवान्देवस्तव रूपं प्रदास्यति ॥ ३९ ॥ ॥ ब्रह्मोवाच ॥ एवमुक्त्वा गौतमं तं वृद्धोवाच विभावसुम् ॥ प्रार्थयित्वा सुविद्यं तं सुरूपं चाकरो
न्मुनिम् ॥ ४० ॥ ततः सुविद्यः सुभगः सुकान्तो वृद्धां स पत्नीमकरोत्प्रीतियुक्तः ॥ तया स रेमे बहुला मनोज्ञया समाः सुखं प्रीतमना गुहायाम्
॥ ४१ ॥ कदाचित्तत्र वसतोर्दंपत्योर्मुदतोर्गिरौ ॥ गुहायां मुनिशार्दूल आजग्मुर्मुनयोऽमलाः ॥ ४२ ॥ वसिष्ठवामदेवाद्या ये चान्ये च महर्षयः ॥
भ्रमन्तः पुण्यतीर्थानि प्राप्नुवंस्तस्य तां गुहाम् ॥४३॥ आगतांस्तानृषीञ्ज्ञात्वा गौतमः सह भार्यया ॥ सत्कारमकरोत्तेषां जहसुस्तं च केचन ॥४४॥
ये बाला यौवनोन्मत्ता वयसा ये च मध्यमाः ॥ वृद्धां च गौतमं प्रेक्ष्य जहसुस्तत्र केचन ॥ ४५ ॥ कृशां विशालां लंबोष्ठीं सलोमां शूर्पकर्णकाम् ॥
दीर्घदन्तां दीर्घनासां दीर्घकेशान्तु जर्जराम् ॥४६॥ रूपलावण्यसौभाग्यविद्यायुक्तं च गौतमम् ॥ संप्रेक्ष्य जहसुः केचित् बालिशा ऋषिपुत्रकाः ॥४७॥
शिष्यास्तथाऽल्पमतयस्तां दृष्ट्वा प्रोचुरुत्स्मिताः ॥ ४८ ॥ ॥ ऋषय ऊचुः ॥ पुत्रोऽयं तव पौत्रो वा वृद्धे को गौतमोऽभवत् ॥ सत्यं वदस्व कल्याणि

इत्येवं जहमुद्विजाः ॥ ४९ ॥ तपस्विनि फलं प्रोक्तं तपसः सत्यमुत्कटम् ॥ तपसा शममन्वेति श्रममेव ह्यशक्तितः ॥ ५० ॥ सकृत्तस्यैव तु शमं समं पश्य सुशोभने ॥ बहुजन्मार्जितस्येह रक्षणं सत्यभाषणम् ॥ ५१ ॥ किमत्र बहुनोक्तेन फल्गुप्रायेण साम्प्रतम् ॥ त्वमेव धन्या लोकेऽस्मिन्वद सौभाग्यसंयुते ॥ ५२ ॥ तपसा दग्धपापा त्वं तपःश्रमसुकीर्तिता ॥ स्वयं कृशा तु लोकेऽस्मिन्तपसा च दमेन च ॥ ५३ ॥ आतिथ्यपूजनेनापि पुत्रपालनकेन च ॥ मा पुष्टमस्तु लोकेऽस्मिञ्छरीरं पापसंचयात ॥ ५४ ॥ दया दानं तपः सत्यं शौचमिन्द्रियनिग्रहः ॥ आतिथ्यपूजनं शान्तिः पुत्रादिपरिपालनम् ॥ ५५ ॥ स्वधर्मवर्तनं सर्वमित्यादि परिपालनात् ॥ यदात्मोदरप्राप्त्यर्थं व्यापारो यस्य केवलम् ॥ ५६ ॥ स्फुटं स नरकायैव शरीरे केवलं मतः ॥ सर्वदुःखसहा नारी का लोके वद भामिनि ॥५७॥ श्वतुल्या विद्यते सुभ्रूः सर्वदाऽतिथिपूजनम् ॥ अपवित्रासु सा ज्ञेया भर्तृपुत्र विवर्जिता॥५८॥ संभोज्यान्ना द्विजैर्नूनं धर्मयुक्तासि शोभने ॥ तस्माद्बुद्धतमा हि त्वं पतिहीनाप्यसंशयम् ॥५९॥ कुरूपिणी सुरूपा त्वमधनापि धनान्विता ॥ तप्तं तपस्त्वयैवोग्रमेकांगुष्ठादि दुष्कृतम् ॥६०॥ लक्ष्मीपतिस्त्वया भक्त्या स्वार्चितः पूर्वजन्मनि ॥ सदानानि सुदत्तानि यज्ञाः स्विष्टाः सुदक्षिणाः ॥ ६१ ॥ तीर्थसेवा कृता सम्यक् प्रदत्तं च हुतं बहु ॥ तस्मात्पुत्रस्त्वया लब्धो गौतमो वेदपारगः ॥ ६२ ॥ वेदवेदाङ्गतत्वज्ञः सर्वशास्त्रबहुश्रुतः ॥ त्रैलोक्यसुकृतेनापि दुर्लभो गौतमः सुतः ॥ ६३ ॥ नप्ता वा पुत्रपौत्रो वा दुहितापुत्र एव वा ॥ पुत्रतृप्तिकराः शश्वद्दौहित्रकुतपास्तिलाः ॥ ६४ ॥ कुलं समानं विमलं याति विष्णोः परं पदम् ॥ अनेन च तपोवृद्धे नात्र कार्या विचारणा ॥ ६५ ॥ केचिदूचुस्ततश्चैव ऋषिशिष्याः सविस्मयाः ॥ विषं वृद्धस्य युवनिर्वृद्धाया अमृतं युवा ॥ इष्टानिष्टसमायोगो दृष्टोऽस्याभिरहो चिरात् ॥ ६६ ॥ ॥ ब्रह्मोवाच ॥ इत्येवमूचिरे केचिद्दंपत्योः शृण्वतोस्तदा ॥ एवमुक्त्वा कृतातिथ्या ययुः सर्वे महर्षयः ॥ ६७ ॥ ऋषीणां वचनं श्रुत्वा उभावपि सुदुःखितौ ॥ लज्जितौ च महाप्राज्ञो गौतमो भार्यया सह ॥ पप्रच्छ मुनिशार्दूलमगस्त्यमृषिसत्तमम् ॥ ६८ ॥ ॥ गौतम उवाच ॥ को देशः किमु तीर्थं वा यत्र श्रेयः समाप्यते ॥ शीघ्रमेव महाप्राज्ञ भुक्तिमुक्तिप्रदायकम् ॥ ६९ ॥ ॥ अगस्त्य उवाच ॥ वदद्भिर्मुनिभिर्ब्रह्मन्मया श्रुतमिदं वचः ॥ सर्वे कामास्तत्र पूर्णा गौतम्यां नात्र संशयः ॥ ७० ॥ तस्माद्गच्छ महाबुद्धे गौतमीं पापनाशिनीम् ॥ अहं त्वामनुयास्यामि यथेच्छसि तथा कुरु ॥ ७१ ॥ ॥ ब्रह्मोवाच ॥ एतच्छ्रुत्वाऽगस्त्यवाक्यं वृद्धया गौतमोऽभ्यगात् ॥ तत्र तेपे तपस्तीव्रं पत्न्या स भगवानृषिः ॥ ७२ ॥ स्तुतिं चकार देवस्य शंभोर्विष्णोस्तथैव च ॥ गङ्गां च तोषयामास भार्यार्थं भगवानृषिः ॥७३॥ गौतम उवाच ॥ खिन्नात्मनामत्र भवे त्वमेव शरणं शिवः ॥ मरुभूमावध्व

गानां विटपीव प्रियायुतः ॥ ७४ ॥ उच्चावचानां भूतानां सर्वथा पापनोदनः ॥ सस्यानां घनवत्कृष्ण त्वमवग्रहशोषिणाम् ॥ ७५ ॥ वैकुण्ठदुर्गानिः श्रेणिस्त्वं पीयूषतराङ्गिणी ॥ अधोगतानां सत्तानां शरणं भव गौतमि ॥ ७६ ॥ ॥ ब्रह्मोवाच ॥ ततस्तुष्टाऽवदद्वाक्यं गौतमं वृद्धया युतम् ॥ शरणागतदीनार्ति शरण्या गौतमी मुदा ॥ ७७ ॥ ॥ गौतम्युवाच ॥ अभिषिञ्चस्व भार्यां त्वं मज्जलैर्मन्त्रसंयुतैः ॥ कलशैरुपचारैश्च ततः पत्नी तव प्रिया ॥ ७८ ॥ सुरूपा चारुसर्वाङ्गी सुभगा चारुलोचना ॥ सर्वलक्षणसंपूर्णा रम्यरूपमवाप्स्यति ॥ ७९ ॥ रूपवत्या पुनस्त्वं वै भार्यया चाभिषेचितः ॥ सर्वलक्षणसंपूर्णः कान्तं रूपमवाप्स्यसि ॥८०॥ ॥ ब्रह्मोवाच ॥ तथेति गांगवचनाद्यथोक्तं तौ च चक्रतुः ॥ सुरूपतामुभौ प्राप्तौ गौतम्याश्च प्रसादतः ॥ ८१ ॥ अभिषेकोदकं यच्च सा नदी समजायत ॥ तस्या नाम्ना तु विख्याता वृद्धाया मुनिसत्तम ॥ ८२ ॥ वृद्धा नदीति विख्याता गौतमोऽपि तथोच्यते ॥ वृद्धगौतम इत्युक्त ऋषिभिः समवासिभिः ॥ वृद्धा तु गौतमीं प्राह गंगां प्रत्यक्षरूपिणीम् ॥ ८३ ॥ ॥ वृद्धोवाच ॥ मन्नाम्नीयं नदी देवि वृद्धा चेत्यभिधीयताम् ॥ त्वया च संगमस्तस्यास्तस्यास्तीर्थमनुत्तमम् ॥ ८४ ॥ रूपसौभाग्यसंपत्तिपुत्रपौत्रप्रवर्धनम् ॥ आयुरारोग्यकल्याणं जयप्रीतिविवर्धनम् ॥ स्नानदानादिहोमैश्च पितॄणां पावनं परम् ॥ ८५ ॥ ॥ ब्रह्मोवाच ॥ अस्त्वित्याह च तां गङ्गा सुवृद्धां गौतमप्रियाम् ॥ गौतमस्थापितं लिङ्गं वृद्धानाम्नैव कीर्तितम् ॥ ८६ ॥ तत्रैव च मुदं प्राप्तो वृद्धया मुनिसत्तमः ॥ तत्र स्नानं च दानं च सर्वाभीष्टप्रदायकम् ॥ ८७ ॥ ततः प्रभृति तत्तीर्थं वृद्धासंगममुच्यते ॥ ८८ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये वृद्धासंगमाद्युभयतटसप्तदशतीर्थवर्णनं नाम सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ ॥ ब्रह्मोवाच ॥ इलातीर्थमिति ख्यातं सर्वसिद्धिकरं नृणाम् ॥ ब्रह्महत्यादिपापानां पावनं सर्वकामदम् ॥ १ ॥ वैवस्वतान्वये जात इलो नाम जनेश्वरः ॥ महत्या सेनया सार्धं जगाम मृगयावनम् ॥ २ ॥ परिबभ्राम गहनं बहुव्यालसमाकुलम् ॥ नानाकारद्विजयुतं विटपैः परिशोभितम् ॥ ३ ॥ वनेचरं नृपश्रेष्ठो मृगयागतमानसः ॥ तत्रैव मतिमाधत्त इलोऽमात्यानथाब्रवीत् ॥ ॥ ४ ॥ इल उवाच ॥ गच्छन्तु नगरं सर्वे मम पुत्रेण पालितम् ॥ देशं कोशं बलं राज्यं पालयन्तु पुनश्च तम् ॥ ५ ॥ वसिष्ठोऽपि तथा यातु आदायाग्नीन्पितेव नः ॥ पत्नीभिः सहितो धीमानरण्येऽहं वसाम्यथ ॥ ६ ॥ अरण्यभोगभुग्भिश्च वाजिवारणमानुषैः ॥ मृगयाशीलिभिः कैश्चिद्यान्तु सर्व इतः पुरीम् ॥ ७ ॥ ॥ ब्रह्मोवाच ॥ तथेत्युक्त्वा ययुस्तेऽपि स्वयं प्रायाच्छनैर्गिरिम् ॥ हिमवन्तं रत्नमयं वसंस्तत्र इलो नृपः ॥ ८ ॥ ददर्श कंदरं तत्र नानारत्नविचित्रितम् ॥ तत्र यक्षेश्वरः कश्चित्समन्युरिति विश्रुतः ॥ ९ ॥ तस्य भार्या समानाम्नी भर्तृव्रतपरायणा ॥ तस्मिन्वस

त्यसौ यक्षो रमणीये नगोत्तमे ॥ १० ॥ मृगरूपेण व्यचरद्भार्यया स महामतिः ॥ स्वेच्छया स्ववने यक्षः क्रीडते नृत्यगीतकैः ॥ ११ ॥ इत्थं स यक्षो जानाति मृगरूपधरोऽपि च ॥ इलस्तु तं न जानाति कंदरं यक्षपालितम् ॥ १२ ॥ यक्षस्य गेहं विपुलं नानारत्नविचित्रितम् ॥ तत्रोपविष्टो नृपतिर्महत्या सेनया वृतः ॥ १३ ॥ वासं चक्रे स तत्रैव गेहे यक्षस्य धीमतः ॥ स यक्षोऽधर्मकोपेन भार्यया मृगरूपधृक् ॥ १४ ॥ इलं जेतुं न शक्नोमि याचितो न ददाति च ॥ हृतं गेहं ममानेन किं करोमीत्यचिन्तयत् ॥ १५ ॥ युधि मत्तं कथं हन्यां चेति स्थित्वा स यक्षराट् ॥ आत्मी यान्प्रेषयामास यक्षाञ्शूरान्धनुर्धरान् ॥ १६ ॥ ॥ यक्ष उवाच ॥ युद्धे जित्वा च राजानमिलमुद्धतदन्तिनम् ॥ गृह्याथाऽन्यतो याति मम तत्कर्तुमर्हथ ॥ १७ ॥ ॥ ब्रह्मोवाच ॥ यक्षेश्वरस्य तद्वाक्याद्यक्षास्ते युद्धदुर्मदाः ॥ इलं गत्वाऽब्रुवन्सर्वे निर्गच्छास्माद्बृहालयात् ॥ १८ ॥ न चेद्युद्धात्परिभ्रष्टः पलायन्निर्गमिष्यसि ॥ तद्यक्षवचनात्कोपाद्युद्धं चक्रे स राजराट् ॥ १९ ॥ जित्वा. यक्षान्बहुविधानुवास दश. शर्वरीः ॥ यक्षेश्वरो मृगो भूत्वा भार्ययाऽपि वने वसन् ॥ २० ॥ हृतगेहो वनं प्राप्तो हृतभृत्यः स यक्षिणीम् ॥ प्राह चिन्तापरो भूत्वा मृगीरूपधरां प्रियाम् ॥ ॥ २१ ॥ ॥ यक्ष उवाच ॥ बलवन्तं दुराधर्षं श्रिया शौर्येण गर्वितम् ॥ मदांधं मृगयासक्तं कथं जेष्ये नृपं प्रिये ॥ २२ ॥ ॥ यक्षिण्युवाच ॥ वद कान्त उपायोऽस्ति तस्य गर्वस्य नाशने ॥ उपायो यदि मद्वाक्यात्करिष्यामि.वदस्व मे ॥ २३ ॥ यक्ष उवाच ॥ अस्त्युपायो वरारोहे नृपतेर्गर्व नाशने ॥ वरेण केन नृपतेरस्य गर्वो व्यपोहति ॥ २४ ॥ तत्कुरुष्व महाभागे मम प्रियकरं शुभम् ॥ तत्र त्वं गच्छ कल्याणि यत्रास्ते नृपमंदधीः ॥ ॥ २५ ॥ तत्र त्वं दर्शयात्मानमिलस्य पुरतः शुभे ॥ आकर्षेलं च राजानमुमावनमिति श्रुतम् ॥ २६ ॥ मृगी भूत्वेव सुभगे तच्च मद्वहवर्तिनम् ॥ मृगमासक्तमनसं स्त्रीत्वमाप्नोतु दुर्मतिः ॥ २७ ॥ राजाऽयं दुर्मनाः कान्ते व्यसनासक्तमानसः ॥ अनेनायाति विपदं तत्रोपायो विचिन्तितः ॥ ॥ २८ ॥ पार्थिव्यसनान्तानि राज्यान्यखिलभूभुजाम् ॥ प्रापयोमावनं सुभ्रूर्मृगी भूत्वा मनोहरा ॥ २९ ॥ प्रविशेत्तत्र राजाऽयं स्त्री भविष्यत्यसंशयम् ॥ करणीयं त्वया भद्रे न चैतद्युज्यते मम ॥ अहं तु पुरुषो येन त्वं पुनः स्त्री च यक्षिणी ॥ ३० ॥ ॥ यक्षिण्युवाच ॥ कथं त्वया न गन्तव्यमुमावनमनुत्तमम् ॥ गतेऽपि त्वयि को दोषस्तन्मे कथय तत्त्वतः ॥ ३१ ॥ ॥ यक्ष उवाच ॥ हिमवत्पर्वतश्रेष्ठ उमया सहितः शिवः ॥ देवैर्गणैरनुवृतो विचचार यथासुखम् ॥ पार्वती शंकरं प्राह कदाचिद्रहसि स्थितम् ॥ ३२ ॥ ॥ पार्वत्युवाच ॥ स्त्रीणामेष स्वभावोस्ति रतं गोपायितं भवेत् ॥ तस्मान्मे नियतं देशमाज्ञया रक्षितं तव ॥ ३३ ॥ देहि मे त्रिदशेशान उमावनमिति श्रुतम् ॥ विना त्वया गणेशेन कार्तिके

गानां विटपीव प्रियायुतः ॥ ७४ ॥ उच्चावचानां भूतानां सर्वथा पापनोदनः ॥ सस्यानां घनवत्कृष्ण त्वमवग्रहशोषिणाम् ॥ ७५ ॥ वैकुण्ठदुर्गानिः श्रेणिस्त्वं पीयूषतराङ्गिणी ॥ अधोगतानां सत्तानां शरणं भव गौतमि ॥ ७६ ॥ ॥ ब्रह्मोवाच ॥ ततस्तुष्टाऽवदद्वाक्यं गौतमं वृद्धया युतम् ॥ शरणागतदीनार्त शरण्या गौतमी मुदा ॥ ७७ ॥ ॥ गौतम्युवाच ॥ अभिषिञ्चस्व भार्यां त्वं मज्जलैर्मन्त्रसंयुतैः ॥ कलशैरुपचारैश्च ततः पत्नी तव प्रिया ॥ ७८ ॥ सुरूपा चारुसर्वाङ्गी सुभगा चारुलोचना ॥ सर्वलक्षणसंपूर्णा रम्यरूपमवाप्स्यति ॥ ७९ ॥ रूपवत्या पुनस्त्वं वै भार्यया चाभिषेचितः ॥ सर्वलक्षणसंपूर्णः कान्तं रूपमवाप्स्यसि ॥८०॥ ॥ ब्रह्मोवाच ॥ तथेति गांगवचनाद्यथोक्तं तौ च चक्रतुः ॥ सुरूपतामुभौ प्राप्तौ गौतम्याश्च प्रसादतः ॥ ८१ ॥ अभिषेकोदकं यच्च सा नदी समजायत ॥ तस्या नाम्ना तु विख्याता वृद्धाया मुनिसत्तम ॥ ८२ ॥ वृद्धा नदीति विख्याता गौतमोऽपि तथोच्यते ॥ वृद्धगौतम इत्युक्त ऋषिभिः समवासिभिः ॥ वृद्धा तु गौतमीं प्राह गंगां प्रत्यक्षरूपिणीम् ॥ ८३ ॥ ॥ वृद्धोवाच ॥ मन्नाम्नीयं नदी देवि वृद्धा चेत्यभिधीयताम् ॥ त्वया च संगमस्तस्यास्तस्यास्तीर्थमनुत्तमम् ॥ ८४ ॥ रूपसौभाग्यसंपत्तिपुत्रपौत्रप्रवर्धनम् ॥ आयुरारोग्यकल्याणं जयप्रीतिविवर्धनम् ॥ स्नानदानादिहोमैश्च पितॄणां पावनं परम् ॥ ८५ ॥ ॥ ब्रह्मोवाच ॥ अस्त्वित्याह च तां गङ्गा सुवृद्धां गौतमप्रियाम् ॥ गौतमस्थापितं लिङ्गं वृद्धानाम्नैव कीर्तितम् ॥ ८६ ॥ तत्रैव च मुदं प्राप्तो वृद्धया मुनिसत्तमः ॥ तत्र स्नानं च दानं च सर्वाभीष्टप्रदायकम् ॥ ८७ ॥ ततः प्रभृति तत्तीर्थं वृद्धासंगममुच्यते ॥ ८८ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये वृद्धासंगमाद्युभयतटसप्तदशतीर्थवर्णनं नाम सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ ॥ ब्रह्मोवाच ॥ इलातीर्थमिति ख्यातं सर्वसिद्धिकरं नृणाम् ॥ ब्रह्महत्यादिपापानां पावनं सर्वकामदम् ॥ १ ॥ वैवस्वतान्वये जात इलो नाम जनेश्वरः ॥ महत्या सेनया सार्धं जगाम मृगयावनम् ॥ २ ॥ परिबभ्राम गहनं बहुव्यालसमाकुलम् ॥ नानाकारद्विजयुतं विटपैः परिशोभितम् ॥ ३ ॥ वनेचरं नृपश्रेष्ठो मृगयागतमानसः ॥ तत्रैव मतिमाधत्त इलोऽमात्यानथाब्रवीत् ॥ ॥ ४ ॥ इल उवाच ॥ गच्छन्तु नगरं सर्वे मम पुत्रेण पालितम् ॥ देशं कोशं बलं राज्यं पालयन्तु पुनश्च तम् ॥ ५ ॥ वसिष्ठोऽपि तथा यातु आदायाग्नीन्पितेव नः ॥ पत्नीभिः सहितो धीमानरण्येऽहं वसाम्यथ ॥ ६ ॥ अरण्यभोगभुग्भिश्च वाजिवारणमानुषैः ॥ मृगयाशीलिभिः कैश्चिद्यान्तु सर्व इतः पुरीम् ॥ ७ ॥ ॥ ब्रह्मोवाच ॥ तथेत्युक्त्वा ययुस्तेऽपि स्वयं प्रायाच्छनैर्गिरिम् ॥ हिमवन्तं रत्नमयं वसंस्तत्र इलो नृपः ॥ ८ ॥ ददर्श कंदरं तत्र नानारत्नविचित्रितम् ॥ तत्र यक्षेश्वरः कश्चित्समन्युरिति विश्रुतः ॥ ९ ॥ तस्य भार्या समानाम्नी भर्तृव्रतपरायणा ॥ तस्मिन्वस

त्यसौ यक्षो रमणीये नगोत्तमे ॥ १० ॥ मृगरूपेण व्यचरद्भार्यया स महामतिः ॥ स्वेच्छया स्वक्ने यक्षः क्रीडते नृत्यगीतकैः ॥ ११ ॥ इत्थं स यक्षो जानाति मृगरूपधरोऽपि च ॥ इलस्तु तं न जानाति कंदरं यक्षपालितम् ॥ १२ ॥ यक्षस्य गेहं विपुलं नानारत्नविचित्रितम् ॥ तत्रोपविष्टो नृपतिर्महत्या सेनया वृतः ॥ १३ ॥ वासं चक्रे स तत्रैव गेहे यक्षस्य धीमतः ॥ स यक्षोऽधर्मकोपेन भार्यया मृगरूपधृक् ॥ १४ ॥ इलं जेतुं न शक्नोमि याचितो न ददाति च ॥ हृतं गेहं ममानेन किं करोमीत्यचिन्तयत् ॥ १५ ॥ युधि मत्तं कथं हन्यां चेति स्थित्वा स यक्षराट् ॥ आत्मी यान्प्रेषयामास यक्षाञ्शूरान्धनुर्धरान् ॥ १६ ॥ ॥ यक्ष उवाच ॥ युद्धे जित्वा च राजानमिलमुद्धतदन्तिनम् ॥ गृहाद्यथाऽन्यतो याति मम तत्कर्तुमर्हथ ॥ १७ ॥ ॥ ब्रह्मोवाच ॥ यक्षेश्वरस्य तद्वाक्याद्यक्षास्ते युद्धदुर्मदाः ॥ इलं गत्वाऽब्रुवन्सर्वे निर्गच्छास्माद्गृहालयात् ॥ १८ ॥ न चेद्युद्धात्परिभ्रष्टः पलायन्निर्गमिष्यसि ॥ तद्यक्षवचनात्कोपाद्युद्धं चक्रे स राजराट् ॥ १९ ॥ जित्वा. यक्षान्बहुविधानुवास दश. शर्वरीः ॥ यक्षेश्वरो मृगो भूत्वा भार्ययाऽपि वने वसन् ॥ २० ॥ हृतगेहो वनं प्राप्तो हतभृत्यः स यक्षिणीम् ॥ प्राह चिन्तापरो भूत्वा मृगीरूपधरां प्रियाम् ॥ ॥ २१ ॥ ॥ यक्ष उवाच ॥ बलवन्तं दुराधर्षं श्रिया शौर्येण गर्वितम् ॥ मदांधं मृगयासक्तं कथं जेष्ये नृपं प्रिये ॥ २२ ॥ ॥ यक्षिण्युवाच ॥ वद कान्त उपायोऽस्ति तस्य गर्वस्य नाशने ॥ उपायो यदि मद्वाक्यात्करिष्यामि.वदस्व मे ॥ २३ ॥ यक्ष उवाच ॥ अस्त्युपायो वरारोहे नृपतेर्गर्व नाशने ॥ वरेण केन नृपतेरस्य गर्वो व्यपोहति ॥ २४ ॥ तत्कुरुष्व महाभागे मम प्रियकरं शुभम् ॥ तत्र त्वं गच्छ कल्याणि यत्रास्ते नृपमंदधीः ॥ ॥ २५ ॥ तत्र त्वं दर्शयात्मानमिलस्य पुरतः शुभे ॥ आकर्षेलं च राजानमुमावनमिति श्रुतम् ॥ २६ ॥ मृगी भूत्वेव सुभगे तञ्च मद्वृहवर्तिनम् ॥ मृगमासक्तमनसं स्त्रीत्वमाप्नोतु दुर्मतिः ॥ २७ ॥ राजाऽयं दुर्मनाः कान्ते व्यसनासक्तमानसः ॥ अनेनायाति विपदं तत्रोपायो विचिन्तितः ॥ ॥ २८ ॥ पापर्धिव्यसनान्तानि राज्यान्यखिलभूभुजाम् ॥ प्रापयोमावनं सुभ्रूर्मृगी भूत्वा मनोहरा ॥ २९ ॥ प्रविशेत्तत्र राजाऽयं स्त्री भविष्यत्यसंशयम् ॥ करणीयं त्वया भद्रे न चैतद्युज्यते मम ॥ अहं तु पुरुषो येन त्वं पुनः स्त्री च यक्षिणी ॥ ३० ॥ ॥ यक्षिण्युवाच ॥ कथं त्वया न गन्तव्यमुमावनमनुत्तमम् ॥ गतेऽपि त्वयि को दोषस्तन्मे कथय तत्त्वतः ॥ ३१ ॥ ॥ यक्ष उवाच ॥ हिमवत्पर्वतश्रेष्ठ उमया सहितः शिवः ॥ देवैर्गणैरनुवृतो विचचार यथासुखम् ॥ पार्वती शंकरं प्राह कदाचिद्रहसि स्थितम् ॥ ३२ ॥ ॥ पार्वत्युवाच ॥ स्त्रीणमेष स्वभावोस्ति रतं गोपायितं भवेत् ॥ तस्मान्मे नियतं देशमाज्ञया रक्षितं तव ॥ ३३ ॥ देहि मे त्रिदशेशान उमावनमिति श्रुतम् ॥ विना त्वया गणेशेन कार्तिके

येन नन्दिना॥३४॥यस्त्वत्र प्रविशेन्नाथ स्त्रीत्वं तस्य भवेदिति॥३५॥यक्ष उवाच ॥ इत्याज्ञोमावने दत्ता प्रसन्नेनेन्दुमौलिना ॥ करोति किं न च पुमा
न्कांतया प्रणयार्थितः ॥ तस्मान्मया न गन्तव्यमुमाया वनमुत्तमम् ॥ ३६ ॥ ॥ ब्रह्मोवाच ॥ तद्भर्तृवचनं श्रुत्वा यक्षिणी कामरूपिणी ॥ मृगी भूत्वा
विशालाक्षी इलस्य पुरतोऽभवत् ॥ ३७ ॥ यक्षस्तु संस्थितस्तत्र ददर्शैलो मृगीं तदा ॥ मृगयासक्तचित्तो वै मृगीं दृष्ट्वा विशेषतः ॥ ३८ ॥ एक एव
हयारूढो निर्ययौ तां मृगीमनु ॥ साऽऽकर्षत शनैस्तं तु राजानं मृगयाकुलम् ॥ ३९ ॥ शनैर्जगाम सा तत्र यदुमावनमुच्यते ॥ अदृश्या तु
मृगी तस्मै दर्शयन्ती क्वचित्क्वचित् ॥ ४० ॥ तिष्ठन्ती चैव गच्छन्ती धावन्ती च बिभीतवत् ॥ हरिणी चपलाक्षी सा तमाकर्षदुमावनम् ॥ ४१ ॥
अनुप्राप्तो हयारूढस्तत्प्राप स उमावनम् ॥ उमावनं प्रविष्टं तं ज्ञात्वा सा यक्षिणी तदा ॥ ४२ ॥ मृगीरूपं परित्यज्य यक्षिणी कामरूपिणी ॥
दिव्यरूपं समास्थाय चाशोकतरुसंनिधौ ॥ ४३ ॥ तच्छाखालम्बितकरा दिव्यगन्धानुलेपना ॥ दिव्यरूपधरा तन्वी कृतकार्या समा तदा ॥ ४४ ॥
हसन्ती नृपतिं प्रेक्ष्य श्रान्तं हयगतं तदा ॥ मृगीमालोकयन्तं तं चपलाक्षमिलं तदा ॥ ४५ ॥ भर्तृवाक्यमशेषेण स्मरन्ती प्राह भूमिपम् ॥ ४६ ॥
समोवाच ॥ हयारूढाऽबला तन्वि क्व एकैव तु गच्छसि ॥ पुरुषस्य च वेषेण इले कमनुयास्यसि ॥ ४७ ॥ ॥ ब्रह्मोवाच ॥ इलेति वचनं श्रुत्वा
राजाऽसौ क्रोधमूर्छितः ॥ यक्षिणीं भर्त्सयित्वाऽसौ तामपृच्छन्मृगीं पुनः ॥ ४८ ॥ तथाऽपि यक्षिणी प्राह इले किमनुवीक्षसे ॥ इलेति वचनं श्रुत्वा
धृतचापो हयस्थितः ॥ ४९ ॥ कुपितो दर्शयामास त्रैलोक्यविजयी धनुः ॥ पुनः सा प्राह नृपतिं माहात्मानमिले स्वयम् ॥ ५० ॥ प्रेक्षस्व पश्चा
न्मां ब्रूहि असत्यां सत्यवादिनीम् ॥ तदा चाऽऽलोकयद्राजा स्तनौ तुंगौ भुजान्तरे ॥ किमिदं मम संजातमित्येवं चकितोऽभवत् ॥ ५१ ॥ ॥
इलोवाच ॥ किमिदं मम संजातं जानीते भवती स्फुटम् ॥ वद सर्वं यथातथ्यं त्वं का वा वद सुव्रते ॥ ५२ ॥ ॥ यक्षिण्युवाच ॥ हिमवत्कंदरश्रेष्ठे
समन्युर्वसते पतिः ॥ यक्षाणामधिपः श्रीमांस्तद्भार्याऽहं तु यक्षिणी ॥ ५३ ॥ यत्कंदरे भवान्राजा तूपविष्टः सुशीतले ॥ यस्य यक्षा हता मोहा
त्त्वया हि संगरं विना ॥ ५४ ॥ ततोऽहं निर्गमार्थं ते मृगी भूत्वा उमावनम् ॥ प्रविष्टा त्वं प्रविष्टोऽसि पुरा प्राह महेश्वरः ॥ ५५ ॥ यस्त्वत्र प्रवि
शेन्मन्दः पुमान्स्त्रीत्वमवाप्स्यति ॥ तस्मात्स्त्रीत्वमवाप्तोऽसि न त्वं दुःखितुमर्हसि ॥ प्रौढोऽपि कोऽत्र जानाति विचित्रभवितव्यताम् ॥ ५६ ॥ ॥
ब्रह्मोवाच ॥ यक्षिणीवचनं श्रुत्वा हयारूढस्तदाऽपतत् ॥ तमाश्वास्य पुनः सैव यक्षिणी वाक्यमब्रवीत् ॥ ५७ ॥ ॥ यक्षिण्युवाच ॥ स्त्रीत्वं जातं जा
तमेव न पुंस्त्वं कर्तुमर्हसि ॥ गृहाण विद्यां स्त्रीयोग्यां नृत्यं गीतमलंकृतिम् ॥ स्त्रीलालित्यं स्त्रीविलासं स्त्रीकृत्यं सर्वमेव तत् ॥ ५८ ॥ ॥

ब्रह्मोवाच ॥ इला सर्वमथावाप्य यक्षिणी वाक्यमब्रवीत् ॥ ५९ ॥ ॥ इलोवाच ॥ को वा भर्ता किं तु कृत्यं पुनः पुंस्त्वं कथं भवेत् ॥ एतद्वदस्व कल्याणी दुःखार्तायां विशेषतः ॥ आर्तानामार्तिशमनाच्छ्रेयो नाभ्यधिकं क्वचित् ॥ ६० ॥ ॥ यक्षिण्युवाच ॥ बुधः सोमसुतो नाम वनादस्माच्च पूर्वतः ॥ आश्रमस्तस्य सुभगे रूपयौवनशालिनः ॥ ६१ ॥ अनेनैव पथा सोमं पितरं स बुधो ग्रहः ॥ द्रष्टुं याति ततो नित्यं नमस्कर्तुं तथैव च ॥ ॥ ६२ ॥ यदा याति बुधः शान्तस्तदाऽऽत्मानं च दर्शय ॥ तं दृष्ट्वा त्वं तु सुभगे सर्वकामानवाप्स्यसि ॥ ६३ ॥ ॥ ब्रह्मोवाच ॥ तामाश्वास्य ततः सुभ्रूर्यक्षिण्यन्तरधीयत ॥ यक्षिणी सा तमाचष्ट यक्षोऽपि सुखमाप्तवान् ॥ ६४ ॥ इलसैन्यं च तत्राऽऽसीत्तद्वृतं च यथासुखम् ॥ उमावनस्थिता चेला गायन्ती नृत्यती पुनः ॥ ६५ ॥ स्त्रीभावमनुचेष्टन्ती स्मरन्ती कर्मणो गतिम् ॥ कदाचित्क्रियमाणे तु इलया नृत्यकर्मणि ॥ ६६ ॥ तामपश्यद् बुधो धीमान्पितरं गन्तुमुद्यतः ॥ इलां दृष्ट्वा गतिं त्यक्त्वा तामागत्याब्रवीद्बुधः ॥ ६७ ॥ ॥ बुध उवाच ॥ भार्या भव मम स्वस्था सर्वाभ्यस्त्वं प्रिया भव ॥ ६८ ॥ ॥ ब्रह्मोवाच ॥ बुधवाक्यमिला भक्त्या त्वभिनन्द्य तथाऽकरोत् ॥ स्मृत्वा च यक्षिणीवाक्यं ततस्तुष्टाऽभवन्मुने ॥ ६९ ॥ बुधो रेमे तया प्रीत्या नीत्वा स्वस्थानमुत्तमम् ॥ सा चापि सर्वभावेन तोषयामास तं पतिम् ॥ ततो बहुतिथे काले बुधस्तुष्टोऽवदत्प्रियाम् ॥ ॥ ७० ॥ ॥ बुध उवाच ॥ किं ते देयं मया भद्रे प्रियं यन्मनसि स्थितम् ॥ ७१ ॥ ॥ ब्रह्मोवाच ॥ तद्वाक्यसमकालं तु पुत्रं देहीत्यभाषत ॥ इला बुधं सोमसुतं प्रीतिमन्तं प्रियं तथा ॥ ७२ ॥ ॥ बुध उवाच ॥ अमोघमेतन्मद्वीर्यं तथा प्रीतिसमुद्भवम् ॥ पुत्रस्ते भविता तस्मात्क्षत्रियो लोक विश्रुतः ॥ ७३ ॥ सोमवंशकरः श्रीमानादित्य इव तेजसा ॥ बुद्ध्या बृहस्पतिसमः क्षमया पृथिवीसमः ॥ ७४ ॥ वीर्येणाऽऽजौ हरिरिव कोपेन हुत भुग्यथा ॥ ७५ ॥ ॥ ब्रह्मोवाच ॥ तस्मिनुत्पद्यमाने तु बुधपुत्रे महात्मनि ॥ जयशब्दश्च सर्वत्र त्वासीच्च सुरवेश्मनि ॥ ७६ ॥ बुधपुत्रे समुत्पन्ने तत्राऽऽजग्मुः सुरेश्वराः ॥ अहमप्यागमं तत्र मुदा युक्तो महामते ॥ ७७ ॥ जातमात्रः सुतो रावमकरोत्स पृथुस्वरम् ॥ तेन सर्वेऽप्यवोचन्वै संगता ऋषयः सुराः ॥ ७८ ॥ यस्मात्पुरू रवोऽस्येति तस्मादेष पुरूरवाः ॥ स्यादित्येवं नाम चक्रुः सर्वे संतुष्टमानसाः ॥ ७९ ॥ बुधोऽप्यध्यापयामास क्षात्रविद्यां सुतं शुभाम् ॥ धनुर्वेदं सप्रयोगं बुधः प्रादात्तदाऽऽत्मजे ॥ ८० ॥ स शीघ्रं वृद्धिमगमच्छुक्लपक्षे यथा शशी ॥ स मातरं दुःखयुतां समीक्ष्येलां महामतिः ॥ नमस्याथ विनीतात्मा इलामैलोऽब्रवीदिदम् ॥ ८१ ॥ ॥ ऐल उवाच ॥ बुधो मातर्मम पिता तव भर्ता प्रियस्तथा ॥ अहं च पुत्रः कर्मण्यः कस्मात्ते मानसो ज्वरः ॥ ८२ ॥ ॥ इलोवाच ॥ सत्यं पुत्र बुधो भर्ता त्वं च पुत्रो गुणाकरः ॥ भर्तृपुत्रकृता चिन्ता न ममास्ति कदाचन॥

॥८३॥ तथाऽपि पूर्वजं किंचिद्दुःखं स्मृत्वा पुनः पुनः ॥ चिन्तयेयं महाबुद्धे ततो मातरमब्रवीत् ॥८४॥ ऐल उवाच ॥ निवेदयस्व मे मातस्तदेव प्रथमं मम॥ ॥८५॥ ब्रह्मोवाच ॥ इला चैनमुवाचेदं रहोवाचं कथं वदे ॥ तथाऽपि पुत्र ते वच्मि पित्रोः पुत्रो यतो गतिः॥मग्नानां दुःखपाथोब्धौ पुत्रः प्रवहणं परम् ॥८६॥ ॥ ब्रह्मोवाच ॥ तन्मातृवचनं श्रुत्वा विनीतः प्राह मातरम् ॥ पादौ निधाय शिरसि साश्रुनेत्रः सगद्गदः ॥ सर्वैरुपायैः पित्रोर्यः पुत्रो न हरति श्रमम् ॥ ८७ ॥ जीवन्मृतस्य तस्याहो निष्फले जन्मजीविते ॥ तीर्थसेवादानयज्ञतपःप्रभृतिकान्यपि ॥ कृतानि तेन पुण्यानि पितरौ येन तोषितौ ॥ ८८ ॥ सर्वं मनोगतं सत्यं वद मातर्यथा तथा ॥ साऽवदत्तनयं सोष्णनिश्वासस्खलिताधरा ॥ यथावृत्तं हि दुःखाब्धौ मज्जमानेव विह्वला ॥ ॥ ८९ ॥ सूर्यवंशप्रसूतानामिक्ष्वाकूणां तथा कुलम् ॥ तत्रोत्पत्तिं स्वस्य नाम राज्यप्राप्तिं प्रियान्सुतान् ॥ ९० ॥ पुरोधसं वसिष्ठं च प्रियां भार्यां स्वकं पदम् ॥ वननिर्याणमेवाथ अमात्यानां पुरोधसः ॥ ९१ ॥ प्रेषणं च नगर्यां तां मृगयासक्तिमेव च ॥ हिमवत्कंदरगतिं यक्षेश्वरगृहे गतिम् ॥ ॥ ९२ ॥ उमावनप्रवेशं च स्त्रीत्वप्राप्तिमशेषतः ॥ महेश्वराज्ञया तत्र चाप्रवेशं नरस्य तु ॥ ९३ ॥ यक्षिणीवाक्यमप्यस्य वरदानं तथैव च ॥ बुधप्राप्तिं तथा प्रीतिं पुत्रोत्पत्त्याद्यशेषतः ॥ ९४ ॥ कथयामास तत्सर्वं श्रुत्वा मातरमब्रवीत् ॥ पुरूरवाः किं करोमि किं कृत्वा सुकृतं भवेत् ॥ ॥ ९५ ॥ एतावता ते तृप्तिश्चेदलमेतेन चाम्बिके ॥ यदप्यन्यन्मनोवार्तं तदप्याज्ञापयस्व मे ॥ ९६ ॥ ॥ इलोवाच ॥ इच्छेयं पुंस्त्वमुत्कृष्टमिच्छेयं राज्यमुत्तमम् ॥ अभिषेकं च पुत्राणां तव चापि विशेषतः ॥ ९७ ॥ दानं दातुं च यष्टुं च मुक्तिमार्गस्य वीक्षणम् ॥ सर्वं च कर्तुमिच्छामि तव पुत्र प्रसादतः ॥ ९८ ॥ ॥ पुत्र उवाच ॥ उपायं त्वा तु पृच्छामि येन पुंस्त्वमवाप्स्यसि ॥ तपसो वाऽन्यतो वाऽपि वदस्व मम तत्त्वतः ॥९९॥ ॥ इलोवाच ॥ बुधं त्वं पितरं पृच्छ गत्वा पुत्र यथार्थवत् ॥ स तु सर्वं तु जानाति उपदेक्ष्यति ते हितम् ॥ १०० ॥ ॥ ब्रह्मोवाच ॥ तन्मातृवच नादैलो गत्वा पितरमञ्जसा ॥ उवाच प्रणतो भूत्वा मातुः कृत्यं तथाऽऽत्मनः ॥ १०१ ॥ ॥ बुध उवाच ॥ इलं जाने महाप्राज्ञ इलां जातां पुन स्तथा ॥ उमावनप्रवेशं च शंभोराज्ञां तथैव च ॥ १०२ ॥ तस्माच्छंभुप्रसादेन उमायाश्च प्रसादतः ॥ विशापो भविता पुत्र तावाराध्य न चान्यथा ॥ १०३ ॥ ॥ पुरूरवा उवाच ॥ पश्येयं तं कथं देवं कथं वा मातरं शिवाम् ॥ तीर्थाद्वा तपसो वाऽपि तत्पितः प्रथमं वद ॥ १०४ ॥ ॥ बुध उवाच ॥ गौतमीं गच्छ पुत्र त्वं तत्राऽस्ते सर्वदा शिवः ॥ उमया सहितः श्रीमाञ्च्छापहन्ता वरप्रदः ॥ १०५ ॥ ॥ ब्रह्मोवाच ॥ पुरूरवा पितुर्वाक्यं श्रुत्वा तु मुदितोऽभवत् ॥ गौतमीं तपसे धीमान्गङ्गां त्रैलोक्यपावनीम् ॥ १०६ ॥ पुंस्त्वमिच्छंस्तथा मातुर्जगाम तपसे त्वरन् ॥ हिम

वन्तं गिरिं नत्वा मातरं पितरं गुरुम् ॥ १०७ ॥ गच्छन्तमन्वगात्पुत्रमिला सोममुतस्तथा ॥ ते सर्वे गौतमीं प्राप्ता हिमवत्पर्वतोत्तमात् ॥ १०८ ॥
तत्र स्नात्वा तपः किंचित्कृत्वा चक्रुः स्तुतिं पराम् ॥ भवस्य देवदेवस्य स्तुतिक्रममिमं शृणु ॥ १०९ ॥ बुधस्तुष्टाव प्रथममिला च तदनन्तरम् ॥
ततः पुरूरवाः पुत्रो गौरीं देवीं च शंकरम् ॥ ११० ॥ ॥ बुध उवाच ॥ यौ तौ रमेते रशनारवेण स्वभावहेमप्रतिमौ सुरूपौ ॥ यावर्चितौ स्कन्द
गणेश्वराभ्यां तौ मे शरण्यौ शरणं भवेताम् ॥ १११ ॥ ॥ इलोवाच ॥ संसारतापत्रयदावदग्धाः शरीरिणो यौ परिचिन्तयन्तः ॥ सद्यः परां
निर्वृतिमाप्नुवन्ति तौ शंकरौ मे शरणं भवेताम् ॥ ११२ ॥ आर्ता ह्यहं पीडितमानसा ते क्लेशादिगोप्ता न परोऽस्ति कश्चित् ॥ देव त्वदीयौ चरणौ
सुपुण्यौ तौ मे शरण्यौ शरणं भवेताम् ॥ ११३ ॥ ॥ पुरूरवा उवाच ॥ ययोः सकाशादिदमभ्युदेति प्रयाति चान्ते लयमेव सर्वम् ॥ जगच्छ
रण्यौ जगदात्मकौ तु गौरीहरौ मे शरणं भवेताम् ॥ ११४ ॥ यौ देववृन्देषु महोत्सवे तु पादौ गृहाणेश गिरीशपुत्र्याः ॥ प्रोक्ते धृतौ प्रीतिवशाच्छि
वेन तौ मे शरण्यौ शरणं भवेताम् ॥ ११५ ॥ ॥ श्रीदेव्युवाच ॥ किमभीष्टं प्रदास्यामि युष्मभ्यं तद्वदन्तु ते ॥ कृतकृत्याः स्थ भद्रं वो देवाना
मपि दुष्करम् ॥ ११६ ॥ ॥ पुरूरवा उवाच ॥ इलो राजा तत्राज्ञात्वा वनं प्राविशदम्बिके ॥ तत्क्षमस्व सुरेशानि पुंस्त्वं दातुं त्वमर्हसि ॥ ११७ ॥
ब्रह्मोवाच ॥ ॥ तथेत्युवाच तान्सर्वान्भवस्य तु मते स्थिता ॥ ततः स भगवानाह देवीवाक्यरतः सदा ॥ ११८ ॥ ॥ शिव उवाच ॥ अत्राभिषेक
मात्रेण पुंस्त्वं प्राप्नोत्वयं नृपः ॥ ११९ ॥ ॥ ब्रह्मोवाच ॥ स्नाताया बुधभार्यायाः शरीराद्वारि सुस्रुवे ॥ नृत्यं गीतं च लावण्यं यक्षिण्या यदुपार्जि
तम् ॥ १२० ॥ तत्सर्वं वारिधाराभिर्गङ्गाम्भसि समाविशत् ॥ ॥ नृत्या गोता च सौभाग्या इमा नद्यो बभूविरे ॥ १२१ ॥ ताश्चापि संगता गङ्गां
ते पुण्याः संगमास्त्रयः ॥ तेषु स्नानं च दानं च सुरराज्यफलप्रदम् ॥ १२२ ॥ इला पुंस्त्वमवाप्याथ गौरीशंभोः प्रसादतः ॥ महाभ्युदयसिद्ध्यर्थं वांज
पेयमथाकरोत् ॥ १२३ ॥ पुरोधसं वसिष्ठं च भार्यां पुत्रांस्तथैव च ॥ अमात्यांश्च बलं कोशमानीय स नृपोत्तमः ॥ १२४ ॥ चतुरङ्गं बलं राज्यं
दण्डकेऽस्थापयत्तदा ॥ इलस्य नाम्ना विख्यातं तत्र तत्पुरमुच्यते ॥ १२५ ॥ सह्यद्रोण्यां मनोहारि महेन्द्रपुरतोऽधिकम् ॥ भवोपभोगनिर्विण्णस्त
स्मिन्पुरवरोत्तमे ॥ २२६ ॥ पूर्वजातानथो पुत्रान्सूर्यवंशक्रमागते ॥ राज्येऽभिषिच्य पश्चात्तमैलं स्नेहादसिञ्चयत् ॥ १२७ ॥ सोमवंशकरः
श्रीमानयं, राजा भवेदिति ॥ सर्वेभ्यो मतिमानेभ्यो ज्येष्ठः श्रेष्ठोऽभवन्मुने ॥ १२८ ॥ यत्र च क्रतवो वृत्ता इलस्य नृपतेः शुभाः ॥ यत्र पुंस्त्व
मवाप्याथ यत्र पुत्राः समागताः ॥ १२९ ॥ यक्षिणीदत्तनृत्यादिगीतसौभाग्यमङ्गलाः ॥ नद्यो भूत्वा यत्र गङ्गां संगतास्तानि नारद ॥ १३० ॥

तीर्थानि शुभदान्यासन्सहस्राण्यथ षोडश ॥ उभयोस्तीरयोस्तात तत्र शंभुरिलेश्वरः ॥ तेषु स्नानं च दानं च सर्वक्रतुफलप्रदम् ॥१२१॥ इति श्रीब्रह्म पुराणगतगौतमीमाहात्म्ये स्वयंभुनारदसंवादे तीर्थमाहात्म्ये बुधेलापुरूरवोवसिष्ठनृत्यगीतसौभाग्येलेश्वरादिषोडशसहस्रतीर्थवर्णनं नामाष्टत्रिंशोऽध्यायः॥३८॥ ॥ ब्रह्मोवाच ॥ चक्रतीर्थमिति ख्यातं ब्रह्महत्यादिनाशनम् ॥ यत्र चक्रेश्वरो देवश्चक्रमाप यतो हरिः ॥१॥ यत्र विष्णुः स्वयं स्थित्वा चक्रार्थं शंकरं प्रभुः ॥ पूजयामास तत्तीर्थं चक्रतीर्थमुदाहृतम् ॥ २ ॥ यस्य श्रवणमात्रेण सर्वपापैः प्रमुच्यते ॥ दक्षक्रतौ प्रवृत्ते तु देवानां च समागमे ॥ ३ ॥ दक्षेण दूषिते देवे शिवे शर्वे महेश्वरे ॥ अनाह्वाने सुरेशस्य दक्षचित्ते मलीमसे ॥ ४ ॥ दाक्षायण्या श्रुते वाक्ये अनाह्वानस्य कारणे ॥ अहल्यायां चोक्तवत्यां कुपिताऽभूत्सुरेश्वरी ॥ ५ ॥ पितरं नाशये पापं क्षमेयं न कथंचन ॥ शृण्वती दोषवाक्यानि पित्रा चोक्तानि भर्तरि ॥ ६ ॥ पत्युः शृण्वन्ति या निन्दां तासां पापावधिः कुतः ॥ यादृशस्तादृशो वाऽपि पतिः स्त्रीणां परा गतिः ॥ ७ ॥ किं पुनः सकलाधीशो महादेवो जगद्गुरुः ॥ श्रुतं तन्निन्दनं तार्हि धारयामि न देहकम् ॥ ८ ॥ तस्मात्त्यक्ष्य इमं देहमित्युक्त्वा सा महासती ॥ कोपेन महताऽऽविष्टा प्रजज्वाल सुरेश्वरी ॥ ९ ॥ शिवैकचेतना देहं बलाद्योगाच्च तत्त्यजे ॥ महेश्वरोऽपि सकलं वृत्तमाकर्ण्य नारदात् ॥ १० ॥ दृष्ट्वा चुकोप पप्रच्छ जयां च विजयां तथा ॥ ते ऊचतुरुभे देवं दक्षक्रतुविनाशनम् ॥ ११॥ दाक्षायण्या इति श्रुत्वा मखं प्रायान्महेश्वरः ॥ भीमैर्गणैः परिवृतो भूतनाथैः समं ययौ ॥१२॥ मखस्तैर्वेष्टितः सर्वो देवब्रह्मपुरस्कृतः ॥ दक्षेण यजमानेन शुद्धभावेन रक्षितः ॥ १३ ॥ वसिष्ठादिभिरत्युग्रैर्मुनिभिः परिवारितः ॥ इन्द्रादित्याद्यैर्वसुभिः सर्वतः परिपालितः ॥१४॥ ऋग्यजुःसामवेदैश्च स्वाहाशब्दैरलंकृतः ॥ श्रद्धा पुष्टिस्तथा तुष्टिः शान्तिर्लज्जा सरस्वती ॥१५॥ भूमिर्द्यौः शर्वरी क्षान्तिरुषा आशा जया मतिः ॥ एताभिश्च तथाऽन्याभिः सर्वतः समलंकृतः ॥१६॥ त्वष्ट्रा महात्मना चापि कारितो विश्वकर्मणा ॥ सुरभिर्नन्दिनी धेनुः कामधुक्कामदोहिनी ॥ १७ ॥ एताभिः कामवर्षाभिः सर्वकामसमृद्धिमान् ॥ कल्पवृक्षः पारिजातो लताः कल्पलतादिकाः ॥१८॥ यद्यदिष्टतमं किंचित्तत्र तस्मिन्मखे स्थितम् ॥ स्वयं मघवता पूष्णा हरिणा परिरक्षितः ॥ १९ ॥ दीयतां भुज्यतां वाऽपि क्रियतां स्थीयतां सुखम् ॥ एतैश्च सर्वतो वाक्यैर्दक्षस्य पूजितं मखम् ॥२०॥ आदौ तु वीरभद्रोऽसा भद्रकाल्या युतो ययौ ॥ शोककोपपरीतात्मा पश्चाच्छूलपिनाकधृक् ॥२१॥ अभ्या ययौ महादेवो महाभूतैरलंकृतः ॥ तानि भूतानि परितो मखे वेष्टय महेश्वरम् ॥ २२ ॥ क्रतुं विध्वंसयामासुस्तत्र क्षोभो महानभूत् ॥ पलायन्त ततः केचित्केचिद्भूत्वा ततः शिवम् ॥ २३ ॥ केचित्स्तुवन्ति देवेशं केचित्कुप्यन्ति शंकरम् ॥ एवं विध्वंसितं यज्ञं दृष्ट्वा पूषा समभ्यगात् ॥ २४ ॥ पूष्णो

दन्तानथोत्पाट्य इन्द्रं व्यद्रावयत्क्षणात् ॥ भगस्य चक्षुषी विप्र वीरभद्रो व्यपाटयत् ॥ २५ ॥ दिवाकरं पुनर्दोर्भ्यां परिभ्राम्य समाक्षिपत् ॥ ततः सुरगणाः सर्वे विष्णुं ते शरणं ययुः ॥ २६ ॥ ॥ देवा ऊचुः ॥ त्राहि त्राहि गदापाणे भूतनाथकृताद्भयात् ॥ महेश्वरगणः कश्चित्प्रमथानां तु नायकः तेन दग्धो मखः सर्वो वैष्णवः पश्यतो हरेः ॥ २७ ॥ ॥ ब्रह्मोवाच ॥ हरिणा चक्रमुत्सृष्टं भूतनाथवधं प्रति ॥ भूतनाथोऽपि तच्चक्रमापतच्च तदाऽग्रसत् ॥ २८ ॥ ग्रस्ते चक्रे ततो विष्णोर्लोकपाला भयाद्ययुः ॥ तथा स्थितानवेक्ष्याथ दक्षो यज्ञं सुरानपि ॥ तुष्टाव शंकरं देवं दक्षो भक्त्या प्रजापतिः ॥ २९ ॥ ॥ दक्ष उवाच ॥ जय शंकर सोमेश जय सर्वज्ञ शंभवे ॥ जय कल्याणभृच्छंभो जय कालात्मने नमः ॥ ३० ॥ आदिकर्तर्नमस्तेऽस्तु नीलकण्ठ नमोस्तु ते ॥ ब्रह्मप्रिय नमस्तेऽस्तु ब्रह्मरूप नमोऽस्तु ते ॥ ३१ ॥ त्रिमूर्तये नमो देव त्रिधाम परमेश्वर ॥ सर्वमूर्ते नमस्तेऽस्तु त्रैलोक्याधार कामद ॥ ३२ ॥ नमो वेदान्तवेद्याय नमस्ते परमात्मने ॥ यज्ञरूप नमस्तेऽस्तु यज्ञधाम नमोऽस्तु ते ॥ ३३ ॥ यज्ञदान नमस्तेऽस्तु हव्यवाह नमोऽस्तु ते ॥ यज्ञहर्त्रे नमस्तेऽस्तु फलदाय नमोऽस्तु ते ॥ ३४ ॥ त्राहि त्राहि जगन्नाथ शरणागतवत्सल ॥ भक्तानामप्यभक्तानां त्वमेव शरणं प्रभो ॥ ३५ ॥ ॥ ब्रह्मोवाच ॥ एवं तु स्तुवतस्तस्य प्रसन्नोऽभून्महेश्वरः ॥ किं ददामीति तं प्राह क्रतुः पूर्णोऽस्तु मे प्रभो ॥ ३६ ॥ तथेत्युक्त्वा च भगवान्देवदेवो महेश्वरः ॥ शंकरः सर्वभूतात्मा करुणावरुणालयः ॥ ३७ ॥ क्रतुं कृत्वा ततः पूर्णं तस्य दक्षस्य वै मुने ॥ एवमुक्त्वा स भगवान्भूतैरन्तरधीयत ॥ ३८ ॥ यथागतं सुरा जग्मुः स्वमेव सदनं प्रति ॥ ततः कदाचिद्देवानां दैत्यानां विग्रहो महान् ॥ ३९ ॥ बभूव तत्र दैत्येभ्यो भीता देवाः श्रियः पतिम् ॥ तुष्टुवुः सर्वभावेन वचोभिस्तं जनार्दनम् ॥ ४० ॥ ॥ देवा ऊचुः ॥ शक्रादयोऽपि त्रिदशाः कटाक्षमवेक्ष्य यस्यास्तप आचरन्ति ॥ सा चापि यत्पादरता च लक्ष्मीस्तं ब्रह्मभूतं शरणं प्रपद्ये ॥ ४१ ॥ यस्मात्त्रिलोक्यां न परः समानो न चाधिकस्तार्क्ष्यरथान्नृसिंहात् स देवदेवोऽवतु नः समस्तान्महाभयेभ्यः कृपया प्रपन्नान् ॥ ४२ ॥ ॥ ब्रह्मोवाच ॥ ततः प्रसन्नो भगवाञ्छङ्खचक्रगदाधरः ॥ किमर्थमागताः सर्वे तत्कर्ताऽस्मीत्युवाच तान् ॥ ४३ ॥ देवा ऊचुः ॥ भयं च तीव्रं दैत्येभ्यो देवानां मधुसूदन ॥ ततस्त्राणाय देवानां मतिं कुरु जनार्दन ॥ ४४ ॥ ॥ ब्रह्मोवाच ॥ तानागतान्हरिः प्राह ग्रस्तं चक्रं हरेण मे ॥ किं करोमि गतं चक्रं भवन्तश्चार्तिमागताः ॥ ४५ ॥ यान्तु सर्वे देवगणा रक्षा वः क्रियते मया ॥ ४६ ॥ ॥ ब्रह्मोवाच ॥ ततो गतेषु देवेषु विष्णुश्चक्रार्थमुद्यतः ॥ गोदावरीं ततो गत्वा शंभोः पूजां प्रचक्रमे ॥ ४७ ॥ सुवर्णकमलैर्दिव्यैः सुगन्धैर्दशभिः शतैः ॥ भक्तितो नित्यवत्पूजां चक्रे विष्णुरुमापतेः ॥ ४८ ॥ नमः संसारकान्तारमहाभयनिवारिणे ॥ पिनाकिने महेशाय सर्वाभीष्ट

प्रदायिने ॥ ४९ ॥ मंत्रेणानेनं भगवान्भक्तियुक्तेन चेतसा ॥ पूजयामास विधिवद्भवानीवल्लभं शिवम् ॥ ५० ॥ एवं संपूज्यमाने तु तयोस्तत्त्व
मिदं शृणु ॥ कमलानां सहस्रे तु यदैकं नैव पूर्यते ॥ ५१ ॥ तदाऽसुरारिः स्वं नेत्रमुत्पाट्यार्घ्यमकल्पयत् ॥ अर्घ्यपात्रं करे गृह्य सहस्रकमला
न्वितम् ॥ ध्यात्वा शंभुं ददावर्घ्यमनन्यशरणो हरिः ॥ ५२ ॥ ॥ विष्णुरुवाच ॥ त्वमेव देव जानीषे भावमन्तर्गतं नृणाम् ॥ त्वमेव शरणोऽ
धीशोऽत्र भवेत्का विचारणा ॥ ५३ ॥ ॥ ब्रह्मोवाच ॥ वदन्नुदश्रुनयनो निलिल्येऽसावितीश्वरे ॥ भवानीसहितः शंभुः पुरस्तादभवत्तदा ॥ ५४ ॥
गाढमालिङ्ग्य विविधैर्वरैरापूरयद्धरिम् ॥ तदेव चक्रमभवन्नेत्रं चापि यथा पुरा ॥ ५५ ॥ ततः सुरगणाः सर्वे तुष्टुवुर्हरिशंकरौ ॥ गङ्गां चापि सरि
च्छ्रेष्ठां देवं च वृषभध्वजम् ॥ ५६ ॥ ततः प्रभृति तत्तीर्थं चक्रतीर्थमिति स्मृतम् ॥ यस्यानुश्रवणेनैव मुच्यते सर्वकिल्बिषैः ॥ ५७ ॥ तत्र स्नानं च
दानं च यः कुर्यात्पितृतर्पणम् ॥ सर्वपापविनिर्मुक्तः पितृभिः स्वर्गभाग्भवेत् ॥ तत्तु चक्राङ्कितं तीर्थमद्यापि परिदृश्यते ॥ ५८ ॥ इति श्रीब्रह्मपुरा
णगतगौतमीमाहात्म्ये चक्रतीर्थवर्णनं नामैकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ ॥ ब्रह्मोवाच ॥ पिप्पलं तीर्थमाख्यातं चक्रतीर्थादनन्तरम् ॥ यत्र चक्रे
श्वरो देवश्चक्रमाप यतो हरिः ॥ १ ॥ यत्र विष्णुः स्वयं स्थित्वा चक्रार्थं शंकरं विभुम् ॥ पूजयामास तत्तीर्थं चक्रतीर्थमुदाहृतम् ॥ २ ॥ यत्र प्रीतोऽ
भवद्विष्णोः शंभुस्तत्पिप्पलं विदुः ॥ महिमानं यस्य वक्तुं न क्षमोऽप्यहिनायकः ॥ ३ ॥ चक्रेश्वरे पिप्पलेशे नामधेयस्य कारणम् ॥ शृणु नारद
तद्भक्त्या साक्षाद्वेदोदितं मया ॥ ४ ॥ दधीचिरिति विख्यातो मुनिरासीद्गुणान्वितः ॥ तस्य भार्या महाप्राज्ञा कुलीना च पतिव्रता ॥ ५ ॥
लोपामुद्रेति या ख्याता स्वसा तस्या गर्भस्तिनी ॥ इति नाम्ना च विख्याता वडवेति प्रकीर्तिता ॥ ६ ॥ दधीचेः सा प्रिया नित्यं तपस्तेपे तया
महत् ॥ दधीचिरग्निमान्नित्यं गृहधर्मपरायणः ॥ ७ ॥ भागीरथीं समाश्रित्य देवातिथिपरायणः ॥ स्वकलत्ररतः शान्तः कुम्भयोनिरिवापरः ॥ ८ ॥
तस्य प्रभावात्तं देशं नारयो दैत्यदानवाः ॥ आजग्मुर्मुनिशार्दूल यत्रागस्त्यस्य चाऽऽश्रमः ॥ ९ ॥ तत्र देवाः समाजग्मू रुद्रादित्यास्तथाऽश्विनौ ॥
इन्द्रो विष्णुर्यमोऽग्निश्च जित्वा दैत्यानुपागतान् ॥ १० ॥ जयेन जातसंहर्षाः स्तुताश्चैव मरुद्गणैः ॥ दधीचिं मुनिशार्दूलं दृष्ट्वा नेमुः सुरेश्वराः ॥
॥ ११ ॥ दधीचिर्जातसंहर्षः सुरान्पूज्य पृथक्पृथक् ॥ गृहकृत्यं ततश्चक्रे सुरेभ्यो भार्यया सह ॥ १२ ॥ पृष्टाश्च कुशलं तेन कथाश्चक्रुः सुरा
अपि ॥ दधीचिमब्रुवन्देवा भार्यया सुखितं पुनः ॥ १३ ॥ आसीनं हृष्टमनस ऋषिं नत्वा पुनः पुनः ॥ १४ ॥ देवा ऊचुः ॥ किमद्य दुर्लभं लोके
ऋषेऽस्माकं भविष्यति ॥ त्वादृशः सकृपो येषु मुनिर्भूकल्पपादपः ॥ १५ ॥ एतदेव फलं पुंसां जीवतां मुनिसत्तम ॥ तीर्थाद्भुतिर्भूतदया दर्शनं च

भवादृशाम् ॥ १६ ॥ यत्स्नेहादुच्यतेऽस्माभिरवधारय तन्मुने ॥ जित्वा दैत्यानिह प्राप्ता हत्वा राक्षसपुंगवान् ॥ १७ ॥ वयं च सुखिनो ब्रह्मंस्त्वयि
दृष्टे विशेषतः ॥ नाऽऽयुधैः फलमस्माकं वोढुं नैव क्षमा वयम् ॥ १८ ॥ स्थाप्यदेशं न पश्याम आयुधानां मुनीश्वर ॥ स्वर्गे सुरद्विषो ज्ञात्वा
स्थापितानि हरन्ति च ॥ १९ ॥ नयेयुरायुधानीति तथैव च रसातले ॥ तस्मात्तवाश्रमे पुण्ये स्थाप्यन्तेऽस्त्राणि मानद ॥ २० ॥ नैवान्य किंचिद्र
यमस्ति विप्र न दानवेभ्यो राक्षसेभ्यश्च घोरम् ॥ त्वदाज्ञया रक्षितपुण्यदेशो न विद्यते तपसा ते समानः ॥ २१ ॥ जितारयो ब्रह्मविदां वरिष्ठं वयं च
पूर्वं निहता दैत्यसंघाः ॥ अस्त्रैरलं भारभूतैः कृतार्थैः स्थाप्यं स्थानं ते समीपे मुनीश ॥ २२ ॥ दिव्यान्भोगान्कामिनीभिः समेतान्देवोद्याने नन्दने
संभजामः ॥ ततो यामः कृतकार्याः सहेन्द्राः स्वं स्वं स्थानं चाऽऽयुधानां च रक्षा ॥ २३ ॥ त्वया कृता जायतां तत्प्रशाधि समर्थस्त्वं रक्षणे धारणे
च ॥ २४ ॥ ॥ ब्रह्मोवाच ॥ तद्वाक्यमाकर्ण्य दधीचिरेवं वाक्यं जगौ विबुधानेवमस्तु ॥ निवार्यमाणः प्रियशीलया स्त्रिया किं देवकार्येण विरुद्ध
कारिणा ॥ २५ ॥ ये ज्ञातशास्त्राः परमार्थनिष्ठाः संसारचेष्टासु गतानुरागाः ॥ तेषां परार्थव्यसनेन किं मुने येनात्र वाऽमुत्र सुखं न किंचित् ॥
॥ २६ ॥ देवद्विषो द्वेषमनुप्रयान्ति दत्ते स्थाने विप्रवर्य शृणुष्व ॥ नष्टे हृते चाऽऽयुधानां मुनीश कुप्यन्ति देवा रिपवस्ते भवन्ति ॥ २७ ॥
तस्मान्नेदं वेदविदां वरिष्ठ युक्तं द्रव्ये परकीये ममत्वम् ॥ तावच्च मैत्री द्रव्यभावश्च तावन्नष्टे हृते रिपवस्ते भवन्ति ॥ २८ ॥ चेदस्ति
शक्तिर्द्रव्यदाने ततस्ते दातव्यमेवार्थिने किं विचार्यम् ॥ नो चेत्सन्तः परकार्याणि कुर्युर्वाग्भिर्मनोभिः कृतिभिस्तथैव ॥ २९ ॥ पर
स्वसंधारणमेतदेव सद्भिर्निरस्तं त्यज कान्त सद्यः ॥ ३० ॥ ॥ ब्रह्मोवाच ॥ एवं प्रियाया वचनं स विप्रो निशम्य भार्यामिदमाह सुभ्रूम् ॥ ३१ ॥
दधीचिरुवाच ॥ पुरा सुराणामनुमान्य भद्रे नेतीति वाणी न सुखं ममेति ॥ ३२ ॥ ॥ ब्रह्मोवाच ॥ श्रुत्वेरितं पत्युरिति प्रियायां दैवं विनाऽन्यन्न
नृणां समर्थम् ॥ तूष्णीं स्थितायां सुरसत्तमास्ते संस्थाप्य चास्त्राण्यतिदीप्तिमन्ति ॥ ३३ ॥ नत्वा मुनीन्द्रं ययुरेव लोकान्दैत्यद्विषो न्यस्तशस्त्राः
कृतार्थाः ॥ गतेषु देवेषु मुनिप्रवर्यो हृष्टोऽवसद्भार्यया धर्मयुक्तः ॥ ३४ ॥ गते च काले ह्यतिविप्रयुक्ते दैवे वर्षे संख्यया वै सहस्रे ॥ न ते सुरा आयु
धानां मुनीश वाचं मनश्चापि तथैव चक्रुः ॥ ३५ ॥ दधीचिरप्याह गभस्तिमोजसा देवारयो मां द्विषंतीह भद्रे ॥ न ते सुरा नेतुकामा भवन्ति
संस्थापितान्यत्र वदस्व युक्तम् ॥ ३६ ॥ सा चाऽऽह कान्तं विनयादुक्तमेव त्वं जानीषे नाथ यदत्र युक्तम् ॥ दैत्या हरिष्यन्ति महाप्रवृद्धास्तपो
युक्ता बलिनः स्वायुधानि ॥ ३७ ॥ तदस्त्ररक्षार्थमिदं स चक्रे मन्त्रैस्तु संक्षाल्य जलैश्च पुण्यैः ॥ तद्वारि सर्वास्त्रमयं सुपुण्यं तेजोयुक्तं तच्च

पपौ दधीचिः ॥ ३८ ॥ निर्वीर्यरूपाणि तदायुधानि क्षयं जग्मुः क्रमशः कालयोगात् ॥ सुराः समागत्य दधीचिमूचुर्महाभयं ह्यागतं शात्रवं नः ॥
॥ ३९ ॥ ददस्व चास्त्राणि मुनिप्रवीर यानि त्वदन्ते निहितानि दैवैः ॥ दधीचिरप्याह सुरारिभीत्या अनागत्या भवतां चाचिरेण ॥ ४० ॥ अस्त्राणि
पीतानि शरीरसंस्थान्युक्तानि युक्तं मम तद्ददन्तु ॥ श्रुत्वा तदुक्तं वचनं तु देवाः प्रोचुस्तमित्थं विनयावनम्राः ॥ ४१ ॥ अस्त्राणि देहीति च वक्तुमेत
च्छक्यं न वाऽन्यत्प्रतिवक्तुं मुनीन्द्र ॥ विना च तैः परिभूयेम नित्यं पुष्टारयः क्व प्रयामो मनीश ॥ ४२ ॥ न मर्त्यलोके न तले न नाके वासः
सुराणां भविताऽद्य तात ॥ त्वं विप्रवर्यस्तपसा चैव युक्तो नान्यद्वक्तुं युज्यते ते पुरस्तात् ॥ ४३ ॥ विप्रस्तदोवाच मदस्थिसंस्थान्यस्त्राणि गृह्णन्तु न
संशयोऽत्र ॥ देवास्तमप्याहुरनेन किं नो ह्यस्त्रैर्हीनाः स्त्रीत्वमाप्ताः सुरेन्द्राः ॥ ४४ ॥ पुनस्तदा चाऽऽह मुनिप्रवीरस्त्यक्ष्ये जीवान्दैहिकान्योगयुक्तः ॥
अस्त्राणि कुर्वन्तु मदस्थिभूतान्यनुत्तमान्युत्तमरूपवन्ति ॥ ४५ ॥ कुरुष्व चेत्याहुरदीनसत्त्वं दधीचिमित्युत्तरमग्निकल्पम् ॥ तदा तु तस्य प्रियमी
रयन्ती न सांनिध्ये प्रातिथेयी मुनीश ॥ ४६ ॥ ते चापि देवास्तामदृष्ट्वैव शीघ्रं तस्या भीता विप्रमूचुः कुरुष्व ॥ तत्याज जीवान्दुस्त्यजान्प्रीतियुक्तो
यथा सुखं देहमिमं जुषध्वम् ॥ ४७ ॥ मदस्थिभिः प्रीतिमन्तो भवन्तु सुराः सर्वे किंतु देहेन कार्यम् ॥ ४८ ॥ ॥ ब्रह्मोवाच ॥ इत्युक्त्वाऽसौ बद्धपद्मा
सनस्थो नासाग्रदत्ताक्षिप्रकाशप्रसन्नः ॥ वायुं सवह्निं मध्यमोद्घोटयोगान्नीत्वा शनैर्देहराकाशगर्भम् ॥ ४९ ॥ यदप्रमेयं परमं पदं यद्ब्रह्मरूपं
यदुपासितव्यम् ॥ तत्रैव विन्यस्य धियं महात्मा सायुज्यतां ब्रह्मणोऽसौ जगाम ॥ ५० ॥ निर्जीवतां प्राप्तमवीक्ष्य देवाः कलेवरं तस्य सुराश्च
सम्यक् ॥ त्वष्टारमप्यूचुरतित्वरन्तः कुरुष्व चास्त्राणि बहूनि सद्यः ॥ ५१ ॥ स चापि तानाह कथं नु कार्यं कलेवरं ब्राह्मणस्येह देवाः ॥ बिभेमि
कर्तुं दारुणं चाक्षमोऽहं विदारितान्यायुधान्युत्तमानि ॥ ५२ ॥ तदस्थिभूतानि करोमि सद्यस्ततो देवा गाः समूचुस्त्वरन्तः ॥५३॥ ॥ देवा ऊचुः ॥
वज्रं मुखं वः क्रियते क्षितार्थं गावो देवैरायुधार्थं क्षणेन ॥ दधीचिदेहं तु विदार्य यूयमस्थीनि शुद्धानि प्रयच्छताद्य ॥ ५४ ॥ ॥ ब्रह्मोवाच ॥ ता देव
वाक्याच्च तथैव चक्रुः संलिह्य चास्थीनि ददुः सुराणाम् ॥ सुरास्त्वरा जग्मुरदीनसत्त्वाः स्वमालयं चापि तथैव गावः ॥ ५५ ॥ कृत्वा तथाऽस्त्राणि
च देवतानां त्वष्टा जगामाथ महांस्त्वरंस्तदा ॥ ततश्चिराच्छीलवती सुभद्रा भर्तुः प्रिया बालगर्भा त्वरन्ती ॥ ५६ ॥ करे गृहीत्वा कलशं वारिपूर्णं
मुमां नत्वा फलपुष्पैः समेत्य ॥ अग्निं च भर्तारमथाऽऽश्रमं च संद्रष्टुकामा ह्याजगामाथ शीघ्रम् ॥ ५७ ॥ संतप्तचित्ता पथि वीक्ष्य कंठाद्भ्रष्टां विभूषां
पतितां धरायाम् ॥ पपात हस्तात्करभूषणञ्च नेत्रं तथा दक्षिणमुच्छलास ॥ ५८ ॥ हा किं भविष्यद्य चिरेण कष्टमित्यंतरेणेव विचिन्तयन्ती ॥

आगच्छन्तां तां प्रातिथेयीं तदानीं निवारयामास तदोल्कपातः ॥ सा संभ्रमादागता चाऽऽश्रमं स्वं नैवापश्यत्तत्र भर्तारमग्रे ॥ ५९ ॥ क्व वा गतश्चेति
सविस्मया सा पप्रच्छ चाग्निं प्रातिथेयी तदानीम् ॥ अग्निस्तदोवाच सविस्तरं तां देवागमं याचनं वै शरीरे ॥ ६० ॥. अस्थ्नामुपादानमथ प्रयाणं
श्रुत्वा सर्वं दुःखिता सा बभूव ॥ दुःखोद्वेगात्सा पपातात्थ पृथ्व्यां मन्दं मन्दं वह्निनाऽऽश्वासिता च ॥ ६१ ॥ ॥ प्रातिथेय्युवाच ॥ शापेऽमराणां तु
नाहं समर्था अग्निं प्राप्स्ये किं नु कार्यं भवेन्मे ॥ ६२ ॥ ॥ ब्रह्मोवाच ॥ कोपं च दुःखं च नियम्य साध्वी तदाऽवादीद्धर्मयुक्तं च भर्तुः ॥ ६३ ॥
॥ प्रातिथेय्युवाच ॥ उत्पद्यते यत्तु विनाशि सर्वं न शोच्यमस्तीति मनुष्यलोके ॥ गोविप्रदेवार्थमिह त्यजन्ति प्राणान्प्रियान्पुण्यभाजो मनुष्याः॥
॥ ६४ ॥ संसारचक्रे परिवर्तमाने देहं समर्थं धर्मयुक्तं त्ववाप्य ॥ प्रियान्प्राणान्देवविप्रार्थहेतोस्ते वै धन्याः प्राणिनो ये त्यजन्ति ॥ ६५ ॥
प्राणाः सर्वेऽस्यापि देहान्वितस्य यातारो वै नात्र संदेहलेशः ॥ एवं ज्ञात्वा विप्रगोदेवदीनाद्यर्थं चैनानुत्सृजन्तीश्वरास्ते ॥ ६६ ॥ निवार्यमाणोऽपि
मया प्रपन्नया चकार देवास्त्रपरिग्रहं सः ॥ मनोगतं वेत्त्यथवा विधातुः को मर्त्यलोकातिगचेष्टितस्य ॥ ६७ ॥ ॥ ब्रह्मोवाच ॥ इत्येवमुक्त्वाऽऽपूज्य
चाग्नीन्यथावद्भर्तुस्त्वचालोमभिः सा विवेश ॥ गर्भस्थितं बालकं प्रातिथेयी कुक्षिं विदार्याथ करे गृहीत्वा ॥ ६८ ॥ नत्वा च गङ्गां भुवमाश्रमं च
वनस्पतीनोषधीराश्रमस्थान् ॥ ६९ ॥ ॥ प्रातिथेय्युवाच ॥ पित्रा हीनो बन्धुभिर्गोत्रजैश्च मात्रा हीनो बालकः सर्व एव ॥ रक्षन्तु सर्वेऽपि च
भूतसंघास्तथौषध्यो बालकं लोकपालाः ॥ ७० ॥ ये बालकं मातृपितृप्रहीणं सन्निर्विशेषं स्वतनुप्ररूढैः ॥ पश्यन्ति रक्षन्ति त एव नूनं ब्रह्मादि
कानामपि वन्दनीयाः ॥ ७१ ॥ ॥ ब्रह्मोवाच ॥ इत्युक्त्वा चात्यजद्बालं भर्तृचित्तपरायणा ॥ पिप्पलानां समीपे तु न्यस्य बालं नमस्य तु ॥
॥ ७२ ॥ अग्निं प्रदक्षिणीकृत्य यज्ञपात्रसमन्विता ॥ विवेशाग्निं प्रातिथेयी भर्त्रा सह दिवं ययौ ॥ ७३ ॥ रुरुदुश्चाऽऽश्रमस्था ये वृक्षाश्च वनवा
सिनः ॥ पुत्रवत्पोषिता येन ऋषिणा च दधीचिना ॥ ७४ ॥ विना तेन न जीवामस्तया मात्रा विना तथा ॥ मृगाश्च पक्षिणः सर्वे वृक्षाः प्रोचुः
परस्परम् ॥ ७५ ॥ वृक्षा ऊचुः ॥ स्वर्गमासेदुषोः पित्रोस्तदपत्येष्वकृत्रिमम् ॥ ये कुर्वन्त्यनिशं स्नेहं त एव कृतिनो नराः ॥ ७६ ॥ दधीचिः
प्रातिथेयी वा वीक्षतेऽस्मान्यथा पुरा ॥ तथा पिता न माता वा धिगस्मान्पापिनो वयम् ॥ ७७ ॥ अस्माकमपि सर्वेषामतः प्रभृति निश्चितम् ॥
बालो दधीचिः प्रातिथेयी बालो धर्मः सनातनः ॥ ७८ ॥ ॥ ब्रह्मोवाच ॥ एवमुक्त्वा तदौषध्यो वनस्पतिसमन्विताः ॥ सोमं राजानमभ्येत्य
याचिरेऽमृतमुत्तमम् ॥ ७९ ॥ स चापि दत्त्वास्तेभ्यः सोमोऽमृतमनुत्तमम् ॥ ददुर्बालाय ते चापि अमृतं सुरवल्लभम् ॥ ८० ॥ स तेन तृप्तो ववृधे

शुक्लपक्षे यथा शशी ॥ पिप्पलैः पालितो यस्मात्पिप्पलादः स बालकः ॥ प्रवृद्धः पिप्पलानेवमुवाच त्वतिविस्मितः ॥ ८१ ॥ ॥ पिप्पलाद उवाच ॥ मानुषेभ्यो मानुषास्तु जायन्ते पक्षिभिः खगाः ॥ बीजेभ्यो वीरुधो लोके वैषम्यं नैव दृश्यते ॥ वार्क्षस्त्वहं कथं जातो हस्तपादादिजीववान् ॥ ८२ ॥ ॥ ब्रह्मोवाच ॥ वृक्षास्तद्वचनं श्रुत्वा सर्वमूचुर्यथाक्रमम् ॥ दधीचेर्मरणं साध्व्यास्तथा चाग्निप्रवेशनम् ॥ ८३ ॥ अस्थ्नां संहरणं देवैरेतत्सर्वं सविस्तरम् ॥ श्रुत्वा दुःखसमाविष्टो निपपात तदा भुवि ॥ ८४ ॥ आश्वासितः पुनर्वृक्षैर्वाक्यैर्धर्मार्थसंहितैः ॥ आश्वस्तः स पुनः प्राह तदोषधिवनस्पतीन् ॥८५॥ पिप्पलाद उवाच ॥ पितृहन्तॄन्हनिष्येऽहं नान्यथा जीवितुं क्षमः॥ पितुर्मित्राणि शत्रूंश्च तथा पुत्रोऽनुवर्ततें ॥८६॥ स एव पुत्रो योऽन्यस्तु पुत्ररूपो रिपुः स्मृतः ॥ वदन्ति पितृमित्राणि तारयन्त्यहितानपि ॥८७॥ ब्रह्मोवाच ॥ वृक्षास्तं बालमादायसोमान्तिकमथाऽऽययुः ॥ बालवाक्यं तु ते वृक्षाः सोमायाथ न्यवेदन् ॥ श्रुत्वा सोमोऽपि तं बालं पिप्पलादमभाषत ॥ ८८ ॥ सोम उवाच ॥ गृहाण विद्यां विधिवत्समग्रां तपः समृद्धिं च शुभां च वाचम् ॥ शौर्यं च रूपं च बलं च बुद्धिं संप्राप्स्यसे पुत्र मदाज्ञया त्वम् ॥ ८९ ॥ ॥ ब्रह्मोवाच ॥ पिप्पलादस्तमप्याह ओषधीशं विनीतवत् ॥ ९० ॥ ॥ पिप्पलाद उवाच ॥ सर्वमेतद्वृथा मन्ये पितृहन्तृविनिष्कृतिम् ॥ न करोम्यत्र यावच्च तस्मात्तत्प्रथमं वद ॥९१॥ यस्मिन्देशे यत्र काले यस्मिन्देवे च मन्त्रके ॥ यत्र तीर्थे च सिध्येत मत्संकल्पः सुरोत्तम ॥ ९२ ॥ ॥ ब्रह्मोवाच ॥ चन्द्रः प्राह चिरं ध्यात्वा भुक्तिर्वा मुक्तिरेव वा ॥ सर्वं महेश्वरादेवाज्जायते नात्र संशयः ॥ ९३ ॥ स सोमं पुनरप्याह कथं द्रक्ष्ये महेश्वरम् ॥ बालोऽहं बालबुद्धिश्च न सामर्थ्यं तपस्तथा ॥ ९४ ॥ चन्द्र उवाच ॥ गौतमीं गच्छ भद्रं त्वं स्तुहि चक्रेश्वरं हरम् ॥ प्रसन्नस्तु तवेशानो ह्यल्पायासेन वत्सक ॥ ९५॥ प्रीतो भवेन्महादेवः साक्षात्कारुणिकः शिवः ॥ आस्ते साक्षात्कृतः शंभुर्विष्णुना प्रभविष्णुना ॥ ९६ ॥ वरं च दत्तवान्विष्णोश्चक्रं च त्रिदशार्चितम् ॥ गच्छ तत्र महाबुद्धे दण्डके गौतमीं नदीम् ॥ ९७ ॥ चक्रेश्वरं नाम तीर्थं जानन्त्योषधयस्तु तत् ॥ तं गत्वा स्तुहि देवेशं सर्वभावेन शंकरम् ॥ स ते प्रीतमनास्तात सर्वान्कामान्प्रदास्यति ॥ ९८ ॥ ॥ ब्रह्मोवाच ॥ तद्वाजवचनाद्ब्रह्मन्पिप्पलादो महामुनिः ॥ आजगाम जगन्नाथो यत्र रुद्रः स चक्रदः ॥ ९९ ॥ तं बालं कृपयाऽऽविष्टाः पिप्पलाः स्वाश्रमान्ययुः ॥ गोदावर्यां ततः स्नात्वा नत्वा त्रिभुवनेश्वरम् ॥ तुष्टाव सर्वभावेन पिप्पलादः शिवं शुचिः ॥ १०० ॥ ॥ पिप्पलाद उवाच ॥ सर्वाणि कर्माणि विहाय धीरास्त्यक्तैषणा निर्जितचित्तवाताः ॥ यं यान्ति मुक्त्यै शरणं प्रयत्नात्तमादिदेवं प्रणमामि शंभुम् ॥ १०१ ॥ यः सर्वसाक्षी सकलान्तरात्मा सर्वेश्वरः सर्वकलानिधानम् ॥ विज्ञाय मच्चित्तगतं समस्तं स मे स्मरारिः करुणां करोतु ॥ १०२ ॥ दिगीश्वराज्ञित्य

सुरार्चितस्य कैलासमान्दोलयतः पुरारेः ॥ अङ्गुष्ठकृत्यैव रसातलादधोगतस्य तस्यैव दशाननस्य ॥ १०३ ॥ आलूनकायस्य गिरं निशम्य विह
स्य देव्या सह दत्तमिष्टम् ॥ तस्मै प्रसन्नः कुपितोऽपि तद्वदयुक्तदाताऽसि महेश्वर त्वम् ॥ १०४॥ सौत्रामणीमृद्धिमधः स चक्रे योऽर्चां हरे नित्यमती
व कृत्वा ॥ बाणः प्रशस्यः कृतवानुच्चपूजां रम्यां मनोज्ञां शशिखण्डमौलेः ॥ १०५ ॥ जित्वा रिपून्देवगणान्प्रपूज्य गुरुं नमस्कर्तुमगाद्गिरीशखं ॥
चुकोप दृष्ट्वा गणनाथमूढमङ्के तमारोप्य जहास सोमः ॥ १०६ ॥ ईशाङ्कारूढोऽपि शिशुस्वभावान्न मातुरङ्कं प्रमुमोच बालः ॥ क्रुद्धं सुतं बोधितुमप्य
शक्तस्ततोऽर्धनारीत्वमवाप सोमः ॥ १०७ ॥ ॥ ब्रह्मोवाच ॥ ॥ ततः स्वयंभूः सुप्रीतः पिप्पलादमभाषत ॥ १०८ ॥ ॥ शिव उवाच ॥ वरं वरय
भद्रं ते पिप्पलाद यथेप्सितम् ॥ १०९ ॥ ॥ पिप्पलाद उवाच ॥ हतो देवैर्महादेव पिता मम महायशाः ॥ अदाम्भिकः सत्यवादी तथा माता पतिव्र
ता ॥ ११० ॥ देवेभ्यश्च तयोर्नाशं श्रुत्वा नाथ सविस्तरम् ॥ दुःखकोपसमाविष्टो नाहं जीवितुमुत्सहे ॥ १११ ॥ तस्मान्मे देहि सामर्थ्यं नाशये
यं सुरान्यथा ॥ अवध्यसेव्यस्त्रैलोक्ये त्वमेव शशिशेखर ॥ ११२ ॥ ॥ ईश्वर उवाच ॥ तार्तीयं नयनं द्रष्टुं यदि शक्नोषि मेऽनघ ॥ ततः समर्थो
भविता देवांच्छेदयितुं भवान् ॥ ११३ ॥ ॥ ब्रह्मोवाच ॥ ततो द्रष्टुं मनश्चक्रे तृतीयं लोचनं विभोः ॥ न शशाक तदोवाच न शक्तोऽस्मीति शंक
रम् ॥ ११४ ॥ ॥ ईश्वर उवाच ॥ किंचित्कुरु तपो बाल यदा द्रक्ष्यसि लोचनम् ॥ तृतीयं त्वं तदाऽभीष्टं प्राप्स्यसे नात्र संशयः ॥ ११५ ॥ ॥
ब्रह्मोवाच ॥ एतच्छ्रुत्वेशानवाक्यं तपसे कृतनिश्चयः ॥ दधीचिसूनुर्धर्मात्मा तत्रैव बहुलाः समाः ॥ ११६ ॥ शिवध्यानैकनिरतो बालोऽपि बलवा
निव ॥ प्रत्यहं प्रातरुत्थाय स्नात्वा नत्वा गुरून्क्रमात् ॥ ११७ ॥ सुखासीनो मनः कृत्वा सुषुम्नायामनन्यधीः ॥ हस्तस्वस्तिकमारोप्य नाभौ विस्मृ
तसंसृतिः ॥ ११८ ॥ स्थानात्स्थानान्तरोत्कर्षान्विदध्यौ शांभवं महः ॥ ददर्श चक्षुर्देवस्य तृतीयं पिप्पलाशनः ॥ कृताञ्जलिपुटो भूत्वा विनीत
इदमब्रवीत् ॥ ११९ ॥ ॥ पिप्पलाद उवाच ॥ शंभुना देवदेवेन वरो दत्तः पुरा मम ॥ तार्तीयचक्षुषो ज्योतिर्यदा पश्यसि तत्क्षणात् ॥ १२० ॥
सर्वं ते प्रार्थितं सिध्येदित्याह त्रिदशेश्वरः ॥ तस्माद्रिपुविनाशाय हेतुभूतां प्रयच्छ मे ॥ १२१ ॥ तदैव पिप्पलाः प्रोचुर्वंडवाऽपि महाद्युते ॥ माता
तव प्रातिथेयी वदन्त्येवं दिवं गता ॥ १२२ ॥ पराभिद्रोहनिरता विस्मृतात्महिता नराः ॥ इतस्ततो भ्रान्तचित्ताः पतन्ति नरकावटे ॥ १२३ ॥
तन्मातृवचनं श्रुत्वा कुपितः पिप्पलाशनः ॥ अभिमाने ज्वलत्यन्तः साधुवादो निरर्थकः ॥ १२४ ॥ देहि देहीति तं प्राह कृत्या नेत्रविनिर्गता ॥
वंडवेति स्मरन्विप्रः कृत्याऽपि वडवाकृतिः ॥ १२५ ॥ सर्वसत्त्वविनाशाय प्रभूताऽनलगर्भिणी ॥ गर्भस्तिनी बालगर्भा या माता पिप्पला

शिनः ॥१२६॥ तद्ध्यानयोगात्तु जाता कृत्या साऽनलगर्भिणी ॥ उत्पन्ना सा महारौद्रा मृत्युजिह्वे व भीषणा ॥१२७॥ अवोचत्पिप्पलादं तं किं कृत्यं मे वदस्व तत् ॥ पिप्पलादोऽपि तां प्राह देवान्खाद रिपून्मम ॥ १२८ ॥ जग्राह सा तथेत्युक्त्वा पिप्पलादं पुरःस्थितम् ॥ स प्राह किमिदं कृत्ये सा चाप्याह त्वयोदितम् ॥ १२९ ॥ देवैश्च निर्मितं देहं ततो भीतः शिवं ययौ ॥ तुष्टाव देवं स मुनिः कृत्यां प्राह तदा शिवः ॥ १३० ॥ ॥ शिव उवाच ॥ योजनान्तःस्थिताञ्जीवान्न गृहाण मदाज्ञया ॥ तस्माद्याहि ततो दूरं कृत्ये कृत्यं ततः कुरु ॥ १३१ ॥ ॥ ब्रह्मोवाच ॥ तीर्थात्तु पिप्पलात्पूर्वं यावद्योजनसंख्यया ॥ प्रातिष्ठद्दडवारूपा कृत्या सा ऋषिनिर्मिता ॥ १३२ ॥ तस्यां जातो महानग्निर्लोकसंहरणक्षमः॥ तं दृष्ट्वा विबुधाः सर्वे त्रस्ताः शंभुमुपागमन् ॥ १३३ ॥ चक्रेश्वरं पिप्पलेशं पिप्पलादेन तोषितम् ॥ स्तुवन्तो भीतमनसः शंभुमूचुर्दिवौकसः ॥ १३४ ॥ ॥ देवा ऊचुः ॥ रक्षस्व शंभो कृत्याऽस्मान्वाधते तद्भवानलः ॥ शरणं भव सर्वेश भीतानामभयप्रद ॥ १३५ ॥ सर्वतः परिभूतानामार्तानां श्रान्तचेतसाम् ॥ सर्वेषामेव जन्तूनां त्वमेव शरणं शिव ॥ १३६ ॥ ऋषिणाऽभ्यर्थिता कृत्या त्वच्चक्षुर्वह्निनिर्गता ॥ सा जिघांसति लोकांस्त्रींस्त्वं नस्त्राता न चेतरः॥१३७॥ ब्रह्मोवाच ॥ तानब्रवीज्जगन्नाथो योजनान्तर्निवासिनः ॥ न बाधते त्वसौ कृत्या तस्माद्यूयमहर्निशम् ॥१३८॥ इहैवाऽऽसध्वममरास्तस्या वो न भयं भवेत् ॥ १३९ ॥ ॥ ब्रह्मोवाच ॥ पुनरूचुः सुरेशानं त्वया दत्तं त्रिविष्टपम् ॥ तत्त्यक्त्वाऽत्र कथं नाथ वत्स्यामस्त्रिदशार्चित ॥ १४० ॥ ॥ ब्रह्मोवाच ॥ देवानां वचनं श्रुत्वा शिवो वाक्यमथाब्रवीत् ॥ १४१ ॥ ॥ शिव उवाच ॥ देवोऽसौ विश्वतश्चक्षुर्यो देवो विश्वतोमुखः ॥ यो रश्मिभिस्तु धमते नित्यं यो जनको मतः ॥ १४२ ॥ स सूर्य एक एवात्र साक्षाद्रूपेण सर्वदा ॥ स्थितिं करोतु तन्मूर्तौ भविष्यन्त्यखिलाः स्थिताः ॥ १४३ ॥ ॥ ब्रह्मोवाच ॥ तथेति शंभुवचनात्पारिजाततरोस्तदा ॥ देवा दिवाकरं चक्रुस्त्वष्टा भास्करमब्रवीत् ॥ १४४ ॥ ॥ त्वष्टोवाच ॥ इहैवाऽऽस्स्व जगत्स्वामिन्रक्षेमान्विबुधान्स्वयम् ॥ स्वांशैश्च वयमप्यत्र तिष्ठामः शंभुसंनिधौ ॥ १४५ ॥ चक्रेश्वरस्य परितो यावद्योजनसंख्यया ॥ गङ्गाया उभयं तीरमासाद्याऽऽसन्सुरोत्तमाः ॥ १४६ ॥ अङ्गुल्यर्धार्धमात्रं तु गंगातीरं समाश्रिताः ॥ तिस्रः कोट्यस्तथा पञ्च शतानि मुनिसत्तम ॥ तीर्थानां तत्र व्युष्टिं च कः शृणोति ब्रवीति वा ॥ १४७ ॥ ॥ ब्रह्मोवाच ॥ ततः सुरगणाः सर्वे विनीताः शिवमब्रुवन् ॥ ॥ १४८ ॥ ॥ देवा ऊचुः ॥ पिप्पलादं सुरेशान शमं नय जगन्मय ॥ १४९ ॥ ॥ ब्रह्मोवाच ॥ ओमित्युक्त्वा जगन्नाथः पिप्पलादमवोचत ॥ ॥ १५० ॥ ॥ शिव उवाच ॥ नाशितेष्वपि देवेषु पिता ते नाऽऽगमिष्यति ॥ दत्ताः पित्रा तव प्राणा देवानां कार्यसिद्धये ॥ १५१ ॥ दीनार्तकरुणा

बन्धुः को हि तादृग्भवे भवेत् ॥ तथा याता दिवं तात तव माता पतिव्रता ॥१५२॥ समा काऽप्यत्र मतया लोपामुद्राऽप्यरुन्धती ॥ यदस्थिभिः सुराः सर्वे जयिनः सुखिनः सदा॥१५३॥तेनावाप्तं यशः स्फीतं तव मात्राऽक्षयं कृतम् ॥ त्वया पुत्रेण सर्वत्र यशः परतरं कृतम्॥१५४॥त्वत्प्रतापभयात्स्वर्गाच्च्युतांस्त्वं पातुमर्हसि ॥ कांदिशीकांस्तव भयादमरांस्त्रातुमर्हसि ॥ नाऽऽर्तत्राणाच्चाभ्यधिकं सुकृतं भुवि विद्यते॥१५५॥यावद्यशः स्फुरति चारु मनुष्यलोके अहानि तावन्ति दिवं गतस्य ॥ दिने दिने वर्षसंख्या परास्मिँल्लोके वासो जायते निर्विकारः ॥१५६॥ मृतास्त एवात्र यशो न येषामन्वास्त एव श्रुतवर्जिता ये ॥ ये दानशीला न नपुंसकास्ते ये धर्मशीला न त एव शोच्याः ॥ १५७ ॥ ॥ ब्रह्मोवाच ॥ भाषितं देवदेवस्य श्रुत्वा शान्तोऽभवन्मुनिः ॥ कृताञ्जलिपुटो भूत्वा नत्वा नाथमथाब्रवीत् ॥ १५८ ॥ ॥ पिप्पलाद उवाच ॥ वाग्भिर्मनोभिः कृतिभिः कदाचिन्ममोपकुर्वन्ति हिते रता ये ॥ तेभ्यो हितार्थं त्विह चापरेषां सोमं नमस्यामि सुरादिपूज्यम् ॥ १५९ ॥ संरक्षितो यैरभिवर्धितश्च समानगोत्रश्च समानधर्मा ॥ तेषामभीष्टानि शिवः करोतु बालेन्दुमौलिं प्रणतोऽस्मि नित्यम् ॥ १६० ॥ यैरहं वर्धितो नित्यं मातृवत्पितृवत्प्रभो ॥ तन्नाम्ना जायतां तीर्थं देवदेव जगत्त्रये ॥ १६१ ॥ यशस्तु तेषां भविता तेभ्योऽहमनृणस्ततः ॥ यानि क्षेत्राणि देवानां यानि तीर्थानि भूतले ॥ १६२ ॥ तेभ्यो यदीदमधिकमनुमन्यन्तु देवताः ॥ ततः क्षमेऽहं देवानामपराधं निरन्तरम् ॥ ॥ १६३ ॥ ॥ ब्रह्मोवाच ॥ ततः समक्षं सुरसाक्षरां गिरं सहस्रचक्षुःप्रमुखास्तथाऽग्रतः ॥ उवाच देवा अपि मेनिरे वचो दधीचिपुत्रोदितमादरेण॥१६४॥बालस्य बुद्धिं विनयं च विद्यां शौर्यं बलं साहसं सत्यवाचम् ॥ पित्रोर्भक्तिं भावशुद्धिं विदित्वा तदाऽऽशादीच्छंकरः पिप्पलादम् ॥ १६५ ॥ ॥ शंकर उवाच ॥ वत्स यद्वै प्रियं कामं यच्चापि सुरवल्लभम् ॥ प्राप्स्यसे वद कल्याणं नान्यथा त्वं मनः कृथाः ॥ १६६ ॥ ॥ पिप्पलाद उवाच ॥ ये गङ्गयामाप्लुता धर्मनिष्ठाः संपश्यन्ति त्वत्पदाब्जं महेश ॥ सर्वान्कामानाप्नुवन्तु प्रसह्य देहान्ते ते पदमायान्तु शैवम् ॥ १६७ ॥ तातः प्राप्तस्त्वत्पदं चाम्बिका मे नाथ प्राप्ता पिप्पलश्चामराश्च ॥ सुखं प्राप्ता नाथनाथं विलोक्य त्वां पश्येयुस्त्वत्पदं ते प्रयान्तु ॥ १६८ ॥ ॥ ब्रह्मोवाच ॥ तथेत्युक्त्वा पिप्पलादं देवदेवो महेश्वरः ॥ अभिनन्द्य च तं देवैः सार्धं वाक्यमथाब्रवीत् ॥ १६९ ॥ देवा अपि मुदा युक्ता निर्भयास्तत्कृताद्भयात् ॥ इदमूचुः सर्व एव दाधीचं शिवसंनिधौ ॥ १७० ॥ ॥ देवा ऊचुः ॥ सुराणां यदभीष्टं च त्वया कृतमसंशयम् ॥ पालिता देवदेवस्य आज्ञा त्रैलोक्यमण्डनी ॥ १७१ ॥ याचितं च त्वया पूर्वं परार्थं नाऽत्मने द्विज ॥ तस्मादन्यत्तमं ब्रूहि किंचिद्दास्यामहे वयम् ॥ १७२ ॥ ॥ ब्रह्मोवाच ॥ पुनः पुनस्तदेवोचुः सुरसंघा द्विजोत्तमम् ॥ कृताञ्जलिपुटः पूर्वं

नत्वा शंभुसुरानिदम् ॥ उवाच पिप्पलादश्च उमां नत्वा च पिप्पलान् ॥ १७३ ॥ ॥ पिप्पलाद उवाच ॥ पितरौ द्रष्टुकामोऽस्मि सदा मे शब्दगो चरौ ॥ ते धन्याः प्राणिनो लोके मातापित्रोर्वशे स्थिताः ॥१७४॥ शुश्रूषणपरा नित्यं तत्पादाज्ञाप्रतीक्षकाः ॥ इन्द्रियाणि शरीरं च कुलं शक्तिं धियं वपुः ॥ १७५ ॥ परिलभ्य तयोः कृत्ये कृतकृत्यो भवेत्स्वयम् ॥ पशूनां पक्षिणां चापि सुलभं मातृदर्शनम् ॥ १७६ ॥ दुर्लभं मम तच्चापि पृच्छे पापफलं नु किम् ॥ दुर्लभं च तथा चेत्स्यात्सर्वेषां यस्य कस्यचित् ॥ १७७ ॥ नोपपद्येत सुलभं मत्तो नान्योऽस्ति पापकृत् ॥ तयोर्दर्शनमात्रं च यदि प्राप्स्ये सुरोत्तमाः ॥ १७८ ॥ मनोवाक्कायकर्मभ्यः फलं प्राप्तं भविष्यति ॥ पितरौ ये न पश्यन्ति समुत्पन्ना स्तु संसृतौ ॥ तेषां महा पातकानां कः संख्यां कर्तुमीश्वरः ॥ १७९ ॥ ब्रह्मोवाच ॥ तद्दधेर्वचनं श्रुत्वा मिथः संमन्त्र्य ते सुराः ॥ विमानवरमारूढौ पितरौ दंपती शुभौ ॥ १८० ॥ तव संदर्शनाकाङ्क्षौ द्रक्ष्यसे त्वद्य निश्चितम् ॥ विषादं लोभमोहौ च त्यक्त्वा चित्तं शमं नय ॥ १८१ ॥ पश्य पश्येति तं प्राहुर्दाधीचं सुरसत्तमाः ॥ विमानवरमारूढौ स्वर्गिणौ स्वर्णभूषणौ ॥ १८२ ॥ तव संदर्शनाकाङ्क्षौ पितरौ दंपती शुभौ ॥ वीज्यमानौ सुरस्त्रीभिः स्तूयमानौ च किंनरैः ॥ ॥ १८३ ॥ दृष्ट्वा स मातापितरौ ननाम शिवसंनिधौ ॥ हर्षबाष्पाश्रुनयनौ स कथंचिदुवाच तौ ॥ १८४ ॥ ॥ पुत्र ऊचुः ॥ तारयन्त्येव पितरा वन्ये पुत्राः कुलोद्वहाः ॥ अहं तु मातुरुदरे केवलं भेदकारणम् ॥ एवंभूतोऽपि तौ मोहात्पश्येयमतिदुर्मतिः ॥ १८५ ॥ ॥ ब्रह्मोवाच ॥ तावालोक्य ततो दुःखाद्वक्तुं नैव शशाक सः ॥ देवाश्च मातापितरौ पिप्पलादमथाब्रुवन् ॥१८६॥ ॥ देवा ऊचुः ॥ धन्यस्त्वं पुत्र लोकेषु यस्य कीर्तिर्गता दिवम् ॥ साक्षात्कृतस्त्वया त्र्यक्षो देवाश्चाऽऽश्वासितास्त्वया ॥ त्वया पुत्रेण सल्लोका न क्षीयन्ते कदाचन ॥१८७॥ब्रह्मोवाच ॥ पुष्पवृष्टिस्तदा स्वर्गात्पपात तस्य मूर्धनि ॥जयशब्दः सुरैरुक्तः प्रादुर्भूतो महामुने॥१८८॥आशिषं तु सुते दत्त्वा दधीचिः सह भार्यया॥शंभुं गङ्गां सुरान्नत्वा पुत्रं वाक्यमथाब्रवीत्॥१८९॥ दधिचिरुवाच ॥ प्राप्य भार्यां शिवे भक्तिं कुरु गङ्गां च सेवय ॥ पुत्रानुत्पाद्य विधिवद्यज्ञानिष्ट्वा सदक्षिणान् ॥ कृतकृत्यस्ततो वत्स आक्रमस्व चिरं दिवम् ॥१९०॥ ब्रह्मोवाच ॥ करोम्येवमिति प्राह दाधीचिः पिप्पलाशनः ॥ दधीचिः पुत्रमाश्वास्य भार्यया च पुनः पुनः॥१९१॥ अनुज्ञातः सुरगणैः पुनः स दिवमाक्रमत् ॥ देवा अप्यूचिरे सर्वे पिप्पलादं ससंभ्रमाः॥१९२॥ देवा ऊचुः ॥ कृत्यां शमय भद्रं ते तदुत्पन्नं महानलम्॥१९३॥ब्रह्मोवाच ॥ पिप्पलादस्तु तानाह न शक्तोऽहं निवारणे ॥ असत्यं नैव वक्ताऽहं यूयं कृत्यां तु ब्रूत ताम् ॥ १९४ ॥ मां दृष्ट्वा सा महारौद्रा विपरीतं करिष्यति ॥ तामेव गत्वा विबुधाः प्रोचुस्ते शान्तिकारणम् ॥ १९५ ॥ अनलं च यथाप्रीति ते उभे नेत्यवोचताम् ॥ सर्वेषां भक्षणायैव सृष्टा चाहं द्विजन्मना ॥

॥ १९६ ॥ तथाच मत्प्रसूतोऽग्निरन्यथा तत्कथं भवेत् ॥ महाभूतानि पञ्चापि स्थावरं जंगमं तथा ॥ १९७ ॥ सर्वमस्मन्मुखे विद्याद्धक्तव्यं नात्र शि
ष्यते ॥ मया संमन्त्र्य ते देवाः पुनरूचुरुभावपि ॥ १९८ ॥ भक्षयेतामुभौ सर्वं यथानुक्रमतस्तथा ॥ वडवाऽपि सुरानेवमुवाच शृणु नारद ॥ १९९ ॥
वडवोवाच ॥ भवतामिच्छया सर्वं भक्ष्यं मे सुरसत्तमाः ॥ २०० ॥ ब्रह्मोवाच ॥ वडवा सा नदी जाता गङ्गया संगता मुने ॥ तद्भवस्तु महानग्निर्य
आसीदतिभीषणः ॥ तमाहुरमरा वह्निं भूतानामादितो विदुः ॥२०१॥ सुरा ऊचुः आपो ज्येष्ठतमा ज्ञेयास्तथैव प्रथमं भवान् ॥ तत्रोप्यपांपतिं ज्येष्ठं
समुद्रमशनं कुरु ॥ यथैव तु वयं ब्रूमो गच्छ भुङ्क्ष्व यथासुखम् ॥ २०२ ॥ ब्रह्मोवाच ॥ अनलस्त्वमरानाह आपस्तत्र कथं त्वहम् ॥ व्रजेयं यदि
मां तत्र प्रापयन्त्युदकं महत् ॥ २०३ ॥ भवन्त एव तेऽप्याहुः कथं तेऽग्ने गतिर्भवेत् ॥ अग्निरप्याह तान्देवान्कन्या मां गुणशालिनी ॥२०४॥ हिरण्य
कलशे स्थाप्य नयेद्यत्र गतिर्मम ॥ तस्य तद्वचनं श्रुत्वा कन्यामूचुः सरस्वतीम् ॥२०५॥ देवा ऊचुः ॥ नयैनमनलं शीघ्रं शिरसा वरुणालयम् ॥२०६॥
ब्रह्मोवाच ॥ सरस्वती सुरानाह नैका शक्ता च धारणे ॥ युक्ता चतसृभिः शीघ्रं वहेयं वरुणालयम् ॥२०७॥ सरस्वत्या वचः श्रुत्वा गङ्गां च यमुनां तथा ॥
नर्मदां तपतीं चैव सुराः प्रोचुः पृथक्पृथक् ॥२०८॥ ताभिः समन्वितोवाह हिरण्यकलशेऽनलम् ॥ संस्थाप्य शिरसाधार्य ता जग्मुर्वरुणालयम्॥२०९॥
संस्थाप्य यत्र देवेशः सोमनाथो जगत्पतिः ॥ अध्यास्ते विबुधैः सार्धं प्रभासे शशिभूषणः ॥२१०॥ प्रापयामासुरनलं पञ्चनद्यः सरस्वती ॥ अध्यास्ते
च महानग्निः पिबन्वारि शनैः शनैः ॥ २११ ॥ ततः सुरगणाः सर्वे शिवमूचुः सुरोत्तमम् ॥२१२॥ ॥ देवा ऊचुः ॥ अस्थ्नां च पावनं ब्रूहि अस्माकं
च गवां तथा ॥ २१३ ॥ ॥ ब्रह्मोवाच ॥ शिवः प्राह तदा सर्वान्गङ्गामाप्लुत्य यत्नतः ॥ देवाश्च गावस्तत्पापान्मुच्यन्ते नात्र संशयः ॥२१४॥ प्रक्षा
लितानि चास्थीनि ऋषिदेहभवान्यथ ॥ तानि प्रक्षालनादेव तत्र प्राप्तानि पूतताम् ॥ २१५ ॥ यत्र देवा मुक्तपापास्तत्तीर्थं पापनाशनम् ॥ तत्र स्नानं
च दानं च ब्रह्महत्याविनाशनम् ॥ २१६ ॥ गवां च पावनं यत्र गोतीर्थं तदुदाहृतम् ॥ तत्र स्नानान्महाबुद्धिर्गोमेधफलमाप्नुयात् ॥ २१७ ॥ यत्र तद्वा
ह्मणास्थीनि आसन्पुण्यानि नारद ॥ पितृतीर्थं तु वै ज्ञेयं पितॄणां प्रीतिवर्धनम् ॥२१८॥ भस्मास्थिनखरोमाणि प्राणिनो यस्य कस्यचित् ॥ तत्र तीर्थं
संक्रमेरन्यावच्चन्द्रार्कतारकम् ॥ २१९ ॥ स्वर्गे वासो भवेत्तस्य अपि दुष्कृतकर्मगः ॥ तथा चक्रेश्वरात्तीर्थात्त्रीणि तीर्थानि नारद ॥ ततः पूताः सुरगणा
गावः शंभुमथाब्रवन् ॥२२०॥ ॥ गोसुरा ऊचुः ॥ यामः स्वं स्वमधिष्ठानमत्र सूर्यः प्रतिष्ठितः ॥ अस्मिन्स्थिते दिनकरे सुराः सर्वे प्रतिष्ठिताः॥२२१॥
भवेयुर्जगतामीश तदनुज्ञातुमर्हसि ॥ सूर्यो ह्यात्माऽस्य जगतस्तस्थुषश्च सनातनः ॥ २२२ ॥ दिवाकरो देवमयस्तत्रास्माभिः प्रतिष्ठितः ॥ यत्र गङ्गा

जगद्धात्री यत्र वै त्र्यम्बकः स्वयम् ॥ सुरवासं प्रतिष्ठानं भवेद्यत्र च त्र्यम्बकम् ॥ २२३ ॥ ॥ ब्रह्मोवाच ॥ आपृच्छ्य पिप्पलादं तं सुराः स्वं सदनं ययुः ॥ पिप्पलाः कालपर्याये स्वर्गं जग्मुरथाक्षयम् ॥ २२४ ॥ पादपानां पदं विप्रः पिप्पलादः प्रतापवान् ॥ क्षेत्राधिपत्ये संस्थाप्य पूजयामास शंकरम् ॥ २२५ ॥ दधीचिमृनुर्मुनिरुग्रतेजा अवाप्य भार्यां गौतमस्याऽऽत्मजां च ॥ पुत्रानथावाप्य श्रियं यशश्च सुहृज्जनैः स्वर्गमवाप धीरः ॥ ॥ २२६ ॥ ततः प्रभृति तत्तीर्थं पिप्पलेश्वरमुच्यते ॥ सर्वक्रतुफलं पुण्यं स्मरणादघनाशनम् ॥ २२७ ॥ किं पुनः स्नानदानाभ्यामादित्यस्य तु दर्शनात् ॥ चक्रेश्वरः पिप्पलेशो देवदेवस्य नामनी ॥ २२८ ॥ सरहस्यं विदित्वा तु सर्वकामानवाप्नुयात् ॥ सूर्यस्य च प्रतिष्ठानात्सुरवासे प्रतिष्ठिते ॥ प्रतिष्ठानं तु तत्क्षेत्रं सुराणामपि वल्लभम् ॥ २२९ ॥ इतीदमाख्यानमतीव पुण्यं पठेत वा यः शृणुयात्स्मरेद्वा ॥ स दीर्घजीवी धनवान्धृर्मयुक्तश्चान्ते स्मरञ्शंभुमुपैति नित्यम् ॥ २३० ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये चक्रेश्वरपिप्पलेश्वरपापप्रणाशनगोतीर्थापितृतीर्थसूर्यप्रतिष्ठानकोट्यादितीर्थवर्णनं नाम चत्वारिंशोऽध्यायः ॥ ४० ॥ ॥ ब्रह्मोवाच ॥ नागतीर्थमिति ख्यातं सर्वकामप्रदं शुभम् ॥ यत्र नागेश्वरो देवः शृणु तस्यापि विस्तरम् ॥ १ ॥ प्रतिष्ठानपुरे राजा शूरसेन इति श्रुतः ॥ सोमवंशभवः श्रीमान्मतिमान्गुणसागरः ॥ २ ॥ पुत्रार्थं स महायत्नमकरोत्प्रियया सह ॥ तस्य पुत्रश्चिरादासीत्सर्पो वै भीषणाकृतिः ॥ ३ ॥ पुत्रं तं पोषयामास शूरसेनो महीपतिः ॥ राज्ञः पुत्रः सर्प इति न कश्चिद्विन्दते जनः ॥ ४ ॥ अन्तर्वर्ती परो वाऽपि मातरं पितरं विना ॥ धात्रेय्यपि न जानाति नामात्यो न पुरोहितः ॥ ५ ॥ तं दृष्ट्वा भीषणं सर्पं सभार्यो नृपसत्तमः ॥ संतापं नित्यमाप्नोति सर्पाद्गरमपुत्रता ॥ ६ ॥ विशेषोज्यं महासर्पो वक्ति नित्यं मनुष्यवत् ॥ स सर्पः पितरं प्राह कुरु चूडामपि क्रियाम् ॥ ७ ॥ तथोपनयनं चापि वेदाध्ययनमेव च ॥ यावद्वेदं न चाधीते तावच्छूद्रसमो द्विजः ॥ ८ ॥ ॥ ब्रह्मोवाच ॥ एतच्छ्रुत्वा पुत्रवचः शूरसेनोऽतिदुःखितः ॥ ब्राह्मणं कंचनाऽऽनीय संस्कारादि तदाऽकरोत् ॥ अधीतवेदः सर्पोऽपि पितरं चाब्रवीदिदम् ॥९॥ ॥ सर्प उवाच ॥ विवाहं कुरु मे राजन्स्त्रीकामोऽहं नृपोत्तम ॥ अन्यथाऽपि च कृत्यं ते न सिध्येदिति मे मतिः ॥ १० ॥ जनयित्वाऽऽत्मजान्वेदविधिनाऽखिलसंस्कृतीः ॥ न कुर्याद्यः पिता तस्य नरकान्नास्ति निष्कृतिः ॥ ११ ॥ ॥ ब्रह्मोवाच ॥ ॥ विस्मितः स पिता प्राह सुतं तमुरगाकृतिम् ॥ १२ ॥ ॥ २२२ ॥ शूरसेन उवाच ॥ यस्य शब्दादपि त्रासं यान्ति शूराश्च पूरुषाः ॥ तस्मै कन्यां तु को दद्याद्वद पुत्र करोमि किम् ॥ १३ ॥ ॥ ब्रह्मोवाच ॥ तत्पितुर्वचनं श्रुत्वा सर्पः प्राह विचक्षणः ॥ १४ ॥ ॥ सर्प उवाच ॥ विवाहा बहवो राज़न्राज्ञां सन्ति जनेश्वर ॥ प्रसह्याऽऽहरणं चापि शस्त्रैर्विवाह एव

च ॥ १५ ॥ जाते विवाहे पुत्रस्य पिताऽसौ कृतकृद्भवेत् ॥ नो चेदत्रैव गङ्गायां मरिष्ये नात्र संशयः ॥ १६ ॥ ॥ ब्रह्मोवाच ॥ तत्पुत्रनिश्चयं
ज्ञात्वा ह्यपुत्रो नृपसत्तमः ॥ विवाहार्थममात्यांस्तानाहूयेदं वचोऽब्रवीत् ॥ १७ ॥ ॥ शूरसेन उवाच ॥ नागेश्वरो मम सुतो युवराजो गुणाकरः ॥
गुणवान्मतिमाञ्छूरो दुर्जयः शत्रुतापनः ॥ १८ ॥ रथे नागे स धनुषि पृथिव्यां नोपमीयते ॥ विवाहस्तस्य कर्तव्यो ह्यहं वृद्धस्तथैव च ॥ १९ ॥
राज्यभारं सुते न्यस्य निश्चिन्तोऽहं भवाम्यतः ॥ न दारसंग्रहो यावत्तावत्पुत्रो मम प्रियः ॥ २० ॥ बालभावं नो जहाति तस्मात्सर्वैऽनुमन्य च ॥
विवाहायाथ कुर्वन्तु यत्नं मम हिते रताः ॥ २१ ॥ न मे काचित्तदा चिन्ता कृतोद्वाहो यदाऽऽत्मजः ॥ सुते न्यस्तभरा यान्ति कृतिनस्तपसे वनम्
॥ २२ ॥ ब्रह्मोवाच ॥ अमात्या राजवचनं श्रुत्वा सर्वे विनीतवत् ॥ ऊचुः प्राञ्जलयो हर्षाद्राजानं भूरितेजसम् ॥ २३ ॥ ॥ अमात्या
ऊचुः ॥ तव पुत्रो गुणज्येष्ठस्त्वं च सर्वत्र विश्रुतः ॥ विवाहे तव पुत्रस्य किं मन्त्र्यं किंतु चिन्त्यते ॥ २४ ॥ ॥ ब्रह्मोवाच ॥
अमात्येषु तथोक्तेषु गम्भीरो नृपसत्तमः ॥ पुत्रं सर्पं त्वमात्यानां न चाऽऽख्याति न ते विदुः ॥ २५ ॥ राजा पुनस्तानुवाच का
स्यात्कन्या गुणाधिका ॥ महावंशभवः श्रीमान्को राजा स्याद्गुणाश्रयः ॥ २६ ॥ संबन्धयोग्यः शूरश्च यत्संबन्धः प्रशस्यते ॥
तद्राजवचनं श्रुत्वा ह्यमात्यानां महामतिः ॥ २७ ॥ कुलीनः साधुरत्यन्तं राजकार्यहिते रतः ॥ राज्ञो मतिं विदित्वा तु इङ्गितज्ञोऽ
ब्रवीदिदम् ॥ २८ ॥ ॥ अमात्य उवाच ॥ पूर्वदेशे महाराज विजयो नाम भूपतिः ॥ वाजिवारणरत्नानां यस्य संख्या न विद्यते ॥ २९ ॥
अष्टौ पुत्रा महेष्वासा महाराजस्य धीमतः ॥ तेषां स्वसा भोगवती साक्षाल्लक्ष्मीरिवापरा ॥ तव पुत्रस्य योग्या सा भार्या राजन्मयोदिता ॥ ३० ॥
॥ ब्रह्मोवाच ॥ वृद्धामात्यवचः श्रुत्वा राजा तं प्रत्यभाषत ॥ ३१ ॥ ॥ राजोवाच ॥ सुता तस्य कथं मेऽस्य सुतस्य स्याद्वदस्व तत् ॥ ३२ ॥ वृद्धा
मात्य उवाच ॥ लक्षितोऽसि महाराज यत्ते मनसि वर्तते ॥ यच्छूरसेनकृत्यं स्यादनुजानीहि मां ततः ॥ ३३ ॥ ॥ ब्रह्मोवाच ॥ वृद्धामात्यवचः
श्रुत्वा भूषणाच्छादनोक्तिभिः ॥ संपूज्य प्रेषयामास महत्या सेनया सह ॥ ३४ ॥ स पूर्वदेशमागत्य महाराजं समेत्य च ॥ संपूज्य विविधैर्वाक्यैरु
पायैर्नीतिसंभवैः ॥ ३५ ॥ महाराजसुतायाश्च भोगवत्या महामतिः ॥ शूरसेनस्य नृपतेः सुनोर्नागस्य धीमतः ॥ ३६ ॥ विवाहायाकरोत्संधिं
मिथ्यामिथ्यावचोक्तिभिः ॥ पूजयामास नृपतिं भूषणाच्छादनादिभिः ॥ ३७ ॥ अवाप्य पूजां नृपतिर्ददामीत्यवदत्तदा ॥ तत आगत्य राज्ञेऽसौ
वृद्धामात्यो महामतिः ॥ ३८ ॥ शूरसेनाय तद्वृत्तं वैवाहिकमवेदयत् ॥ ततो बहुतिथे काले वृद्धामात्यो महामतिः ॥ ३९ ॥ पुनर्बलेन महता वस्त्रा

लंकारभूषितः ॥ जगाम तरसा सर्वैरन्यैश्च सचिवैर्वृतः ॥ ४० ॥ विवाहाय महामात्यो महाराजाय बुद्धिमान् ॥ सर्वं प्रोवाच वृद्धोऽसावमात्यः सचि
वैवृतः ॥ ४१ ॥ ॥ वृद्धामात्य उवाच ॥ अत्राऽऽगन्तुं नेच्छति स शूरसेनस्य भूपतेः ॥ पुत्रो नाग इति ख्यातो बुद्धिमान्गुणसागरः ॥ ४२ ॥
क्षत्रियाणां विवाहाश्च भवेयुर्बहुधा नृप ॥ तस्माच्छस्त्रैरलंकारैर्विवाहः स्यान्महामते ॥ ४३ ॥ क्षत्रिया ब्राह्मणाश्चैव सत्यां वाचं वदन्ति हि ॥
तस्माच्छस्त्रैरलंकारैर्विवाहस्त्वनुमन्यताम् ॥ ४४ ॥ ॥ ब्रह्मोवाच ॥ वृद्धामात्यवचः श्रुत्वा विजयो राजसत्तमः ॥ मेने वाक्यं तथा सत्यममात्यं
भूपतिं तदा ॥ ४५ ॥ विवाहमकरोद्राजा भोगवत्याः सविस्तरम् ॥ शस्त्रेण च यथाशास्त्रं प्रेषयामास तां पुनः ॥ ४६ ॥ स्वानमात्यांस्तथा गाश्च
हिरण्यतुरगादिकम् ॥ बहु दत्त्वाऽथ विजयो हर्षेण महता युतः ॥ ४७ ॥ तामादायाथ सचिवा वृद्धामात्यपुरोगमाः ॥ प्रतिष्ठानमथाभ्येत्य शूरसे
नाय तां मुषाम् ॥ ४८ ॥ न्यवेदयंस्तथोचुस्ते विजयस्य वचो बहु ॥ भूषणानि विचित्राणि दास्यो वस्त्रादिकं च यत् ॥ ४९ ॥ निवेद्य शूरसे
नाय कृतकृत्या बभूविरे ॥ विजयस्य तु येऽमात्या भोगवत्या सहाऽऽगताः ॥ ५० ॥ तान्पूजयित्वा राजाऽसौ बहुमानपुरःसरम् ॥ विजयाय
यथा प्रीतिस्तथा कृत्वा व्यसर्जयत् ॥ ५१ ॥ विजयस्य सुता बाला रूपयौवनशालिनी ॥ श्वश्रूश्वशुरयोर्नित्यं शुश्रूषन्ती सुमध्यमा ॥ ५२ ॥
भोगवत्याश्च यो भर्ता महासर्पोऽतिभीषणः ॥ एकान्तदेशे विजने गृहे रत्नसुशोभिते ॥ ५३ ॥ सुगन्धकुसुमाकीर्णे तत्राऽऽस्ते सुखशीतले ॥ स
सर्पो मातरं प्राह पितरं च पुनः पुनः ॥ ५४ ॥ मम भार्या राजपुत्री किं मां नैवोपसर्पति ॥ तत्पुत्रवचनं श्रुत्वा सर्पमातेदमब्रवीत् ॥ ५५ ॥
॥ राजपत्न्युवाच ॥ धात्रिके गच्छ सुभगे शीघ्रं भोगवतीं वद ॥ तव भर्ता सर्प इति ततः सा किं वदिष्यति ॥ ५६ ॥ ॥ ब्रह्मोवाच ॥ धात्रिका
च तथेत्युक्त्वा गत्वा भोगवतीं तदा ॥ रहोगता उवाचेदं विनीतवदपूर्ववत् ॥ ५७ ॥ ॥ धात्रिकोवाच ॥ जानेऽहं सुभगे भद्रे भर्तारं तव दैवतम् ॥
न चाऽऽख्येयं त्वया क्वापि सर्पो न पुरुषो ध्रुवम् ॥ ५८ ॥ ॥ ब्रह्मोवाच ॥ तस्यास्तद्वचनं श्रुत्वा भोगवत्यब्रवीदिदम् ॥ ५९ ॥ भोगवत्युवाच ॥
मानुषीणां मनुष्यो हि भर्ता सामान्यतो भवेत् ॥ किं पुनर्दैवजातिस्तु भर्ता पुण्येन लभ्यते ॥ ६० ॥ ॥ ब्रह्मोवाच ॥ भोगवत्यास्तु तद्वाक्यं सा
च सर्वं न्यवेदयत् ॥ सर्पाय सर्पमात्रे च राज्ञे चैव यथाक्रमम् ॥ ६१ ॥ रुरोद राजा तद्वाक्यात्स्मृत्वा तां कर्मणो गतिम् ॥ भोगवत्यपि तां प्राह
उक्तपूर्वां पुनः सखीम् ॥ ६२ ॥ ॥ भोगवत्युवाच ॥ कान्तं दर्शय भद्रं ते वृथा याति वयो मम ॥ ६३ ॥ ॥ ब्रह्मोवाच ॥ ततः सा दर्शयामास सर्पं
तमतिभीषणम् ॥ सुगन्धकुसुमाकीर्णे शयने सा रहोगता ॥ ६४ ॥ तं दृष्ट्वा भीषणं सर्पं भर्तारं रत्नभूषितम् ॥ कृताञ्जलिपुटा वाक्यमवदत्कान्त

मञ्जसा ॥ ६५ ॥ ॥ भोगवत्युवाच ॥ धन्याऽस्म्यनुगृहीताऽस्मि यस्या मे दैवतं पतिः ॥ ६६ ॥ ॥ ब्रह्मोवाच ॥ इत्युक्त्वा शयने स्थित्वा
तं सर्पं सर्पभावनैः ॥ खेलयामास तन्वङ्गी गीतैश्चैवाङ्गसंगमैः ॥ ६७ ॥ सुगन्धकुसुमैः पानैस्तोषयामास तं पतिम् ॥ तस्याश्चैव प्रसादेन सर्प
स्याभूत्स्मृतिर्मुने ॥ स्मृत्वा सर्वं दैवकृतं रात्रौ सर्पोऽब्रवीत्प्रियाम् ॥ ६८ ॥ ॥ सर्प उवाच ॥ राजकन्याऽपि मां दृष्ट्वा न भीताऽसि कथं
प्रिये ॥ सोवाच दैवविहितं कोऽतिक्रमितुमीश्वरः ॥ पतिरेव गतिः स्त्रीणां सर्वदैव विशेषतः ॥ ६९ ॥ ॥ ब्रह्मोवाच ॥ ततः प्रसन्नो
नागेन्द्रः प्राह भार्यां महामतिः ॥ ७० ॥ ॥ सर्प उवाच ॥ तुष्टोऽस्मि तव भक्त्याऽहं किं ददामि तवेप्सितम् ॥ तव प्रसादा
च्चार्वङ्गि सर्वस्मृतिरभूदियम् ॥ ७१ ॥ शप्तोऽहं देवदेवेन कुपितेन पिनाकिना ॥ महेश्वरकरे नागः शेषपुत्रो महाबलः ॥ ७२ ॥
सोऽहं पतिस्त्वं च भार्या नाम्ना भोगवती पुरा ॥ उमावाक्याज्जहासोच्चैः शंभुः प्रीतो रहोगतः ॥ ७३ ॥ ममापि चाऽऽगतं भद्रे हास्यं तद्देवसंनिधौ ॥
ततस्तु कुपितः शंभुः प्रादाच्छापं ममेदृशम् ॥ ७४ ॥ शिव उवाच ॥ मनुष्ययोनौ त्वं सर्पो भविता ज्ञानवानिति ॥ ७५ ॥ सर्प उवाच ॥ ततः प्रसा
दितः शंभुस्त्वया भद्रे मया सह ॥ पुनश्चोक्तं तेन भद्रे गौतम्यां मम पूजनम् ॥ ७६ ॥ कुर्वतो ज्ञानमाधास्ये यदा सर्पाकृतेस्तव ॥ तदा
विशापो भविता भोगवत्याः प्रसादतः ॥ ७७ ॥ तस्मादिदं ममाऽऽपन्नं तव चापि शुभानने ॥ तस्मान्नीत्वा गौतमीं मां पूजां कुरु मया सह ॥ ७८ ॥
ततो विशापो भविता आवां यावः शिवं पुनः ॥ सर्वेषां सर्वदाऽऽर्तानां शिव एव परा गतिः ॥ ७९ ॥ ब्रह्मोवाच ॥ तच्छ्रुत्वा भर्तृवचनं सा भर्त्रा
गौतमीं ययौ ॥ ततः स्नात्वा तु गौतम्यां पूजां चक्रे शिवस्य तु ॥ ८० ॥ ततः प्रसन्नो भगवान्दिव्यरूपं ददौ मुने ॥ आपृच्छ्य पितरौ सर्पो
भार्यया गन्तुमुद्यतः ॥ शिवलोकं ततो ज्ञात्वा पिता प्राह महामतिः ॥८१॥ पितोवाच ॥ युवराज्यधरो ज्येष्ठः पुत्र एको भवानिति ॥ तस्माद्राज्यम
शेषेण कृत्वोत्पाद्य सुतान्बहून् ॥ याते मयि परं धाम ततो याहि शिवं पुरम् ॥ ८२ ॥ ब्रह्मोवाच ॥ एतच्छ्रुत्वा पितृवचस्तथेत्याह स नागराट् ॥
कामरूपमवाप्याथ भार्यया सह सुव्रतः ॥ ८३ ॥ पित्रा मात्रा तथा पुत्रैः राज्यं कृत्वा सुविस्तरम् ॥ याते पितरि स्वर्लोकं पुत्रान्स्थाप्य स्वके पदे
॥ ८४ ॥ भार्यामात्यादिसहितस्ततः शिवपुरं ययौ ॥ ततःप्रभृति तत्तीर्थं नागतीर्थमिति श्रुतम् ॥ ८५ ॥ यत्र नागेश्वरो देवो भोगवत्या प्रति
ष्ठितः ॥ तत्र स्नानं च दानं च सर्वक्रतुफलप्रदम्॥८६॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये नागतीर्थवर्णनं नामैकचत्वारिंशोऽध्यायः
॥४१॥ ब्रह्मोवाच ॥ मातृतीर्थमिति ख्यातं सर्वसिद्धिकरं नृणाम् ॥ आधिभिर्मुच्यते जन्तुस्तत्तीर्थस्मरणादपि ॥१॥ देवानामसुराणां च संगरोऽभूत्सु

दारुणः ॥ नाशक्नुवंस्तदा जेतुं देवा दानवसंगरम् ॥ २ ॥ तदाऽहमगमं देवैस्तिष्ठन्तं शूलपाणिनम् ॥ अस्तवं विविधैर्वाक्यैः कृताञ्जलिपुटः शनैः ॥ ३ ॥ संमन्त्र्य देवैरसुरैश्च सर्वैर्यदाऽहतं संमथितुं समुद्रम् ॥ यत्कालकूटं समभून्महेश तत्त्वां विना को ग्रसितुं समर्थः ॥ ४ ॥ पुष्पप्रहारेण जगत्त्रयं यः स्वाधीनमापादयितुं समर्थः ॥ मारो हरेऽप्यन्यसुरादिवन्द्यो वितायमानो विलयं प्रयातः ॥ ५ ॥ विमथ्य वारीशमनंगशत्रो यदुत्तमं तत्तु दिवौकसेभ्यः ॥ दत्त्वा विषं संहरतेति शोभां धत्ते महत्त्वं त्वयि निश्चितं तत् ॥ ६ ॥ ततश्च तुष्टो भगवानादिकर्ता त्रिलोचनः ॥ ७ ॥ शिव उवाच ॥ दास्येऽहं यदभीष्टं वो ब्रुवन्तु सुरसत्तमाः ॥ ८ ॥ देवा ऊचुः ॥ दानवेभ्यो भयं घोरं तत्रैहि वृषभध्वज ॥ जहि शत्रून्सुरान्पाहि नाथवन्त स्त्वया प्रभो ॥ ९ ॥ निष्कारणः सुहृच्छंभो नाभविष्यद्भवान्यदि ॥ तदाऽकरिष्यन्किमिव दुःखार्ताः सर्वदेहिनः ॥ १० ॥ ब्रह्मोवाच ॥ इत्युक्तस्त त्क्षणात्प्रायाद्यत्र ते देवशत्रवः ॥ तत्र तद्युद्धमभवच्छंकरेण सुरद्विषाम् ॥ ११ ॥ ततस्त्रिलोचनः श्रान्तस्तमोरूपधरः शिवः ॥ ललाटाद्व्यपतंस्त स्य युध्यतः स्वेदबिन्दवः ॥१२॥ स संहरन्दैत्यगणांस्तामसीं मूर्तिमाश्रितः॥ तां मूर्तिमसुरा दृष्ट्वा मेरुपृष्ठाद्भुवं ययुः ॥१३॥ स संहरन्सर्वदैत्यांस्तदा ऽगच्छद्भुवं हरः ॥ इतश्चेतश्च भीतास्तेऽधावन्सर्वा महीमिमाम् ॥१४॥ तथैव कोपाद्रुद्रोऽपि शत्रूंस्ताननुधावति ॥ तथैव युध्यतः शंभोः पतिताः स्वेद बिन्दवः ॥१५॥ यत्र यत्र भुवं प्राप्तो बिन्दुर्महेश्वरो मुने ॥ तत्र तत्र शिवाकारा मातरो जज्ञिरे ततः ॥१६॥ प्रोचुर्महेश्वरं सर्वाः खादामस्त्वसुरानिति ॥ ततः प्रोवाच भगवान्सर्वैः सुरगणैर्वृतः ॥ १७ ॥ ॥ शिव उवाच ॥ स्वर्गाद्भुवमनुप्राप्ता राक्षसास्ते रसातलम् ॥ अनुप्राप्तास्ततः सर्वाः शृण्वन्तु मम भाषितम्॥१८॥यत्र यत्र द्विषो यान्ति तत्र गच्छन्तु मातरः ॥ रसातलमनुप्राप्ता इदानीं मद्भयाद्विषः ॥ भवत्योऽप्यनुगच्छन्तु रसातलमनुद्विषः॥१९॥ ॥ ब्रह्मोवाच ॥ ताश्च जग्मुर्भुवं भित्त्वा यत्र ते दैत्यदानवाः ॥ तान्हत्वा मातरः सर्वान्देवारीनतिभीषणान् ॥ २० ॥ पुनर्देवानुपाजग्मुः पथा तेनैव मातरः ॥ गताश्च मातरो यावद्यावच्च पुनरागताः ॥ २१ ॥ तावद्देवाः स्थिता आसन्मौतमीतीरमाश्रिताः ॥ प्रस्थानात्तत्र मातॄणां सुराणां च प्रति ष्ठितेः ॥ २२ ॥ प्रतिष्ठानं तु तत्क्षेत्रं पुण्यं विजयवर्धनम् ॥ मातॄणां यत्र चोत्पत्तिर्मातृतीर्थं पृथक्पृथक् ॥ २३ ॥ तत्र तत्र बिलान्यासन्रसातलगतानि च ॥ सुरास्ताभ्यो वरान्प्रोचुर्लोके पूजा यथा शिवः ॥ २४ ॥ प्राप्नोति तद्वन्मातृभ्यः पूजा भवतु सर्वदा ॥ इत्युक्त्वाऽन्तर्दधुर्देवा आसंस्तत्रैव मातरः ॥ २५ ॥ यत्र यत्र स्थिता देव्यो मातृतीर्थं ततो विदुः ॥ सुराणामपि सेव्यानि किं पुनर्मानुषादिभिः ॥ २६ ॥ तेषु स्नानमथो दानं पितॄणां चैव तर्पणम् ॥ सर्वं तदक्षयं ज्ञेयं शिवस्य वचनं यथा ॥ २७ ॥ यस्त्विदं शृणुयान्नित्यं स्मरेदपि पठेत्तथा ॥ आख्यानं मातृतीर्थानामायुष्मान्स सुखी

भवेत् ॥ २८ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये स्वयंभुनारदसंवादे देवतीर्थमातृतीर्थप्रतिष्ठानवर्णनं नाम द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥
॥ ब्रह्मोवाच ॥ इदमप्यपरं तीर्थं देवानामपि दुर्लभम् ॥ ब्रह्मतीर्थमिति ख्यातं भुक्तिमुक्तिप्रदं नृणाम् ॥ १ ॥ स्थितेषु देवसैन्येषु प्रविष्टेषु रसातलम् ॥
दैत्येषु च मुनिश्रेष्ठ तथा मातृषु तानतु ॥ २ ॥ मदीयं पञ्चमं वक्त्रं गर्दभाकृति भीषणम् ॥ तद्वक्त्रं देवसैन्येषु मयि तिष्ठत्युवाच ह ॥ ३ ॥ हे दैत्याः
किं पलायन्ते न भयं वोऽस्तु सत्वरम् ॥ आगच्छन्ति सुरान्सर्वान्भक्षयिष्ये क्षणादिति ॥ ४ ॥ निवारयन्तं मामेवं भक्षणायोद्यतं तथा ॥ तं दृष्ट्वा
विबुधाः सर्वे वित्रस्ता विष्णुमब्रुवन् ॥ ५ ॥ त्राहि विष्णो जगन्नाथ ब्रह्मणोऽस्य मुखं लुन ॥ चक्रधृग्विबुधानाह छेद्मि चक्रेण वै शिरः ॥ ६ ॥
किं तु तच्छिन्नमेवेदं संहरेत्सचराचरम् ॥ मन्त्रं ब्रूमोऽत्र विबुधाः श्रूयतां सर्वमेव हि ॥ ७ ॥ त्रिनेत्रः कशिरश्छेत्ता स च धत्ते न संशयः ॥ मया च
शंभुः सर्वैश्च स्तुतः प्रोक्तस्तथैव च ॥ ८ ॥ यागः क्षणी दृष्टफलेऽसमर्थः स नैव कर्तुः फलतीति मत्वा ॥ फलस्य दाने प्रतिभूर्जटीति निश्चित्य
लोकः प्रतिकर्म यातः ॥ ९ ॥ ततः सुरेशः संतुष्टो देवनां कार्यसिद्धये ॥ लोकानामुपकारार्थं तथेत्याह सुरान्प्रति ॥ १० ॥ तद्वक्त्रं पापरूपं यद्भी
षणं लोमहर्षणम् ॥ निकृत्य नखशस्त्रैश्च क स्थाप्यं चेत्यथाब्रवीत् ॥ ११ ॥ तत्रेला विबुधानाह नाहं वोढुं शिरः क्षमा ॥ रसातलमथो यास्ये उदधि
श्चाप्यथाब्रवीत् ॥ १२ ॥ शोषं यास्ये क्षणादेव पुनश्चोचुः शिवं सुराः ॥ त्वयैवैतद्ब्रह्मशिरो धार्यं लोकानुकम्पया ॥ १३ ॥ अच्छेदे जगतां नाश
श्छेदे दोषश्च तादृशः ॥ एवं विमृश्य सोमेशो दधार कशिरस्तदा ॥ १४ ॥ तद्दृष्ट्वा दुष्करं कर्म गौतमीतीरमाश्रितम् ॥ अस्तुवञ्जगतामीशं प्रणया
दूक्तितः सुराः ॥ १५ ॥ देवेष्वमित्रं कशिरोऽतिभीमं तान्भक्षणायोपगतं निकृत्य ॥ नखाग्रमूच्या शकलेन्दुमौलिस्त्यागेऽपि दोषात्कृपयाऽनुधत्ते ॥
॥१६॥ तत्र ते विबुधाः सर्वे स्थिता ये ब्रह्मणोऽन्तिके ॥ तुष्टुर्विबुधेशानं कर्म दृष्ट्वाऽतिदैवतम् ॥ १७ ॥ ततःप्रभृति तत्तीर्थं ब्रह्मतीर्थमिति श्रुतम् ॥
अद्यापि ब्रह्मणो रूपं चतुर्मुखमवस्थितम् ॥ १८ ॥ शिरोमात्रं तु यः पश्येत्स गच्छद्ब्रह्मणः पदम् ॥ यत्र स्थित्वा स्वयं रुद्रो लूनवान्ब्रह्मणः शिरः ॥
॥ १९ ॥ रुद्रतीर्थं तदेव स्यात्तत्र साक्षाद्दिवाकरः ॥ देवानां च स्वरूपेण स्थितो यस्मात्ततुत्तमम् ॥ २० ॥ सौर्यं तीर्थं तदाख्यातं सर्वक्रतुफलप्र
दम् ॥ तत्र स्नात्वा रविं दृष्ट्वा पुनर्जन्म न विद्यते ॥ २१ ॥ महादेवेन यच्छिन्नं ब्रह्मणः पञ्चमं शिरः ॥ क्षेत्रेऽविमुक्ते संस्थाप्य देवतानां हितं कृतम् ॥
॥ २२ ॥ ब्रह्मतीर्थं शिरोमात्रं यो दृष्ट्वा गौतमीतटे ॥ क्षेत्रेऽविमुक्ते तस्यैव स्थापितं योऽनुपश्यति ॥ कपालं ब्रह्मणः पुण्यं ब्रह्महा पूततां व्रजेत् ॥२३॥
इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये ब्रह्मतीर्थब्रह्मशिरोलिङ्गशिवतीर्थसूर्यतीर्थादिषडशीतितीर्थवर्णनं नाम त्रिचत्वारिंशोऽध्यायः॥४३॥

॥ ब्रह्मोवाच ॥ ॥ अविघ्नं तीर्थमाख्यातं सर्वविघ्नविनाशनम् ॥ तत्रापि वृत्तमाख्यास्ये शृणु नारद भक्तितः ॥ १ ॥ देवसत्रे प्रवृत्ते तु गौतम्याश्चोत्तरे तटे ॥ समाप्तिर्नैव सत्रस्य संजाता विघ्नदोषतः ॥ २ ॥ ततः सुरगणाः सर्वे मामवोचन्हरिं तदा ॥ ततो ध्यानगतोऽहं तानवोचं वीक्ष्य कारणम् ॥३॥ विनायककृतौ विघ्नैर्नैतत्सत्रं समाप्यते ॥ तस्मात्स्तुवन्तु ते सर्वे आदिदेवं विनायकम्॥४॥तथेत्युक्त्वा सुरगणाः स्नात्वा ते गौतमीतटे ॥ अस्तुवन्भक्तितो देवा आदिदेवं गणेश्वरम्॥५॥ देवा ऊचुः॥ यः सर्वकार्येषु सदा सुराणामपीशविष्ण्वम्बुजसंभवानाम् ॥ पूज्यो नमस्यः परिचिन्तनीयस्तं विघ्नराजं शरणं व्रजामः ॥ ६ ॥ न विघ्नराजेन समोऽस्ति कश्चिद्देवो मनोवाञ्छितसंप्रदाता ॥ निश्चित्य चैतत्त्रिपुरान्तकोऽपि तं पूजयामास वधे पुराणाम्॥ ७ ॥ करोतु सोऽस्माकमविघ्नमस्मिन्महाक्रतौ सत्वरमाम्बिकेयः ॥ ध्यातेन येनाखिलदेहभाजां पूर्णा भविष्यन्ति मनोभिलाषाः ॥ ८ ॥ महोत्सवोऽभूदखिलस्य देव्या जातः सुतश्चिन्तितमात्र एव ॥ अतोऽवदन्सुरसंघाः कृतार्थाः सद्योजातं विघ्नराजं नमन्तः ॥ ९ ॥ यो मातुरुत्सङ्गगतोऽथ मात्रा निवार्यमाणोऽपि बलाच्च चन्द्रम् ॥ संगोपयामास पितुर्जटासु गणाधिनाथस्य विनोद एषः ॥ १० ॥ पपौ स्तनं मातुरथापि तृप्तो यो भ्रातृमात्सर्यकषायबुद्धिः ॥ लम्बोदरस्त्वं भव विघ्नराजो लम्बोदरं नाम चकार शंभुः ॥ ११ ॥ संवेष्टितो देवगणैर्महेशः प्रवर्ततां नृत्यमितीत्युवाच ॥ संतोषितो नूपुररावमात्राद्गणेश्वरत्वेऽभिषिषेच पुत्रम् ॥ १२ ॥ यो विघ्नपाशं च करेण बिभ्रत्स्कन्धे कुठारं च तथा परेण ॥ अपूजितो विघ्नमथोऽपि मातुः करोति को विघ्नपतेः समोऽन्यः ॥ १३ ॥ धर्मार्थकामादिषु पूर्वपूज्यो देवासुरैः पूज्यत एव नित्यम्॥ यस्यार्चनं नैव विनाशमस्ति तं पूर्वपूज्यं प्रथमं नमामि ॥ १४ ॥ यस्यार्चनात्प्रार्थनयाऽनुरूपां दृष्ट्वा तु सर्वस्य फलस्य सिद्धिम् ॥ स्वतन्त्रसामर्थ्यकृतातिगर्वं भ्रातृप्रियं त्वाखुरथं तमीडे ॥ १५ ॥ यो मातरं सरसैर्नृत्यगीतैस्तथाऽभिलाषैरखिलैर्विनोदैः ॥ संतोषयामास तदाऽतितुष्टं तं श्रीगणेशं शरणं प्रपद्ये ॥ १६ ॥ सुरोपकारैरसुरैश्च युद्धैः स्तोत्रैर्नमस्कारपरैश्च मन्त्रैः ॥ पितप्रसादेन सदा समृद्धं तं श्रीगणेशं शरणं प्रपद्ये ॥ १७ ॥ जये पुराणामकरोत्प्रतीपं पित्राऽपि हर्षात्प्रतिपूजितो यः ॥ निर्विघ्नतां चापि पुनश्चकार तस्मै गणेशाय नमस्करोमि ॥ १८ ॥ ॥ ब्रह्मोवाच ॥ इति स्तुतः सुरगणैर्विघ्नेशः प्राह तान्पुनः ॥ १९ ॥ ॥ गणेश उवाच ॥ इतो निर्विघ्नता सत्रे मत्तः स्यादसुरारिणः ॥ २० ॥ ॥ ब्रह्मोवाच ॥ देवसत्रे निवृत्ते तु गणेशः प्राह तान्सुरान् ॥ २१ ॥ ॥ गणेश उवाच ॥ स्तोत्रेणानेन ये भक्त्या मां स्तोष्यन्ति यतव्रताः ॥ तेषां दारिद्र्यदुःखानि न भवेयुः कदाचन ॥ २२ ॥ अत्र ये भक्तितः स्नानं दानं कुर्युरतन्द्रिताः ॥ तेषां सर्वाणि कार्याणि भवेयुरिति मन्यताम् ॥ २३ ॥ ॥ ब्रह्मोवाच ॥ तद्वाक्यसमकालं तु तथेत्यूचुः सुरा

अपि ॥ निवृत्ते तु मखे तस्मिन्सुरा जग्मुः सुरालयम् ॥ २४ ॥ ततः प्रभृति तत्तीर्थमविघ्नमिति गद्यते ॥ सर्वकामप्रदं पुंसां सर्वविघ्नविनाशनम् ॥ ॥ २५ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्येऽविघ्नतीर्थवर्णनं नाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ ॥ ब्रह्मोवाच ॥ शेषतीर्थमिति ख्यातं सर्वकामप्रदायकम् ॥ तस्य रूपं प्रवक्ष्यामि यन्मया परिभाषितम् ॥ १ ॥ शेषो नाम महानागो रसातलपतिः प्रभुः ॥ सर्वनागैः परिवृतो रसा तलमथाभ्यगात् ॥ २ ॥ राक्षसा दैत्यदनुजाः प्रविष्टा ये रसातलम् ॥ तैर्निरस्तो भोगिपतिर्मामुवाचाथ विह्वलः ॥ ३ ॥ शेष उवाच ॥ रसातलं त्वया दत्तं राक्षसानां ममापि च ॥ ते मे स्थानं न ददति तस्मात्त्वां शरणं गतः ॥ ४ ॥ ततोऽहमब्रवं नागं गौतमीं याहि पन्नग ॥ तत्र स्तुत्वा महादेवं लप्स्यसे त्वं मनोरथम् ॥ ५ ॥ नान्योऽस्ति लोकत्रितये मनोरथसमर्पकः ॥ मद्वाक्यप्रेरितो नागो गंगामाप्लुत्य यत्नतः ॥ कृताञ्जलिपुटो भूत्वा तुष्टाव त्रिदशेश्वरम् ॥६॥ शेष उवाच ॥ नमस्त्रैलोक्यनाथाय दक्षयज्ञविभेदिने ॥ आदिकर्त्रे नमस्तुभ्यं नमस्त्रैलोक्यरूपिणे ॥७॥ नमःसहस्रशिरसे नमः संहारकारिणे ॥ सोमसूर्याग्निरूपाय जलरूपाय ते नमः ॥ ८ ॥ सर्वदा सर्वरूपाय कालरूपाय ते नमः ॥ पाहि शंकर सर्वेश पाहि सोमेश सर्वग ॥ जगन्नाथ नमस्तुभ्यं देहि मे मनसेप्सितम् ॥९ ॥ ॥ ब्रह्मोवाच ॥ ततो महेश्वरः प्रीतः प्रादान्नागेप्सितान्वरान् ॥ विनाशाय सुरारीणां दैत्यदानवरक्षसाम् ॥ १० ॥ शेषाय प्रददौ शूलं जह्नवेनारिपुंगवान् ॥ ततः प्रोक्तः शिवेनासौ शेषः शूलेन भोगिभिः ॥११॥ रसातलमथो गत्वा निजघान रिपून्रणे ॥ निहत्य नागः शूलेन दैत्यंदानवराक्षसान् ॥ १२ ॥ न्यवर्तत पुनर्देवो यत्र शेषेश्वरो हरः ॥ पथा येन समायातो देवं द्रष्टुं स नागराट् ॥१३॥ रसातलाद्यत्र देवो बिलं तत्र व्यजायत ॥ तस्माद्बिलतलाद्यातं गाङ्गं वार्यतिपुण्यदम् ॥ १४ ॥ तद्वारि गङ्गामगमद्गङ्गायाः संगमस्ततः ॥ देवस्य पुरतश्चापि कुण्डं तत्र सुविस्तरम् ॥ १५ ॥ नागस्तत्राकरोद्धोमं यत्र चाग्निः सदा स्थितः॥ सोष्णं तदभवद्वारि गंगायास्तत्र संगमः ॥ १६ ॥ देवदेवं समाराध्य नागः प्रीतो महयशाः ॥ रसातलं ततोऽभीष्टं शिवात्प्राप्य तलं ययौ ॥ १७ ॥ ततः प्रभृति तत्तीर्थं नागतीर्थमुदाहृतम् ॥ सर्वकामप्रदं पुण्यं रोगदारिद्र्यनाशनम् ॥ १८ ॥ आयुर्लक्ष्मीकरं पुण्यं स्नानदानाच्च मुक्तिदम् ॥ शृणुयाद्वा पठेद्भक्त्या यो वाऽपि स्मरते तु तत् ॥ १९ ॥ तीर्थं शेषेश्वरो यत्र यत्र शक्तिप्रदः शिवः ॥ एकविंशतितीर्थानामुभयोस्तत्र तीरयोः ॥ शतानि मुनिशार्दूल सर्वसंपत्प्रदायिनाम् ॥ २० ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये उभयतीरगतशेषतीर्थशेषेश्वरशूलेश्वराग्निकुण्डरसातलगङ्गासंगमोष्णतीर्थाद्येकविंशतिशततीर्थवर्णनं नाम पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥ ॥ ब्रह्मोवाच ॥ महानलमिति ख्यातं वडवानलमुच्यते ॥ महानलो यत्र देवो वडवा यत्र

सा नदी ॥ १ ॥ तत्तीर्थं पुत्र वक्ष्यामि मृत्युदोषजरापहम् ॥ पुराऽऽसन्नैमिषारण्ये ऋषयः सत्रकारिणः ॥ २ ॥ शमितारं च ऋषयो मृत्युं चक्रु
स्तपस्विनः ॥ वर्तमाने सत्रयागे मृत्यौ शमितरि स्थिते ॥३॥ न ममार तदा कश्चिदुभयं स्थास्नु जङ्गमम् ॥ विना पशून्मुनिश्रेष्ठ मर्त्यं चामर्त्यतां
गतम् ॥ ४ ॥ ततस्त्रिविष्टपे शून्ये मर्त्ये चैवातिसंभृते ॥ मृत्युनोपेक्षिते देवा राक्षसानूचिरे तदा ॥ ५ ॥ गच्छध्वमृषिसत्रं तन्नाशयध्वं महाध्व
रम् ॥ इति देववचः श्रुत्वा प्रोचुस्ते राक्षसाः सुरान् ॥ ६ ॥ विध्वंसयामस्तं यज्ञमस्माकं किं फलं ततः ॥ प्रवर्तते विना हेतुं न कोऽपि क्वापि जातु
चित् ॥ ७ ॥ ॥ ब्रह्मोवाच ॥ देवा अप्यसुरानूचुर्यज्ञार्थं भवतामपि ॥ भवेदेव ततो यान्तु ऋषीणां सत्रमुत्तमम् ॥ ८ ॥ ते श्रुत्वा त्वरिताः सर्वे
यत्र यज्ञः प्रवर्तते ॥ जग्मुस्तत्र विनाशाय देववाक्याद्विशेषतः ॥ ९ ॥ तज्ज्ञात्वा ऋषयो मृत्युमाहुः किं कुर्महे वयम् ॥ आगता देववचनाद्राक्षसा
यज्ञनाशिनः ॥ १० ॥ मृत्युना सह संमन्त्र्य नैमिषारण्यवासिनः ॥ सर्वे त्यक्त्वा स्वाश्रमं तं शमित्रा सह नारद ॥ ११ ॥ अग्निमात्रमुपादाय
त्यक्त्वा पात्रादिकं तु यत् ॥ क्रतुनिष्पत्तये जग्मुर्गौतमीं प्रति सत्वराः ॥ १२ ॥ तत्र स्नात्वा महेशानं रक्षणायोपतस्थिरे ॥ कृताञ्जलिपुटास्ते तु
तुष्टुवुस्त्रिदशेश्वरम् ॥ १३ ॥ ॥ ऋषय ऊचुः ॥ यो लीलया विश्वमिदं चकार धाता विधाता भुवनत्रयस्य ॥ यो विश्वरूपः सदसत्परो यः सोमेश्वरं तं
शरणं व्रजामः ॥ १४ ॥ ॥ मृत्युरुवाच ॥ इच्छामात्रेण यः सर्वं हन्ति पाति करोति यः ॥ तमहं त्रिदशेशानं शरणं यामि शंकरम् ॥ १५ ॥
महाबलं महाकायं महानागविभूषणम् ॥ महामूर्तिधरं देवं शरणं यामि शंकरम् ॥ ॥ १६ ॥ ॥ ब्रह्मोवाच ॥ ततः प्रोवाच भगवान्मृत्यो का प्रीति
रस्तिते ॥ १७ ॥ ॥ मृत्युरुवाच ॥ राक्षसेभ्यो भयं घोरमापन्नं त्रिदशेश्वर ॥ यज्ञमस्मांश्च रक्षस्व यावत्सत्रं समाप्यते ॥ १८ ॥ ॥ ब्रह्मोवाच ॥
तथा चकार भगवांस्त्रिनेत्रो वृषभध्वजः ॥ शमित्रा मृत्युना सत्रमृषीणां पूर्णतां ययौ ॥ १९ ॥ हविषां भागधेयाय आजग्मुरमराः क्रमात् ॥ तानवो
चन्मुनिगणाः संक्षुब्धा मृत्युना सह ॥ २० ॥ ॥ ऋषय ऊचुः ॥ अस्मन्मखविनाशाय राक्षसाः प्रेषिता यतः ॥ तस्माद्भवद्भ्यः पापिष्ठा राक्षसाः सन्तु
शत्रवः ॥ २१ ॥ ॥ ब्रह्मोवाच ॥ ततः प्रभृति देवानां राक्षसा वैरिणोऽभवन् ॥ कृत्यां च वडवां तत्र देवाश्च ऋषयोऽमलाः ॥ २२ ॥ मृत्योर्भार्यां भव
त्वं तामित्युक्त्वा तेऽभ्यर्षेचयन् ॥ अभिषेकोदकं यत्तु सा नदी वडवाऽभवत् ॥ २३ ॥ मृत्युना स्थापितं लिङ्गं महानलमिति श्रुतम् ॥ ततः
प्रभृति तत्तीर्थं वडवासंगमं विदुः ॥ २४ ॥ महानलो यत्र देवस्तत्तीर्थं भुक्तिमुक्तिदम् ॥ सहस्रं तत्र तीर्थानां सर्वाभीष्टप्रदायिनाम् ॥ उभयोस्तीर
योस्तत्र स्मरणादघघातिनाम् ॥ २५ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये वडवादिसहस्रतीर्थवर्णनं नाम षट्चत्वारिंशोऽ

ध्यायः ॥ ४६ ॥ ॥ ब्रह्मोवाच ॥ आत्मतीर्थमिति ख्यातं भुक्तिमुक्तिप्रदं नृणाम् ॥ तस्य प्रभावं वक्ष्यामि यत्र ज्ञानेश्वरः शिवः ॥ १ ॥
दत्त इत्यपि विख्यातः सोऽत्रिपुत्रो हरप्रियः ॥ दुर्वाससः प्रियो भ्राता सर्वज्ञानविशारदः ॥ स गत्वा पितरं प्राह विनयेन प्रणम्य च ॥
॥ २ ॥ ॥ दत्त उवाच ॥ ब्रह्मज्ञानं कथं मे स्यात्कं पृच्छामि क्व यामि च ॥ ३ ॥ ब्रह्मोवाच ॥ तच्छ्रुत्वाऽत्रिः पुत्रवाक्यं ध्यात्वा वचनम
ब्रवीत् ॥ ४ ॥ ॥ अत्रिरुवाच ॥ गौतमीं पुत्र गच्छ त्वं तत्र स्तुहि महेश्वरम् ॥ स तु प्रीतो यदैव स्यात्ततो ज्ञानमवाप्स्यसि ॥ ५ ॥
॥ ब्रह्मोवाच ॥ तथेत्युक्त्वा तदाऽऽत्रेयो गङ्गां गत्वा शुचिर्यतः ॥ कृताञ्जलिपुटो भूत्वा भक्त्या तुष्टाव शंकरम् ॥ ६ ॥ ॥ दत्त उवाच ॥ संसार
कूपे पतितोऽस्मि दैवान्मोहेन गुप्तो भवदुःखपङ्के ॥ अज्ञाननाम्ना तमसाऽऽवृतोऽहं परं न विन्दामि सुराधिनाथ॥७॥भिन्नस्त्रिशूलेन बलीयसाऽहं पापे
न चिन्ताक्षुरपाटितश्च ॥ तप्तोऽस्मि पञ्चेन्द्रियतीव्रतापैः श्रान्तोऽस्मि संतारय सोमनाथ ॥ ८ ॥ बद्धोऽस्मि दारिद्र्यमयैश्च बन्धैर्हतोऽस्मि रोगानल
तीव्रतापैः ॥ क्रान्तोऽस्म्यहं मृत्युभुजंगमेन भीतो भृशं किं करवाणि शंभो ॥ ९ ॥ भवाभवाभ्यामतिपीडितोऽहं तृष्णाक्षुधाभ्यां च रजस्तमो
भ्याम् ॥ ईदृक्षया जरया चाभिभूतः पश्यावस्थां कृपया मेऽद्य नाथ ॥ १० ॥ कामेन कोपेन च मत्सरेण दम्भेन दर्पादिभिरप्यनेकैः ॥ एकैकशः
कष्टगतोऽस्मि विद्धस्त्वं नाथवद्धारय नाथ शत्रून् ॥ ११ ॥ कस्यापि कश्चित्पतितस्य पुंसो दुःखप्रणोदी भवतीति सत्यम् ॥ विना भवन्तं ममः
सोमनाथ कुत्रापि कारुण्यवचोऽपि नास्ति ॥ १२ ॥ तावत्स कोपो भयमोहदुःखान्यज्ञानदारिद्र्यरुजस्तथैव ॥ कामादयो मृत्युरपीह यावन्नमः
शिवायेति न वच्मि वाक्यम् ॥ १३ ॥ न मेऽस्ति धर्मो न च मेऽस्ति भक्तिर्नाहं विवेकी करुणा कुतो मे ॥ दाताऽसि तेनाऽऽशु शरण्य चित्ते
निधेहि सोमेति पदं मदीये ॥ १४ ॥ याचे न चाहं सुरभूपतित्वं हृत्पद्ममध्ये मम सोमनाथ ॥ श्रीसोमपादाम्बुजसंनिधानं याचे विचार्यैव च तत्कु
रुष्व ॥ १५ ॥ यथा तथाहं विदितोऽस्मि पापस्तथाऽपि विज्ञापनमाशृणुष्व ॥ संश्रूयते यत्र वचैः शिवेति तत्र स्थितिः स्यान्मम सोम नित्यम्
॥ १६ ॥ गौरीपते शंकर सोमनाथ विश्वेश कारुण्यनिधेऽखिलात्मन् ॥ संस्तूयते यत्र सदेति तत्र केषामपि स्यात्कृतिनां निवासः
॥ १७ ॥ ॥ ब्रह्मोवाच ॥ दत्तात्रेयस्तुतिं श्रुत्वा तुतोष भगवान्हरः ॥ वरदोऽस्मीति तं प्राह योगिनं विश्वकृद्भवः ॥ १८ ॥ ॥ आत्रेय उवाच ॥
आत्मज्ञानं च मुक्तिं च भुक्तिं च विपुलां त्वयि ॥ तीर्थस्यापि च माहात्म्यं वरोऽयं त्रिदशार्चित ॥१९॥ ॥ ब्रह्मोवाच ॥ एवमस्त्विति तं शंभुरुक्त्वा
चान्तरधीयत ॥ ततः प्रभृति तत्तीर्थमात्मतीर्थं विदुर्बुधाः ॥ तत्र स्नानेन दानेन मुक्तिः स्यादिह नारद ॥ २० ॥ इति श्रीब्रह्मपुराणगतगौतमी

माहात्म्ये तीर्थमाहात्म्य आत्मतीर्थवर्णनं नाम सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ ब्रह्मोवाच ॥ अश्वत्थतीर्थमाख्यातं पिप्पलं च ततः परम् ॥ उत्तरे मन्दतीर्थं तु तत्र व्युष्टिमितः शृणु ॥ १ ॥ पुरा त्वगस्त्यो भगवान्दक्षिणाशापतिः प्रभुः ॥ देवैस्तु प्रेरितः पूर्वं विन्ध्यस्य प्रार्थनं प्रति ॥ २ ॥ स शनैर्विन्ध्यमभ्यागात्सहस्रमुनिभिर्वृतः ॥ तमागत्य नगश्रेष्ठं बहुवृक्षसमाकुलम् ॥ ३ ॥ स्पर्धिनं मेरुभानुभ्यां विन्ध्यं शृङ्गशतैर्वृतम् ॥ अत्युन्नतं नगं धीरो लोपामुद्रापतिर्मुनिः ॥ ४ ॥ कृतातिथ्यो द्विजैः सार्धं प्रशस्य च नगं पुनः ॥ इदमाह मुनिश्रेष्ठो देवकार्यार्थसिद्धये ॥ ५ ॥ ॥ अगस्त्य उवाच ॥ अहं यामि नगश्रेष्ठ मुनिभिस्तत्त्वदर्शिभिः ॥ तीर्थयात्रां करोमीति दक्षिणाशां व्रजाम्यहम् ॥६॥ देहि मार्गं नगपते आतिथ्यं देहि याचते ॥ यावदागमनं मे स्यात्स्थातव्यं तावदेव हि ॥ ७ ॥ नान्यथा भवितव्यं ते तथेत्याह नगोत्तमः ॥ आक्रामन्दक्षिणामाशां तैर्वृतो मुनिभिर्मुनिः ॥८॥ शनैः स गौतमीमागात्सत्रयागाय दीक्षितः ॥ यावत्संवत्सरं सत्रमकरोद्दृषिभिर्वृतः ॥ ९ ॥ कैटभस्य सुतौ पापौ राक्षसौ धर्मकण्टकौ ॥ अश्वत्थः पिप्पलश्चेति विख्यातौ त्रिदशालये ॥ १० ॥ अश्वत्थोऽश्वत्थरूपेण पिप्पलो ब्रह्मरूपधृक् ॥ तावुभावन्तरं प्रेप्सू यज्ञविध्वंसनाय तु ॥ ११ ॥ कुरुतां काङ्क्षितं रूपं दानवौ पापचेतसौ ॥ अश्वत्थो वृक्षरूपेण पिप्पलो ब्राह्मणाकृतिः ॥१२॥उभौ तौ ब्राह्मणान्नित्यं पीडयेतां तपोधन ॥ आलभन्ते च येऽश्वत्थं तांस्तानश्नात्यसौ तरुः ॥१३॥ पिप्पलः सामगो भूत्वा शिष्यानश्नाति राक्षसः ॥ तस्मादद्यापि विप्रेषु सामगोऽतीव निष्कृपः ॥ १४ ॥ क्षीयमाणान्द्विजान्दृष्ट्वा मुनयो राक्षसाविमौ ॥ इति बुद्ध्वा महाप्रज्ञा दक्षिणं तीरमाश्रितम् ॥ १५ ॥ सौरिं शनैश्चरं मन्दं तपस्यन्तं धृतव्रतम् ॥ गत्वा मुनिगणाः सर्वे रक्षःकर्म न्यवेदयन् ॥ १६ ॥ सौरिर्मुनिगणानाह पूर्णे तपसि मे द्विजाः ॥ राक्षसौ हन्म्यपूर्णेन तपसाऽक्षम एव हि ॥ १७ ॥ पुनः प्रोचुर्मुनिगणा दास्यामस्ते तपो महत् ॥ इत्युक्तो ब्राह्मणैः सौरिः कृतमित्याह तानपि ॥ १८ ॥ सौरिर्ब्राह्मणवेषेण प्रायादश्वत्थ रूपिणम् ॥ राक्षसं ब्राह्मणो भूत्वा प्रदक्षिणमथाकरोत् ॥ १९ ॥ प्रदक्षिणं तु कुर्वाणं मेने ब्राह्मणमेव तम् ॥ नित्यवद्राक्षसः पापो भक्षयामास मायया ॥ २० ॥ तस्य कायं समाविश्य चक्षुषाऽन्त्राण्यपश्यत ॥ दृष्टः स राक्षसः पापो मन्देन रविसूनुना ॥ २१ ॥ भस्मीभूतः क्षणेनैव गिरिर्वज्रहतो यथा ॥ अश्वत्थं भस्मसत्कृत्वा अन्यं ब्राह्मणरूपिणम् ॥ २२ ॥ राक्षसं पापनिलयमेक एव तमभ्यगात् ॥ अर्घा यानो विप्र इव शिष्यरूपो विनीतवत् ॥ २३ ॥ पिप्पलः पूर्ववच्चापि भक्षयामास भानुजम् ॥ स भक्षितः पूर्ववच्च कुक्षावन्त्राण्यवैक्षत ॥ २४ ॥ तेनाऽऽलोकितमात्रोऽसौ राक्षसो भस्मसादभूत् ॥ उभौ हत्वा भानुसुतः किं कृत्यं मे वदन्त्वथ ॥ २५ ॥ मुनयो जातसंहर्षाः सर्व एव तपस्विनः ॥

ततः प्रसन्ना ह्यभवन्नृषयोऽगस्त्यपूर्वकाः ॥ २६ ॥ वरान्ददुर्यथाकामं सौरये मन्दगामिने ॥ स प्रीतो ब्राह्मणानाह शनिः सूर्यसुतो बली ॥ २७ ॥ सौरिरुवाच ॥ मद्वारे नियता ये च कुर्वन्त्यश्वत्थलम्भनम् ॥ तेषां सर्वाणि कार्याणि स्युः पीडा मद्भवा न च ॥ २८ ॥ तीर्थं चाश्वत्थसंज्ञे वै स्नानं कुर्वन्ति ये नराः ॥ तेषां सर्वाणि कार्याणि भवेयुरपरो वरः ॥ २९ ॥ चक्षुष्पंदं भुजस्पंदं दुःस्वप्नं दुर्विचिन्तनम् ॥ शत्रूणां च समुत्थानं शमयाश्व त्थ चाशु मे ॥ ३० ॥ मन्त्रेणानेन देवर्षे शिवध्यानपरायणाः ॥ मन्दवारे तु येऽश्वत्थं प्रातरुत्थाय मानवाः ॥ आलभन्ते च तेषां वै ग्रहपीडा व्यपो हतु ॥ ३१ ॥ ॥ ब्रह्मोवाच ॥ ततः प्रभृति तत्तीर्थमश्वत्थं पिप्पलं विदुः ॥ तीर्थं शनैश्चरं तत्र तत्रागस्त्यं च सान्निकम् ॥ ३२ ॥ याज्ञिकं चापि तत्तीर्थं सामगं तीर्थमेव च ॥ इत्याद्यष्टोत्तराण्यांसन्सहस्राण्यथ षोडश ॥ तेषु स्नानं च दानं च सर्वयागफलप्रदम् ॥ ३३ ॥ इति श्रीब्रह्मपुराणगत गौतमीमाहात्म्येऽश्वत्थाद्यष्टोत्तरषोडशसहस्रतीर्थवर्णनं नामाष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥ ब्रह्मोवाच ॥ सोमतीर्थमिति ख्यातं तदप्युक्तं महात्म भिः ॥ तत्र स्नानेन दानेन सोमपानफलं भवेत् ॥ १ ॥ जगतां मातरः पूर्वमोषध्यो जीवसंमताः ॥ ममापि मातरो देव्यः पूर्वासां पूर्ववत्तराः ॥ २ ॥ आसु प्रतिष्ठितो धर्मः स्वाध्यायो यज्ञकर्म च ॥ आभिरेव धृतं सर्वं त्रैलोक्यं सचराचरम् ॥ ३ ॥ अशेषरोगोपशमो भवत्याभिरसंशयम् ॥ अन्नमे ताभिरेव स्यादशेषप्राणरक्षणम् ॥ अत्रौषध्यो जगद्धन्द्या मामूचुरनहंकृताः ॥ ४ ॥ ॥ ओषध्य ऊचुः ॥ अस्माकं त्वं पतिं देहि राजानं सुरसत्तम ॥ ॥ ५ ॥ ॥ ब्रह्मोवाच ॥ तच्छ्रुत्वा वचनं तासां मयोक्ता ओषधीरिदम् ॥ पतिं प्राप्स्यथ सर्वाश्च राजानं प्रीतिवर्धनम् ॥ ६ ॥ राजानमिति तच्छ्रुत्वा त्म मामूचुः पुनर्मुने ॥ गन्तव्यं क्व पुनश्चोक्ता गौतमीं यान्तु मातरः ॥ ७ ॥ तुष्टायामथ तस्यां वो राजा स्याल्लोकपूजितः ॥ ताश्च गत्वा मुनिश्रेष्ठ तुष्टुवुर्गौतमीं नदीम् ॥ ८ ॥ ॥ ओषध्य ऊचुः ॥ किं वाऽभविष्यन्भववर्तिनो जना नानाघसंगाभिभवोत्थदुःखाः ॥ न चाऽऽगमिष्यद्भवती भुवं चेत्पुण्योदके गौतमि शंभुकान्ते ॥ ९ ॥ को वेत्ति भाग्यं नरदेहभाजां महीगतानां सरितामधीशे ॥ एषां महापातकसंघहन्त्री त्वमम्ब गङ्गे सुलभा सदैव ॥ १० ॥ न ते विभूतिं ननु वेत्ति कोऽपि त्रैलोक्यवन्द्ये जगदम्ब गङ्गे ॥ गौरीसमालिंगितविग्रहोऽपि धत्ते स्मरारिः शिरसाऽपि यत्त्वाम् ॥ ॥ ११ ॥ नमोऽस्तु ते मातरभीष्टदायिनि नमोऽस्तु ते ब्रह्ममयेऽघनाशिनि ॥ नमोऽस्तु ते विष्णुपदाब्जनिःसृते नमोऽस्तु ते शंभुजटाविनिःसृते ॥ ॥ १२ ॥ ॥ ब्रह्मोवाच ॥ इत्येवं स्तुवतामीशा किं ददामीत्यवोचत ॥ १३ ॥ ॥ ओषध्य ऊचुः ॥ पतिं देहि जगन्माता राजानमतितेजस म् ॥ १४ ॥ ॥ ब्रह्मोवाच ॥ तदोवाच नदी गङ्गा ओषधीस्ता इदं वचः ॥ १५ ॥ ॥ गङ्गोवाच ॥ अहं चामृतरूपाऽस्मि ओषध्यो मातरोऽमृताः ॥

तादृशं चामृतात्मानं पतिं सोमं ददामि वः ॥ १६ ॥ ॥ ब्रह्मोवाच ॥ देवाश्च ऋषयो वाक्यं मेनिरे सोम एव च ॥ ओषध्यश्चापि तद्वाक्यं ततो जग्मुः स्वमालयम् ॥ १७ ॥ यत्र चाऽऽपुर्महौषध्यो राजानममृतात्मकम् ॥ सोमं समस्तसंतापपापसंघनिवारकम् ॥ १८ ॥ सोमतीर्थं तु तत्ख्यातं सोमपानफलप्रदम् ॥ तत्र स्नानेन दानेन पितरः स्वर्गमाप्नुयुः ॥ १९ ॥ य इदं शृणुयान्नित्यं पठेद्वा भक्तितः स्मरेत् ॥ दीर्घमायुरवाप्नोति स पुत्री धनवान्भवेत्॥२०॥इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये सोमतीर्थवर्णनं नामैकोनपञ्चाशोऽध्यायः॥४९॥ ब्रह्मोवाच॥धान्यतीर्थमिति ख्यातं सर्वकामप्रदं नृणाम् ॥ सुभिक्षं क्षेमदं पुंसां सर्वापद्विनिवारणम्॥१॥ओषध्यः सोमराजानं पतिं प्राप्य मुदाऽन्विताः॥ ऊचुः सर्वस्य लोकस्य गङ्गा याश्चेप्सितं वचः॥२॥ ओषध्य ऊचुः ॥ वैदिकी पुण्यगाथाऽस्ति यां वै वेदविदो विदुः ॥ भूमिं सस्यवतीं कश्चिन्मातरं मातृसंमिताम्॥३॥ गङ्गासमीपे यो दद्यात्सर्वान्कामानवाप्नुयात् ॥ भूमिं सस्यवतीं गाश्च ओषधीश्च मुदाऽन्वितः ॥ ४ ॥ विष्णुब्रह्मेशरूपाय यो दद्याद्भक्तिमान्नरः ॥ सर्वं तदक्षयं विद्या त्सर्वकामानवाप्नुयात् ॥५॥ ओषध्यः सोमराजन्याः सोमश्चाप्योषधीपतिः ॥ इति ज्ञात्वा ब्रह्मविद ओषधीर्यः प्रदास्यति ॥ ६ ॥ सर्वान्कामानवाप्नोति ब्रह्मलोके महीयते ॥ ता एव सोमराजन्याः प्रीताः प्रोचुः पुनः पुनः ॥ ७ ॥ ओषध्य ऊचुः ॥ योऽस्मान्ददाति गङ्गायां तं राजन्पारयामसि ॥ त्व मुत्तमश्चौषधीश त्वदधीनं चराचरम् ॥ ८ ॥ ओषधयः संवदन्ते सोमेन सह राज्ञा ॥ योऽस्मान्ददाति विप्रेभ्यस्तं राजन्पारयामसि ॥ ९ ॥ वयं च ब्रह्मरूपिण्यः प्राणरूपिण्य एव च ॥ योऽस्मान्ददाति विप्रेभ्यस्तं राजन्पारयामसि ॥ १० ॥ अस्मान्ददाति यो नित्यं ब्राह्मणेभ्यो जितव्रतः ॥ उपास्तिरस्ति साऽस्माकं तं राजन्पारयामसि ॥ ११ ॥ स्थावरं जंगमं किंचिदस्माभिर्व्याप्तं जगत् ॥ योऽस्मान्ददाति विप्रेभ्यस्तं राजन्पारया मसि ॥ १२ ॥ हव्यं कव्यं यदमृतं यत्किंचिदुपभुज्यते ॥ तद्वरीयश्च यो दद्यात्तं राजन्पारयामसि ॥ १३ ॥ इत्येतां वैदिकीं गाथां यः शृणोति स्म रेत वा ॥ पठते भक्तिमापन्नस्तं राजन्पारयामसि ॥ १४ ॥ ब्रह्मोवाच ॥ यत्रैषा पठिता गाथा सोमेन सह राज्ञा ॥ गंगातीरे चौषधीभिर्धान्यतीर्थं तदुच्यते ॥ १५ ॥ ततः प्रभृति तत्तीर्थमौषध्यं सौम्यमेव च ॥ अमृतं वेदगाथं च मातृतीर्थं तथैव च ॥ १६ ॥ एषु स्नानं जपो होमो दानं च पितृ तर्पणम् ॥ अन्नदानं तु यः कुर्यात्तदानन्त्याय कल्पते ॥ १७ ॥ षट्शताधिकसाहस्रं तीर्थानां तीरयोर्द्वयोः ॥ सर्वपापनिहन्तॄणां सर्वसंपद्विवर्धनम् ॥ ॥ १८ ॥ इति श्री ब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये धान्यतीर्थादिषट्शताधिकसहस्रतीर्थवर्णनं नाम पञ्चाशोऽध्यायः ॥ ५० ॥ ब्रह्मोवाच ॥ विदर्भासंगमं पुण्यं रेवतीसंगमं तथा ॥ तत्र यद्वृत्तमाख्यास्ये यत्पुराणविदो विदुः ॥ १ ॥ भरद्वाज इति ख्यात ऋषिरासीत्तपोधिकः ॥ तस्य स्वसा

रेवतीति कुरूपा विकृतस्वना ॥२॥ तां दृष्ट्वा विकृतां भ्राता भरद्वाजः प्रतापवान् ॥ चिन्तया परया युक्तो गंगायां दक्षिणे तटे ॥३॥ कस्मै दद्यामिमां
कन्यां स्वसारं भीषणाकृतिम् ॥ न कश्चित्प्रतिगृह्णाति दातव्या च स्वसा तथा ॥ ४ ॥ अहो भूयान्न कस्यापि कन्या दुःखैककारणम् ॥ मरणं
जीवतोऽप्यस्य प्राणिनस्तु पदे पदे ॥ ५ ॥ एवं विमृशतंस्तस्य स्वाश्रमे चातिशोभने ॥ द्रष्टुं मुनिवरः प्रायाद्भरद्वाजं यतव्रतम् ॥ ६ ॥ द्व्यष्टवर्षः
शुभवपुः शान्तो दान्तो गुणाकरः ॥ नाम्ना कठ इति ख्यातो भरद्वाजं ननाम सः ॥ ७ ॥ विधिवत्पूज्य तं विप्रं भरद्वाजः कठं तदा ॥ तस्याऽऽगमन
कार्यं च पप्रच्छ पुरतः स्थितः ॥ ८ ॥ कठोऽप्याह भरद्वाजं विद्यार्थ्यहमुपागतः ॥ तथाच दर्शनाकाङ्क्षी यद्युक्तं तद्विधीयताम् ॥ ९ ॥ भरद्वाजः कठं
प्राह अधीष्व यदभीप्सितम् ॥ पुराणं स्मृतयो वेदा धर्मशास्त्राण्यनेकशः ॥ १० ॥ सर्वं वेद्मि महाप्राज्ञ रुचिरं वद मा चिरम् ॥ कुलीनो धर्मनिरतो
गुरुशुश्रूषणे रतः ॥ अभिमानी श्रुतधरः शिष्यः पुण्यैरवाप्यते ॥ ११ ॥ ॥ कठ उवाच ॥ अध्यापयस्व भो ब्रह्मञ्छिष्यं मां वीतकल्मषम् ॥ शुश्रूषण
रतं भक्तं कुलीनं सत्यवादिनम् ॥ १२ ॥ ब्रह्मोवाच ॥ तथेत्युक्त्वा भरद्वाजः प्रादाद्विद्यामशेषतः ॥ प्राप्तविद्यः कठः प्रीतो भरद्वाजमथाब्रवीत् ॥
॥ १३ ॥ कठ उवाच ॥ इच्छेयं दक्षिणां दातुं गुरो तव मनःप्रियाम् ॥ वदस्व दुर्लभं वाऽपि गुरो तुभ्यं नमोऽस्तु ते ॥ १४ ॥ विद्यां प्राप्यापि ये
मोहात्स्वगुरोः पारितोषिकम् ॥ न प्रयच्छन्ति निरयं ते यान्त्याचन्द्रतारकम् ॥ १५ ॥ भरद्वाज उवाच ॥ गृहाण कन्यां विधिवद्भार्यां कुरु मम
स्वसाम् ॥ अस्यां प्रीत्या वर्तितव्यं याचेयं दक्षिणामिमाम् ॥ १६ ॥ कठ उवाच ॥ भ्रातृवत्पुत्रवच्चापि शिष्यः स्यात्तु गुरोः सदा ॥ गुरुश्च पितृवच्च
स्यात्संबन्धोऽत्र कथं भवेत् ॥ १७ ॥ भरद्वाज उवाच ॥ मद्वाक्यं कुरु सत्यं त्वं ममाऽऽज्ञा तव दक्षिणा ॥ सर्वं स्मृत्वा कठाद्य त्वं रेवतीं भर
तन्मनाः ॥ १८ ॥ ब्रह्मोवाच ॥ तथेत्युक्त्वा गुरोर्वाक्यात्कठो जग्राह पाणिना ॥ रेवतीं विधिवद्दत्तां तां समीक्ष्य कठस्त्वथ ॥१९॥ तत्रैव पूजया मास
देवेशं शंकरं तदा ॥ रेवत्या रूपसंपत्त्यै शिवप्रीत्यै च रेवती ॥ २० ॥ सुरूपा चारुसर्वांगी न रूपेणोपमीयते ॥ अभिषेकोदकं तत्र रेवत्या यद्विनिः
सृतम् ॥२१॥ साऽभवत्तत्र गंगायां तस्मात्तन्नामतो नदी ॥ रेवतीति समाख्याता रूपसौभाग्यदायिनी ॥२२॥ पुनर्देवैश्च विविधैरभिषेकं चक्रुर सः ॥
पुण्यरूपत्वसंसिद्धचै विदर्भा तदभून्नदी ॥२३॥ श्रद्धया संगमे स्नात्वा रेवतीगंगयोर्नरः ॥ सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥२४॥ तथा विदर्भा
गौतम्योः संगमे श्रद्धया मुने ॥ स्नानं करोत्यसौ याति भुक्तिं मुक्तिं च तत्क्षणात् ॥ २५ ॥ उभयोस्तीरयोस्तत्र तीर्थानां शतमुत्तमम् ॥ सर्वपापक्षयकरं
सर्वसिद्धिप्रदायकम् ॥२६॥ इति श्रीब्रह्मपुराणगतगौतमीमहात्म्ये तीर्थमाहात्म्ये विदर्भासंगमरेवतीसंगमादितीर्थवर्णनं नामैकपञ्चाशोऽध्यायः ॥५१॥

॥ ब्रह्मोवाच ॥ पूर्णतीर्थमिति ख्यातं गंगाया उत्तरे तटे ॥ तत्र स्नात्वा नरोऽज्ञानात्तथाऽपि शुभमाप्नुयात् ॥ १ ॥ पूर्णतीर्थस्य माहात्म्यं वर्ण्यते केन जन्तुना ॥ स्वयं संस्थीयते यत्र चक्रिणा च पिनाकिना ॥ २ ॥ पुरा धन्वन्तरिर्नाम कल्पादावायुषः सुतः ॥ इष्ट्वा बहुविधैर्यज्ञैरश्वमेधपुरः सरैः ॥ ३ ॥ दत्त्वा दानान्यनेकानि भुक्त्वा भोगांश्च पुष्कलान् ॥ विज्ञाय भोगवैषम्यं परं वैराग्यमाश्रितः ॥ ४ ॥ गिरिशृंगेऽम्बुधेः पारे तथा गंगानदीतटे ॥ शिवविष्ण्वोर्गृहे वाऽपि विशेषात्पुण्यसंगमे ॥ ५ ॥ तप्तं हुतं च जप्तं च सर्वमक्षयतां व्रजेत् ॥ धन्वन्तरिरिति ज्ञात्वा तत्र तेपे तपो महत् ॥ ६ ॥ ज्ञानवैराग्यसंपन्नो भीमेशचरणाश्रयः ॥ तपश्चकार विपुलं गङ्गासागरसंगमे ॥ ७ ॥ पुरा च निकृतो राज्ञा रणं हित्वा महासुरः ॥ सहस्रमेकं वर्षाणां समुद्रं प्राविशद्भयात् ॥ ८ ॥ धन्वन्तरौ वनं प्राप्ते राज्यं प्राप्ते तु तत्सुते ॥ विरागं च गते राज्ञि तमः प्रायादथार्णवात् ॥ ९ ॥ तपस्यन्तं तमो नाम बलवानसुरो मुने ॥ गङ्गातीरं समाश्रित्य राजा धन्वन्तरिर्यतः ॥ १० ॥ जपहोमरतो नित्यं ब्रह्मज्ञानपरायणः ॥ तं रिपुं नाशयामीति तमः प्रायादथार्णवात् ॥ ११ ॥ नाशितो बहुशोऽनेन राज्ञा बलवता त्वहम् ॥ तं रिपुं नाशयामीति तमः प्रायादथार्णवात् ॥ १२ ॥ मायया प्रमदारूपं कृत्वा राजानमभ्यगात् ॥ नृत्यगीतवती सुभ्रूर्हसन्ती चारुदर्शना ॥ १३ ॥ तां दृष्ट्वा चारुसर्वाङ्गीं बहुकालं नयान्विताम् ॥ शान्तामनुव्रतां भक्तां कृपया चाब्रवीदिदम् ॥ १४ ॥ ॥ नृप उवाच ॥ काऽसि त्वं कस्य हेतोर्वा वर्तसे गहने वने ॥ कं दृष्ट्वा हर्षसीव त्वं वद कल्याणि पृच्छते ॥ १५ ॥ ॥ ब्रह्मोवाच ॥ प्रमदा चापि तद्वाक्यं श्रुत्वा राजानमब्रवीत् ॥ १६ ॥ प्रमदोवाच ॥ त्वयि तिष्ठति को लोके हेतुर्हर्षस्य मे भवेत् ॥ अहमिन्द्रस्य या लक्ष्मीस्त्वां दृष्ट्वा कामसंभृतम् ॥ १७ ॥ हर्षाच्चरामि पुरतो राजंस्तव पुनः पुनः ॥ अगण्यपुण्यविरहादहं सर्वस्य दुर्लभा ॥ १८ ॥ ब्रह्मोवाच ॥ एतद्वचो निशम्याऽऽशु तपस्त्यक्त्वा सुदुष्करम् ॥ तामेव मनसा ध्यायंस्तन्निष्ठस्तत्परायणः ॥ १९ ॥ तदेकशरणो राजा बभूव स यदा तमः ॥ अन्तर्धानं गतो ब्रह्मन्नाशयित्वा तपो बृहत् ॥ २० ॥ एतस्मिन्नन्तरेऽहं वै वरान्दातुं समभ्यगाम् ॥ तं दृष्ट्वा विह्वलीभूतं तपोभ्रष्टं यथा मृतम् ॥ २१ ॥ तमाश्वास्याथ विविधैर्हेतुभिर्नृपसत्तमम् ॥ तव शत्रुस्तमो नाम कृत्वा ते तपसश्च्युतिम् ॥ २२ ॥ चरितार्थो गतो राजन्न त्वं शोचितुमर्हसि ॥ आनन्दयन्ति प्रमदास्तापयन्ति च मानवम् ॥ २३ ॥ सर्वा एव विशेषेण किमु मायामयी तु सा ॥ ततः कृताञ्जली राजा मामाह विगतभ्रमः ॥ २४ ॥ ॥ राजोवाच ॥ कथं समीहितप्राप्तिर्ब्रह्मन्मम भविष्यति ॥ किं करोमि कथं ब्रह्मंस्तपसः पारमाप्नुयाम् ॥ ॥ २५ ॥ ॥ ब्रह्मोवाच ॥ ततस्तस्योत्तरं प्रादां देवदेवं जनार्दनम् ॥ स्तुहि सर्वप्रयत्नेन ततः सिद्धिमवाप्स्यसि ॥ २६ ॥ स ह्यशेषजगत्स्रष्टा

वेदवेद्यः पुरातनः ॥ सर्वार्थसिद्धिदः पुंसां नान्योऽस्ति भुवनत्रये ॥ २७ ॥ स जगाम नगश्रेष्ठं हिमवन्तं नृपोत्तमः ॥ कृताञ्जलिपुटो भूत्वा विष्णुं
तुष्टाव भक्तितः ॥ २८ ॥ ॥ धन्वन्तरिरुवाच ॥ जय विष्णो जयाचिन्त्य जय जिष्णो जयाच्युत ॥ जय गोपाल लक्ष्मीश जय कृष्ण जगन्मय ॥
॥ २९ ॥ जय भूतपते नाथ जय पन्नगशायिने ॥ जय सर्वग गोविन्द जय विश्वकृते नमः ॥ ३० ॥ जय विश्वभुजे देव जय विश्वधृते नमः ॥
जयेश सदसत्त्वं वै जय माधव धर्मिणे ॥ ३१ ॥ जय कामद काम त्वं जय रामं गुणार्णव ॥ जयपुष्टिद पुष्टीश जय कल्याणदायिने ॥ ३२ ॥
जय भूतप भूतेश जय मानविधायिने ॥ जय कर्मद कर्म त्वं जय पीताम्बरच्छद ॥ ३३ ॥ जय सर्वेश सर्वस्त्वं जय मङ्गलरूपिणे ॥ जय सत्त्वा
धिनाथाय जय वेदविदे नमः ॥ ३४ ॥ जय जन्मद जन्मिस्थ परमात्मन्नमोऽस्तु ते ॥ जय मुक्तिद मुक्तिस्त्वं जय भुक्तिद केशव ॥ ३५ ॥
जय लोकद लोकेश जय पापविनाशन ॥ जय वत्सल भक्तानां जय चक्रधृते नमः ॥ ३६ ॥ जय मानद मानस्त्वं जय लोकनमस्कृत ॥ जय
धर्मद धर्मस्त्वं जय संसारपारग ॥ ३७ ॥ जय अन्नद अन्नं त्वं जय वाचस्पते नमः ॥ जय शक्तिद शक्तिस्त्वं जय जैत्रवरप्रद ॥ ३८ ॥ जय यज्ञद
यज्ञरूपं जय पद्मदलेक्षण ॥ जय दानद दानं त्वं जय कैटभसूदन ॥ ३९ ॥ जय कीर्तिद कीर्तिस्त्वं जय मूर्तिद मूर्तिधृक् ॥ जय सौख्यद सौख्या
त्मञ्जय पावनपावन ॥४०॥ जय शान्तिद शान्तिस्त्वं जय शंकरसंभव ॥ जय पानद पानस्त्वं जय ज्योतिःस्वरूपिणे ॥४१॥ जय वामन वित्तेश
जय धूमपताकिने ॥ जय सर्वस्य जगतो दातृमूर्ते नमोऽस्तु ते ॥ ४२ ॥ त्वमेव लोकत्रयवर्तिजीवनिकायसंक्लेशविनाशदक्ष ॥ श्रीपुण्डरीकाक्ष कृपा
निधे त्वं निंधेहि पाणिं मम मूर्ध्नि विष्णो ॥ ४३ ॥ ॥ ब्रह्मोवाच ॥ एवं स्तुवन्तं भगवाञ्शंखचक्रगदाधरः ॥ वरेण च्छन्दयामास सर्वकामसमृद्धिदः॥
॥ ४४ ॥ धन्वन्तरिः प्रीतमना वरदानेन चक्रिणः ॥ वरदानाय देवेशं गोविन्दं संस्थितं पुरः ॥ ४५ ॥ तमाह नृपतिः प्रह्वः सुरराज्यं ममेप्सितम् ॥
तच्च दत्तं त्वया विष्णो प्राप्तोऽस्मि कृतकृत्यताम् ॥ ४६ ॥ स्तुतः संपूजितो विष्णुस्तत्रैवान्तरधीयत ॥ तथैव त्रिदशेशत्वमवाप नृपतिः क्रमात् ॥
॥ ४७ ॥ प्रागर्जितानेककर्मपरिपाकवशात्ततः ॥ त्रिःकृत्वो नाशमगमत्सहस्राक्षः स्वकात्पदात् ॥ ४८ ॥ नहुषाद्वृत्रहत्यायाः सिन्धुसेनवधात्ततः ॥
अहल्यायां च गमनाद्येन केन च हेतुना ॥ ४९ ॥ स्मारं स्मारं तत्तदिन्द्रश्चिन्तासंतापदुर्मनाः ॥ ततः सुरपतिः प्राह वाचस्पतिमिदं वचः ॥ ५० ॥
इन्द्र उवाच ॥ हेतुना केन वागीश भ्रष्टराज्यो भवाम्यहम् ॥ मध्ये मध्ये पदभ्रंशाद्वरं निःश्रीकता नृणाम् ॥ ५१ ॥ गहनां कर्मणां जीवगतिं को वेत्ति
तत्त्वतः ॥ रहस्यं सर्वभावानां ज्ञातुं नान्यः प्रगल्भते ॥ ५२ ॥ ॥ ब्रह्मोवाच ॥ बृहस्पतिर्हरिं प्राह ब्रह्माणं पृच्छ गच्छ तम् ॥ स तु जानाति यद्भूतं

भविष्यच्चापि वर्तनम् ॥ ५३ ॥ स तु वक्ष्यति येनेदं जातं तच्च महामते ॥ तावागत्य महाप्राज्ञौ नमस्कृत्य ममान्तिकम् ॥ कृताञ्जलिपुटो भूत्वा मामूचतुरिदं वचः ॥ ५४ ॥ ॥ इन्द्रबृहस्पती ऊचतुः ॥ ॥ भगवन्केन दोषेण शचीभर्ता उदारधीः ॥ राज्यात्प्रभ्रश्यते नाथ संशयं छेत्तुमर्हसि ॥ ५५ ॥ ॥ ब्रह्मोवाच ॥ ॥ तदाऽहमब्रवं ब्रह्मंश्चिरं ध्यात्वा बृहस्पतिम् ॥ खण्डधर्माख्यदोषेण तेन राज्यपदाच्युतः ॥ ५६ ॥ देशकालादिदोषेण श्रद्धामंत्रविपर्ययात् ॥ यथावद्दक्षिणादानादसद्द्रव्यप्रदानतः ॥ ५७ ॥ देवभूदेवतावज्ञापातकाच्च विशेषतः ॥ यत्खण्डत्वं स्वधर्मस्य देहिनामुपजायते ॥ ५८ ॥ तेनातिमानसस्तापः पदहानिश्च दुस्त्यजा ॥ कृतोऽपि धर्मोऽनिष्टाय जायते क्षुब्धचेतसाम् ॥ ५९ ॥ कार्यस्य न भवेत्सिद्धयै तस्मादव्याकुलाय च ॥ असंपूर्णे स्वधर्मे हि किमनिष्टं न जायते ॥ ६० ॥ ताभ्यां यत्पूर्ववृत्तान्तं तदप्युक्तं मयाऽनघ ॥ आयुषस्तु सुतः श्रीमान्धन्वन्तरिरुदारधीः ॥ ६१ ॥ तमसा च कृतं विघ्नं विष्णुना तच्च नाशितम् ॥ पूर्वजन्मसुवृत्तान्तामित्यादि परिकीर्तितम् ॥ ६२ ॥ तच्छ्रुत्वा विस्मितौ चोभौ मामेव पुनरूचतुः ॥६३॥ ॥ इन्द्रबृहस्पती ऊचतुः ॥ ॥ तद्दोषप्रतिबन्धस्तु केन स्यात्सुरसत्तम ॥६४॥ ब्रह्मोवाच ॥ ॥ पुनर्ध्यात्वा तावदं श्रूयतां दोषहारकम् ॥ कारणं सर्वसिद्धीनां दुःखसंसारतारणम् ॥ ६५ ॥ शरणं तप्तचित्तानां निर्वाणं जीवतामपि ॥ गत्वा तु गौतमीं देवीं स्तूयेतां हरिशंकरौ ॥ ६६ ॥ नोपायोऽन्योऽस्ति संशुद्धयै तौ तां हित्वा जगत्त्रये ॥ तदैव जग्मतुरुभौ गौतमीं मुनिसत्तम ॥ स्नातौ कृतेक्षणौ चोभौ देवौ तुष्टुवतुर्मुदा ॥ ६७ ॥ ॥ इन्द्र उवाच ॥ ॥ नमो मत्स्याय कूर्माय वराहाय नमो नमः ॥ नरसिंहाय देवाय वामनाय नमो नमः ॥ ६८ ॥ नमोऽस्तु हयरूपाय त्रिविक्रम नमोऽस्तु ते ॥ नमोऽस्तु बुद्धरूपाय रामरूपाय कल्किने ॥ ६९ ॥ अनन्तायाच्युतायेश जामदग्न्याय ते नमः ॥ वरुणेन्द्रस्वरूपाय यमरूपाय ते नमः ॥ ७० ॥ परमेशाय देवाय नमस्त्रैलोक्यरूपिणे ॥ बिभ्रत्सरस्वतीं वक्त्रे सर्वज्ञोऽसि नमोऽस्तु ते ॥ ७१ ॥ लक्ष्मीवानस्यतो लक्ष्मीं बिभ्रद्वक्षसि चानघ ॥ बहुबाहूरुपादस्त्वं बहुकर्णाक्षिशीर्षकः ॥ त्वामेव सुखिनं प्राप्य बहवः सुखिनोऽभवन् ॥ ७२ ॥ तावन्निःश्रीकता पुंसां मालिन्यं दैन्यमेव वा ॥ यावन्न यान्ति शरणं हरे त्वां करुणार्णवम् ॥ ७३ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ सूक्ष्मं परं ज्योतिरनन्तरूपमोंकारमात्रं प्रकृतेः परं यत् ॥ चिद्रूपमानन्दमयं समस्तमेवं वदन्तीश मुमुक्षवस्त्वाम् ॥ ७४ ॥ आराधयन्त्यत्र भवन्तमीशं महामखैः पञ्चभिरप्यकामाः ॥ संसारसिन्धोः परमाप्तकामा विशन्ति दिव्यं भुवनं वपुस्ते ॥ ७५ ॥ सर्वेषु सत्त्वेषु समत्वबुद्ध्या संवीक्ष्य षट्सूर्मिषु शान्तभावाः ॥ ज्ञानेन ते कर्मफलानि हित्वा ध्यानेन ते त्वां प्रविशन्ति शंभो ॥ ७६ ॥ न जातिधर्माणि न वेदशास्त्रं न ध्यानयोगो न समाधिधर्मः ॥

रुद्रं शिवं शंकरं शान्तचित्तं भक्त्या देवं सोममहं नमस्ये ॥ ७७ ॥ मूर्खोऽपि शंभो तव पादभक्त्या समाप्नुयान्मुक्तिमयीं तनुं ते ॥ ज्ञानेषु यज्ञेषु तपःसु चैव ध्यानेषु होमेषु महाफलेषु ॥ ७८ ॥ संपन्नमेतत्फलमुत्तमं यत्सोमेश्वरे भक्तिरहर्निशं यत ॥ सर्वस्य जीवस्य सदा प्रियस्य फलस्य दृष्टस्य तथा श्रुतस्य ॥ ७९ ॥ स्वर्गस्य मोक्षस्य जगन्निवास सोपानपंक्तिस्तव भक्तिरेषा ॥ त्वत्पादसंप्राप्तिफलाप्तये तु सोपानपंक्तिं न वदन्ति धीराः ॥ ८० ॥ तस्माद्दयालो मम भक्तिरस्तु नैवास्त्युपायस्तव रूपसेवा ॥ आत्मीयमालोक्य महत्त्वमीश पापेषु चास्मासु कुरु प्रसादम् ॥ ८१ ॥ स्थूलं च सूक्ष्मं त्वमनादि नित्यं पिता च माता यदसच्च सच्च ॥ एवं स्तुतो यः श्रुतिभिः पुराणैर्नमामि सोमेश्वरमीशितारम् ॥ ८२ ॥ ॥ ब्रह्मो वाच ॥ ॥ ततः प्रीतौ हरिहरावूचतुस्त्रिदशेश्वरौ ॥ ८३ ॥ ॥ हरिहरावूचतुः ॥ ॥ ब्रियतां यन्मनोभीष्टं यद्वरं चातिदुर्लभम् ॥ ८४ ॥ ॥ ब्रह्मोवाच ॥ इन्द्रः प्राह सुरेशानं मद्राज्यं तु पुनः पुनः ॥ जायते भ्रश्यते चैव तत्पापमुपशाम्यताम् ॥ ८५ ॥ यथा स्थिरोऽहं राज्येस्यां सर्वं स्यान्निश्चलं मम ॥ सुप्रीतौ यदि देवेशौ सर्वं स्यान्निश्चलं सदा ॥ ८६ ॥ तथेति हरिवाक्यं तावभिनन्द्येदमूचतुः ॥ परं प्रसादमापन्नौ तावालोक्य स्मितानना ॥ ८७ ॥ निरपायानिराधारानिर्विकारस्वरूपिणौ ॥ शरण्यौ सर्वलोकानां भुक्तिमुक्तिप्रदावुभौ ॥ ८८ ॥ ॥ हरिहरावूचतुः ॥ ॥ त्रिदैवत्यं महातीर्थं गौतमी वाञ्छितप्रदा ॥ तस्यामनेन मन्त्रेण कुरुतां स्नानमादरात् ॥ ८९ ॥ अभिषेकं महेन्द्रस्य मङ्गलाय बृहस्पतिः ॥ करोतु संस्मरन्नावां संपदां स्थैर्यसिद्धये ॥ ९० ॥ इह जन्मनि पूर्वस्मिन्यत्किंचित्सुकृतं कृतम् ॥ तत्सर्वं पूर्णतामेतु गोदावरि नमोऽस्तु ते ॥ ९१ ॥ एवं स्मृत्वा तु यः कश्चिद्गौतम्यां स्नानमाचरेत् ॥ आवाभ्यां तु प्रसादेन धर्मः संपूर्णतामियात् ॥ पूर्वजन्मकृतादोषात्स मुक्तः पुण्यवान्भवेत् ॥ ९२ ॥ ब्रह्मोवाच ॥ तथेति चक्रतुः प्रीतौ सुरेन्द्रधिषणौ ततः ॥ महाभिषेकमिन्द्रस्य चकार द्युसदां गुरुः ॥ ९३ ॥ तेनाभूद्या नदी पुण्या मङ्गलेत्युदिता तु सा ॥ तया च संगमः पुण्यो गङ्गायाः शुभदस्त्वसौ ॥ ९४ ॥ इन्द्रेण संस्तुतो विष्णुः प्रत्यक्षोऽभूज्जगन्मयः ॥ त्रिलोकसंमितां शक्रो भूतिं लेभे जगत्पतेः ॥ ९५ ॥ तन्नाम्ना चापि विख्यातो गोविन्द इति तत्र च ॥ त्रिलोकसंमिता लब्धा तेन गौर्वज्रधारिणा ॥ ९६ ॥ दत्ता च हरिणा तत्र गोविन्दस्तदभूद्धरिः ॥ त्रैलोक्यराज्यं यत्प्राप्तं हरिणा च हरेर्मुने ॥ ९७ ॥ निश्चलं येन संजातं देवदेवान्महेश्वरात् ॥ बृहस्पतिर्देवगुरुर्यत्रास्तौषीन्महेश्वरम् ॥ ९८ ॥ राज्यस्य स्थिरभावाय देवेन्द्रस्य महात्मनः ॥ सिद्धेश्वरस्तत्र देवो लिङ्गं तु त्रिदशार्चितम् ॥ ९९ ॥ ततः प्रभृति तत्तीर्थं गोविन्दमिति विश्रुतम् ॥ मङ्गलासंगमं चैव पूर्णतीर्थं ततः परम् ॥ १०० ॥ इन्द्रतीर्थमिति ख्यातं बार्हस्पत्यं च विश्रुतम् ॥ यत्र सिद्धेश्वरो देवो

विष्णुर्गोविन्द एव च ॥ १०१ ॥ तेषु स्नानं च दानं च यत्किंचित्सुकृतार्जनम् ॥ सर्वं तदक्षयं विद्यात्पितॄणामतिवल्लभम् ॥ १०२ ॥ शृणोति
यश्चापि पठेद्यश्च स्मरति नित्यशः ॥ तस्य तीर्थस्य माहात्म्यं भ्रष्टराज्यप्रदायकम् ॥ १०३ ॥ सप्तत्रिंशत्सहस्राणि तीर्थानां तीरयोर्द्वयोः ॥ उभयोर्मु
निशार्दूल सर्वसिद्धिप्रदायिनाम् ॥ १०४ ॥ न पूर्णतीर्थसदृशं तीर्थमस्ति महाफलम् ॥ निष्फलं तस्य जन्मादि यो न सेवेत तन्नरः ॥ १०५ ॥
इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये उभयोस्तीरयोः पूर्णतीर्थमङ्गलासंगमगोविन्दसिद्धेश्वरादिसप्तत्रिंशत्सहस्रतीर्थवर्णनं नाम
द्विपञ्चाशोऽध्यायः ॥ ५२ ॥ ॥ ब्रह्मोवाच ॥ रामतीर्थमिति ख्यातं ब्रह्महत्याविनाशनम् ॥ तस्य स्मरणमात्रेण सर्वपापैः प्रमुच्यते ॥ १ ॥ इक्ष्वा
कुवंशप्रभवः क्षत्रियो लोकविश्रुतः ॥ बलवान्मतिमाञ्शूरो यथा शक्रः पुरंदरः ॥ २ ॥ पितृपैतामहं राज्यं कुर्वन्नास्ते यथा बलिः ॥ तस्य
तिस्रो महिष्यः स्यू राज्ञो दशरथस्य हि ॥ ३ ॥ कौसल्या च सुमित्रा च कैकेयी च महामते ॥ एताः कुलीनाः सुभगा रूपलक्षणसंयुताः ॥ ४ ॥
तस्मिन्राजनि राज्ये तु स्थितेऽयोध्यापतौ मुने ॥ वसिष्ठे ब्रह्मविच्छ्रेष्ठे पुरोधसि विशेषतः ॥ ५ ॥ न च व्याधिर्न दुर्भिक्षं न चावृष्टिर्न चाऽऽधयः ॥
ब्रह्मक्षत्रविशां नित्यं शूद्राणां च विशेषतः ॥ ६ ॥ आश्रमाणां तु सर्वेषामानन्दोऽभूत्पृथक्पृथक् ॥ तस्मिञ्शासति राजेन्द्रं इक्ष्वाकूणां कुलोद्वहे ॥ ७॥
देवानां दानवानां तु राज्यार्थं विग्रहोऽभवत् ॥ क्वापि तत्र जयं प्रापुर्देवाः क्वापि तथेतरे ॥ ८ ॥ एवं प्रवर्तमाने तु त्रैलोक्यमतिपीडितम् ॥ अभून्ना
रद तत्राहमवदं दैत्यदानवान् ॥ ९ ॥ देवांश्चापि विशेषेण न कृतं तैर्मदीरितम् ॥ पुनश्च संगरस्तेषां बभूव सुमहान्मिथः ॥ १० ॥ विष्णुं ज्ञात्वा सुरा
प्रोचुस्तथेशानं जगन्मयम् ॥ तावूचतुरुभौ देवानसुरान्दैत्यदानवान् ॥ ११ ॥ तपसा बलिनो यान्त पनः कुर्वन्तु संगरम् ॥ तथेत्याहुर्ययुः
सर्वे तपसे नियतव्रताः ॥ १२ ॥ ययुस्तु राक्षसान्देवाः पुनस्ते मत्सरान्विताः ॥ देवानां दानवानां च संगरोऽभूत्सुदारुणः ॥ १३ ॥ न तत्र देवा
जेतारो नैव दैत्याश्च मानवाः ॥ संयुगे वर्तमाने तु वागुवाचाशरीरिणी ॥ १४ ॥ ॥ आकाशवागुवाच ॥ येषां दशरथो राजा ते जेतारो न चेतरे ॥
॥ १५ ॥ ॥ ब्रह्मोवाच ॥ इति श्रुत्वा जयायोभौ जग्मतुर्देवदानवौ ॥ तत्र वायुस्त्वरन्प्राप्तो राजानमवदत्तदा ॥ १६ ॥ ॥ वायुरुवाच ॥ आगन्त
व्यं त्वया राजन्देवदानवसंगरे ॥ यत्र राजा दशरथो जयस्तत्रेति विश्रुतम् ॥ १७ ॥ तस्मात्त्वं देवपक्षे स्या भवेयुर्जयिनः सुराः ॥ १८ ॥ ॥
ब्रह्मोवाच ॥ तद्वायुवचनं श्रुत्वा राजा दशरथो नृपः ॥ आगम्यते मया सत्यं गच्छ वायो यथासुखम् ॥ १९ ॥ गते वायौ तदा दैत्या आजग्मु
र्भूपतिं प्रति ॥ तेऽप्यूचुर्भगवन्नस्मत्साहाय्यं कर्तुमर्हसि ॥ २० ॥ राजन्दशरथ श्रीमन्विजयस्त्वयि संस्थितः ॥ तस्मात्त्वं वै दैत्यपतेः साहाय्यं

कर्तुमर्हसि ॥ २१ ॥ ततः प्रोवाच नृपतिर्वायुना प्रार्थितः पुरा ॥ प्रतिज्ञातं मया तच्च यान्तु दैत्याश्च दानवाः ॥ २२ ॥ स तु राजा तथा चक्रे गत्वा
चैव त्रिविष्टपम् ॥ युद्धं चक्रे तथा दैत्यैर्दानवैः सह राक्षसैः ॥ २३ ॥ पश्यत्सु देवसंघेषु नमुचेर्भ्रातरस्तदा ॥ विविधुर्निशितैर्बाणैरथाक्षं नृपतेस्तथा ॥
॥ २४ ॥ भिन्नाक्षं तं रथं राजा न जानाति स संभ्रमात् ॥ राजान्तिके स्थिता सुभ्रूः कैकेय्याऽज्ञायि नारद ॥ २५ ॥ न ज्ञापितं तया राज्ञे स्वयमा
लोक्य सुव्रता ॥ भग्नमक्षं समालक्ष्य चक्रे हस्तं तदा स्वकम् ॥ २६ ॥ अश्नवन्मुनिशार्दूल तदेतन्महदद्भुतम् ॥ रथेन रथिनां श्रेष्ठस्तया दत्तकरेण
च ॥ २७ ॥ जितवान्दैत्यदनुजान्देवैः प्राप्य वरान्बहून् ॥ ततो देवैरनुज्ञातस्त्वयोध्यां पुनरभ्यगात् ॥ २८ ॥ स तु मध्ये महाराजो मार्गे वीक्ष्य तदा
प्रियाम् ॥ कैकेय्याः कर्म तद्दृष्ट्वा विस्मयं परमं गतः ॥ २९ ॥ ततस्तस्यै वरान्प्रादात्रींस्तु नारद सा अपि ॥ अनुमान्य नृपप्रोक्तं कैकेयी वाक्यम
ब्रवीत् ॥ ३० ॥ ॥ कैकेय्युवाच ॥ त्वयि तिष्ठन्तु राजेन्द्र त्वया दत्ता वरा अमी ॥३१॥ ब्रह्मोवाच ॥ विभूषणानि राजेन्द्रो दत्त्वा स प्रियया सह ॥
रथेन विजयी राजा ययौ स्वनगरं सुखी ॥ ३२ ॥ योषितां किमदेयं हि प्रियाणामुचितागमे ॥ स कदाचिद्दृशरथो मृगयाशीलिभिर्वृतः ॥ ३३ ॥
अटन्नरण्ये शर्वर्यां वारिबन्धमथाकरोत् ॥ सप्तव्यसनहीनेन भवितव्यं तु भूभुजा ॥ ३४ ॥ इति जानन्नपि च तच्चकार तु विधेर्वशात् ॥ गर्तं
प्रविश्य पानार्थमागतान्निशितैः शरैः ॥ ३५ ॥ मृगान्हन्ति महाबाहुः शृणु कालविपर्ययम् ॥ गर्तं प्रविष्टे नृपतौ तस्मिन्नेव नगोत्तमे ॥ ३६ ॥
वृद्धो वै श्रवणो नाम न शृणोति न पश्यति ॥ तस्य भार्या तथाभूता तावब्रूतां तदा सुतम् ॥ ३७ ॥ मातापितरावूचतुः ॥ आवां तृषार्तौ रात्रिश्च
कृष्णा चापि प्रवर्तते ॥ वृद्धानां जीवितं कृत्स्नं बालस्त्वमसि पुत्रक ॥ ३८ ॥ अन्धानां बधिराणां च वृद्धानां धिक्च जीवितम् ॥ जरानंर्जर
देहानां धिग्धिक्पुत्रक जीवितम् ॥ ३९ ॥ तावत्पुंभिर्जीवितव्यं यावल्लक्ष्मीर्दृढं वपुः ॥ यावदाज्ञाऽप्रतिहता तीर्थादावन्यथा मृतिः ॥ ४० ॥
ब्रह्मोवाच ॥ इत्येतद्वचनं श्रुत्वा वृद्धयोर्गुरुवत्सलः ॥ पुत्रः प्रोवाच तद्दुःखं गिरा मधुरया हरन् ॥ ४१ ॥ पुत्र उवाच ॥ मयि जीवति किं नाम
युवयोर्दुःखमीदृशम् ॥ न हरत्यात्मजः पित्रोर्यश्चरित्रैर्मनोरुजम् ॥ ४२ ॥ तेन किं तनुजेनेह कुलोद्वेगविधायिना ॥ ४३ ॥ ब्रह्मोवाच ॥ इत्युक्त्वा
पितरौ नत्वा तावाश्वास्य महामनाः ॥ तरुस्कन्धे समारोप्य वृद्धौ च पितरौ तदा ॥ ४४ ॥ हस्ते गृहीत्वा कलशं जगाम ऋषिपुत्रकः ॥ स ऋषिर्न तु
राजानं जानाति नृपतिर्द्विजम् ॥ ४५ ॥ उभौ सरभसौ तत्र द्विजो वारि समाविशत् ॥ सत्वरं कलशे न्युब्जे वारि गृह्णन्तमाशुगैः ॥४६॥ द्विजं राजा
द्विपं मत्वा विव्याध निशितैः शरैः ॥ वनद्विपोऽपि भूपानामवध्यस्ताद्विदन्नपि ॥ ४७ ॥ विव्याध तं नृपः कुर्यान्न किं किं विधिवञ्चितः ॥ स विद्धो

मर्मदेशे तु दुःखितो वाक्यमब्रवीत् ॥४८॥ द्विज उवाच ॥ केनेदं दुःखदं कर्म कृतं सद्ब्राह्मणस्य मे ॥ हा तात इति स प्राह नापराधोऽस्ति कश्चन ॥ ॥ ४९ ॥ ब्रह्मोवाच ॥ तदेतद्वचनं श्रुत्वा मुनेरार्तस्य भूपतिः ॥ निश्चेष्टश्च निरुत्साहो शनैस्तं देशमभ्यगात् ॥ ५० ॥ तं तु दृष्ट्वा द्विजवरं ज्वलंन्तमिव तेजसा ॥ असावप्यभवत्तत्र सशल्य इव मूर्च्छितः ॥ ५१ ॥ आत्मानमात्मना कृत्वा स्थिरं राजाऽब्रवीदिदम् ॥ ५२ ॥ राजोवाच ॥ को भवान्द्विजशार्दूल किमर्थमिह चाऽऽगतः ॥ वद पापकृते मह्यं वद मे निष्कृतिं पराम् ॥ ५३ ॥ ब्रह्महा वर्णिभिः किंतु श्वपचैरपि जातुचित् ॥ न स्प्रष्टव्यो महाबुद्धे द्रष्टव्यो न कदाचन ॥ ५४ ॥ ब्रह्मोवाच ॥ तद्राजवचनं श्रुत्वा मुनिपुत्रोऽब्रवीद्वचः ॥ ५५ ॥ मुनिपुत्र उवाच ॥ उत्क्रमिष्यन्ति मे प्राणा अतो वक्ष्यामि किंचन ॥ स्वच्छन्दवृत्तिताज्ञाने विद्धि पाकं च कर्मणाम् ॥ ५६ ॥ आत्मार्थं तु न शोचामि वृद्धौ तु पितरौ मम ॥ तयोः शुश्रूषकः कः स्यादन्धयोरेकपुत्रयोः ॥५७॥ विना मया महारण्ये कथं तौ जीवयिष्यतः ॥ ममाभाग्यमहो कीदृक्पितृशुश्रूषणे क्षतिः ॥५८॥ जाता मेऽद्य विना प्राणैर्हा विधे किं कृतं त्वया ॥ तथाऽपि गच्छ तत्र त्वं गृहीतकलशस्त्वरन् ॥५९॥ ताभ्यां देह्युदपानं त्वं यथा तौ न मरिष्यतः ॥६०॥ ब्रह्मोवाच ॥ इत्येवं ब्रुवतस्तस्य गताः प्राणा महावने ॥ विसृज्य सशरं चापमादाय कलशं नृपः ॥ ६१ ॥ तत्रागात्स तु वेगेन यत्र वृद्धौ महावने ॥ वृद्धौ चापि तदा रात्रौ तावन्योन्यं समूचतुः ॥६२॥ वृद्धावूचतुः ॥ उद्विग्नः कुपितो वा स्यादथ वा भक्षितः कथम् ॥ न प्राप्तश्चाऽऽवयोर्यष्टिः किं कुमः का गतिर्भवेत् ॥ ६३ ॥ न कोऽपि तादृशः पुत्रो विद्यते सचराचरे ॥ यः पित्रोरन्यथा वाक्यं न करोत्यपि निन्दितः ॥ ६४ ॥ वज्रादपि कठोरं वा जीवितं तमपश्यतोः ॥ शीघ्रं न यान्ति यत्प्राणास्तदेकायत्तजीवयोः ॥ ६५ ॥ ॥ ब्रह्मोवाच ॥ एवं बहुविधा वाचो वृद्धयोर्वदतोर्वने ॥ तदा दशरथो राजा शनैस्तं देशमभ्यगात् ॥ ६६ ॥ पादसंचारशब्देन मेनाते सुतमागतम् ॥ ६७ ॥ वृद्धावूचतुः ॥ कुतो वत्स चिरात्प्राप्तस्त्वं दृष्टिस्त्वं परायणम् ॥ न ब्रूषे किंतु रुष्टोऽसि वृद्धयोरन्धयोः सुतः ॥ ६८ ॥ ब्रह्मोवाच ॥ सशल्य इव दुःखार्तः शोचन्दुष्कृतमात्मनः ॥ स भीत इव राजेन्द्रस्तावुवाचाथ नारद ॥ ६९ ॥ उदपानं च कुरुतां तच्छ्रुत्वा नृपभाषितम् ॥ नायं वक्ता सुतोऽस्माकं को भवांस्तत्पुरा वद ॥ ७० ॥ पश्चात्पिबावः पानीयं ततो राजाऽब्रवीच्च तौ ॥ ७१ ॥ राजोवाच ॥ तत्र तिष्ठति वां पुत्रो यत्र वारिसमाश्रयः ॥ ७२ ॥ ॥ ब्रह्मोवाच ॥ तच्छ्रुत्वोचतुरार्तौ तौ सत्यं ब्रूहि न चान्यथा ॥ आचचक्षे ततो राजा सर्वमेव यथातथम् ॥ ७३ ॥ ततस्तु पतितौ वृद्धौ तत्राऽऽवां नय मा स्पृश ॥ ब्रह्मघ्नस्पर्शनं पापं न कदाचिद्विनश्यति ॥ ७४ ॥ निन्ये वै श्रवणं वृद्धं सभार्यं नृपसत्तमः ॥ यत्रासौ पतितः पुत्रस्तं स्पृष्ट्वा तौ विलेपतुः ॥ ७५ ॥ वृद्धावूचतुः ॥ यथा पुत्रवियोगेन

मृत्युर्नौ विहितस्तथा ॥ त्वं चापि पाप पुत्रस्य वियोगान्मृत्युमाप्स्यसि ॥ ७६ ॥ ॥ ब्रह्मोवाच ॥ एवं तु जल्पतोर्ब्रह्मन्गताः प्राणास्ततो नृपः ॥ अग्निना योजयामास वृद्धौ च ऋषिपुत्रकम् ॥ ७७ ॥ ततो जगाम नगरं दुःखितो नृपतिर्मुने ॥ वसिष्ठाय च तत्सर्वं न्यवेदयदशेषतः ॥ ७८ ॥ नृपाणां सूर्यवंश्यानां वसिष्ठो हि परा गतिः ॥ वसिष्ठोऽपिद्विजश्रेष्ठैः संमन्त्र्याऽऽह च निष्कृतिम् ॥ ७९ ॥ वसिष्ठ उवाच ॥ गालवं वामदेवं च जाबालिमथ कश्यपम् ॥ एतानन्यान्समाहूय हयमेधाय यत्नतः ॥ ८० ॥ यजस्व हयमेधैश्च बहुभिर्बहुदक्षिणैः ॥ ८१ ॥ ब्रह्मोवाच ॥ ॥ अकरोद्धयमेधांश्च राजा दशरथो द्विजैः ॥ एतस्मिन्नन्तरे तत्र वागुवाचाशरीरिणी ॥ ८२ ॥ ॥ आकाशवाण्युवाच ॥ ॥ पूतं शरीरमभवद्राज्ञो दशरथस्य हि ॥ व्यवहार्यश्च भविता भविष्यन्ति तथा सुताः ॥ ज्येष्ठपुत्रप्रसादेन राजाऽपापो भविष्यति ॥ ८३ ॥ ॥ ब्रह्मोवाच ॥ ततो बहुतिथे काले ऋष्यशृङ्गान्मुनीश्वरात् ॥ देवानां कार्यसिद्ध्यर्थं सुता आसन्सुरोपमाः ॥ ८४ ॥ कौशल्यायां तथा रामः सुमित्रायां च लक्ष्मणः ॥ शत्रुघ्नश्चापि कैकेय्यां भरतो मतिमत्तरः ॥ ८५ ॥ ते सर्वे मतिमन्तश्च प्रिया राज्ञो वशे स्थिताः ॥ तं राजानमृषिः प्राप्य विश्वामित्रः प्रजापतिः ॥ ८६ ॥ रामं च लक्ष्मणं चापि अयाचत महामते ॥ यज्ञसंरक्षणार्थाय ज्ञाततन्महिमा मुनिः ॥ ८७ ॥ चिरप्राप्तसुतो वृद्धो राजा नैवेत्यभाषत ॥ ८८ ॥ ॥ राजोवाच ॥ ॥ महता दैवयोगेन कथंचिद्वार्धके मुने ॥ जातावानन्दसंदोहदायकौ मम बालकौ ॥ ८९ ॥ सशरीरमिदं राज्यं दास्ये नैव सुताविमौ ॥ ९० ॥ ॥ ब्रह्मोवाच ॥ ॥ वसिष्ठेन तदा प्रोक्तो राजा दशरथस्त्विति ॥ ९१ ॥ ॥ वसिष्ठ उवाच ॥ ॥ रघवः प्रार्थना भङ्गं न राजन्कापि शिक्षिताः ॥ ९२ ॥ ॥ ब्रह्मोवाच ॥ ॥ रामं च लक्ष्मणं चैव कथंचिदवदन्नृपः ॥ ९३ ॥ ॥ राजोवाच ॥ ॥ विश्वामित्रस्य ब्रह्मर्षेः कुरुतां यज्ञरक्षणम् ॥ ९४ ॥ ॥ ब्रह्मोवाच ॥ ॥ वदन्निति सुतौ सोष्णं निश्वसन्गलपिताधरः ॥ पुत्रौ समर्पयामास विश्वामित्रस्य शास्त्रकृत ॥ ॥ ९५ ॥ तथेत्युक्त्वा दशरथं नमस्य च पुनः पुनः ॥ जग्मतू रक्षणार्थाय विश्वामित्रेण तौ मुदा ॥ ९६ ॥ ततः प्रहृष्टः स मुनिर्मुदा ग्रादात्तदोभयोः ॥ माहेश्वरीं महाविद्यां धनुर्विद्यापुरःसराम् ॥ ९७ ॥ शास्त्रीमास्त्रीं लौकिकीं च रथविद्यां गजोद्भवाम् ॥ अश्वविद्यां गदाविद्यां मन्त्राह्वानविसर्जने ॥ ९८ ॥ सर्वविद्यामथावाप्य उभौ तौ रामलक्ष्मणौ ॥ वनौकसां हितार्थाय जघ्नतुस्ताटकां वने ॥ ९९ ॥ अहल्यां शापनिर्मुक्तां पादस्पर्शाच्च चक्रतुः ॥ यज्ञविध्वंसनायाताञ्जघ्नतुस्त्रत्र राक्षसान् ॥ १०० ॥ कृतविद्यौ धनुष्पाणी चक्रतुर्यज्ञरक्षणम् ॥ ततो महामखे वृत्ते विश्वामित्रो मुनीश्वरः ॥ १०१ ॥ पुत्राभ्यां सहितो राज्ञो जनकं द्रष्टुमभ्यगात् ॥ चित्रामदर्शयत्तत्र राजमध्ये नृपात्मजः ॥ १०२ ॥ रामः सौमित्रिसहितो धनुर्विद्यां गुरोर्मताम् ॥ तत्प्रीतो

जनकः प्रादात्सीतां लक्ष्मीमयोनिजाम् ॥१०३॥ शत्रुघ्नभरतादीनां वसिष्ठादिमते स्थितः ॥१०४॥ राजा दशरथः श्रीमान्विवाहमकरोन्मुने ॥ ततो बहुतिथे काले राज्यं तस्य प्रयच्छति ॥ १०५ ॥ नृपतौ सर्वलोकानामनुमत्या गुरोरपि ॥ मन्थरात्मकदुर्दैवप्रेरिता मत्सराकुला ॥१०६॥ कैकेयी विघ्नमातस्थे वनप्रव्राजनं तथा ॥ भरतस्य च तद्राज्यं राजा नैव च दत्तवान् ॥१०७॥ पितरं सत्यवाक्यं तं कुर्वन्रामो महावनम् ॥ विवेश सीतया सार्धं तथा सौमित्रिणा सह ॥१०८॥ सतां च मानसं शुद्धं स विवेश स्वकैर्गुणैः॥ तस्मिन्विनिर्गते रामे वनवासाय दीक्षिते ॥१०९॥ समं लक्ष्मणसीताभ्यां राज्यतृष्णाविवर्जिते ॥ तं रामं चापि सौमित्रिं सीतां च गुणशालिनीम् ॥ ११० ॥ दुःखेन महताऽऽविष्टो ब्रह्मशापं च संस्मरन् ॥ तदा दशरथो राजा प्राणांस्तत्याज दुःखितः ॥ १११ ॥ कृतकर्मविपाकेन राजा नीतो यमानुगैः ॥ तस्मै राज्ञे महाप्राज्ञ यावत्स्थावरजङ्गमे ॥११२॥ यमसद्मन्यनेकानि तामिस्रादीनि नारद ॥ नरकाण्यथ घोराणि भीषणानि बहूनि च ॥ ११३ ॥ तत्र क्षिप्तस्तदा राजा नरकेषु पृथक्पृथक् ॥ पच्यते छिद्यते राजा पिष्यते चूर्ण्यते तथा ॥११४॥ शोष्यते दश्यते भूयो दह्यते च महामते ॥ एवमादिषु घोरेषु नरकेषु स पच्यते ॥११५॥ रामोऽपि गच्छन्नध्वानं चित्रकूटमथागमत् ॥ तत्रैव त्रीणि वर्षाणि व्यतीतानि महामते ॥ ११६ ॥ पुनः स दक्षिणामाशामाक्रामद्दण्डकं वनम् ॥ विख्यातं त्रिषु लोकेषु देशानां ताद्धि पुण्यदम् ॥ ११७ ॥ प्राविशत्तन्महारण्यं भीषणं दैत्यसेवितम् ॥ तद्भयाद्दृषिभिस्त्यक्तं हत्वा दैत्यांस्तु राक्षसान् ॥ ११८ ॥ विचरन्दण्डकारण्ये ऋषिसेव्यमथाकरोत् ॥ तत्रेदं वृत्तमाख्यास्ये शृणु नारद यत्नतः ॥ ११९ ॥ तावच्छनैस्त्वगाद्रामो यावद्योजनपञ्चकम् ॥ गौतमीं समनुप्राप्तो राजाऽपि नरके स्थितः ॥ १२० ॥ यमः स्वर्किंकरानाह रामो दशरथात्मजः ॥ गौतमीमभितो याति पितरं तस्य धीमतः ॥१२१॥ आकर्षन्त्वथ राजानं नरकान्नात्र संशयः ॥ उत्तीर्य गौतमीं याति यावद्योजनपञ्चकम् ॥ १२२ ॥ रामस्तावत्तस्य पिता नरके नैव पच्यताम् ॥ यदेतन्मद्वचः पुण्यं न कुर्युर्यदि दूतकाः ॥ १२३ ॥ ततश्च नरके घोरे यूयं सर्वे निमज्जथ ॥ या काऽप्युक्ता परा शक्तिः शिवस्य समवायिनी ॥ १२४ ॥ तामेव गौतमीं सन्तो वदन्त्यम्भःस्वरूपिणीम् ॥ हरिब्रह्ममहेशानां मान्या वन्द्या च सैव यत् ॥ १२५ ॥ निस्तीर्यते न केनापि तदतिक्रमजं त्वघम् ॥ पापिनोऽप्यात्मजः कश्चिद्यस्य गङ्गामनुस्मरेत् ॥१२६॥ सोऽनेकदुर्गनिरयान्निर्गतो मुक्ततां व्रजेत् ॥ किं पुनस्तादृशः पुत्रो गौतमीनिकटे स्थितः॥१२७॥यस्यासौ नरके पक्तुं न कैरपि हि शक्यते॥दक्षिणाशापतेर्वाक्यं निशम्य यमकिंकराः॥१२८॥नरके पच्यमानंतमयोध्याधिपतिं नृपम् ॥ उत्तार्य घोरनरकाद्वचनं चेदमब्रुवन्॥१२९॥ यमकिंकरा ऊचुः ॥ ॥ धन्योऽसि नृपशार्दूल यस्य पुत्रः स तादृशः ॥ इह चामुत्र विश्रान्तिः सुपुत्रः केन लभ्यते॥१३०॥ ब्रह्मोवाच ॥

स विश्रान्तः शनै राजा किंकरान्वाक्यमब्रवीत्॥१३१॥राजोवाच॥नरकेष्वथ घोरेषु पच्यमानः पुनः पुनः॥ कथं त्वाकर्षितः शीघ्रं तन्मे वक्तुमिहार्हथ
॥ १३२ ॥ ब्रह्मोवाच ॥ तत्र कश्चिच्छान्तमना राजानमिदमब्रवीत् ॥१३३॥ ॥ यमदूत उवाच ॥ वेदशास्त्रपुराणादावेतद्गोप्यं प्रयत्नतः ॥ प्रकाश्यते
तदपि ते सामर्थ्यं पुत्रतीर्थयोः॥१३४॥रामस्तव सुतः श्रीमान्गौतमीतीरमागतः ॥ तस्मात्त्वं नरकाद्घोरादाकृष्टोऽसि नरोत्तम ॥१३५॥ यदि त्वां तत्र
गौतम्यां स्मरेद्रामः सलक्ष्मणः ॥ स्नानं कृत्वाऽथ पिण्डादि ते दद्यात्स नृपोत्तमं ॥ १३६॥ ततस्त्वं सर्वपापेभ्यो मुक्तो यासि त्रिविष्टपम् ॥१३६॥
राजोवाच ॥ तत्र गत्वा भवद्वाक्यमाख्यास्ये स्वसुतौ प्रति ॥ भवन्त एव शरणमनुज्ञां दातुमर्हथ ॥ १३७ ॥ ॥ ब्रह्मोवाच ॥ तद्राजवचनं श्रुत्वा
कृपया यमकिंकराः ॥ आज्ञां च प्रददुस्तस्मै राजा प्रागात्सुतौ प्रति ॥ १३८ ॥ भीषणं यातनादेहमापन्नो निःश्वसन्मुहुः ॥ निरीक्ष्य स्वं लज्जमानः
कृतं कर्म च संस्मरन् ॥ १३९ ॥ स्वेच्छया विहरन्गङ्गामाससाद च राघवः ॥ गौतम्यास्तटमाश्रित्य रामो लक्ष्मण एव च ॥ १४० ॥ सीतया
सह वैदेह्या सखौ चैव यथाविधि ॥ नैव तत्राभवद्भोज्यं भक्ष्यं वा गौतमीतटे ॥ १४१ ॥ तद्दिने तत्र वसतां गौतमीतीरवासिनाम् ॥ तद्दृष्ट्वा दुः
खितो भ्राता लक्ष्मणो राममब्रवीत् ॥ १४२ ॥ ॥ लक्ष्मण उवाच ॥ पुत्रौ दशरथस्याऽऽवां तवापि वत्सलमीदृशम् ॥ नास्ति भोज्यमथास्माकं गंगा
तीरनिवासिनाम् ॥ १४३ ॥ ॥ राम उवाच ॥ भ्रातर्यद्विहितं कर्म नैव तद्वान्यथा भवेत् ॥ पृथिव्यामन्नपूर्णायां वयमन्नाभिलाषिणः ॥ १४४ ॥
सौमित्रे नूनमस्माभिर्न ब्राह्मणमुखे हुतम् ॥ अवज्ञया महीदेवांस्तर्पयन्त्यर्चयन्ति न ॥ १४५ ॥ ते ये लक्ष्मण जायन्ते सर्वदैव बुभुक्षिताः ॥
स्नात्वा देवांनथाभ्यर्च्य होतव्यश्च हुताशनः ॥ ततः स्वसमये देवो विधास्यत्यशनं तु नौ ॥ १४६ ॥ ॥ ब्रह्मोवाच भ्रात्रोः संजल्पतोरेवं पश्यतोः
कर्मणो गतिम् ॥ शनैर्दशरथो राजा तं देशमुपजग्मिवान् ॥ १४७ ॥ तं दृष्ट्वा लक्ष्मणः शीघ्रं तिष्ठ तिष्ठेति चाब्रवीत् ॥ धनुराकृष्य कोपेन रक्ष
स्त्वं दानवोऽथवा ॥ १४८ ॥ आसन्नं च पुनर्दृष्ट्वा याहि याह्यत्र पुण्यभाक् ॥ रामो दाशरथी राजा धर्मभाक्पश्य वर्तते ॥ १४९ ॥ गुरुभक्तः
सत्यसंधो देवब्राह्मणसेवकः ॥ त्रैलोक्यरक्षादक्षोऽसौ वर्तते यत्र राघवः ॥ १५० ॥ न तत्र त्वादृशामस्ति प्रवेशः पापकर्मणाम् ॥ यदि प्रविशसे
पाप ततो वधमवाप्स्यसि ॥ १५१ ॥ तत्पुत्रवचनं श्रुत्वा शनैराहूय वाचया ॥ उवाचाधोमुखो भूत्वा स्नुषां पुत्रौ कृताञ्जलिः ॥ मुहुरन्तर्विनिध्याय
न्गतिं दुष्कृतकर्मणः ॥ १५२ ॥ ॥ राजोवाच ॥ अहं दशरथो राजा पुत्रौ मे शृणुतं वचः ॥ तिसृभिर्ब्रह्महत्याभिर्वृतोऽहं दुःखमागतः ॥ छिन्नं पश्यत
मे देहं नरकेषु च पाचितम् ॥ १५३ ॥ ॥ ब्रह्मोवाच ॥ ततः कृताञ्जली रामः सीतया लक्ष्मणेन च ॥ भूभौ प्रणेमुस्ते सर्वे वचनं चैतदब्रुवन् ॥

॥ १५४ ॥ ॥ सीतारामलक्ष्मणा ऊचुः ॥ कस्येदं कर्मणस्तात फलं नृपतिसत्तम ॥ १५५ ॥ ॥ ब्रह्मोवाच ॥ स च नाह यथावृत्तं ब्रह्महत्यात्रयं
तथा ॥ १५६ ॥ ॥ राजोवाच ॥ निष्कृतिर्ब्रह्महन्तॄणां पुत्रौ क्वापि न विद्यते ॥१५७॥ ॥ ब्रह्मोवाच ॥ ततो दुःखेन महताऽऽवृताः सर्वे भुवं गताः ॥
राजानं वनवासं च मातरं पितरं तथा ॥ १५८ ॥ दुःखागमं कर्मगतिं नरके पातनं तथा ॥ एवमाद्यथ संस्मृत्य मुमोह नृपतेः सुतः ॥ विसंज्ञं
नृपतिं दृष्ट्वा सीता वाक्यमथाब्रवीत् ॥ १५९ ॥ ॥ सीतोवाच ॥ न शोचन्ति महात्मानस्त्वादृशा व्यसनागमे ॥ चिन्तयन्ति प्रतीकारं दैन्यमप्यथ
मानुषम् ॥ १६० ॥ शोचद्भिर्युगसाहस्रं विपत्तिर्नैव तीर्यते ॥ व्यामोहमाप्नुवन्तीह न कदाचिद्विचक्षणाः ॥ १६१ ॥ किमनेनात्र दुःखेन निष्फलेन
जनेश्वर ॥ देहि हत्यां प्रथमतो या जाता ह्यतिभीषणा ॥ १६२ ॥ पितृभक्तः पुण्यशीलो वेदवेदांगपारगः ॥ अनागा यो हतो विप्रस्तत्पापस्यात्र
निष्कृतिम् ॥ १६३ ॥ आचरामि यथाशास्त्रं मा शोकं कुरुतं युवाम् ॥ द्वितीयां लक्ष्मणो हत्यां गृह्णातु त्वपरां भवान् ॥ १६४ ॥ ॥ ब्रह्मोवाच ॥
एतद्धर्मयुतं वाक्यं सीतया भाषितं दृढम् ॥ तथेति चाऽऽहतुरुभौ ततो दशरथोऽब्रवीत् ॥ १६५ ॥ ॥ दशरथ उवाच ॥ त्वं हि ब्रह्मविदः कन्या
जनकस्य त्वयोनिजा ॥ भार्या रामस्य किं चित्रं यद्युक्तमनुभाषसे ॥ १६६ ॥ न कोऽपि भवतां किंतु श्रमः स्वल्पोऽपि विद्यते ॥ गौतम्यां स्नान
दानेन पिण्डनिर्वपणेन च ॥ १६७ ॥ तिसृभिर्ब्रह्महत्याभिर्मुक्तो यामि त्रिविष्टपम् ॥ त्वया जनकसंभूते स्वकुलोचितमीरितम् ॥ १६८ ॥ प्रापयन्ति
परं पारं भवाब्धेः कुलयोषितः ॥ गोदावर्याः प्रसादेन किं नामास्त्यत्र दुर्लभम् ॥१६९ ॥ ॥ ब्रह्मोवाच ॥ तथेति क्रियमाणे तु पिण्डदानाय शत्रुहा ॥
नैवापश्यद्भक्ष्यभोज्यं ततो लक्ष्मणमब्रवीत् ॥ १७० ॥ लक्ष्मणः प्राह विनयादिङ्गुद्याश्च फलानि च ॥ सन्ति तेषां च पिण्याकमानीतं तत्क्षणा
दिव ॥ १७१ ॥ पिण्याकेनाथ गंगायां पिण्डं दातुं तथा पितुः ॥ मनः कुर्वंस्ततो रामो मन्दोऽभूद्दुःखितस्तदा ॥ १७२ ॥ दैवी
वागभवत्तत्र दुःखं त्यज नृपात्मज ॥ राज्यभ्रष्टो वनं प्राप्तः किं वै निष्किंचनो भवान् ॥ १७३ ॥ अशठो धर्मनिरतो न शो
चितुमिहार्हसि ॥ वित्तशाठ्येन यो धर्मं करोति स तु पातकी ॥ १७४ ॥ श्रूयते सर्वशास्त्रेषु यद्राम शृणु यत्नतः ॥ यदन्नः पु
रुषो राजंस्तदन्नास्तस्य देवताः ॥ १७५ ॥ पिण्डे निपतिते भूमौ नापश्यत्पितरं तदा ॥ शवं च पतितं यत्र शवतीर्थमनुत्तमम् ॥ १७६ ॥
महापातकसंघातविघातकृदनुस्मृतिः ॥ तत्राऽऽगच्छँल्लोकपाला रुद्रादित्यास्तथाऽश्विनौ ॥१७७॥ स्वं स्वं विमानमारूढास्तेषां मध्येऽतिदीप्ति मान् ॥
विमानवरमारूढः स्तूयमानश्च किंनरैः ॥१७८॥ आदित्यसदृशाकारस्तेषां मध्ये बभौ पिता ॥ तमदृष्ट्वा स्वपितरं देवान्दृष्ट्वा विमानिनः ॥१७९॥

कृताञ्जलिपुटो रामः पिता मे केत्यभाषत ॥ इति दिव्याऽभवद्वाणी रामं संबोध्य सीतया ॥ १८० ॥ तिसृभिर्ब्रह्महत्याभिर्मुक्तो दशरथो नृपः ॥ वृत्तं पश्य. सुरैस्तात देवा अप्यूचिरे च तम् ॥ १८१ ॥ देवा ऊचुः ॥ धन्योऽसि कृतकृत्योऽसि राम स्वर्गं गतः पिता ॥ नानानिरयसं घातात्पूर्वजानुद्धरेत्तु यः ॥ १८२ ॥ स धन्योऽलंकृतं तेन कृतिना भुवनत्रयम् ॥ एनं पश्य महाबाहो मुक्तपापं रविप्रभम् ॥ १८३ ॥ सर्व संपत्तियुक्तोऽपि पापी दग्धद्रुमोपमः ॥ निष्किंचनोऽपि सुकृती दृश्यते चन्द्रमौलिवत् ॥ १८४ ॥ ॥ ब्रह्मोवाच ॥ दृष्ट्वाऽब्रवीत्सुतं राजा आशीर्भिर भिनन्द्य च ॥ १८५ ॥ ॥ राजोवाच ॥ कृतकृत्योऽसि भद्रं ते तारितोऽहं त्वयाऽनघ ॥ धन्यः स पुत्रो लोकेऽस्मिन्पितॄणां यस्तु तारकः ॥ ॥ १८६ ॥ ॥ ब्रह्मोवाच ॥ ततः सुरगणाः प्रोचुर्देवानां कार्यसिद्धये ॥ रामं च पुरुषश्रेष्ठं गच्छ तात यथासुखम् ॥ ततस्तद्वचनं श्रुत्वा रामस्ता नब्रवीत्सुरान् ॥ १८७ ॥ ॥ राम उवाच ॥ गुरौ पितरि मे देवाः किं कृत्यमवशिष्यते ॥ १८८ ॥ ॥ देवा ऊचुः ॥ नदी न गङ्गया तुल्या न त्वया सदृशः सुतः ॥ न शिवेन समो देवो न तारेण समो मनुः ॥ १८९ ॥ त्वया राम गुरूणां च कार्यं सर्वमनुष्ठितम् ॥ तारिताः पितरो राम त्वया पुत्रेण मानद ॥ गच्छन्तु सर्वे स्वस्थानं त्वं च गच्छ यथासुखम् ॥ १९० ॥ ॥ ब्रह्मोवाच ॥ तद्देववचनाद्धृष्टः सीतया लक्ष्मणाग्रजः ॥ दृष्ट्वा तु गङ्गामा हात्म्यं विस्मितो वाक्यमब्रवीत् ॥ १९१ ॥ ॥ राम उवाच ॥ अहो गङ्गाप्रभावोऽयं त्रैलोक्ये नोपमीयते ॥ वयं धन्या यतो गंगा दृष्टाऽस्माभिस्त्रि पावनी ॥ १९२ ॥ ॥ ब्रह्मोवाच ॥ हर्षेण महता युक्तो देवं स्थाप्य महेश्वरम् ॥ तं षोडशभिरीशानमुपचारैः प्रयत्नतः ॥ १९३ ॥ संपूज्याऽऽवरणै र्युक्तं षट्त्रिंशत्कलमीश्वरम् ॥ कृताञ्जलिपुटो भूत्वा रामस्तुष्टाव शंकरम् ॥ १९४ ॥ ॥ राम उवाच ॥ नमामि शंभुं पुरुषं पुराणं नमामि सर्वज्ञमपार भावम् ॥ नमामि रुद्रं प्रभुमक्षयं तं नमामि शर्वं शिरसा नमामि ॥ १९५ ॥ नमामि देवं परमव्ययं तमुमापतिं लोकगुरुं नमामि ॥ नमामि दारि द्र्यविदारणं तं नमामि रोगापहरं नमामि ॥ १९६ ॥ नमामि कल्याणमचिन्त्यरूपं नमामि विश्वोद्भवबीजरूपम् ॥ नमामि विश्वस्थितिकारणं तं नमामि संहारकरं नमामि ॥ १९७ ॥ नमामि गौरीप्रियमव्ययं तं नमामि नित्यं क्षरमक्षरं तम् ॥ नमामि चिद्रूपममेयभावं त्रिलोचनं तं शिरसा नमामि ॥ १९८ ॥ नमामि कारुण्यकरं भवस्य भयंकरं वाऽपि सदा नमामि ॥ नमामि दातारमभीप्सितानां नमामि सोमेशमुमेशमादौ ॥ ॥ १९९ ॥ नमामि वेदत्रयलोचनं तं नमामि मूर्तित्रयवर्जितं तम् ॥ नमामि पुण्यं सदसद्व्यतीतं नमामि तं पापहरं नमामि ॥ २०० ॥ नमामि विश्वस्य हिते रतं तं नमामि रूपाणि बहूनि धत्ते ॥ यो विश्वगोप्ता सदसत्प्रणेता नमामि तं विश्वपतिं नमामि ॥ २०१ ॥ यज्ञेश्वरं संप्रति हव्य

कव्यं तथा गतिं लोकसंदाशिवो यः ॥ आराधितो यश्च ददाति सर्वं नमामि दानप्रियमिष्टदेवम् ॥ २०२ ॥ नमामि सोमेश्वरमस्वतन्त्रमुमापतिं तं विजयं नमामि ॥ नमामि विघ्नेश्वरनन्दिनाथं पुत्रप्रियं तं शिरसा नमामि ॥ २०३ ॥ नमामि देवं भवदुःखशोकविनाशनं चन्द्रधरं नमामि ॥ नमामि गंगाधरमीशमीड्यमुमाधवं देववरं नमामि ॥२०४॥ नमाम्यजादीशपुरंदरादिसुरासुरैरर्चितपादयुग्मम् ॥ नमामि देवीमुखवादनानामीक्षार्थमक्षित्रितयं य ऐच्छत् ॥२०५॥ पञ्चामृतैर्गन्धसुधूपदीपैर्विचित्रपुष्पैर्विविधैश्च मन्त्रैः ॥ अन्नप्रकारैः सकलोपचारैः संपूजितं सोममहं नमामि ॥ २०६ ॥ ब्रह्मोवाच ॥ ततः स भगवानाह रामं शंभुः सलक्ष्मणम् ॥ वरान्वृणीष्वं भद्रं ते रामः प्राह वृषध्वजम् ॥२०७॥ राम उवाच ॥ स्तोत्रेणानेन ये भक्त्या तोष्यन्ति त्वां सुरोत्तमं ॥ तेषां सर्वाणि कार्याणि सुसिद्धिं यान्तु शङ्कर ॥ २०८ ॥ येषां च पितरः शंभो पतिता नरकार्णवे ॥ तेषां पिण्डादिदानेन पूता यान्तु त्रिविष्टपम् ॥ २०९ ॥ जन्मप्रभृति यच्चीर्णं मनोवाक्कायिकं त्वघम् ॥ अत्र तु स्नानमात्रेण तत्सद्यो नाशमाप्नुयात ॥ ॥ २१० ॥ अत्र ये भक्तितः शंभो ददत्यर्थिभ्य अण्वपि ॥ सर्वं तदक्षयं शंभो दातॄणां फलकृद्भवेत् ॥ २११ ॥ ब्रह्मोवाच ॥ एवमस्त्विति तं रामं शंकरो हृषितोऽब्रवीत् ॥ गते तस्मिन्सुरश्रेष्ठे रामोऽप्यनुचरैः सह ॥ २१२ ॥ गौतमी यत्र चोत्पन्ना शनैस्तं देशमभ्यगात् ॥ ततः प्रभृति तत्तीर्थं रामतीर्थमुदाहृतम् ॥ २१३ ॥ दयालोरपतद्यत्र लक्ष्मणस्य कराच्छरः ॥ तद्बाणतीर्थं मभवत्सर्वापद्विनिवारणम् ॥ २१४ ॥ यत्र सौमित्रिणा स्नानं शंकरस्यार्चनं कृतम् ॥ तत्तीर्थं लक्ष्मणं जातं तथा सीतासमुद्भवम् ॥ २१५ ॥ नानाविधाशेषपापसंघनिर्मूलनक्षमम् ॥ यदङ्घ्रिसंगादभवद्गंगा त्रैलोक्यपावनी ॥ २१६ ॥ स यत्र स्नानमकरोत्तद्वैशिष्ट्यं किमुच्यते ॥ तद्रामतीर्थं सदृशं तीर्थं क्वापि न विद्यते ॥२१७॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये रामतीर्थादितीर्थवर्णनं नाम त्रिपञ्चाशोऽध्यायः ॥५३॥ ब्रह्मोवाच ॥ पुत्रतीर्थमिति ख्यातं पुण्यतीर्थं तदुच्यते ॥ सर्वान्कामानवाप्नोति यन्महिम्नः श्रुतेरपि ॥१॥ तस्य स्वरूपं वक्ष्यामि शृणु यत्नेन नारद ॥ दितेः पुत्राश्च दनुजाः परिक्षीणा यदाऽभवन् ॥ अदितेस्तु सुता ज्येष्ठाः सर्वभावेन नारद ॥ २ ॥ तदा दितिः पुत्रवियोगदुःखात्संस्पर्धमाना दनुमा ससाद ॥ ३ ॥ दितिरुवाच ॥ क्षीणाः सुता आवयोरेव भद्रे किं कुर्महे कर्म लोके गरीयः ॥ पश्यादितेर्वैशमभिन्नमुत्तमं साराज्ययुक्तं यशसा जयश्रिया ॥ ४ ॥ जितारिमभ्युन्नतकीर्तिधर्मं मच्चित्तसंहर्षविनाशदक्षम् ॥ समानभर्तृत्वसमानधर्मं समानगोत्रेऽपि समानरूपे ॥ ५ ॥ न जीवयेयं श्रिय मुन्नतिं च जीर्णोऽस्मि दृष्ट्वा त्वदितिप्रसूतान् ॥ कामप्यवस्थामनुयामि दुःस्थाऽदितेर्विलोक्याथ परां समृद्धिम् ॥ दावप्रवेशोऽपि सुखाय नूनं स्व

प्रेऽप्यवेक्ष्या न सपत्नलक्ष्मीः ॥ ६ ॥ ब्रह्मोवाच ॥ एवं ब्रुवाणामतिदीनवक्त्रां विनिश्वसन्तीं परमेष्ठिपुत्रः ॥ कृताभिपूजो विगतश्रमस्तां स सान्त्व
यन्नाह मनोभिरामाम् ॥ ७ ॥ परमेष्ठिपुत्र उवाच ॥ खेदो न कार्यः समभीप्सितं यत्तत्प्राप्यते पुण्यत एव भद्रे ॥ तत्साधनं वेत्ति महानुभावः प्रजाप
तिस्ते स तु वक्ष्यतीति ॥ ८ ॥ साध्ध्येतत्सर्वभावेन प्रश्रयावनता सती ॥ ९ ॥ ब्रह्मोवाच ॥ एवं ब्रुवाणां च दितिं दनुः प्रोवाच नारद ॥ १० ॥
दनुरुवाच ॥ भर्तारं कश्यपं भद्रे तोषयस्व निजैर्गुणैः ॥ तुष्टो यदि भवेद्भर्ता ततः कामानवाप्स्यसि ॥ ११ ॥ ब्रह्मोवाच ॥ तथेत्युक्त्वा सर्वभावै
स्तोषयामास कश्यपम् ॥ दितिं प्रोवाच भगवान्कश्यपोऽथ प्रजापतिः ॥ १२ ॥ कश्यप उवाच ॥ किं ददामि तवाभीष्टं दिते वरय सुव्रते ॥
॥ १३ ॥ ब्रह्मोवाच ॥ दितिरप्याह भर्तारं पुत्रं बहुगुणान्वितम् ॥ जेतारं सर्वलोकानां सर्वलोकनमस्कृतम् ॥ १४ ॥ येन जातेन लोकेऽस्मिन्भवेयं
वीरपुत्रिणी ॥ तं वरेयं सुरपितरित्याह विनयान्विता ॥ १५ ॥ कश्यप उवाच ॥ उपदेक्ष्ये व्रतं श्रेष्ठं द्वादशाब्दफलप्रदम् ॥ तत आगत्य ते गर्भ
माधास्ये यन्मनोगतम् ॥ निष्पापतायां जातायां सिध्यन्ति हि मनोरथाः ॥ १६ ॥ ब्रह्मोवाच ॥ भर्तृवाक्यादितिः प्रीता तं नमस्याऽऽयतेक्षणा ॥
उपदिष्टं व्रतं चक्रे भर्त्राऽऽदिष्टं यथाविधि ॥ १७ ॥ तीर्थसेवापात्रदानव्रतचर्यादिवर्जिताः ॥ कथमासादयिष्यन्ति प्राणिनोऽत्र मनोरथान् ॥ १८ ॥
ततश्चीर्णे व्रते तस्यां दित्यां गर्भमधारयत् ॥ पुनः कान्तामथोवाच कश्यपस्तां दितिं रहः ॥ १९ ॥ कश्यप उवाच ॥ न प्राप्नुवन्ति यत्कामान्सु
नयोऽपि तपःस्थिताः ॥ यथाविहितकर्मागावज्ञया तच्छुचिस्मिते ॥ २० ॥ निन्दितं च न कर्तव्यं संध्ययोरुभयोरपि ॥ न स्वप्तव्यं न गन्तव्यं
मुक्तकेशी च नो भव ॥ २१ ॥ भोक्तव्यं सुभगे नैव क्षुतं वा जृम्भणं तथा ॥ सन्ध्याकाले न कर्तव्यं भूतसंघसमाकुले ॥ २२ ॥ सान्तर्धानं
सदा कार्यं हसितं तु विशेषतः ॥ गृहान्तर्देशे संध्यासु न स्थातव्यं कदाचन ॥ २३ ॥ मुशलोलूखलादीनि शूर्पपीठपिधानकम् ॥ नैवातिक्र
मणीयानि दिवा रात्रौ सदा प्रिये ॥ २४ ॥ उदक्शीर्षं तु शयनं न संध्यासु विशेषतः ॥ वक्तव्यं नानृतं किंचिन्नान्यगेहाटनं तथा ॥ २५ ॥
कान्तादन्यो न वीक्ष्यस्तु प्रयत्नेन नरः क्वचित् ॥ इत्यादिनियमैर्युक्ता यदि त्वमनुवर्तसे ॥ ततस्ते भविता पुत्रस्त्रैलोक्यैश्वर्यभाजनम् ॥ २६ ॥
ब्रह्मोवाच ॥ तथेति प्रतिजज्ञे सा भर्तारं लोकपूजितम् ॥ गतश्च कश्यपो ब्रह्मन्नितश्चेतः सुरान्प्रति ॥ २७ ॥ दितेर्गर्भोऽपि ववृधे बलवान्पुण्यसं
भवः ॥ एतत्सर्वं मयो दैत्यो मायया वेत्ति तत्त्वतः ॥ २८ ॥ इन्द्रस्य सख्यमभवन्मयेन प्रीतिपूर्वकम् ॥ मयो गत्वा रहः प्राह इन्द्रं स विनयान्वितः
॥ २९ दितेर्दनोरभिप्रायं व्रतं गर्भस्य वर्धनम् ॥ तस्य वीर्यं च विविधं प्रीत्येन्द्राय न्यवेदयत् ॥ ३० ॥ विश्वासैकगृहं मित्रमपायत्रासवर्जितम् ॥

अर्जितं सुकृतं नानाविधं चेत्तदवाप्यते ॥ ३१ ॥ नारद उवाच ॥ नमुचेश्च प्रियो भ्राता मयो दैत्यो महाबलः ॥ भ्रातृहन्त्रा कथं मैत्र्यं
मयस्याऽऽसीत्सुरेश्वर ॥ ३२ ॥ ब्रह्मोवाच ॥ दैत्यानामधिपश्चाऽऽसीद्बलवान्नमुचिः पुरा ॥ इन्द्रेण वैरमभवद्भीषणं लोमहर्षणम् ॥ ३३ ॥
युद्धं हित्वा कदाचिद्वो गच्छन्तं तु शतक्रतुम् ॥ दृष्ट्वा दैत्यपतिः शूरो नमुचिः पृष्ठतोऽन्वगात् ॥ ३४ ॥ तमायान्तमभिप्रेक्ष्य शचीभर्ता भयातुरः॥
ऐरावतं गजं त्यक्त्वा इन्द्रः फेनमथाऽऽविशत् ॥ ३५ ॥ स वज्रपाणिस्तरसा फेनेनैवाहनद्रिपुम् ॥ नमुचिर्नाशमगमत्तस्य भ्राता मयोऽनुजः ॥३६॥
भ्रातृहन्तुविनाशाय तपस्तेपे मयो महत् ॥ मायां च विविधामाप देवानामतिभीषणाम् ॥ ३७ ॥ वरांश्चावाप्य तपसा विष्णोर्लोकपरायणात् ॥
दानशौण्डः प्रियालापी तदाऽभवदसौ मयः ॥ ३८ ॥ अग्नींश्च ब्राह्मणान्पूज्य जेतुमिन्द्रं कृतक्षणः ॥ दातारं च तदाऽर्थिभ्यः स्तूयमानं च बन्दि
भिः ॥ ३९ ॥ विदित्वा मघवा वायोर्मयं मायाविनं रिपुम् ॥ उपक्रांतं सुयुद्धाय विप्रो भूत्वा तमभ्यगात् ॥ शचीभर्ता मयं दैत्यं प्रोवाचेदं पुनः
पुनः ॥ ४० ॥ ॥ इन्द्र उवाच ॥ देहि दैत्यपते मह्यमर्थिनेऽपेक्षितं वरम् ॥ त्वां श्रुत्वा दातृतिलकमागतोऽहं द्विजोत्तमः ॥ ४१ ॥ ॥ ब्रह्मोवाच ॥
मयोऽपि ब्राह्मणं मत्वाऽवदद्दत्तं मया तव ॥ विचारयन्ति कृतिनो बहुल्पं वा पुरोऽर्थिनि ॥ ४२ ॥ इत्युक्ते तु हरिः प्राह संख्यामिच्छे ह्यहं त्वया ॥
इन्द्रं मयः पुनः प्राह किमनेन द्विजोत्तम ॥ ४३ ॥ न त्वया मम वैरं भोः स्वस्तीत्याह हरिर्मयम् ॥ तत्त्वं वदेति स हरिर्दैत्येनोक्तः स्वकं वपुः ॥
॥ ४४ ॥ दर्शयामास दैत्याय सहस्राक्षं यदुच्यते ॥ ततः सविस्मयो दैत्यो मयो हरिमुवाच ह ॥ ४५ ॥ ॥ मय उवाच ॥ किमिदं वज्रपाणिस्त्वं
त्वायोग्या कृतिः सखे ॥ ४६ ॥ ॥ ब्रह्मोवाच ॥ विहस्याथ परिष्वज्य कृतमित्यब्रवीद्धरिः ॥ केनापि साधयन्त्यत्र पण्डिताश्च समीहितम् ॥ ४७ ॥
ततः प्रभृति शक्रस्य मयेन महती ह्यभूत् ॥ सुप्रीतिर्मुनिशार्दूल मयो हरिहितः सदा ॥ ४८ ॥ इन्द्रस्य भवनं गत्वा तस्मै सर्वं न्यवेदयत् ॥ किं मे
कृत्यामिति प्राह मयं मायाविनं हरिः ॥ ४९ ॥ हरये च मयो मायां प्रादात्प्रीत्या तथा हरिः ॥ प्राप्तः संप्रीतिमानाह किं कृत्यं मय तद्वद ॥ ५० ॥
मय उवाच ॥ अगस्त्यस्याऽऽश्रमं गच्छ तत्राऽऽस्ते गर्भिणी दितिः ॥ तस्याः शुश्रूषणं कुर्वन्नास्स्व तत्र कियन्ति च ॥ ५१ ॥ अहानि मघवंस्तस्या
गर्भमाविश्य वज्रधृक् ॥ वर्धमानं च तं छिन्धि यावद्वश्योऽथवा मृतिम् ॥ प्राप्नोति तावद्वज्रेण ततो मे भविता रिपुः ॥ ५२ ॥ ॥ ब्रह्मोवाच ॥ तथे
त्युक्त्वा मयं पूज्य मघवानेक एव हि ॥ विनीतवत्तदा प्रायाद्दितिं मातरमञ्जसा ॥ ५३ ॥ शुश्रूषमाणस्तां देवीं शक्रो दैतेयमातरम् ॥ सा न जाना
ति तच्चित्तं शक्रस्य द्विषतो दितिः ॥ ५४ ॥ गर्भे स्थितं तु यद्भूतं देवेन्द्रस्य विचेष्टितम् ॥ अमोघं तन्मुनेस्तेजः कश्यपस्य दुरासदम् ॥ ५५ ॥

ततः प्रगृह्य कुलिशं सहस्राक्षः पुरंदरः ॥ अन्तः प्रवेशकामोऽसौ बहुकालं समावसन् ॥ ५६ ॥ संध्योदक्शीर्षनिद्रां तामवेक्ष्य कुलिशायुधः ॥ इद
मन्तरमित्युक्त्वा दित्याः कुक्षिं समाविशत् ॥ ५७ ॥ अन्तर्वर्तिं च यद्भूतमिन्द्रं दृष्ट्वा धृतायुधम् ॥ हन्तुकामं तदोवाच पुनः पुनरभीतवत् ॥ ५८ ॥
गर्भस्थ उवाच ॥ किं मां न रक्षसे वज्रिन्भ्रातरं त्वं जिघांससि ॥ नारणे मारणादन्यत्पातकं विद्यते महत् ॥ ५९ ॥ ऋते युद्धान्महाबाहो शक्र
युध्यस्व निर्गते ॥ मयि तस्मान्नैतदेवं तव युक्तं भविष्यति ॥ ६० ॥ शतक्रतुः सहस्राक्षः शचीभर्ता पुरंदरः ॥ वज्रपाणिः सुरेन्द्रस्त्वं ते न युक्तं भवे
त्प्रभो ॥ ६१ ॥ अथवा युद्धकामस्त्वं मम निष्क्रमणं यथा ॥ तथा कुरु महाबाहो मार्गादस्मादपासर ॥ ६२ ॥ कुमार्गे न प्रवर्तन्ते महान्तोऽपि
विपद्गताः ॥ अविद्यश्चाप्यशस्त्रश्च नैव चाऽऽयुधसंग्रहः ॥ ६३ ॥ त्वं विद्यावान्वज्रपाणे मां निघ्नंक्ति न लज्जसे ॥ कुर्वन्ति गर्हितं कर्म न कुलीनाः
कदाचन ॥ ६४ ॥ हत्वा वा किं तु जायेत यशो वा पुण्यमेव वा ॥ वध्यन्ते भ्रातरः कामाद्गर्भस्थाः किं नु पौरुषम् ॥ ६५ ॥ यदि वा युद्धभक्ति
स्ते मयि भ्रातरसंशयम् ॥ ततो मुष्टिं पुरस्कृत्य वज्रिणेऽसौ व्यवस्थितः ॥ ६६ ॥ बालघाती भ्रातृघाती तथा विश्वासघातकः ॥ एवंभूतं फलं शक्र
कस्मान्मां हन्तुमुद्यतः ॥ ६७ ॥ यस्याऽऽज्ञया सर्वमिदं वर्तते सचराचरम् ॥ स हन्ता बालकं मां वै किं यशः किंतु पौरुषम् ॥ ६८ ॥ ॥
ब्रह्मोवाच ॥ एवं ब्रुवन्तं तं गर्भं चिच्छेद कुलिशेन सः ॥ क्रोधान्धानां लोभिनां च न घृणा क्वापि विद्यते ॥ ६९ ॥ न ममार ततो दुःखादाद्रुस्ते
भ्रातरो वयम् ॥ पुमांश्चिच्छेद तान्खण्डान्मा वधीरिति चाब्रुवन् ॥ ७० ॥ विश्वस्तान्मातृगर्भस्थान्निजभ्रातॄञ्शतक्रतो ॥ द्वेषविध्वस्तबुद्धीनां न
चित्ते करुणाकणः ॥ ७१ ॥ एवं तु खण्डितं खण्डं हस्तपादादिजीववत् ॥ निर्विकारं ततो दृष्ट्वा सप्तसप्त सुविस्मितः ॥ ७२ ॥ एकवद्बहुरू
पाणि गर्भस्थानि शुभानि च ॥ रुदन्ति बहुरूपाणि मा रुतेत्यब्रवीद्धरिः ॥ ७३ ॥ ततस्ते मरुतो जाता बलवन्तो महौजसः ॥ गर्भस्था एव तेऽ
न्योन्यमूचुः शक्रं गतभ्रमाः ॥ ७४ ॥ अगस्त्यं मुनिशार्दूलं माता यस्याऽऽश्रमे स्थिता ॥ अस्मत्पिता तव भ्राता सख्यं ते बहु मन्यते ॥ ७५ ॥
अस्मानुपरि सस्नेहं मनस्ते विद्महे मुने ॥ न यत्करोति श्वपचः प्रवृत्तस्तत्र वज्रधृक् ॥ ७६ ॥ इत्येतद्वचनं श्रुत्वा अगस्त्योऽगात्ससंभ्रमः ॥ दितिं
संबोधयामास व्यथितां गर्भवेदनात् ॥ ७७ ॥ तत्रागस्त्यः शचीकान्तमशपत्कुपितो भृशम् ॥ ७८ ॥ ॥ अगस्त्य उवाच ॥ संग्रामे रिपवः पृष्ठं
पश्येयुस्ते सदा हरे ॥ जीवतामेव मरणमेतदेव हि मानिनाम् ॥ पृष्ठं पलायमानानां यत्पश्यन्त्यहिता रणे ॥७९॥ ॥ ब्रह्मोवाच ॥ साऽपि तं गर्भसंस्थं
च शशापेन्द्रं रुषा दितिः ॥ ८० ॥ ॥ दितिरुवाच ॥ न पौरुषं कृतं तस्माच्छापोऽयं भविता तव ॥ स्त्रीभिः परिभवं प्राप्य राज्यात्त्वम्भ्रश्यसे हरे ॥८१॥

अर्जितं सुकृतं नानाविधं चेत्तदवाप्यते ॥ ३१ ॥ नारद उवाच ॥ नमुचेश्च प्रियो भ्राता मयो दैत्यो महाबलः ॥ भ्रातृहन्त्रा कथं मैत्र्यं
मयस्याऽऽसीत्सुरेश्वर ॥ ३२ ॥ ब्रह्मोवाच ॥ दैत्यानामधिपश्चाऽऽसीद्बलवान्नमुचिः पुरा ॥ इन्द्रेण वैरमभवद्भीषणं लोमहर्षणम् ॥ ३३ ॥
युद्धं हित्वा कदाचिद्वो गच्छन्तं तु शतक्रतुम् ॥ दृष्ट्वा दैत्यपतिः शूरो नमुचिः पृष्ठतोऽन्वगात् ॥ ३४ ॥ तमायान्तमभिप्रेक्ष्य शचीभर्ता भयातुरः॥
ऐरावतं गजं त्यक्त्वा इन्द्रः फेनमथाऽऽविशत् ॥ ३५ ॥ स वज्रपाणिस्तरसा फेनेनैवाहनद्रिपुम् ॥ नमुचिर्नाशमगमत्तस्य भ्राता मयोऽनुजः ॥३६॥
भ्रातृहन्तुविनाशाय तपस्तेपे मयो महत् ॥ मायां च विविधामाप देवानामतिभीषणाम् ॥ ३७ ॥ वरांश्चावाप्य तपसा विष्णोर्लोकपरायणात् ॥
दानशौण्डः प्रियालापी तदाऽभवदसौ मयः ॥ ३८ ॥ अग्नींश्च ब्राह्मणान्पूज्य जेतुमिन्द्रं कृतक्षणः ॥ दातारं च तदाऽर्थिभ्यः स्तूयमानं च बन्दि
भिः ॥ ३९ ॥ विदित्वा मघवा वायोर्मयं मायाविनं रिपुम् ॥ उपक्रांतं सुयुद्धाय विप्रो भूत्वा तमभ्यगात् ॥ शचीभर्ता मयं दैत्यं प्रोवाचेदं पुनः
पुनः ॥ ४० ॥ ॥ इन्द्र उवाच ॥ देहि दैत्यपते मह्यमर्थिनेऽपेक्षितं वरम् ॥ त्वां श्रुत्वा दातृतिलकमागतोऽहं द्विजोत्तमः ॥ ४१ ॥ ॥ ब्रह्मोवाच ॥
मयोऽपि ब्राह्मणं मत्वाऽवदद्दत्तं मया तव ॥ विचारयन्ति कृतिनो बह्वल्पं वा पुरोऽर्थिनि ॥ ४२ ॥ इत्युक्ते तु हरिः प्राह संख्यामिच्छे ह्यहं त्वया ॥
इन्द्रं मयः पुनः प्राह किमनेन द्विजोत्तम ॥ ४३ ॥ न त्वया मम वैरं भोः स्वस्तीत्याह हरिर्मयम् ॥ तत्त्वं वदेति स हरिर्दैत्येनोक्तः स्वकं वपुः ॥
॥ ४४ ॥ दर्शयामास दैत्याय सहस्राक्षं यदुच्यते ॥ ततः सविस्मयो दैत्यो मयो हरिमुवाच ह ॥ ४५ ॥ ॥ मय उवाच ॥ किमिदं वज्रपाणिस्त्वं
त्वायोग्या कृतिः सखे ॥ ४६ ॥ ॥ ब्रह्मोवाच ॥ विहस्याथ परिष्वज्य कृतमित्यब्रवीद्धरिः ॥ केनापि साधयन्त्यत्र पण्डिताश्च समीहितम् ॥ ४७ ॥
ततः प्रभृति शक्रस्य मयेन महती ह्यभूत् ॥ सुप्रीतिर्मुनिशार्दूल मयो हरिहितः सदा ॥ ४८ ॥ इन्द्रस्य भवनं गत्वा तस्मै सर्वं न्यवेदयत् ॥ किं मे
कृत्यामिति प्राह मयं मायाविनं हरिः ॥ ४९ ॥ हरये च मयो मायां प्रादात्प्रीत्या तथा हरिः ॥ प्राप्तः संप्रीतिमानाह किं कृत्यं मय तद्वद ॥ ५० ॥
मय उवाच ॥ अगस्त्यस्याऽऽश्रमं गच्छ तत्राऽऽस्ते गर्भिणी दितिः ॥ तस्याः शुश्रूषणं कुर्वन्नास्स्व तत्र कियन्ति च ॥ ५१ ॥ अहानि मघवंस्तस्या
गर्भमाविश्य वज्रधृक् ॥ वर्धमानं च तं छिन्धि यावद्वश्योऽथवा मृतिम् ॥ प्राप्नोति तावद्वज्रेण ततो मे भविता रिपुः ॥ ५२ ॥ ॥ ब्रह्मोवाच ॥ तथे
त्युक्त्वा मयं पूज्य मघवानेक एव हि ॥ विनीतवत्तदा प्रायाद्दितिं मातरमञ्जसा ॥ ५३ ॥ शुश्रूषमाणस्तां देवीं शक्रो दैतेयमातरम् ॥ सा न जाना
ति तच्चित्तं शक्रस्य द्विषतो दितिः ॥ ५४ ॥ गर्भे स्थितं तु यद्भूतं देवेन्द्रस्य विचेष्टितम् ॥ अमोघं तन्मुनेस्तेजः कश्यपस्य दुरासदम् ॥ ५५ ॥

ततः प्रगृह्य कुलिशं सहस्राक्षः पुरंदरः ॥ अन्तः प्रवेशकामोऽसौ बहुकालं समावसन् ॥ ५६ ॥ संध्योदक्शीर्षनिद्रां तामवेक्ष्य कुलिशायुधः ॥ इद
मन्तरमित्युक्त्वा दित्याः कुक्षिं समाविशत् ॥ ५७ ॥ अन्तर्वर्तिं च यद्भूतमिन्द्रं दृष्ट्वा धृतायुधम् ॥ हन्तुकामं तदोवाच पुनः पुनरभीतवत् ॥ ५८ ॥
गर्भस्थ उवाच ॥ किं मां न रक्षसे वज्रिन्भ्रातरं त्वं जिघांससि ॥ नारणे मारणादन्यत्पातकं विद्यते महत् ॥ ५९ ॥ ऋते युद्धान्महाबाहो शक्र
युध्यस्व निर्गते ॥ मयि तस्मान्नैतदेवं तव युक्तं भविष्यति ॥ ६० ॥ शतक्रतुः सहस्राक्षः शचीभर्ता पुरंदरः ॥ वज्रपाणिः सुरेन्द्रस्त्वं ते न युक्तं भवे
त्प्रभो ॥ ६१ ॥ अथवा युद्धकामस्त्वं मम निष्क्रमणं यथा ॥ तथा कुरु महाबाहो मार्गादस्मादपासर ॥ ६२ ॥ कुमार्गे न प्रवर्तन्ते महान्तोऽपि
विपद्गताः ॥ अविद्यश्चाप्यशस्त्रश्च नैव चाऽऽयुधसंग्रहः ॥ ६३ ॥ त्वं विद्यावान्वज्रपाणे मां निघ्नन्कि न लज्जसे ॥ कुर्वन्ति गर्हितं कर्म न कुलीनाः
कदाचन ॥ ६४ ॥ हत्वा वा किं तु जायेत यशो वा पुण्यमेव वा ॥ वध्यन्ते भ्रातरः कामाद्गर्भस्थाः किं नु पौरुषम् ॥ ६५ ॥ यदि वा युद्धभक्ति
स्ते मयि भ्रातरसंशयम् ॥ ततो मुष्टिं पुरस्कृत्य वज्रिणेऽसौ व्यवस्थितः ॥ ६६ ॥ बालघाती भ्रातृघाती तथा विश्वासघातकः ॥ एवंभूतं फलं शक्र
कस्मान्मां हन्तुमुद्यतः ॥ ६७ ॥ यस्याऽऽज्ञया सर्वमिदं वर्तते सचराचरम् ॥ स हन्ता बालकं मां वै किं यशः किंतु पौरुषम् ॥ ६८ ॥ ॥
ब्रह्मोवाच ॥ एवं ब्रुवन्तं तं गर्भं चिच्छेद कुलिशेन सः ॥ क्रोधान्धानां लोभिनां च न घृणा क्वापि विद्यते ॥ ६९ ॥ न ममार ततो दुःखादाद्रुस्ते
भ्रातरो वयम् ॥ पुमांश्चिच्छेद तान्खण्डान्मा वधीरिति चाब्रुवन् ॥ ७० ॥ विश्वस्तान्मातृगर्भस्थान्निजभ्रातॄञ्शतक्रतो ॥ द्वेषविध्वस्तबुद्धीनां न
चित्ते करुणाकणः ॥ ७१ ॥ एवं तु खण्डितं खण्डं हस्तपादादिजीववत् ॥ निर्विकारं ततो दृष्ट्वा सप्तसप्त सुविस्मितः ॥ ७२ ॥ एकवद्बहुरू
पाणि गर्भस्थानि शुभानि च ॥ रुदन्ति बहुरूपाणि मा रुतेत्यब्रवीद्धरिः ॥ ७३ ॥ ततस्ते मरुतो जाता बलवन्तो महौजसः ॥ गर्भस्था एव तेऽ
न्योन्यमूचुः शक्रं गतभ्रमाः ॥ ७४ ॥ अगस्त्यं मुनिशार्दूलं माता यस्याऽऽश्रमे स्थिता ॥ अस्मत्पिता तव भ्राता सख्यं ते बहु मन्यते ॥ ७५ ॥
अस्मानुपरि सस्नेहं मनस्ते विग्रहे मुने ॥ न यत्करोति श्वपचः प्रवृत्तस्तत्र वज्रधृक् ॥ ७६ ॥ इत्येतद्वचनं श्रुत्वा अगस्त्योऽगात्ससंभ्रमः ॥ दितिं
संबोधयामास व्यथितां गर्भवेदनात् ॥ ७७ ॥ तत्रागस्त्यः शचीकान्तमशपत्कुपितो भृशम् ॥ ७८ ॥ ॥ अगस्त्य उवाच ॥ संग्रामे रिपवः पृष्ठं
पश्येयुस्ते सदा हरे ॥ जीवतामेव मरणमेतदेव हि मानिनाम् ॥ पृष्ठं पलायमानानां यत्पश्यन्त्यहिता रणे ॥७९॥ ॥ ब्रह्मोवाच ॥ साऽपि तं गर्भसंस्थं
च शशापेन्द्रं रुषा दितिः ॥ ८० ॥ ॥ दितिरुवाच ॥ न पौरुषं कृतं तस्माच्छापोऽयं भविता तव ॥ स्त्रीभिः परिभवं प्राप्य राज्यात्प्रभ्रश्यसे हरे ॥८१॥

ब्रह्मोवाच ॥ एतस्मिन्नन्तरे तत्र कश्यपो वै प्रजापतिः ॥ प्रायाच्च व्यथितोऽगस्त्याच्छ्रुत्वा शक्रविचेष्टितम् ॥ गर्भान्तरगतः शक्रः पितरं प्राह भीतवत् ॥८२॥ शक्र उवाच ॥ ॥ अगस्त्याच्च दितेश्चैव बिभेमि क्रमितुं बहिः ॥ ८३ ॥ ब्रह्मोवाच ॥ ॥ भार्यासमीपमापन्नः कश्यपोऽपि प्रजापतिः ॥ पुत्रकर्म च तद्दृष्ट्वा गर्भान्तःस्थितिमेव च ॥ दितिशापमगस्त्यस्य श्रुत्वाऽसौ दुःखितोऽभवत् ॥ ८४ ॥ ॥ कश्यप उवाच ॥ ॥ निर्गच्छ शक्र पुत्रैतत्पापं किं कृतवानसि ॥ न निर्मलकुलोत्पन्ना मनः कुर्वन्ति पातके ॥ ८५ ॥ ॥ ब्रह्मोवाच ॥ ॥ स निर्गतो वज्रपाणिः सव्रीडोऽधोमुखोऽब्रवीत् ॥ तन्मूर्तिरेव वदति सदसच्चेष्टितं नृणाम् ॥ ८६ ॥ ॥ शक्र उवाच ॥ ॥ यदुक्तमत्र श्रेयः स्यात्तत्कर्ताऽहमसंशयम् ॥ ८७ ॥ ॥ ब्रह्मोवाच ॥ ॥ ततो ममान्तिकं प्रायाल्लोकपालैः स कश्यपः ॥ सर्वं वृत्तमथोवाच पुनः पप्रच्छ मां सुरैः ॥ ८८ ॥ दितिगर्भस्य वै शान्ति सहस्राक्षविशापताम् ॥ गर्भस्थानां च सर्वेषामिन्द्रेण सह मित्रताम् ॥ ८९ ॥ तेषामारोग्यतां चापि शचीभर्तुरदोषताम् ॥ अगस्त्यदत्तशापस्य विशापत्वमपि क्रमात् ॥ ९० ॥ ततोऽहमब्रवं वाक्यं कश्यपं विनयान्वितम् ॥ प्रजापते कश्यप त्वं वसुभिर्लोकपालकैः ॥ ९१ ॥ इन्द्रेण सहितः शीघ्रं गौतमीं याहि मानद ॥ तत्र स्नात्वा महेशानं स्तुहि सर्वैः समन्वितः ॥ ९२ ॥ ततः शिवप्रसादेन सर्वं श्रेयो भवेदिति ॥ तथेत्युक्त्वा जगामासौ कश्यपो गौतमीं तदा ॥ ९३ ॥ स्नात्वा तुष्टाव क्लेशमेभिरेव पदक्रमैः ॥ सर्वदुःखापनोदाय द्वयमेव प्रकीर्तितम् ॥ गौतमी वा पुण्यनदी शिवो वा करुणाकरः ॥ ९४ ॥ ॥ कश्यप उवाच ॥ पाहि शंकरं देवेश पाहि लोकनमस्कृत ॥ पाहि पावन वागीश पाहि पन्नगभूषण ॥ ९५ ॥ पाहि धर्म वृषारूढ पाहि वेदत्रयेक्षण ॥ पाहि गोधर लक्ष्मीश पाहि शर्व गजाम्बरं ॥ ९६ ॥ पाहि त्रिपुरहन्नाथ पाहि सोमार्धभूषण ॥ पाहि यज्ञेश सोमेश पाह्यभीष्टप्रदायक ॥ ९७ ॥ पाहि कारुण्यनिलय पाहि मङ्गलदायक ॥ पाहि प्रभव सर्वस्य पाहि पालक वासव ॥ ९८ ॥ पाहि भास्कर वित्तेश पाहि ब्रह्मनमस्कृत ॥ पाहि विश्वेश सिद्धेश पाहि पूर्ण नमोऽस्तु ते ॥ ९९ ॥ घोरसंसारकान्तारसंचारोद्विग्नचेतसाम् ॥ शरीरिणां कृपासिन्धो त्वमेव शरणं शिव ॥ १०० ॥ ॥ ब्रह्मोवाच ॥ ॥ एवं संस्तुवतस्तस्य पुरतोऽभूद्वृषध्वजः ॥ वरेण च्छन्दयामास कश्यपं तं प्रजापतिम् ॥ १०१ ॥ कश्यपोऽपि शिवं प्राह विनीतवदिदं वचः ॥ स प्राह विस्तरेणाथ इन्द्रस्य तु विचेष्टितम् ॥ १०२ ॥ शापं नाशं च पुत्राणां परस्परमिमित्रताम् ॥ पापप्राप्तिं तु शक्रस्य शापप्राप्तिं तथैव च ॥ ततो वृषाकपिः प्राह दितिं चागस्त्यमेव च ॥ १०३ ॥ ॥ शिव उवाच ॥ ॥ मरुतो ये भवत्पुत्राः पञ्चाशच्चैकवर्जिताः ॥ सर्वे भवेयुः सुभगा भवेयुर्यज्ञभागिनः ॥ १०४ ॥ इन्द्रेण सहिता नित्यं वर्तयेयुर्मुदाऽन्विताः ॥ १०५ ॥ इन्द्रस्य तु हविर्भागो यत्र यत्र मखे भवेत् ॥ आदौ तु मरुतस्तत्र भवेयुर्नात्र

संशयः ॥१०६॥ मरुद्भिः सहितं शक्रं न जयेयुः कदाचन ॥ जेता भवेत्सर्वदैव सुखं तिष्ठ प्रजापते ॥१०७॥ अद्यप्रभृति ये कुर्युरनयाद्भ्रातृघातनम् ॥ वंशच्छेदो विपत्तिश्च नित्यं तेषां भविष्यति ॥१०८॥ ॥ ब्रह्मोवाच ॥ ॥ अगस्त्यमृषिशार्दूलं शंभुरप्याह यत्नतः ॥ १०९ ॥ ॥ शंभुरुवाच ॥ ॥ न कुर्यास्त्वं तु कोपं च शचीभर्तरि वै मुने ॥ शमं व्रज महाप्राज्ञ मरुतस्त्वमरा भवन् ॥ ११० ॥ ब्रह्मोवाच ॥ ॥ दितिं चापि शिवः प्राह प्रसन्नो वृषभध्वजः ॥ १११ ॥ ॥ शिव उवाच ॥ ॥ एको भूयान्मम सुतस्त्रैलोक्यैश्वर्यमण्डितः ॥ इत्येवं चिन्तयन्ती त्वं तपसे नियताऽभवः ॥ ११२ ॥ तदेतत्सफलं तेऽद्य पुत्रा बहुगुणाः शुभाः ॥ अभवन्बलिनः शूरास्तस्माज्जहि मनोरुजम् ॥ अन्यानपि वरान्सुभ्रूर्याचस्व गतसंभ्रमा ॥ ११३ ॥ ब्रह्मो वाच ॥ ॥ तदेतद्वचनं श्रुत्वा देवदेवस्य सा दितिः ॥ कृताञ्जलिपुटा नत्वा शंभुं वाक्यमथाब्रवीत् ॥ ११४ ॥ ॥ दितिरुवाच ॥ ॥ लोके यदेत त्परमं यत्पित्रोः पुत्रदर्शनम् ॥ विशेषेण तु तन्मातुः प्रियं स्यात्सुरपूजित ॥ ११५ ॥ तत्रापि रूपसंपत्तिशौर्यविक्रमवान्भवेत् ॥ एकोऽपि तनयः किंतु बहवश्चेत्किमुच्यते ॥ ११६ ॥ मत्पुत्रास्ते प्रभावाच्च जेतारो बलिनो ध्रुवम् ॥ इन्द्रस्य भ्रातरः सत्यं पुत्राश्चैव प्रजापतेः ॥ ११७ ॥ अग स्त्यस्य प्रसादाच्च गङ्गायाश्च प्रसादतः ॥ यत्र देव प्रसादस्ते तच्छुभं कोऽत्र संशयः ॥ ११८ ॥ कृतार्थोऽहं तथाऽपि त्वां भक्त्या विज्ञापयाम्य हम् ॥ शृणुष्व देववचनं कुरुष्व च जगद्धितम् ॥ ११९ ॥ ॥ ब्रह्मोवाच ॥ ॥ वदेत्युक्ता जगद्धात्रा दितिर्नम्राऽब्रवीदिदम् ॥ १२० ॥ ॥ दिति रुवाच ॥ ॥ सन्ततिप्रापणं लोके दुर्लभं सुरवन्दित ॥ विशेषेण प्रियं मातुः पुत्रश्चेत्किं नु वर्ण्यते ॥ १२१ ॥ स चापि गुणवान्श्रीमानायुष्मान्यदि नायते ॥ किंतु स्वर्गेण मोक्षेण पारमेष्ठ्यपदेन वा ॥१२२॥ सर्वेषामपि भूतानामिहामुत्र फलैषिणाम् ॥ गुणवत्पुत्रसंप्राप्तिरभीष्टा सर्वदैव हि ॥ तस्मादा प्लवनादत्र क्रियतां समनुग्रहः॥१२३॥शंकर उवाच ॥ महापापफलं चेदं यदेतदनपत्यता ॥ स्त्रिया वा पुरुषस्यापि वन्ध्यत्वं यदि जायते ॥१२४॥ तदत्र स्नानमात्रेण तदोषो नाशमाप्नुयात् ॥ स्नात्वा तत्र फलं दद्यात्स्तोत्रमेतच्च यः पठेत् ॥ १२५ ॥ स तु पुत्रमवाप्नोति त्रिमासस्नानदानतः ॥ अपुत्रिणी त्वत्र स्नानं कृत्वा पुत्रमवाप्नुयात् ॥ १२६ ॥ ऋतुस्नाता तु या काचित्तत्र स्नाता सुतांल्लभेत् ॥ त्रिमासाभ्यन्तरं या तु गुर्विणी भक्तितस्त्विह ॥ १२७ ॥ फलैः स्नात्वा तु मां पश्येत्स्तोत्रेण स्तौति मां तथा ॥ तस्याः शक्रसमः पुत्रो जायते नात्र संशयः ॥ १२८ ॥ पितृदोषैश्च ये पुत्रं न लभन्ते दिते शृणु ॥ धनापहारदोषैश्च तत्रैषा निष्कृतिः परा ॥ १२९ ॥ तत्रैषां पिण्डदानेन पितॄणां प्रीणनेन च ॥ किंचित्सुवर्णदानेन ततः पुत्रो भवेद्ध्रुवम् ॥ १३० ॥ ये न्यासाद्यपहर्तारो रत्नापहृत्कारकाः ॥ श्राद्धकर्मविहीनाश्च तेषां वंशो न वर्धते ॥ १३१ ॥ दोषिणां तु परेतानां

गतिरेषा भवेदिति ॥ संततिर्जायतां श्लाघ्या जीवतां तीर्थसेवनात् ॥ १३२ ॥ संगमे दितिगंगायाः स्नात्वा सिद्धेश्वरं प्रभुम् ॥ अनाद्यपारमजरं
चित्सदानन्दविग्रहम् ॥ १३३ ॥ देवर्षिसिद्धगन्धर्वयोगीश्वरनिषेवितम् ॥ लिंगात्मकं महादेवं ज्योतिर्मयमनामयम् ॥ १३४ ॥ पूजयित्वोपचा
रैश्च नित्यं भक्त्या यतव्रतः ॥ स्तोत्रेणानेन यः स्तौति चतुर्दश्यष्टमीषु च ॥ १३५ ॥ यथाशक्त्या स्वर्णदानं ब्राह्मणानां च भोजनम् ॥ यः करो
त्यत्र गंगायां स पुत्रशतमाप्नुयात् ॥ १३६ ॥ संप्राप्य सकलान्कामानन्ते शिवपुरं व्रजेत् ॥ स्तोत्रेणानेन यः कश्चिद्यत्र क्वापि स्तवीति माम् ॥
षण्मासात्पुत्रमाप्नोति अपि वन्ध्याऽप्यशङ्कितम् ॥ १३७ ॥ ॥ ब्रह्मोवाच ॥ ततः प्रभृति तत्तीर्थं पुत्रतीर्थमुदाहृतम् ॥ तत्र तु स्नानदानाद्यैः सर्वकां
मानवाप्नुयात् ॥ १३८ ॥ मरुद्भिः सह मैत्र्येण मित्रतीर्थं तदुच्यते ॥ निष्पापत्वेन चेन्द्रस्य शक्रतीर्थं तदुच्यते ॥ १३९ ॥ ऐन्द्रीं श्रियं यत्र लेभे
तत्तीर्थं कमलाभिधम् ॥ एतानि सर्वतीर्थानि सर्वाभीष्टप्रदानि हि ॥ १४० ॥ सर्वं भविष्यतीत्युक्त्वा शिवश्चान्तरधीयत ॥ कृतकृत्याश्च ते जग्मुः
सर्व एव यथागतम् ॥ तीर्थानां पुण्यदं तत्र लक्षमेकं प्रकीर्तितम् ॥ १४१ ॥ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये स्वयंभुनारदसंवादे तीर्थमा
हात्म्ये पुत्रतीर्थादिलक्षतीर्थवर्णनं नाम चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥ ॥ ब्रह्मोवाच ॥ ॥ यमतीर्थमिति ख्यातं पितॄणां तृप्तिवर्धनम् ॥ दृष्टादृष्टप्रदं
पुण्यं सर्वतीर्थनिषेवितम् ॥ १ ॥ तस्य प्रभावं वक्ष्यामि सर्वपापप्रणाशनम् ॥ अनुह्लाद इति ख्यातः कपोतो बलवानभूत् ॥ २ ॥ तस्य भार्या
हेतिनाम्नी पक्षिणी कामरूपिणी ॥ मृत्योः पौत्रो ह्यनुह्लादो दौहित्री हेतिरेव च ॥ ३ ॥ कालेनाथ तयोः पुत्राः पौत्राश्चैव बभूविरे ॥ तस्य शत्रुश्च
बलवानुलूको नाम पक्षिराट् ॥ ४ ॥ तस्य पुत्राश्च पौत्राश्च आग्नेयास्ते बलोत्कटाः ॥ तयोश्च वैरमभवद्बहुकालं द्विजन्मनोः ॥ ५ ॥ गङ्गाया
उत्तरे पारे कपोतस्याऽऽश्रमोऽभवत् ॥ तस्याश्च दक्षिणे पारे उलूको नाम पक्षिराट् ॥ ६ ॥ वासं चक्रे तत्र पुत्रैः पौत्रैश्च द्विजसत्तम ॥ तयोश्च युद्ध
मभवद्बहुकालं विरुद्धयोः ॥ ७ ॥ पुत्रैः पौत्रैश्च वृतयोर्बलिनोर्बलिभिः सह ॥ उलूको वा कपोतो वा नैवाऽऽप्नोति जयाजयौ ॥ ८ ॥ कपोतो यममा
राध्य मृत्युं पैतामहं तथा ॥ याम्यमस्त्रमथावाप्य सर्वेभ्योऽप्यधिकोऽभवत् ॥ ९ ॥ तथोलूकोऽग्निमाराध्य बलवानभवद्भृशम् ॥ वरैरुन्मत्तयो
र्युद्धमभवच्चातिभीषणम् ॥ १० ॥ तत्राऽऽग्नेयमुलूकोऽपि कपोतायास्त्रमाक्षिपत् ॥ कपोतोऽप्यथ पाशान्वै याम्यानाक्षिप्य शत्रवे ॥ ११ ॥
उलूकायाथ दण्डं च मृत्युपाशानवासृजत् ॥ पुनस्तदभवद्युद्धं पुराऽऽडीवकयोर्यथा ॥ १२ ॥ हेतिः कपोतकी दृष्ट्वा ज्वलनं प्राप्तमान्तिके ॥ पति
व्रता महायुद्धे भर्तुः सा दुःखविह्वला ॥ १३ ॥ अग्निना वेष्ट्यमानांश्च पुत्रान्दृष्ट्वा विशेषतः ॥ सा गत्वा ज्वलनं हेतिस्तुष्टाव विविधोक्तिभिः ॥१४॥

॥ हेतिरुवाच ॥ रूपं नं दानं न परोक्षमस्ति यस्याऽऽत्मभूतं च पदार्थजातम् ॥ अश्नन्ति हव्यानि च येन देवाः स्वाहापतिं यज्ञभुजं नमस्ये ॥
॥ १५ ॥ मुखभूतं च देवानां सर्वज्ञं हव्यवाहनम् ॥ होतारं चापि देवानां देवानां दूतमेव च ॥ १६ ॥ तं देवं शरणं यामि आदिदेवं विभावसुम् ॥
अन्तः स्थितः प्राणरूपो बहिश्चान्नप्रदो हि यः ॥ यो यज्ञसाधनं यामि शरणं तं धनंजयम् ॥ १७ ॥ ॥ अग्निरुवाच ॥ अमोघमेतदस्त्रं मे न्यस्तं
युद्धे कपोतकि ॥ यत्र विश्रम्येदस्त्रं तन्मे ब्रूहि पतिव्रते ॥ १८ ॥ ॥ कपोत्युवाच ॥ मयि विश्रम्यतामस्त्रं न पुत्रेषु न भर्तरि ॥ सत्यवाग्भव
हव्येश जातवेदो नमोऽस्तु ते ॥ १९ ॥ ॥ जातवेदा उवाच ॥ तुष्टोऽस्मि तव वाक्येन भर्तृभक्त्या पतिव्रते ॥ तवापि भर्तृपुत्राणां हेतिक्षेमं
ददाम्यहम् ॥ २० ॥ आग्नेयमेतदस्त्रं मे न भर्तारं सुतानपि ॥ न त्वां दहेत्ततो याहि सुखेन त्वं कपोतकि ॥ २१ ॥ ॥ ब्रह्मोवाच ॥ एतस्मिन्नन्तरे
तत्र उलूकी ददृशे पतिम् ॥ वेष्टयमानं याम्यपाशैर्यमदण्डेन ताडितम् ॥ उलूकी दुःखिता भूत्वा यमं प्रायाद्भयातुरा ॥ २२ ॥ ॥ उलूक्युवाच ॥
त्वद्भीता अनुद्रवन्ते जनास्त्वद्भीता ब्रह्मचर्यं चरन्ति ॥ त्वद्भीताः साधु चरन्ति धीरास्त्वद्भीताः कर्मनिष्ठा भवन्ति ॥ २३ ॥ त्वद्भीता
अनाशकमाचरन्ति ग्रामादरण्यमभि यच्चरन्ति ॥ त्वद्भीताः सौम्यतामाश्रयन्ते त्वद्भीताः सोमपानं भजन्ते ॥ त्वद्भीताश्चान्नगोदाननि
ष्ठास्त्वद्भीता ब्रह्मवादं वदन्ति ॥ २४ ॥ ॥ ब्रह्मोवाच ॥ एवं ब्रुवत्यां तस्यां तामाह दक्षिणादिक्पतिः ॥ २५ ॥ ॥ यम उवाच ॥ वरं वरय
भद्रं ते दास्येऽहं मनसः प्रियम् ॥ २६ ॥ ॥ ब्रह्मोवाच ॥ ॥ यमस्येति वचः श्रुत्वा सा तमाह पतिव्रता ॥ २७ ॥ ॥ उलूक्युवाच ॥ ॥ भर्ता मे
वेष्टितः पाशैर्दण्डेनाभिहतस्तव ॥ तस्माद्रक्ष सुरश्रेष्ठ पुत्रान्भर्तारमेव च ॥ २८ ॥ ॥ ब्रह्मोवाच ॥ तद्वाक्यात्कृपया युक्तो यमः प्राह पुनः पुनः ॥
॥ २९ ॥ यम उवाच ॥ ॥ पाशानां चापि दण्डस्य स्थानं वद्व शुभानने ॥ ३० ॥ ब्रह्मोवाच ॥ ॥ सा प्रोवाच यमं देवं मयि पाशास्त्वयेरिताः ॥
आविशन्तु जगन्नाथ दण्डो मय्येव संविशेत् ॥ ततः प्रोवाच भगवान्यमस्तां कृपया पुनः ॥ ३१ ॥ यम उवाच ॥ तव भर्ता च पुत्राश्च सर्वे
जीवन्तु विज्वराः ॥ ३२ ॥ ब्रह्मोवाच ॥ न्यवारयद्यमः पाशानाग्नेयास्त्रं तु हव्यवाट् ॥ कपोतोलूकयोश्चापि प्रीतिं वै चक्रतुः सुरौ ॥ आहतुश्च
द्विजन्मानौ ब्रियतां वर ईप्सितः ॥ ३३ ॥ पक्षिणावूचतुः ॥ भवतोर्दर्शनं लब्धं वैरव्याजेन दुष्करम् ॥ वयं च पक्षिणः पापाः किं वरेण सुरोत्तमौ
॥ ३४ ॥ अथ देयो वरोऽस्माकं भवद्भ्यां प्रीतिपूर्वकम् ॥ नाऽऽत्मार्थमनुयाचावो दीयमानं वरं शुभम् ॥ ३५ ॥ आत्मार्थं यस्तु याचेत स शोच्यो
हि सुरेश्वरौ ॥ जीवितं सफलं तस्य यः परार्थोद्यतः सदा ॥ ३६ ॥ अग्निरापो रविः पृथ्वी धान्यानि विविधानि च ॥ परार्थं वर्तनं तेषां सतां चापि

वशतः ॥ ३७ ॥ ब्रह्मादयोऽप हि यतो युज्यन्ते मृत्युना सह ॥ एवं ज्ञात्वा तु देवेशौ वृथा स्वार्थपरिश्रमः ॥ ३८ ॥ जन्मना सहयत्पुंसां
विहितं परमेष्ठिना ॥ कदाचिन्नान्यथा तद्वै वृथा क्लिश्यन्ति जन्तवः ॥ ३९ ॥ तस्माद्याचावहे किंचिद्धिताय जगतां शुभम् ॥ गुणदायि तु सर्वेषां
तद्युवामनुमन्यताम् ॥ ४० ॥ ॥ ब्रह्मोवाच ॥ तावाहतुरुभौ देवौ पक्षिणौ लोकविश्रुतौ ॥ धर्मस्य यशसोऽवाप्त्यै लोकानां हितकाम्यया ॥ ४१ ॥
पक्षिणावूचतुः ॥ आवयोराश्रमौ तीर्थे गङ्गायां उभये तटे ॥ भवेतां जगतां नाथावेष एव परो वरः ॥ ४२ ॥ स्नानं दानं जपो होमः पितॄणां
चापि पूजनम् ॥ सुकृती दुष्कृती चाऽपि यः करोति यथा तथा ॥ सर्वं तदक्षयं पुण्यं स्यादित्येष परो वरः ॥ ४३ ॥ देवावूचतुः ॥ एवमस्तु तथा
चान्यत्सुप्रीतौ तु ब्रवावहै ॥ ४४ ॥ यम उवाच ॥ उत्तरे गौतमीतीरे यमस्तोत्रं पठन्ति ये ॥ तेषां सप्तसु वंशेषु नाकाले मृत्युमाप्नुयात् ॥ ४५ ॥
पुरुषो भाजनं च स्यात्सर्वदा सर्वसंपदाम् ॥ यस्त्विदं पठते नित्यं मृत्युस्तोत्रं जितात्मवान् ॥ ४६ ॥ अष्टाशीतिसहस्रैश्च व्याधिभिर्न स बाध्यते ॥
अस्मिंस्तीर्थे द्विजश्रेष्ठौ त्रिमासाद्धर्विणी सती ॥ ४७ ॥ अर्वाग्वन्ध्या च षण्मासात्सप्ताहं स्नानमाचरेत् ॥ वीरसूः सा भवेन्नारी शतायुः स सुतो
भवेत् ॥ ४८ ॥ लक्ष्मीवान्मतिमाञ्छूरः पुत्रपौत्रविवर्धनः ॥ तत्र पिण्डादिदानेन पितरो मुक्तिमाप्नुयुः ॥ मनोवाक्कायजात्पापात्स्नानान्मुक्तो भवे
न्नरः ॥ ४९ ॥ ब्रह्मोवाच ॥ यमवाक्याद्यथा तथा हव्यवाडाह पक्षिणौ ॥ ५० ॥ अग्निरुवाच ॥ मत्स्तोत्रं दक्षिणे तीरे ये पठन्ति यतव्रताः ॥ तेषामा
रोग्यमैश्वर्यं लक्ष्मीं रूपं ददाम्यहम् ॥ ५१ ॥ इदं स्तोत्रं तु यः कश्चिद्यत्र क्वापि पठेन्नरः ॥ नैवाग्नितो भयं तस्य लिखितेऽपि गृहे स्थिते ॥ ५२ ॥
स्नानं दानं च यः कुर्यादग्नितीर्थे शुचिर्नरः ॥ अग्निष्टोमफलं तस्य भवेदेव न संशयः ॥ ५३ ॥ ब्रह्मोवाच ॥ ततः प्रभृति तत्तीर्थं याम्यमाग्नेयमेव च ॥
कपोतं च तथोलूकं हेत्युलूकं विदुर्बुधाः ॥ ५४ ॥ तत्र त्रीणि सहस्राणि तावन्त्येव शतानि च ॥ पुनर्नवतितीर्थानि प्रत्येकं मुक्तिभाजनम् ॥ ॥ ५५ ॥
तेषु स्नानेन दानेन प्रेतीभूताश्च ये नराः ॥ पूतास्ते पुत्रवित्ताढ्या आक्रमेयुर्दिवं शुभाः ॥ ५६ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये
यमाग्न्यादिनवत्युत्तरत्रिशताधिकत्रिसहस्रतीर्थवर्णनं नाम पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥ ब्रह्मोवाच ॥ तपस्तीर्थमिति ख्यातं तपोवृद्धिकरं महत् ॥
सर्वकामप्रदं पुण्यं पितॄणां प्रीतिवर्धनम् ॥ १ ॥ तस्मिंस्तीर्थे तु यद्वृत्तं शृणु पापप्रणाशनम् ॥ अपामग्नेश्च संवादमृषीणां च परस्परम् ॥ २ ॥ अपो
ज्येष्ठतमाः केचिन्मेनिरेऽग्निं तथाऽपरे ॥ एवं ब्रुवन्तो मुनयः संवादं चाग्निवारिणोः ॥ ३ ॥ विनाऽग्निं जीवनं क्व स्याज्जीवभूतो यतोऽनलः ॥ आत्म
भूतो हव्यभूतश्चाग्निना जायतेऽखिलम् ॥ ४ ॥ अग्निना ध्रियते लोको ह्यग्निर्ज्योतिर्मयं जगत् ॥ तस्मादग्नेः परं नास्ति पावनं दैवतं महत् ॥ ५ ॥

अन्तर्ज्योतिः स एवोक्तः परं ज्योतिः स एव हि॥विनाऽग्निना किंचिदस्ति यस्य धाम जगत्त्रयम् ॥६॥तस्मादग्नेः परं नास्ति भूतानां ज्यैष्ठ्यभाजनम् ॥
योषित्क्षेत्रेऽर्पितं बीजं पुरुषेण यथा तथा॥ ७॥ तस्य देहादिका शक्तिः कृशानोरेव नान्यथा ॥ देवानां हि मुखं वह्निस्तस्मान्नातः परं विदुः ॥ ८ ॥
अपरे तु ह्यपां ज्यैष्ठ्यं मेनिरे वेदवादिनः ॥ अद्भिः संपत्स्यते ह्यन्नं शुचिरद्भिः प्रजायते ॥ ९ ॥ अद्भिरेव धृतं सर्वमापो वै मातरः स्मृताः ॥ त्रैलो
क्यजीवनं वारि वदन्तीति पुराविदः ॥ १० ॥ उत्पन्नममृतं ह्यब्यस्ताभ्यश्चौषधिसंभवः ॥ अग्निर्ज्यैष्ठ इति प्राहुरापो ज्येष्ठतमाः परे ॥ ११ ॥ एवं
मीमांसमानास्ते ऋषयो वेदवादिनः ॥ विरुद्धवादिनो मां च समभ्येत्येदमब्रुवन् ॥ १२ ॥ ॥ ऋषय ऊचुः ॥ ॥ अग्नेरपां वद ज्यैष्ठ्यं त्रैलोक्यस्य
भवान्प्रभुः ॥ १३ ॥ ॥ ब्रह्मोवाच ॥ ॥ अहमप्यब्रवं प्राप्तानृषीन्सर्वान्यतव्रतान् ॥ उभौ पूज्यतमौ लोक उभाभ्यां जायते जगत् ॥ १४ ॥ उभा
भ्यां जायते हव्यं कव्यं चामृतमेव च ॥ उभाभ्यां जीवनं लोके शरीरस्य च धारणम् ॥ १५ ॥ नानयोश्च विशेषोऽस्ति ततो ज्यैष्ठ्यं समं मतम् ॥
ततो मद्वचनाज्ज्यैष्ठ्यमुभयोर्नैव कस्यचित् ॥ १६ ॥ ज्यैष्ठ्यमन्यतरस्येति मेनिरे ऋषिसत्तमाः ॥ न तृप्ता मम वाक्येन जग्मुर्वायुं तपस्विनः ॥१७॥
॥ मुनय ऊचुः ॥ ॥ कस्य ज्यैष्ठ्यं भवान्प्राणो वायो सत्यं त्वयि स्थितम् ॥ ॥ ब्रह्मोवाच ॥ १८ ॥ वायुराहानलो ज्येष्ठः सर्वमग्नौ प्रतिष्ठितम् ॥
नेत्युक्ताऽन्योन्यमृषयो जगमुस्तेऽपि वसुंधराम् ॥ १९ ॥ ॥ मुनय ऊचुः ॥ ॥ सत्यं भूमे वद ज्यैष्ठ्यमाधाराऽसि चराचरे ॥ २० ॥ ॥ ब्रह्मो
वाच ॥ ॥ भूमिरप्याह विनयादागतांस्तानृषीनिदम् ॥ २१ ॥ ॥ भूमिरुवाच ॥ ॥ ममाप्याधारभूताः स्युरापो देव्यः सनातनाः ॥ अब्यस्तु
जायते सर्वं ज्यैष्ठ्यमप्सु प्रतिष्ठितम् ॥ २२ ॥ ॥ ब्रह्मोवाच ॥ ॥ नेत्युक्ताऽन्योन्यमृषयो जग्मुः क्षीरोदशायिनम् ॥ तुष्टुवुर्विविधैः स्तोत्रैः शङ्ख च
क्रगदाधरम् ॥ २३ ॥ ॥ ऋषय ऊचुः ॥ ॥ यो वेद सर्वं भुवनं भविष्यद्यज्जायमानं च गुहानिविष्टम् ॥ लोकत्रयं चित्रविचित्ररूपमन्ते समस्तं च
यमाविवेश ॥ २४ ॥ यदक्षरं शाश्वतमप्रमेयं यं वेदवेद्यमृषयो वदन्ति ॥ यमाश्रिताः स्वेप्सितमाप्नुवन्ति तद्वस्तु सत्यं शरणं व्रजामः ॥ २५ ॥ भूतं
महाभूतजगत्प्रधानं न विन्दते योगिनो विष्णुरूपम् ॥ तद्वक्तुमेते ऋषयोऽत्र याताः सत्यं वदस्वेह जगन्निवास ॥ २६ ॥ त्वमन्तरात्माऽखिलदेह
भाजां त्वमेव सर्वं त्वयि सर्वमीश ॥ तथाऽपि जानन्ति न केऽपि कुत्राप्यहो भवन्तं प्रकृतिप्रभावात् ॥ अन्तर्बहिः सर्वत एव सन्तं विश्वात्मना संप
रिवर्तमानम् ॥ २७ ॥ ॥ ब्रह्मोवाच ॥ ॥ ततः प्राह जगद्धात्री देवी वागशरीरिणी ॥ २८ ॥ ॥ देवी वागुवाच ॥ ॥ उभावाराध्य तपसा भक्त्या
च नियमेन च ॥ यस्य स्यात्प्रथमं सिद्धिस्तद्भूतं ज्येष्ठमुच्यते ॥ २९ ॥ ॥ ब्रह्मोवाच ॥ ॥ तथेत्युक्ता ययुः सर्वे ऋषयो लोकपूजिताः ॥ श्रान्ताः

खिन्नान्तरात्मानः परं वैराग्यमाश्रिताः ॥३०॥ सर्वलोकैकजननीं भुवनत्रयपावनीम् ॥ गौतमीमगमन्सर्वे तपस्तप्तुं यतव्रताः॥३१॥ अन्दैवतं तथाऽग्नि
च पूजनायोद्यतास्तदा ॥ अग्नेश्च पूजका ये च अपां वै पूजने स्थिताः ॥ तत्र वागब्रवीद्दैवी वेदमाता सरस्वती ॥ ३२ ॥ ॥ दैवी वागुवाच ॥ अग्ने
रापस्तथा योनिरद्भिः शौचमवाप्यते ॥ अग्नेश्च पूजका ये च विनाऽद्भिः पूजनं कथम् ॥ ३३ ॥ अप्सु जातासु सर्वत्र कर्मण्यधिकृतो भवेत् ॥ ताव
त्कर्मण्यनर्होऽयमशुचिर्मलिनो नरः ॥ ३४ ॥ न मग्नः श्रद्धया यावदप्सु शीतासु वेदवित् ॥ तस्मादापो वरिष्ठाः स्युर्मातृभूता यतः स्मृताः ॥ तस्मा
ज्जेष्ठ्यमपामेव जनन्योऽग्नेर्विशेषतः ॥ ३५ ॥ ॥ ब्रह्मोवाच॥ ॥ एतद्वचः शुश्रुवुस्ते ऋषयो वेदवादिनः ॥ निश्चयं च ततश्चक्रुर्भवेज्ज्यैष्ठ्यमपामिति ॥
॥ ३६ ॥ यत्र तीर्थे वृत्तमिदमृषिसत्रे च नारद ॥ तपस्तीर्थं तु तत्प्रोक्तं सत्रतीर्थं तदुच्यते ॥ ३७ ॥ अग्नितीर्थं च तत्प्रोक्तं तथा सारस्वतं विदुः ॥
तेषु स्नानं च दानं च सर्वकामप्रदं शुभम् ॥ ३८ ॥ चतुर्दश शतान्यत्र तीर्थानां पुण्यदायिनाम् ॥ तेषु स्नानं च दानं च स्वर्गमोक्षप्रदायकम् ॥३९॥
कृतं संदेहहरणमृषीणां यत्र भाषया ॥ सरस्वत्यभवत्तत्र गंगया संगता नदी ॥ माहात्म्यं तस्य को वक्तुं संगमस्य क्षमो नरः ॥ ४० ॥ इति
श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये तपस्तीर्थादिचतुर्दशशततीर्थवर्णनं नाम षट्पञ्चाशोऽध्यायः ॥ ५६ ॥ ॥ ब्रह्मोवाच ॥
देवतीर्थमिति ख्यातं गंगाया उत्तरे तटे ॥. तस्य प्रभावं वक्ष्यामि सर्वपापप्रणाशनम् ॥ १ ॥ आर्ष्टिषेण इति ख्यातो राजा सर्व
गुणान्वितः ॥ तस्य भार्या जया नाम साक्षाल्लक्ष्मीरिवापरा ॥ २ ॥ तस्य पुत्रो भरो नाम मातिमान्पितृवत्सलः ॥ धनुर्वेदे च
वेदे च निष्णातो दक्ष एव च ॥ ३ ॥ तस्य भार्या रूपवती सुप्रभेत्यभिविश्रुता ॥ आर्ष्टिषेणस्ततो राजा पुत्रे राज्यं निवेश्य सः ॥ ४ ॥
पुरोधसा च मुख्येन दीक्षां चक्रे जनेश्वरः ॥ सरस्वत्यास्ततस्तीरे हयमेधाय यत्नवान् ॥ ५ ॥ ऋत्विग्भिर्ऋषिमुख्यैश्च वेदशास्त्रपरायणैः ॥ दीक्षितं
तं नृपश्रेष्ठं ब्राह्मणाग्निसमीपतः ॥ ६ ॥ मिथुर्दानवराट्शूरः पापबुद्धिः प्रतापवान् ॥ मखं विध्वस्य नृपतिं सभार्यं सपुरोहितम् ॥ ७ ॥ आदाय
वेगात्स प्रागाद्रसातलतलं मुने ॥ नीते तस्मिन्नपवरे यज्ञे नष्टे ततोऽमराः ॥ ८ ॥ ऋत्विजश्च ययुः सर्वे स्वं स्वं स्थानं मखात्ततः ॥ पुरोहितसुतो
राज्ञो देवापिरिति विश्रुतः ॥ ९ ॥ बालस्तां मातरं दृष्ट्वा आत्मनः पितरं न च ॥ दृष्ट्वा सविस्मयो भूत्वा दुःखितोऽतीव चाभवत् ॥ १० ॥ स मातरं
तु पप्रच्छ पिता मे क्व गतोऽम्बिके ॥ पितृहीनो न जीवेयं मातः सत्यं वदस्व मे ॥ ११ ॥ धिग्धिक्पितृविहीनानां जीवितं पापकर्मणाम् ॥ न वक्षि
यदि मे मातर्जलमग्निमथाऽऽविश ॥ १२ ॥ पुत्रं प्रोवाच सा माता राज्ञो भार्या पुरोधसः ॥ दानवेन तलं नीतो राज्ञा सह पिता तव ॥ १३ ॥ ॥

देवापिरुवाच ॥ क्व नीतः केन वा नीतः कथं नीतः क्व कर्मणि ॥ केषु पश्यत्सु किं स्थानं दानवस्य वदस्व मे॥१४॥ ॥ मातोवाच ॥ दीक्षितं यज्ञसद
सि सभार्यं सपुरोधसम् ॥ राजानं तं मिथुर्दैत्यो नीतवान्स रसातलम् ॥ पश्यत्सु देवसंघेषु वह्निब्राह्मणसंनिधौ ॥ १५ ॥ ॥ ब्रह्मोवाच ॥ तन्मातृव
चनं श्रुत्वा देवापिः कृत्यमस्मरत् ॥ देवान्पश्येऽथवाऽग्निं वा ऋत्विजो वाऽसुरांस्तथा ॥ १६ ॥ एतेष्वेव पिताऽन्वेष्यो नान्यत्रेति मतिर्मम ॥ इति
निश्चित्य देवापिर्भरं प्राह नृपात्मजम् ॥ १७ ॥ ॥ देवापिरुवाच ॥ तपसा ब्रह्मचर्येण व्रतेन नियमेन च ॥ आनेतव्या मया सर्वे नीता ये च रसा
तलम् ॥ १८ ॥ जाते पराभवे घोरे यो न कुर्यात्प्रतिक्रियाम् ॥ नराधमेन किं तेन जीवता वा मृतेन वा ॥ १९ ॥ त्वं प्रशाधि महीं कृत्स्नामार्ष्टि
षेणः पिता यथा ॥ माता मम त्वया पाल्या राजन्यावन्ममाऽऽगतिः ॥ भवेच्च कृतकार्यस्य अनुजानीहि मां भर ॥ २० ॥ ॥ ब्रह्मोवाच ॥ भरेणो
क्तः स देवापिः सर्वं निश्चित्य यत्नतः ॥ २१ ॥ ॥ भर उवाच ॥ सिद्धिं कुरु सुखं याहि मा चिन्तामल्पिकां भज ॥ २२ ॥ ॥ ब्रह्मोवाच ॥ ततो
देवापिरमरराजाङ्घ्रिध्यानतत्परः ॥ ऋत्विजोऽन्वेष्य यत्नेन नत्वा तानृत्विजः पृथक् ॥ कृताञ्जलिपुटो बालो देवापिर्वाक्यमब्रवीत् ॥ २३ ॥ ॥
देवापिरुवाच ॥ भवद्भिश्च मखो रक्ष्यो यजमानश्च दीक्षितः ॥ पुरोधाश्च तथा रक्ष्यः पत्नी या दीक्षितस्य तु ॥ २४ ॥ भवंतस्तु तत्र पश्यत्सु यज्ञं
विध्वस्य ऋत्विजः ॥ राजादयस्तेन नीतास्तन्न युक्ततमं भवेत् ॥ २५ ॥ अथाप्येतदहं मन्ये भवन्तस्तानरोगिणः ॥ दातुमर्हन्ति विप्राग्र्या ह्यन्यथा
शापमर्हथ ॥ २६ ॥ ॥ ऋत्विज ऊचुः ॥ मखेऽग्निः प्रथमं पूज्यो ह्यग्निरेवात्र दैवतम् ॥ तस्माद्वयं न जानीमो ह्यग्नीनां परिचारकाः ॥ २७ ॥ स
एव दाता भोक्ता च हर्ता कर्ता च हव्यवाट् ॥ २८ ॥ ॥ ब्रह्मोवाच ॥ ऋत्विजः पृष्ठतः कृत्वा देवाग्निर्जातवेदसम् ॥ पूजयित्वा यथान्यायमग्नये
तन्न्यवेदयत् ॥ २९ ॥ ॥ अग्निरुवाच ॥ यथर्त्विजस्तथा चाहं देवानां परिचारकः ॥ हव्यं वहामि देवानां भोक्तारो रक्षकाश्च ते ॥ ३० ॥ ॥
देवापिरुवाच ॥ देवानाहूय यत्नेन हविर्भागान्पृथक्पृथक् ॥ दास्येऽहमेष शीघ्रं त्वं तस्माद्याहि सुरान्प्रति ॥ ३१ ॥ ॥ ब्रह्मोवाच ॥ देवापिः स सुरा
न्प्राप्य नत्वा तेभ्यः पृथक्पृथक् ॥ ऋत्विग्वाक्यं चाग्निवाक्यं शापं चापि न्यवेदयत् ॥ ३२ ॥ ॥ देवा ऊचुः ॥ आहूता वैदिकैर्मन्त्रैर्ऋत्विग्भिश्च
यथाक्रमम् ॥ भोक्ष्यामहे हविर्भागान्न स्वतन्त्रा द्विजोत्तम ॥ ३३ ॥ तस्माद्वेदानुगा नित्यं वयं वेदेन चोदिताः ॥ परतन्त्रास्ततो विप्र वेदेभ्यस्त
न्निवेदय ॥ ३४ ॥ ॥ ब्रह्मोवाच ॥ स देवापिः शुचिर्भूत्वा वेदानाहूय यत्नतः ॥ ध्यानेन तपसा युक्तो वेदाश्चापि पुरोऽभवन् ॥ ३५ ॥ वेदानुवाच
देवापिर्नमस्य तु पुनःपुनः ॥ ऋत्विग्वाक्यं चाग्निवाक्यं देववाक्यं न्यवेदयत् ॥ ३६ ॥ ॥ वेदा ऊचुः ॥ परतन्त्रा वयं तात ईश्वरस्य वशानुगाः ॥

अशेषजगदाधारो निराधारो निरञ्जनः ॥ ३७ ॥ सर्वशक्त्यैकसदनं निधानं सर्वसंपदाम् ॥ स तु कर्ता महादेवः संहर्ता स महेश्वरः ॥ ॥ ३८ ॥ वयं शब्दमया ब्रह्मन्वदामो विद्म एव च ॥ अस्माकमेतत्कृत्यं स्याद्वदामो यत्तु पृच्छसि ॥ ३९ ॥ केन नीतास्तस्य नाम तत्पुरं तद्बलं तथा ॥ भक्षिताः किंतु नो नष्टा एतज्जानीमहे वयम् ॥ ४० ॥ यथा च तव सामर्थ्यं यमाराध्य च यत्र च ॥ स्यादित्येतच्च जानीमो यथा प्राप्स्यसि तान्पुनः ॥ ४१ ॥ ॥ ब्रह्मोवाच ॥ एतच्छ्रुत्वाऽवदद्देदान्विचार्य सुचिरं हृदि ॥ ४२ ॥ ॥ देवापिरुवाच ॥ वेदा वदन्त्वेतदेव सर्वमाशु यथार्थतः ॥ सर्वान्प्राप्स्ये तलं नीतानलं तेभ्यो नमोऽस्तु वः ॥ ४३ ॥ ॥ वेदा ऊचुः ॥ गौतमीं गच्छ देवापे तत्र स्तुहि महेश्वरम् ॥ सुप्रसन्नस्तवाभीष्टं दास्यत्येव कृपाकरः ॥ ४४ ॥ भवेद्देवः शिवः प्रीतः स्तुतः सत्यं महामते ॥ आर्ष्टिषेणश्च नृपतिस्तस्य जाया जया सती ॥ ४५ ॥ उपमन्युस्तव पिता तले तिष्ठन्त्यरोगिणः ॥ वरदानान्महेशस्य मिथुं हत्वा च राक्षसम् ॥ यशः प्राप्स्यसि धर्मं च एतच्छक्यं न चेतरत् ॥ ४६ ॥ ॥ ब्रह्मोवाच ॥ तद्वेदवचनाद्बालो देवापिर्गौतमीं गतः ॥ स्नात्वा कृतक्षणो विप्रस्तुष्टाव च महेश्वरम् ॥ ४७ ॥ देवापिरुवाच ॥ बालोऽहं देवदेवेश गुरूणां त्वं गुरुर्मम ॥ न मे शक्तिस्त्वत्स्तवने तुभ्यं शंभो नमोऽस्तु ते ॥ ४८ ॥ न त्वां जानन्ति निगमा न देवा मुनयो न च ॥ न ब्रह्मा नापि वैकुण्ठो योऽसि सोऽसि नमोऽस्तु ते ॥ ४९ ॥ येऽनाथा ये च कृपणा ये दरिद्राश्च रोगिणः ॥ पापात्मानो ये च लोके तांस्त्वं पासि महेश्वर ॥ ५० ॥ तपसा नियमैर्मन्त्रैः पूजितास्त्रिदिवौकसः ॥ त्वया दत्तं फलं तेभ्यो दास्यन्ति जगतां पते ॥ ५१ ॥ याचितारश्च दातारस्तेभ्यो यद्यन्मनीषितम् ॥ भवतीति न चित्रं स्यात्त्वं विपर्ययकारकः ॥ ५२ ॥ येऽज्ञानिनो ये च पापा ये मग्ना नरकार्णवे ॥ शिवेति वचनान्नाथ तान्पासि त्वं जगद्गुरो ॥ ५३ ॥ ब्रह्मोवाच ॥ एवं तु स्तुवतस्तस्य पुरः प्राह त्रिलोचनः ॥ ५४ ॥ शिव उवाच ॥ वरं ब्रूह्यथ देवापे अलं दैन्येन बालक ॥ ५५ ॥ देवापिरुवाच ॥ राजानं राजपत्नीं च पितरं च गुरुं मम ॥ प्राप्तुमिच्छे जगन्नाथ निधनं च रिपोर्मम ॥ ५६ ॥ ब्रह्मोवाच ॥ देवापिवचनं श्रुत्वा तथेत्याहाखिलेश्वरः ॥ देवापेः सर्वमभवदाज्ञया शंकरस्य तत् ॥ ५७ ॥ आहूय स्वगणं शंभुर्देवापिकरुणाकरः ॥ नान्दिनं प्रेषयामास शंभुः शूलेन नारद ॥ ५८ ॥ रसातले मिथुं नन्दी हत्वा चासुरपुंगवान् ॥ तत्पित्रादीन्समानीय तस्मै तान्स न्यवेदयत् ॥ ५९ ॥ हयमेधश्च तत्राऽऽसीदार्ष्टिषेणस्य धीमतः ॥ अग्निश्च ऋत्विजो देवा वेदाश्च ऋषयोऽब्रुवन् ॥ ६० ॥ अग्न्यादय ऊचुः ॥ यत्र साक्षाद भूच्छंभुर्देवापे भक्तवत्सलः ॥ देवदेवो जगन्नाथो देवतीर्थमभूच्च तत् ॥ ६१ ॥ सर्वपापक्षयकरं सर्वसिद्धिप्रदं नृणाम् ॥ पुण्यदं तीर्थमेतत्स्यात्तव कीर्तिश्च

शाश्वती॥६२॥ब्रह्मोवाच ॥ अश्वमेधे निवृत्ते तु सुरास्तेभ्यो वरान्ददुः ॥ स्नात्वा कृतार्था गङ्गायां ततस्ते दिवमाक्रमन्॥६३॥ततः प्रभृति तत्राऽऽसंस्ती
र्थानि दश पञ्च च ॥ सहस्राणि शतान्यष्टावुभयोरपि तीरयोः ॥ तेषु स्नानं च दानं च ह्यतीव फलदं विदुः ॥ ६४ ॥ इति श्रीब्रह्मपुराणगतगौतमी
माहात्म्ये तीर्थमाहात्म्ये आर्ष्टिषेणाद्यष्टोत्तरशताधिकपञ्चदशसहस्रतीर्थवर्णनं नाम सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥ ब्रह्मोवाच ॥ तपोवनमिति ख्यातं
नन्दिनीसंगमं तथा ॥ सिद्धेश्वरं तत्र तीर्थं गौतम्या दक्षिणे तटे ॥ १ ॥ शार्दूलं चेति विख्यातं तेषां वृत्तमिदं शृणु ॥ यस्य श्रवणमात्रेण सर्वपापैः
प्रमुच्यते ॥ २ ॥ अग्निर्होता पुरा त्वासीद्देवानां हव्यवाहनः ॥ भार्यां प्राप्तो दक्षसुतां स्वाहां नाम सुरूपिणीम् ॥ ३ ॥ साऽनपत्या पुरा चाऽऽसीत्पु
त्रार्थं तप आविशत् ॥ तपश्चरन्तीं विपुलं तोषयन्तीं हुताशनम् ॥ स भर्ता हुतभुक्प्राह भार्यां स्वाहामनिन्दिताम् ॥ ४ ॥ अग्निरुवाच ॥ अप
त्यानि भविष्यन्ति मा तपः कुरु शोभने ॥ ५ ॥ ब्रह्मोवाच ॥ तच्छ्रुत्वा भर्तृवाक्यं तु निवृत्ता तपसोऽभवत ॥ स्त्रीणामभीष्टदं नान्यद्भर्तृवाक्यं
विना क्वचित् ॥ ६ ॥ ततः कतिपये काले तारकाद्भय आगते ॥ अनुत्पन्ने कार्तिकेये चिरकालरहोगते ॥ ७ ॥ महेश्वरे भवान्यां च त्रस्तां देवाः
समागताः ॥ देवानां कार्यसिद्ध्यर्थमग्निऽप्रोचुर्दिवौकसः ॥ ८ ॥ देवा ऊचुः ॥ देवं गच्छ महाभाग शंभुं त्रैलोक्यपूजितम् ॥ तारकाद्भयमापन्नं
शंभवे त्वं निवेदय ॥ ९ ॥ अग्निरुवाच ॥ न गन्तव्यं तत्र देशे दंपत्योः स्थितयो रहः ॥ सामान्यमात्रतो न्यायः किं पुनः शूलपाणिनि ॥ १० ॥
एकान्तस्थितयोः स्वैरं जल्पतोश्च सरागयोः ॥ दंपत्योः शृणुयाद्भावयं निरयात्तस्य नोद्धृतिः ॥ ११ ॥ स स्वाम्यखिललोकानां महाकालश्चिरं
लवान् ॥ निरीक्षणीयः केन स्याद्भवान्या रहसि स्थितः ॥ १२ ॥ देवा ऊचुः ॥ महाभये चानुगते न्यायः कोऽन्यत्र वर्ण्यते ॥ तारकाद्भय आपन्ने
गच्छ त्वं तारको भवान् ॥ १३ ॥ महाभयाब्धौ साधूनां यत्परार्थाय जीवितम् ॥ रूपेणान्येन वा गच्छ वाचं वद यथा तथा ॥ १४ ॥ विश्राव्य देव
वचनं शंभुमागच्छ सत्वरः ॥ ततो दास्यामहे पूजामुभयोर्लोकयोः क्वे ॥१५॥ ब्रह्मोवाच ॥ शुको भूत्वा जगामाऽऽशु देववाक्याद्धुताशनः ॥ यत्राऽऽसी
ज्जगतां नाथो रममाणस्तदोमया ॥ १६ ॥ स भीतवदथ प्रायाच्छुको भूत्वा तदाऽनलः ॥ नाशकद्वारदेशे तु प्रवेष्टुं हव्यवाहनः ॥ १७ ॥ ततो गवाक्ष
देशे तु तस्थौ धुन्वन्नधोमुखः ॥ तं दृष्ट्वा प्रहसञ्च्छंभुरुमां प्राह रहोगतः ॥ १८ ॥ शंभुरुवाच ॥ पश्य देवि शुकं प्राप्तं देववाक्याद्धुताशनम् ॥ १९ ॥
ब्रह्मोवाच ॥ लज्जिता चावदद्देवमलं देवेति पार्वती ॥ पुरश्चरन्तं देवेशो ह्याग्निं तं द्विजरूपिणम् ॥ २० ॥ आहूय बहुशश्चापि ज्ञातोऽस्यग्नेऽत्र मा वद ॥
विदारयस्व स्वमुखं गृहाणेदं नयस्व तत् ॥२१॥ इत्युक्त्वा तस्य चाऽऽस्येऽग्ने रेतः स प्राक्षिपद्बहु ॥ रेतोगर्भस्तदा चाग्निर्गन्तुं नैव च शक्तवान् ॥२२॥

सुरनद्यास्ततस्तीरं श्रान्तोऽग्निरुपतास्थिवान् ॥ कृत्तिकासु च तद्रेतःप्रक्षेपात्कार्तिकोऽभवत् ॥ २३ ॥ अवशिष्टं च यत्किञ्चिदग्नेर्देहे च शांभवम् ॥ तदेव रेतो वह्निस्तु स्वभार्यायां द्विधाऽक्षिपत् ॥ २४ ॥ स्वाहायां प्रियभूतायां पुत्रार्थिन्यां विशेषतः ॥ पुरा साऽऽश्वासिता तेन संततिस्ते भविष्यति ॥ २५ ॥ तद्वह्निनाऽथ संस्मृत्य तत्क्षिप्तं शांभवं महः ॥ तदग्ने रेतसस्तस्यां जज्ञे मिथुनमुत्तमम् ॥ २६ ॥ सुवर्णश्च सुवर्णा च रूपेणाप्रतिमं भुवि ॥ अग्नेः प्रीतिकरं नित्यं लोकानां प्रीतिवर्धनम् ॥ २७ ॥ अग्निः प्रीत्या सुवर्णौ तां प्रादाद्धर्माय धीमते ॥ सुवर्णस्याथ पुत्रस्य संकल्पामकरोत्प्रियाम् ॥ एवं पुत्रस्य पुत्र्याश्च विवाहमकरोत्कविः ॥ २८ ॥ अन्योन्यरेतोव्यतिषङ्गदोषादग्नेरपत्यमुभयं तथैव ॥ पुत्रः सुवर्णो बहुरूपरूपी रूपाणि कृत्वा सुरसत्तमानाम् ॥ २९ ॥ इन्द्रस्य वायोर्धनदस्य भार्यां जलेश्वरस्यापि मुनीश्वराणाम् ॥ भार्यास्तु गच्छत्यनिशं सुवर्णो यस्याः प्रियं यच्च वपुः स कृत्वा ॥ ॥ ३० ॥ याति क्वचिच्चापि कवेस्तनूजस्तद्भर्तृरूपं च पतिव्रतासु ॥ कृत्वाऽनिशं ताभिरुदारभावः कुर्वन्कृतार्थं मदनं स रेमे ॥ ३१ ॥ कृत्या तदा कृत्यभवत्सुवर्णो धर्मस्य भार्याऽपि सुवर्णनाम्नी ॥ स्वाहासुता स्वैरिणी सा बभूव यस्यापि यस्यापि मनोगता या ॥ ३२ ॥ भार्या सुरूपा सैव भूत्वा सुवर्णा रेमे पतीन्मानुषानासुरांश्च ॥ देवानृषीन्पितृरूपांस्तथाऽन्यान्रूपौदार्यस्थैर्यगाम्भीर्ययुक्तान् ॥३३॥ याऽभिप्रेता यस्य देवस्य भार्या तद्रूपा सा रमते तेन सार्धम् ॥ नानाभेदैः करणैश्चाप्यनेकैराकर्षन्ती तन्मनः कामसिद्धिम् ॥ ३४ ॥ एवं सुवर्णस्य निरीक्ष्य चेष्टामग्नेः सूनोः पुत्रिकायास्तथाऽग्नेः ॥ सर्वे च शेपुः कुपितास्तदाऽग्नेः पुत्रं च पुत्रीं च सुरासुरास्ते ॥ ३५ ॥ ॥ सुरासुरा ऊचुः ॥ कृतं यदेतद्व्यभिचाररूपं यच्छद्मना वर्तनं पापरूपम् ॥ तस्मात्सुतस्ते व्यभिचारवांश्च सर्वत्रगामी जायतां हव्यवाह ॥ ३६ ॥ तथा सुवर्णाऽपि न चैकनिष्ठा भूयाद्वह्ने नैकतृप्ता बहूंश्च ॥ नानाजातीन्निन्दितान्देहभाजो भजित्री स्यादेष दोषश्च पुत्र्याः ॥ ३७ ॥ ॥ ब्रह्मोवाच ॥ इत्येतच्छापवचनं श्रुत्वाऽग्निरतिभीतवत् ॥ मामभ्येत्य तदोवाच निष्कृतिं वद पुत्रयोः ॥ ३८ ॥ तदाऽहमब्रवं वह्निं गौतमीं गच्छ शंकरम् ॥ स्तुत्वा तत्र महाबाहो निवेदय जगत्पतेः ॥ ३९ ॥ माहेश्वरेण वीर्येण तव देहस्थितेन च ॥ एवंविधं त्वपत्यं ते जातं वह्ने ततो भवान् ॥ ४० ॥ निवेदयस्व देवाय देवानां शापमीदृशम् ॥ स्वापत्यरक्षणायासौ शंभुः श्रेयः करिष्यति ॥ ४१ ॥ स्तुहि देवं च देवीं च भक्त्या प्रीतो भवेच्छिवः ॥ ततस्त्वपत्यविषये प्रियान्कामानवाप्स्यसि ॥ ४२ ॥ ततो मद्वचनादग्निर्गङ्गां गत्वा महेश्वरम् ॥ तुष्टाव नियतो वाक्यैः स्तुतिभिर्वेदसंमितैः ॥ ४३ ॥ ॥ अग्निरुवाच ॥ विश्वस्य जगतो धाता विश्वमूर्तिर्निरञ्जनः ॥ आदिकर्ता स्वयंभूश्च तं नमामि जगत्पतिम् ॥ ४४ ॥ योऽग्निर्भूत्वा संहरति स्रष्टा वै जलरूपतः ॥ सूर्यरूपेण यः पाति तं नमामि च

त्र्यम्बकम् ॥ ४५ ॥ यजमानस्य रूपेण सुराणां तृप्तिहेतवे ॥ वायुरूपेण जीवानां व्यवस्थाकरणेन च ॥ ४६ ॥ शिवरूपेण यः पाति सुखाय
सततं हरिः ॥ अवकाशं प्राणिनां तु धत्ते व्योमस्वरूपतः ॥ ४७ ॥ ॥ ब्रह्मोवाच ॥ ततः प्रसन्नो भगवाननन्तः शंभुरव्ययः ॥ करेण च्छन्दया
मास पावकं सुरपूजितम् ॥ ४८ ॥ स विनीतः शिवं प्राह तव वीर्यं मयि स्थितम् ॥ तेन जातः सुतो रम्यः सुवर्णो लोकविश्रुतः ॥ ४९ ॥ तथा
सुवर्णा पुत्री च तस्मादेव जगत्प्रभो ॥ अन्योन्यवीर्यसङ्गाच्च तद्दोषादुभयं त्विदम् ॥ ५० ॥ व्यभिचारात्सदोषं च ह्यपत्यमभवच्छिव ॥ शापं ददुः
सुराः सर्वे तयोः शान्तिं कुरु प्रभो ॥ तदग्निवचनाच्छम्भुः प्रोवाचेदं शुभोदयम् ॥ ५१ ॥ ॥ शंभुरुवाच ॥ मद्वीर्यादभवत्त्वत्तः सुवर्णो भूरिविक्रमः ॥
समग्रा ऋद्धयः सर्वाः सुवर्णेऽस्मिन्मदाहिताः ॥५२॥ भविष्यन्ति न संदेहो वह्ने शृणु वचो मम ॥ त्रयाणामपि लोकानां पावनः स भविष्यति ॥
॥ ५३ ॥ स एव चामृतं लोके स एव सुरवल्लभः ॥ स एव भुक्तिमुक्ती च स एव मखदक्षिणा ॥ ५४ ॥ स एव रूपं सर्वस्य गुरूणामप्यसौ गुरुः ॥
वीर्यं श्रेष्ठतमं विद्याद्वीर्यं मत्तो यदुत्तमम् ॥ ५५ ॥ विशेषतस्त्वयि क्षिप्तं तस्य का स्याद्विचारणा ॥ हीनं तेन विना सर्वं संपूर्णास्तेन संपदः ॥
॥ ५६ ॥ जीवन्तोऽपि मृताः सर्वे सुवर्णेन विना नराः ॥ निर्गुणोऽपि धनी मान्यः सगुणोऽप्यधनो नहि ॥ ५७ ॥ तस्मान्नातः परं किंचित्सुवर्णाद्धि
भविष्यति ॥ तथा चैषा सुवर्णाऽपि स्यादुत्कृष्टाऽपि चञ्चला ॥ ५८ ॥ अनया वीक्षितं सर्वं न्यूनं पूर्णं भविष्यति ॥ तपसा जपहोमैश्च येयं प्राप्या
जगत्त्रये ॥ ५९ ॥ तस्याः प्रभावं प्राशस्त्यमग्रे किंचिच्च कीर्त्यते ॥ सर्वत्र या तु संतिष्ठेदायाता विचरिष्यति ॥ ६० ॥ सुवर्णा कमला साक्षात्प
त्रिा च भविष्यति ॥ अद्य प्रभृत्यात्मजयोस्तथा स्वैरं विचेष्टतोः ॥ तथाऽपि चैतयोः पुण्यं न भूतं न भविष्यति ॥ ६१ ॥ ॥ ब्रह्मोवाच ॥
एवमुक्त्वा ततः शंभुः साक्षात्तत्राभवच्छिवः ॥ लिङ्गरूपेण सर्वेषां लोकानां हितकाम्यया ॥ ६२ ॥ वरान्प्राप्य सुताभ्यां स वह्निस्तुष्टोऽभव
त्ततः ॥ स्वभर्त्रा च सुवर्णा सा धर्मेणाग्निसुता मुदा ॥ ६३ ॥ वर्तयामास पुत्रोऽपि वह्नेः संकल्पया मुदा ॥ एतस्मिन्नन्तरे स्वर्णामग्नेर्दुहितरं मुने ॥
॥६४॥ परिभूय च धर्मं तं शार्दूलो दानवेश्वरः ॥ अहरद्भाग्यसौभाग्यविलासवसतिं छलात् ॥ ६५ ॥ नीता रसातलं तेन सुवर्णा लोकविश्रुता ॥
जामाताऽग्नेः स धर्मश्च अग्निश्चैव स हव्यवाट् ॥ ६६ ॥ विष्णवे लोकनाथाय स्तुत्वा चैव पुनः पुनः ॥ कार्यविज्ञापनं चोभौ चक्रतुः प्रभवि
ष्णवे ॥ ६७ ॥ ततश्चक्रेण चिच्छेद शार्दूलस्य शिरो हरिः ॥ साऽऽनीता विष्णुना देवी सुवर्णा लोकसुन्दरी ॥ ६८ ॥ महेश्वरसुता चैव अग्ने
श्चैव तथा प्रिया ॥ महेश्वराय तां विष्णुर्दर्शयामास नारद ॥ ६९ ॥ प्रीतोऽभवन्महेशोऽपि सस्वजे तां पुनःपुनः ॥ चक्रं प्रक्षालितं यत्र

शार्दूलच्छेदि दीप्तिमत् ॥ ७० ॥ चक्रतीर्थं तु विख्यातं शार्दूलं चेति तद्विदुः ॥ यत्र नीता सुवर्णा सा विष्णुना शंकरान्तिकम् ॥ ७१ ॥ तत्तीर्थं शांकरं ज्ञेयं वैष्णवं सिद्धमेव तु ॥ यत्राऽऽनन्दमनुप्राप्तो ह्यग्निर्धर्मश्च शाश्वतः ॥ ७२ ॥ आनन्दाश्रूणि न्यपतन्यत्राग्नेर्मुनिसत्तम ॥ आनन्देति नदी जाता तथा वै नन्दिनीति च ॥ ७३ ॥ तस्याश्च संगमः पुण्यो गङ्गायां तत्र वै शिवः ॥ तत्रैव संगमे साक्षात्सुवर्णाऽद्यापि संस्थिता ॥ ७४ ॥ दाक्षायणी सैव शिवा आग्नेयी चेति विश्रुता ॥ अम्बिका जगदाधारा शिवा कात्यायनीश्वरी ॥ ७५ ॥ भक्ताभीष्टप्रदा नित्यमलंकृत्योभयं तटम् ॥ तपस्तेपे यत्र चाग्निस्तत्तीर्थं तु तपोवनम् ॥ ७६ ॥ एवमादीनि तीर्थानि तीरयोरुभयोर्मुने ॥ तेषु स्नानं च दानं च सर्वकामप्रदं शुभम् ॥ ७७ ॥ उत्तरे चैव पारे च सहस्राणि चतुर्दश ॥ दक्षिणे च तथा पारे सहस्राण्यथ षोडश ॥ ७८ ॥ तत्र तत्र च तीर्थानि साभिज्ञानानि सन्ति वै ॥ नामानि च पृथक् सन्ति संक्षेपात्तन्मयोच्यते ॥ ७९ ॥ एतानि यश्च शृणुयाद्यश्च वा पठति स्मरेत् ॥ सर्वेषु तत्र काम्येषु परिपूर्णो भवेन्नरः ॥ ८० ॥ एतद्वृत्तं तु यो ज्ञात्वा तत्र स्नानादिकं चरेत् ॥ लक्ष्मीवाञ्जायते नित्यं धर्मवांश्च विशेषतः ॥ ८१ ॥ अब्जकात्पश्चिमे तीर्थे तच्छार्दूलमुदाहृतम् ॥ वाराणस्यादितीर्थेभ्यः सर्वेभ्यो ह्यधिकं भवेत् ॥ ८२ ॥ तत्र स्नात्वा पितॄन्देवान्वन्दते तर्पयत्यपि ॥ सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥ ८३ ॥ तपोवनाच्च शार्दूलान्मध्ये तीर्थान्यशेषतः ॥ तस्यैकैकस्य माहात्म्यं न केनाप्यत्र वर्ण्यते ॥ ८४ ॥ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये तपोवननन्दिनीसंगमेश्वरदेवीदाक्षायणीसिद्धेश्वरवैष्णवशार्दूलाग्निचक्रतीर्थादित्रिंशत्सहस्रतीर्थवर्णनं नामाष्टपञ्चाशोऽध्यायः ॥ ५८ ॥ ॥

॥ ब्रह्मोवाच ॥ ॥ इन्द्रतीर्थमिति ख्यातं तत्रैव च वृषाकपम् ॥ फेनायाः संगमो यत्र हनूमंतं तथैव च ॥ १ ॥ अब्जकं चापि यत्प्रोक्तं यत्र देव स्त्रिविक्रमः ॥ तत्र स्नानं च दानं च पुनरावृत्तिदुर्लभम् ॥ २ ॥ तत्र वृत्तान्यथाऽऽख्यास्ये गंगाया दक्षिणे तटे ॥ इन्द्रेश्वरं चोत्तरे च शृणु भक्त्या यतव्रतः ॥ ३ ॥ नमुचिर्बलवानासीदिन्द्रशत्रुर्मदोत्कटः ॥ तस्येन्द्रेणाभवद्युद्धं फेनेनेन्द्रोऽहरच्छिरः ॥४॥ अपां च नमुचेः शत्रोस्तत्फेनं वज्ररूपधृक् ॥ शिरश्छित्त्वा तच्च फेनं गंगाया दक्षिणे तटे ॥ ५ ॥ न्यपतद्भुवि भित्त्वा तु रसातलमथाऽऽविशत् ॥ रसातलभवं गांगं वारि पावनमेवच ॥ ६ ॥ वज्रा दिष्टेन मार्गेण व्यगमद्भूमिमण्डलम् ॥ तज्जलं फेननाम्ना तु नदी फेनेति गद्यते ॥ ७ ॥ तस्यास्तु संगमः पुण्यो गंगया लोकविश्रुतः ॥ सर्वपाप क्षयकरो गङ्गायमुनयोरिव ॥ ८ ॥ हनूमदुपमाता वै यत्राऽऽप्लुवनमात्रतः ॥ मार्जारत्वादभून्मुक्ता विष्णुगंगाप्रसादतः ॥ ९ ॥ मार्जारं चेति तत्तीर्थं पुरा प्रोक्तं मया तव ॥ हनूमंतं च तत्प्रोक्तं तत्राऽऽख्यानं पुरोदितम् ॥ १० ॥ वार्षाकपं चाब्जकं च तत्रेदं प्रयतः शृणु ॥ हिरण्य इति विख्यातो

दैत्यानां पूर्वजो बली ॥ ११ ॥ तपस्तप्त्वा सुरैः सर्वैरजेयोऽभूत्सुदारुणः ॥ तस्यापि बलवान्पुत्रो देवानां दुर्जयः सदा ॥ १२ ॥ महाशनिरिति
ख्यातस्तस्य भार्या पराजिता ॥ तेनेन्द्रस्याभवद्युद्धं बहुकालं निरन्तरम् ॥ १३ ॥ महाशनिर्महावीर्यः सततं रणमूर्धनि ॥ जित्वा नागेन सहितं शक्रं
पित्रे न्यवेदयत् ॥ १४ ॥ बद्ध्वा हस्तिसमायुक्तं स्वसारं वीक्ष्य तां तदा ॥ विहाय क्रूरतां दैत्यो हिरण्याय न्यवेदयत् ॥ १५ ॥ महाशनिपिता
दैत्यः पूर्वेषां पूर्ववत्तरः ॥ शचीकान्तं तले स्थाप्य तस्य रक्षामथाकरोत् ॥ १६ ॥ महाशनिर्हरिं जित्वा जेतुं वरुणमभ्यगात् ॥ वरुणोऽपि महा
बुद्धिः प्रादात्कन्यां महाशनेः ॥ १७ ॥ उदधिं स्वालयं प्रादाद्वरुणस्तु महाशनेः ॥ तयोश्च सख्यमभवद्वरुणस्य महाशनेः ॥ १८ ॥ वारुणी चापि
या कन्या सा प्रियाऽभून्महाशनेः ॥ वीर्येण यशसा चापि शौर्येण च बलेन च ॥ १९ ॥ महाशनिर्महादैत्यस्त्रैलोक्ये नोपमीयते ॥ निरिन्द्रत्वं गते
लोके देवाः सर्वे न्यमन्त्रयन् ॥२०॥ ॥ देवा ऊचुः ॥ ॥ विष्णुरेवेन्द्रदाता स्यादैत्यहन्ता स एव च ॥ मन्त्रदृग्वा स एव स्यादिन्द्रं चान्यं करिष्यति ॥
॥ २१ ॥ ॥ ब्रह्मोवाच ॥ ॥ एवं संमन्त्र्य ते देवा विष्णोर्मन्त्रं न्यवेदयन् ॥ ममावध्यो महादैत्यो महाशनिरिति ब्रुवन् ॥ २२ ॥ प्रायाद्वारीश्वरं
विष्णुः श्वशुरं वरुणं तदा ॥ केशवो वरुणं गत्वा प्राहेन्द्रस्य पराभवम् ॥ २३ ॥ तथा त्वयैतत्कर्तव्यं यथाऽऽयाति पुरंदरः ॥ तद्विष्णुवचनाच्छीघ्रं
ययौ जलपतिर्मुने ॥ २४ ॥ सुतापतिं हिरण्यसुतं विक्रान्तं तं महाशनिम् ॥ अतिसंमानितस्तेन जामात्रा वरुणः प्रभुः ॥ २५ ॥ पप्रच्छाऽऽगमनं
दैत्यो विनयाच्छ्वशुरं तदा ॥ वरुणः प्राह तं दैत्यं यदागमनकारणम् ॥ २६ ॥ ॥ वरुण उवाच ॥ ॥ इन्द्रं देहि महाबाहो यस्त्वया निर्जितः पुरा ॥
बद्धं रसातलस्थं तं देवानामधिपं सखे ॥ २७ ॥ अस्माकं सर्वदा मान्यं देहि त्वं मम शत्रुहन् ॥ बध्वा विमोक्षणं शत्रोर्महते यशसे सताम् ॥ २८ ॥
॥ ब्रह्मोवाच ॥ ॥ तथेत्युक्त्वा कथंचित्स दैत्येशो वरुणाय तम् ॥ प्रादादिन्द्रं शचीकान्तं वारणेन समन्वितम् ॥ २९ ॥ स दैत्यमध्येऽतिविराज
मानो हरिं तदोवाच जलेशसंनिधौ ॥ संपूज्य चैवाथ महोपचारैर्महाशनिर्मघवन्तं बभाषे ॥ ३० ॥ ॥ महाशनिरुवाच ॥ केन त्वमिन्द्रोऽद्य कृतो
ऽसि केन वीर्येण तवेदृग्दद्रु भाषसे च ॥ त्वं संगरे शत्रुभिर्बाध्यसे च तथाऽपि चेन्द्रो भवसीति चित्रम् ॥३१॥ अथापि बद्धा पुरुषेण काचित्तस्याः प
तिस्तां मोचयतीति युक्तम् ॥ स्त्रियोऽस्वतन्त्राः पुरुषप्रधानास्त्वं वै पुमान्भविता शक्र साधो ॥ ३२ ॥ बद्धो मया संगरे वाहनेन काप्यस्त्रं ते
वज्रमुद्दामशक्ति ॥ चिन्तारत्नं नन्दनं योषितस्ता यशो बलं देवराजोपभोग्यम् ॥ सर्वं हि त्वा किंतु मुक्तो जलेशादाकाङ्क्षसे जीवितं धिक्तवेदम् ॥
॥ ३३ ॥ तज्जीवनं यत्तु यशोनिधानं स एष मृत्युर्यशसो यद्विरोधि ॥ एवं जानञ्शक्र कथं जलेशान्मुक्तिं प्राप्तो नैव लज्जां भजेथाः ॥

॥ ३४ ॥ त्रिविष्टपस्थः परिवेष्टितः सन्सर्वैः सुरैः कान्तया वीज्यमानः ॥ संस्तूयमानश्च तथाऽप्सरोभिर्नूनं लज्जा ते बिभेतीति मन्ये ॥ ३५ ॥ त्वं वृत्रहा नमुचेश्चापि हन्ता पुरां भेत्ता गोत्रभिद्वज्रबाहुः ॥ एवं सुरास्त्वां परिपूजयन्तीत्यतो जिष्णो सर्वमेतत्त्यजस्व ॥ ३६ ॥ विकारमाप्याप्यहितोद्भवं ये जीवन्ति लोकाननुसंविशन्ति ॥ भवादृशां दुश्यवनाब्जजन्मा कथं न हृद्भेदमवाप कर्ता ॥ ३७ ॥ ॥ ब्रह्मोवाच ॥ एवमुक्ता तु दैत्येशो वरुणाय महात्मने ॥ प्रादादिन्द्रं पुनश्चेदं वचनं तदभाषत ॥ ३८ ॥ ॥ महाशनिरुवाच ॥ अद्य प्रभृत्यसौ शिष्य इन्द्रः स्याद्वरुणो गुरुः ॥ श्वशुरो मम येन त्वं मुक्तिमाप्तोऽसि वासव ॥ ३९ ॥ तथा त्वं भृत्यभावेन वर्तेथा वरुणं प्रति ॥ नो चेद्वद्ध्वा पुनस्त्वां वै क्षेप्स्ये चैव रसातलम् ॥ ४० ॥ ॥ ब्रह्मोवाच ॥ एवं निर्भर्त्स्य तं शक्रं हंसश्चापि पुनः पुनः ॥ अब्रवीद्गच्छ गच्छेति वरुणं चानुमन्य तु ॥ ४१ ॥ स तु प्राप्तः स्वनिलयं लज्जया कलुषीकृतः ॥ पौलोम्यां प्राह तत्सर्वं यत्तच्छत्रुपराभवम् ॥ ४२ ॥ ॥ इन्द्र उवाच ॥ एवमुक्तः कृतश्चैव शत्रुणाऽहं वरानने ॥ निर्वापयामि येन स्वमात्मानं सुभगे वद ॥ ४३ ॥ ॥ इन्द्राण्युवाच ॥ दानवानामथोद्भूतिं शक्र मायां पराभवम् ॥ वरदानं तथा मृत्युं जानेऽहं वलसूदन ॥ ४४ ॥ तस्माद्यस्मात्तस्य मृत्युरथवाऽपि पराभवः ॥ जायेत शृणु तत्सर्वं वक्ष्येऽहं प्रीतये तव ॥ ४५ ॥ हिरण्यस्य सुतो वीरः पितृव्यस्य सुतो बली ॥ तस्मान्मम स्यात्स भ्राता वरदानाच्च दर्पितः ॥ ४६ ॥ ब्रह्माणं तोषयामास तपसा नियमेन च ॥ ईदृशं बलमापन्नं तपसा किं न सिध्यति ॥ ४७ ॥ तस्मात्त्वया चित्तरागो विस्मयो वा कथंचन ॥ न कार्यः शृणु तत्रेदं कार्यं यत्तु क्रमागतम् ॥ ४८ ॥ ॥ ब्रह्मोवाच ॥ एवमुक्त्वा तु पौलोमी प्राहेन्द्रं विनयान्विता ॥ ४९ ॥ ॥ इन्द्राण्युवाच ॥ नासाध्यमस्ति तपसो नासाध्यं यज्ञकर्मणः ॥ नासाध्यं लोकनाथ स्य विष्णोर्भक्त्या हरस्य च ॥ ५० ॥ पुनश्चेदं मया कान्त श्रुतमस्त्यतिशोभनम् ॥ स्त्रीणां स्वभावं जानन्ति स्त्रिय एव सुराधिप ॥ ५१ ॥ तस्माद्भूमेस्तथा चापां नासाध्यं विद्यते प्रभो ॥ तपो वा यज्ञकर्मादि ताभ्यामेव यतो भवेत् ॥ ५२ ॥ तत्रापि तीर्थभूता तु या भूमिस्तां व्रजेद्भवान् ॥ तत्र विष्णुं शिवं पूज्य सर्वान्कामानवाप्स्यसि ॥ ५३ ॥ श्रुतमस्ति पुनश्चेदं स्त्रियो याश्च पतिव्रताः ॥ ता एव सर्वं जानन्ति धृतं ताभिश्चराचरम् ॥ ॥ ५४ ॥ पृथिव्यां सारभूतं स्यात्तन्मध्ये दण्डकं वनम् ॥ तत्र गङ्गा जगद्धात्री तत्रेशं पूजय प्रभो ॥ ५५ ॥ विष्णुं वा जगतामीशं दीनार्तार्तिहरं विभुम् ॥ अनाथानामिह नृणां मज्जतां दुःखसागरे ॥५६॥ हरो हरिर्वा गङ्गा वा काप्यन्यच्छरणं नहि ॥ तस्मात्सर्वप्रयत्नेन तोषयैतान्समाहितः ॥ ॥ ५७ ॥ भक्त्या स्तोत्रैश्च तपसा कुरु चैव मया सह ॥ ततः प्राप्स्यसि कल्याणमीशविष्णुप्रसादजम् ॥ ५८ ॥ अज्ञात्वैकगुणं कर्म फलं दास्यति

कर्मिणः ॥ ज्ञात्वा शतगुणं तत्स्याद्भार्यया च तदक्षयम् ॥ ५९ ॥ पुंसः सर्वेषु कार्येषु भार्यैवेह सहायिनी ॥ स्वल्पानामपि कार्याणां नहि सिद्धि
स्तया विना ॥ ६० ॥ एकेन यत्कृतं कर्म तस्मादर्धफलं भवेत् ॥ जायया तु कृतं नाथ पुष्कलं पुरुषो लभेत् ॥ ६१ ॥ तस्मादेतत्सुविदितधर्मो
जाया इति श्रुतेः ॥ श्रूयते दण्डकारण्ये सरिच्छ्रेष्ठाऽस्ति गौतमी ॥ ६२ ॥ अशेषपापप्रशमनी सर्वाभीष्टप्रदायिनी ॥ तस्माद्गच्छ मया तत्र कुरु पुण्यं
महाफलम् ॥ ६३ ॥ ततः शत्रून्निहत्याऽऽजौ महत्सुखमवाप्स्यसि ॥ ६४ ॥ ॥ ब्रह्मोवाच ॥ तथेत्युक्तः स गुरुणा भार्यया च शतक्रतुः ॥ ययौ
गङ्गां जगद्धात्रीं गौतमीं चेति विश्रुताम् ॥ ६५ ॥ दण्डकारण्यमध्यस्थां ययौ स प्रीतिमान्हरिः ॥ तपः कर्तुं मनश्चक्रे देवदेवाय शंभवे ॥ ६६ ॥
गङ्गां नत्वा तु प्रथमं स्नात्वा च स कृताञ्जलिः ॥ शिवैकशरणो भूत्वा स्तोत्रं चेदं ततोऽब्रवीत् ॥ ६७ ॥ ॥ इन्द्र उवाच ॥ स्वमायया यो ह्यखिलं
चराचरं सृजत्यवत्यत्ति न सज्जतेऽस्मिन् ॥ एकः स्वतन्त्रोऽद्वयचित्सुखात्मकः स नः प्रसन्नोऽस्तु पिनाकपाणिः ॥ ६८ ॥ न यस्य तत्त्वं सनकाद
योऽपि जानन्ति वेदान्तरहस्यविज्ञाः ॥ स पार्वतीशः सकलाभिलाषदाता प्रसन्नोऽस्तु ममान्धकारिः ॥ ६९ ॥ सृष्ट्वा स्वयंभूर्भगवान्किरीटी भयं
करं चास्य शिरोऽन्वपश्यत् ॥ छित्त्वा नखाग्रैर्नखसक्तमेतच्चिक्षेप तस्मादभवत्त्रिवर्गः ॥ ७० ॥ पापं दरिद्रं त्वथ लोभयाच्ञे मोहो विपच्चेति ततोऽ
प्यनन्तम् ॥ जातप्रभावं भवदुःखरूपं बभूव तैर्व्याप्तमिदं समस्तम् ॥ ७१ ॥ अवेक्ष्य सर्वे चकितः सुरेशो देवीमवोचज्जगदस्तमेति ॥ त्वं पाहि
लोकेश्वरि लोकमातरुमे शरण्ये सुभगे सुभद्रे ॥ ७२ ॥ जगत्प्रतिष्ठे वरदे जय त्वं मुक्तिः समाधिः परमा च मुक्तिः ॥ स्वाहा त्वं स्वधा स्वस्तिरना
दिसिद्धिर्गीर्बुद्धिरासीरजरामरे त्वम् ॥ ७३ ॥ विद्यादिरूपेण जगत्त्रये त्वं रक्षां करोष्येव मदाज्ञया च ॥ त्वयैव सृष्टं भुवनत्रयं स्याद्यतः प्रकृत्यैव
तथैव चित्रम् ॥ ७४ ॥ इत्येवमुक्ता दयिता हरेण संश्लेषसंलापपरा बभूव ॥ श्रान्ता भवस्यार्धतनौ सुलग्ना चिक्षेप च स्वेदजलं कराग्रैः ॥ ७५ ॥
तस्माद्बभूव प्रथमं सं धर्मो लक्ष्मीरथो दानमथो सुवृष्टिः ॥ सत्त्वं सुसंपन्नधरं सरांसि धान्यानि पुष्पाणि फलानि चैव ॥ ७६ ॥
सौभाग्यवस्तूनि वपुः सुवेषः शृङ्गारभाजीनि महौषधानि ॥ नृत्यानि गीतान्यमृतं पुराणं श्रुतिस्मृती नीतिरथान्नपाने ॥ ७७ ॥ शस्त्राणि
शास्त्राणि गृहोपयोग्यान्यस्त्राणि तीर्थानि च काननानि ॥ इष्टानि पूर्तानि च मङ्गलानि यानानि शुभ्राभरणासनानि ॥ ७८ ॥
भवाङ्गसंसर्गसुसंप्रहाससुस्वेदसंलापरहःप्रकारैः ॥ तथैव जातं सचराचरं च अपापकं देवि ततश्च जातम् ॥ ७९ ॥ सुखं प्रभूतं
च शुभं च नित्यं विराजि चैतत्तव देवि भावात् ॥ तस्मात्तु मां रक्ष जगन्निवित्रि भीतं भवेभ्यो जगतां प्रधाने ॥ ८० ॥ एके तर्केर्विमुह्यन्ति

लीयन्ते तत्र चापरे ॥ शिवशक्त्योस्तदाऽद्वैतं सुन्दरं नौमि विग्रहम् ॥ ८१ ॥ ब्रह्मोवाच ॥ एवं तु स्तुवतस्तस्य पुरस्तादभवच्छिवः ॥ ८२ ॥
शिव उवाच ॥ किमभीष्टं वरयसे हरे वद परायणम् ॥ ८३ ॥ इन्द्र उवाच ॥ बलवान्मे रिपुश्चाऽऽस्ते दर्शने चाशनिर्यथा ॥ तेन बद्धस्तलं नीतः
परिभूतस्त्वनेकधा ॥ ८४ ॥ वाक्सायकैस्तथा विद्धस्तद्वधाय त्वियं कृतिः ॥ तदर्थं जगतामीश येन जेष्ये रिपुं प्रभो ॥ ८५ ॥ तदेव देहि वीर्यं मे
यच्चान्यद्रिपुनाशनम् ॥ जातः पराभवो यस्मात्तद्विनाशे कृते सति ॥ पुनर्जातमहं मन्ये वरं कीर्तिर्जयश्रियोः ॥ ८६ ॥ ब्रह्मोवाच ॥ स शिवः शक्र
माहेदं न मयैकेन ते रिपुः ॥ वधमाप्नोति तस्मात्त्वं विष्णुमप्यव्ययं हरिम् ॥ ८७ ॥ आराधयस्व पौलोम्या सह देवं जनार्दनम् ॥ लोकत्रयैकशरणं
नारायणमनन्यधीः ॥ ८८ ॥ ततः प्राप्स्यसि तस्माच्च मत्तश्चापि प्रियं हरे ॥ पुनश्चोवाच भगवानादिकर्ता महेश्वरः ॥ ८९ ॥ मन्त्राभ्यासस्तपो
वाऽपि योगाभ्यसनमेव च ॥ संगमे यत्र कुत्रापि सिद्धिदं मुनयो विदुः ॥ ९० ॥ किं पुनः संगमे विप्र गौतमीसिन्धुफेनयोः ॥ गिरीणां गह्वरे
यद्वा सरितामथ संगमे ॥ ९१ ॥ विप्रो धियैव भवति मुकुन्दाङ्घ्रिनिविष्टया ॥ गङ्गाया दक्षिणे तीर आपस्तम्बो मुनीश्वरः ॥ ९२ ॥ आस्ते तस्याप्यहं
तोषमगमं बलसूदन ॥ तेन त्वं भार्यया चैव तोषयस्व गदाधरम् ॥ ९३ ॥ ब्रह्मोवाच ॥ आपस्तम्बेन सहितो गंगाया दक्षिणे तटे ॥ तुष्टाव देवं प्रयतः
स्नात्वा पुण्येऽथ संगमे ॥ ९४ ॥ फेनायाश्चैव गङ्गायास्तत्र देवं जनार्दनम् ॥ वैदिकैर्विविधैर्मन्त्रैस्तपसाऽतोषयत्तदा ॥ ९५ ॥ ततस्तुष्टोऽभव
द्विष्णुः किं देयं चेत्यभाषत ॥ देहि मे शत्रुहन्तारमित्याह भगवान्हरिः ॥ ९६ ॥ दत्तमित्येव जानीहि तमुवाच जनार्दनः ॥ तत्राभवच्छिवस्यैव
गङ्गाविष्ण्वोः प्रसादतः ॥ ९७ ॥ अम्भसा पुरुषो जातः शिवविष्णुस्वरूपधृक् ॥ चक्रपाणिः शूलधरः स गत्वा तु रसातलम् ॥ ९८ ॥ निजघान
तदा दैत्यमिन्द्रशत्रुं महाशनिम् ॥ सखाऽभवत्स चेन्द्रस्य अब्जकः स वृषाकपिः ॥ ९९ ॥ दिविस्थोऽपि सदा चेन्द्रस्तमन्वेति वृषाकपिम् ॥
कुपिता प्रणयेनाभूदन्यासक्तं विलोक्य तम् ॥ शचीं तां सान्त्वयन्नाह शतमन्युर्हसन्निदम् ॥ १०० ॥ इन्द्र उवाच ॥ नाहमिन्द्राणि शरणमृते सत्यु
वृषाकपेः ॥ वारि वाऽपि हविर्यस्य अग्नेः प्रियकरं सदा ॥ १०१ ॥ नाहमन्यत्र गन्ताऽस्मि प्रिये चाङ्गेन ते शपे ॥ तस्मान्नार्हसि मा वक्तुं शङ्कयाऽ
न्यत्र भामिनि ॥ १०२ ॥ पतिव्रता प्रिया मे त्वं धर्मे मन्त्रे सहायिनी ॥ सापत्या च कुलीना च त्वत्तोऽन्या का प्रिया मम ॥ १०३ ॥ तस्मा
त्तवोपदेशेन गंगां प्राप्य महानदीम् ॥ प्रसादादेवदेवस्य विष्णोर्वै चक्रपाणिनः ॥ १०४ ॥ तथा शिवस्य देवस्य प्रसादाच्च वृषाकपेः ॥ जलोद्भ
वाच्च मे मित्रादब्जकाल्लोकविश्रुतात् ॥ १०५ ॥ उत्तीर्णदुःखः सुभगे इत इन्द्रोऽहमच्युतः ॥ किं न साध्यं यत्र भार्या भर्तृचित्तानुगामिनी ॥ १०६ ॥

दुष्करा तत्र नो मुक्तिः किंत्वर्थादित्रयं शुभे ॥ जायैव परमं मित्रं लोकद्वयहितैषिणी ॥ १०७ ॥ सा चेत्कुलीना प्रियभाषिणी च पतिव्रता रूप
वती गुणाढ्या ॥ संपत्सु चाऽऽपत्सु समानरूपा तया ह्यसाध्यं किमिह त्रिलोक्याम् ॥ १०८ ॥ तस्मात्तव धिया कान्ते ममेदं शुभमागतम् ॥
इतस्तवोदितुं चैव कर्तव्यं नान्यदस्ति मे ॥ १०९ ॥ परलोके च धर्मे च सत्पुत्रसदृशं न च ॥ आर्तस्य पुरुषस्येह भार्यावद्वेषजं न हि ॥ ११० ॥
निःश्रेयसपदप्राप्त्यै तथा पापस्य मुक्तये ॥ गंगया सदृशं नास्ति शृणु चान्यद्वरानने ॥ १११ ॥ धर्मार्थकाममोक्षाणां प्राप्तये पापमुक्तये ॥ शिव
विष्ण्वोरनन्यत्वज्ञानान्नास्त्यत्र मुक्तये ॥ ११२ ॥ तस्मात्तव धिया साध्वि सर्वमेतन्मनोगतम् ॥ अवाप्तं च शिवाद्विष्णोर्गंगायाश्च प्रसादतः ॥
॥ ११३ ॥ इन्द्रत्वं मे स्थिरं चेतो मन्ये. मित्रबलात्पुनः ॥ वृषाकपिर्मम सखा यो जातस्त्वप्सु भामिनि ॥ ११४ ॥ त्वं च प्रियसखी नित्यं
नान्यत्प्रियतरं मम ॥ तीर्थानां गौतमी गंगा देवानां हरिशंकरौ ॥ ११५ ॥ तस्मादेभ्यः प्रसादेन सर्वं चेप्सितमाप्तवान् ॥ मम प्रीतिकरं चेदं
तीर्थं त्रैलोक्यविश्रुतम् ॥ ११६ ॥ तस्मादेतद्धि याचिष्ये देवान्सर्वाननुक्रमात् ॥ अनुमन्यन्तु ऋषयो गंगा च हरिशंकरौ ॥ ११७ ॥
इन्द्रेश्वरे चाञ्जके च उभयोस्तीरयोः सुराः ॥ एकत्र शंकरो देवो ह्यपरत्र जनार्दनः ॥ ११८ ॥ पावयन्दंडकारण्यं साक्षाद्विष्णुस्त्रिविक्रमः ॥
अन्तरे यानि तीर्थानि सर्वपुण्यप्रदानि च ॥ ११९ ॥ अत्र तु स्नानमात्रेण सर्वे ते मुक्तिमाप्नुयुः ॥ पापिष्ठाः. पापतो मुक्तिमाप्नुयुर्ये च
धर्मिणः ॥ १२० ॥ तेषां तु परमा मुक्तिः पितृभिः पञ्चपञ्चभिः ॥ अत्र किंचिच्च ये दद्युरर्थिभ्यस्तिलमात्रकम् ॥ १२१ ॥ दातृभ्यो ह्यक्षयं
तत्स्यात्कामदं मोक्षदं तथा ॥ धन्यं यशस्यमायुष्यमारोग्यं पुण्यवर्धनम् ॥ १२२ ॥ आरुयानं विष्णुशंभ्वोश्च ज्ञात्वा स्नानाच्च मुक्तिदम् ॥ अस्य
तीर्थस्य माहात्म्यं ये शृण्वन्ति पठन्ति च ॥ १२३ ॥ पुण्यभाजो भवेयुस्ते तेभ्योऽत्रैव स्मृतिर्भवेत् ॥ शिवविष्ण्वोरशेषाघसंघविच्छेदकारिणी ॥
यां प्रार्थयन्ति मुनयो विजितेन्द्रियमानसाः ॥ १२४ ॥ ब्रह्मोवाच ॥ भविष्यत्येवमेवेति तं देवा ऋषयोऽब्रुवन् ॥ गौतम्या उत्तरे पारे तीर्थानां
मोक्षदायिनाम् ॥ १२५ ॥ देवर्षीसिद्धसेव्यानां सहस्राण्यथ सप्त वै ॥ तथैव दक्षिणे तीरे तीर्थान्येकादशैव तु ॥ १२६ ॥ अञ्जकं हृदयं प्रोक्तं गो
दावर्या मुनीश्वरैः ॥ विश्रामस्थानमीशस्य विष्णोर्ब्रह्मण एव च ॥ १२७ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये गौतम्युत्तरकूलस्थेन्द्रेश्वरादिसप्तस
हस्रतीर्थदक्षिणकूलस्थापस्तम्बसोमेश्वरफेनासंगमवृषाकप्यञ्जकवैष्णवहनूमतीर्थमार्जारेत्याद्येकादशतीर्थवर्णनं नामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥
॥ ब्रह्मोवाच ॥ आपस्तम्बमिति ख्यातं तीर्थं त्रैलोक्यविश्रुतम् ॥ स्मरणादप्यशेषाघसंघविध्वंसनक्षमम् ॥ १ ॥ आपस्तम्बो महाप्राज्ञो मुनिरासी

न्मदायशाः ॥ तस्य भार्याऽक्षसूत्रेति पतिधर्मपरायणा ॥ २ ॥ तस्य पुत्रो महाप्राज्ञः कर्किनामाऽथ तत्त्ववित् ॥ तस्याऽऽश्रममनुप्राप्तो ह्यगस्त्यो
मुनिसत्तमः ॥ ३ ॥ तमगस्त्यं पूजयित्वा आपस्तम्बो मुनीश्वरः ॥ शिष्यैरनुगतो धीमांस्तं प्रष्टुमुपचक्रमे ॥ ४ ॥ ॥ आपस्तम्ब उवाच ॥
त्रयाणां को नु पूज्यः स्यादेवानां मुनिसत्तम ॥ भुक्तिर्मुक्तिश्च कस्मात्स्यादन्नदाता च को भवेत् ॥ ५ ॥ अनन्तश्चापि को विप्र देवानामपि
दैवतम् ॥ यज्ञैः क इज्यते देवः को वेदेष्वनुगीयते ॥ एतं मे संशयं छेत्तुं वदागस्त्य महामुने ॥ ६ ॥ ॥ अगस्त्य उवाच ॥ धर्मार्थकाममो
क्षाणां प्रमाणं शब्द उच्यते ॥ तत्रापि वैदिकः शब्दः प्रमाणं परमं मतः ॥ ७ ॥ वेदेन गीयते यस्तु पुरुषः स परात्परः ॥ मृतोऽपरः स विज्ञेयो
ह्यमृतः पर उच्यते ॥ ८ ॥ योऽमूर्तः स परो ज्ञेयो ह्यपरो मूर्त उच्यते ॥ गुणाभिव्याप्तिभेदेन मूर्तोऽसौ त्रिविधो भवेत् ॥ ९ ॥ ब्रह्मा विष्णुः
शिवश्चेति एक एव त्रिधोच्यते ॥ त्रयाणामपि देवानां वेद्यमेकं परं हि तत् ॥ १० ॥ एकस्य बहुधा व्याप्तिर्गुणकर्मविभेदतः ॥ लोकानामुपकारार्थमाकृतित्रितयं भवेत् ॥ ११ ॥ यस्तत्त्वं वेत्ति परमं स च विद्वान्न चेतरः ॥ तत्र यो भेदमाचष्टे लिङ्गभेदी स उच्यते ॥ १२ ॥ प्रायश्चित्तं न
तस्यास्ति यश्चैषां व्याहरेद्भिदम् ॥ त्रयाणामपि देवानां मूर्तिभेदः पृथक्पृथक् ॥ १३ ॥ वेदाः प्रमाणं सर्वत्र साकारेषु पृथक्पृथक् ॥ निराकारं च
यत्त्वेकं तत्तेभ्यः परमं मतम् ॥ १४ ॥ ॥ आपस्तम्ब उवाच ॥ नानेन निर्णयः कश्चिन्मयाऽत्र विदितो भवेत् ॥ तत्राप्यत्र रहस्यं यत्तद्भिमृश्याऽऽ
शु कीर्त्यताम् ॥ निःसंशयं निर्विकल्पं भाजनं सर्वसंपदाम् ॥ १५ ॥ ॥ ब्रह्मोवाच ॥ एतदाकर्ण्य भगवानगस्त्यो वाक्यमब्रवीत् ॥ १६ ॥
॥ अगस्त्य उवाच ॥ यद्यप्येषां न भेदोऽस्ति देवानां तु परस्परम् ॥ तथाऽपि सर्वसिद्धिः स्याच्छिवादेव सुखात्मनः ॥ १७ ॥ प्रपञ्चस्य निमित्तं
यत्तज्ज्योतिश्च परं शिवः ॥ तमेवं साधय हरं भक्त्या परमया मुने ॥ गौतम्यां सकलाघौघसंहर्त्ता दण्डके वने ॥ १८ ॥ ॥ ब्रह्मोवाच ॥ एतच्छ्रुत्वा
मुनिर्वाक्यं परां प्रीतिमुपागतः ॥ भुक्तिदो मुक्तिदः पुंसां साकारोऽथ निराकृतिः ॥ १९ ॥ सृष्ट्याकारस्ततः प्रोक्तः पालनाकार एव च ॥ दाता च
हन्ति सर्वं यो यस्मादेतत्समाप्यते ॥ २० ॥ ॥ अगस्त्य उवाच ॥ ब्रह्माकृतिः कर्तृरूपा वैष्णवी पालनी तथा ॥ रुद्राकृतिर्निहंत्री सा सर्ववेदेषु
पठ्यते ॥ २१ ॥ ॥ ब्रह्मोवाच ॥ आपस्तम्बस्तदा गंगां गत्वा स्नात्वा यतव्रतः ॥ तुष्टाव शंकरं देवं स्तोत्रेणानेन नारद ॥ २२ ॥ ॥ आपस्तम्ब
उवाच ॥ काष्ठेषु वह्निः कुसुमेषु गन्धो बीजेषु वृक्षादि दृषत्सु हेम ॥ भूतेषु सर्वेषु तथाऽस्ति यो वै तं सोमनाथं शरणं व्रजामि ॥ २३ ॥ यो लील
या विश्वमिदं चकार धाता विधाता भुवनत्रयस्य ॥ यो विश्वरूपः सदसत्परो यः सोमेश्वरं तं शरणं व्रजामि ॥ २४ ॥ यं स्मृत्य दारिद्र्यमहाभिशा

परोगादिभिर्न स्पृश्यते शरीरी॥ यमाश्रिताश्चेप्सितमाप्नुवन्ति सोमेश्वरं तं शरणं व्रजामि ॥ २५ ॥ येन त्रयीधर्ममवेक्ष्य पूर्वं ब्रह्मादयस्तत्र समीहिताश्च ॥ एवं द्विधा येन कृतं शरीरं सोमेश्वरं तं शरणं व्रजामि ॥ २६ ॥ यस्मै नमो गच्छति मन्त्रपूतं हुतं हविर्या च कृता च पूजा ॥ दत्तं हवियेंन सुरा भजन्ते तं सोमनाथं शरणं व्रजामि ॥ २७ ॥ यस्मात्परं नान्यदस्ति प्रशस्तं यस्मात्परं नैव सुसूक्ष्ममन्यत् ॥ यस्मात्परं नो महतां महच्च सोमेश्वरं तं शरणं व्रजामि ॥ २८ ॥ यस्याऽऽज्ञया विश्वमिदं विचित्रमचिन्त्यरूपं विविधं महच्च ॥ एकाकियं यद्वदनुप्रयाति सोमेश्वरं तं शरणं व्रजामि ॥ २९ ॥ यस्मिन्विभूतिः सकलाधिपत्यं कर्तृत्वदातृत्वमहत्त्वमेव ॥ प्रीतिर्यशः सौख्यमनादिधर्मः सोमेश्वरं तं शरणं व्रजामि ॥ ३० ॥ नित्यं शरण्यः सकलस्य पूज्यो नित्यं प्रियो यः शरणागतस्य ॥ नित्यं शिवो यः सकलस्य रूपं सोमेश्वरं तं शरणं व्रजामि ॥ ३१ ॥ ॥ ब्रह्मोवाच ॥ ततः प्रसन्नो भगवानाह नारद तं मुनिम् ॥ आत्मार्थं च परार्थं च आपस्तम्बोऽब्रवीच्छिवम् ॥ ३२ ॥ सर्वान्कामानाप्नुयुस्ते ये स्नात्वा देवमीश्वरम् ॥ पश्येयुर्जगतामीशमस्त्विवत्याह शिवो मुनिम् ॥ ३३ ॥ ततः प्रभृति तत्तीर्थमापस्तम्बमुदाहृतम् ॥ अनाद्यविद्यातिमिरव्रात निर्मूलनक्षमम् ॥३४॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये दक्षिणकूलस्थापस्तम्बसोमेश्वरतीर्थवर्णनं नाम षष्टितमोऽध्यायः ॥६०॥ ब्रह्मोवाच ॥ यमतीर्थमिति स्यातं पितृणां प्रीतिवर्धनम् ॥ अशेषपापशमनं तत्र वृत्तमिदं शृणु ॥ १ ॥ तत्राऽऽख्यानमिदं त्वासीदितिहासं पुरातनम् ॥ सरमेति प्रसिद्धाऽस्ति नाम्ना देवशुनी मुने ॥ २ ॥ तस्याः पुत्रौ महाश्रेष्ठौ श्वानौ नित्यं जनाननु ॥ गामिनौ पवनाहारौ चतुरक्षौ यमप्रियौ ॥ ॥ ३ ॥ गा रक्षति स्म देवानां यज्ञार्थं कल्पितान्पशून् ॥ रक्षन्तीमनुजग्मुस्ते राक्षसा दैत्यदानवाः ॥ ४ ॥ रक्षन्तीं तां महाप्राज्ञाः श्वानयोर्मातरं शुनीम् ॥ प्रलोभयित्वा विविधैर्वाक्यैर्दानैश्च यत्नतः ॥ ५ ॥ हृता गा राक्षसैः पापैः पश्वर्थे कल्पिताः शुभाः ॥ तत आगत्य सा देवानिदमाह क्रमाच्छुनी ॥ ६ ॥ ॥ सरमोवाच ॥ मां बद्ध्वा राक्षसैः पाशैस्ताडयित्वा प्रहारकैः ॥ नीता गा यज्ञसिद्ध्यर्थं कल्पिताः पशवः सुराः ॥ ७ ॥ ॥ ब्रह्मोवाच ॥ तस्या वाक्यं निशम्याऽऽशु सुरान्प्राह बृहस्पतिः ॥ ८ ॥ ॥ बृहस्पतिरुवाच ॥ इयं विकृतरूपाऽऽस्ते अस्याः पापं च लक्षये ॥ अस्या मतेन ता गावो नीता नान्येन हेतुना ॥ पापेयं सुकृतीवेति लक्ष्यते देहचेष्टितैः ॥ ९ ॥ ॥ ब्रह्मोवाच ॥ तद्वरोर्वचनाच्छक्रः पदा तां प्राहरच्छुनीम् ॥ पदाघातात्तदा तस्या मुखात्क्षीरं प्रसुस्रुवे ॥ १० ॥ पुनः प्राह शचीभर्ता क्षीरं पीतं त्वया शुनि ॥ राक्षसैश्च तदा दत्तं तस्माद्भीतास्तु गा मम ॥११॥ ॥ सरमोवाच ॥ नापराधोऽस्ति मे नाथ न चान्यस्यापि कस्यचित् ॥ नापराधो न चोपेक्षा ममास्ति त्रिदशेश्वर ॥ १२ ॥ गावो या राक्षसैर्नीतास्त्व

दागमनहेतवे ॥ तस्माद्दुष्टोऽसि किं नाथ रिपवो बलिनस्तु ते ॥ १३ ॥ ॥ ब्रह्मोवाच ॥ ततो ध्यात्वा देवगुरुर्ज्ञात्वा तस्या विचेष्टितम् ॥ सत्यं शक्र त्वियं दुष्टा रिपूणां पक्षकारिणी ॥१४॥ ततः शशाप तां शक्रः पापिष्ठे त्वं शुनी भव ॥ मर्त्यलोके पापभूता अज्ञानात्पापकारिणी ॥ १५ ॥ तदेन्द्रस्य तु शापेन मानुषे सा व्यजायत ॥ यथा शप्ता मघवता पापात्सा ह्यतिभीषणा ॥१६॥ गावो या राक्षसैर्नीतास्तासामानयनाय च ॥ यत्नं कुर्वन्सुरपतिर्विष्णवे तन्व्यवेदयत् ॥ १७ ॥ विष्णुर्दैत्यांश्च दनुजान्गोहंतॄंश्चैव राक्षसान् ॥ हन्तुं प्रयत्नमकरोज्जगृहे च महद्धनुः ॥ १८ ॥ शार्ङ्गं यल्लोकविख्यातं दैत्यनाशनमेव च ॥ जितारिः पूजितो देवैः स्वयं स्थित्वा जनार्दनः ॥ १९ ॥ यत्र वै दण्डकारण्ये शार्ङ्गपाणिर्जगत्प्रभुः ॥ तत्रस्थान्दैत्यदनुजान्राक्षसांश्च बलीयसः ॥ २० ॥ पुनर्जघ्ने स वै विष्णुर्गा यैर्नीताश्च राक्षसैः ॥ तत्र वै दण्डकारण्ये शार्ङ्गपाणिरिति श्रुतः ॥ २१ ॥ युध्यमानस्ततो विष्णुर्दितिजै राक्षसैः सह ॥ ते जग्मुर्दक्षिणामाशां विष्णोस्त्रासान्महामुने॥२२॥अन्वगच्छत्ततो विष्णुस्तानेव परमेश्वरः ॥ गरुत्मता तानवाप्य शार्ङ्गमुक्तैर्महोजवैः ॥ २३ ॥ बाणैस्तान्व्याहनद्विष्णुर्गगाया उत्तरे तटे ॥ देवारयः क्षयं नीता विष्णुना प्रभविष्णुना ॥ २४ ॥ शार्ङ्गमुक्तैर्महावेगैः सुस्वनैश्च सुमन्त्रितैः ॥ क्षयं प्राप्ता विष्णुबाणैस्ततस्ते देवशत्रवः ॥ २५ ॥ गावो लब्धा यत्र देवैर्बाणतीर्थं तदुच्यते ॥ वैष्णवं लोकविदितं गोतीर्थं चेति विश्रुतम् ॥ २६ ॥ पश्वर्थं कल्पिता गावो गंगाया दक्षिणे तटे ॥ प्रद्रुतास्ते सुराः सर्वे गङ्गायां संन्यवेशयन् ॥ २७ ॥ तन्मध्ये कारयामासुर्द्वीपं चैवाऽऽश्रयं गवाम् ॥ तैर्गोभिस्तत्र गङ्गायां सुरयज्ञो व्यजायत ॥ २८ ॥ यज्ञतीर्थं तु तत्प्रोक्तं गोद्वीपं गांगमध्यतः ॥ देवानां यजनं तच्च सर्वकामप्रदं शुभम् ॥ २९ ॥ स्वयं मूर्तिमती भूत्वा गंगाशक्तिर्महाद्युते ॥ असारापारसंसारसागरोत्तरणे तरिः ॥ ३० ॥ विश्वेश्वरी योगयाया सद्भक्ताभयदायिनी ॥ गोरक्षं तु ततस्तीर्थं गङ्गाया दक्षिणे तटे ॥ ३१ ॥ तौ श्वानौ सरमापुत्रौ चतुरक्षौ यमप्रियौ ॥ मातुः शापं चापराधं सर्वं चापि सविस्तरम् ॥ ३२ ॥ निवेद्य तु यथान्यायं कार्यं चापि सुखप्रदम् ॥ विशापकरणं चापि पप्रच्छतुरुभौ यमम् ॥ ३३ ॥ स ताभ्यां सहितः सौरिः पित्रे सूर्याय चाब्रवीत् ॥ श्रुत्वा सूर्यः सुतं प्राह गंगायां सुरसत्तम ॥ ३४ ॥ लोकत्रयैकपावन्यां गौतम्यां दण्डके वने ॥ श्रद्धया परया वत्स सुस्नातः सुसमाहितः ॥ ॥ ३५ ॥ ब्रह्माणं चैव विष्णुं च मामीशं च यथाक्रमम् ॥ स्तुहि त्वं सर्वभावेन भृत्यौ प्रीतिमवाप्स्यतः ॥ ३६ ॥ तत्पितुर्वचनं श्रुत्वा यमः प्रीतमनास्तदा ॥ तयोश्च प्रीतये प्रायादेवतर्पणयोर्यमः ॥ ३७ ॥ गौतम्यामवहारिण्यां सुसमाहितमानसः ॥ तथैव तोषयामास गङ्गायां सुरसत्तमान् ॥ ॥ ३८ ॥ श्वभ्यां च सहितः श्रीमान्दक्षिणाशापतिः प्रभुः ॥ ब्रह्माणं तोषयामास भानुं वै दक्षिणे तटे ॥ ३९ ॥ ईशानमुत्तरे विष्णुं स्वयं धर्मः

प्रतापवान् ॥ दत्तवन्तो वरं श्रेष्ठं सरमाया विशापकम् ॥ वरानयाचत बहूल्लोकानामुपकारकान् ॥ ४० ॥ ॥ यम उवाच ॥ बहुःस्नानं तु ये कुर्युर्ब्रह्मविष्णुमहेश्वराः ॥ आत्मार्थं च परार्थं च ते कामानाप्नुयुः शुभान् ॥ ४१ ॥ बाणतीर्थे तु ये स्नात्वा शार्ङ्गपाणिं स्मरन्ति वै ॥ तेभ्यो दारिद्र्यदुःखानि न भवेयुर्युगे युगे ॥ ४२ ॥ गोतीर्थे ब्रह्मतीर्थे वा यस्तु स्नात्वा यतव्रतः ॥ ब्रह्माणं तं नमस्याथ द्वीप स्यापि प्रदक्षिणम् ॥ ४३ ॥ यः कुर्यात्तेन पृथिवी सप्तद्वीपा वसुंधरा ॥ प्रदक्षिणीकृता तत्र किंचिद्दत्त्वा वसु द्विजम् ॥ ४४ ॥ तदेव यजनं प्राप्य किंचिद्धुत्वा हुताशने ॥ अश्वमेधादियज्ञानां फलं प्राप्नोति पुष्कलम् ॥ ४५ ॥ यः सकृत्तत्र पठति गायत्रीं वेदमातरम् ॥ अधीता स्तेन वेदा वै निष्कामो मुक्तिभाजनम् ॥ ४६ ॥ स्नात्वा तु दक्षिणे कूले शक्तिं देवीं तु भक्तितः ॥ पूजयित्वा यथान्यायं सर्वान्का मानवाप्नुयात् ॥ ४७ ॥ ब्रह्मविष्णुमहेशानां शक्तिर्माता त्रयीमयी ॥ सर्वान्कामानवाप्नोति पुत्रवान्धनवान्भवेत् ॥ ४८ ॥ आदित्यं भक्तितो यस्तु दक्षिणे नियतो नरः ॥ स्नात्वा पश्येत तेनेष्टा यज्ञा विविधदक्षिणाः ॥ ४९ ॥ कूले यश्चोत्तरे चैव गंगाया दैत्यसूदनम् ॥ स्नात्वा पश्येत तं नत्वा तस्य विष्णोः परं पदम् ॥ ५० ॥ यमेश्वरं ततो यस्तु यमतीर्थे तु पूजितम् ॥ स्नातः पश्यति युक्तात्मा स करोत्यचिरेण हि ॥ ॥ ५१ ॥ पितृणामक्षयं पुण्यं फलदं कीर्तिवर्धनम् ॥ तत्र स्नानेन दानेन जपेन स्तवनेन च ॥ अपि दुष्कृतकर्माणः पितरो मोक्षमाप्नुयुः ॥ ५२ ॥ ब्रह्मोवाच ॥ इत्याद्यष्ट सहस्राणि तीर्थानि त्रीणि नारद ॥ तेषु स्नानं च दानं च सर्वमक्षयपुण्यदम् ॥ ५३ ॥ एतेषां स्मरणं पुण्यं नानाजन्माघनाशनम् ॥ श्रवणात्पितृभिः सार्धं पठनात्स्वकुलैः सह ॥ ५४ ॥ तेषामप्यतिपापानि नाशं यान्ति ममाऽऽज्ञया ॥ तत्र स्नानादि यः कृत्वा किंचिद्दत्त्वा यतात्मवान् ॥ ५५ ॥ पितृणां पिण्डदानादि कृत्वा नत्वा सुरानिमान् ॥ धनं धान्यं यशो वीर्यमायुरारोग्यसंपदः ॥ ५६ ॥ पुत्रान्पौत्रान्प्रियां भार्यां लब्ध्वा चान्यन्मनीषितम् ॥ अवियुक्तः प्रीतमना बन्धुभिश्चातिमानितः ॥ ५७ ॥ नरकस्थानपि पितॄंस्तार यित्वा कुलानि च ॥ पावयित्वा प्रियैर्युक्तो ह्यन्ते विष्णुं शिवं स्मरेत् ॥ ततो मुक्तिपदं गच्छेद्देवानां वचनं यथा ॥ ५८ ॥ ॥ इति श्रीब्रह्मपुराण गतगौतमीमाहात्म्ये तीर्थमाहात्म्ये बाणतीर्थशार्ङ्गपाणीयगोद्वीपदेवयजनब्रह्मतीर्थशक्तियमादित्यसुपर्णदैत्यसूदनयमेश्वरापितृतीर्थादित्र्यधिकाष्टसह स्रतीर्थवर्णनं नामैकषष्टितमोऽध्यायः ॥ ६१ ॥ ॥ ब्रह्मोवाच ॥ ॥ यक्षिणीसंगमं नाम तीर्थं सर्वफलप्रदम् ॥ तत्र स्नानेन दानेन सर्वान्कामानवा प्नुयात् ॥ १ ॥ यत्र यक्षेश्वरो देवो दर्शनाद्भुक्तिमुक्तिदः ॥ तत्र च स्नानमात्रेण सत्रयागफलं लभेत् ॥ २ ॥ विश्रावसोः स्वसा नाम्ना पिप्पला गुरुहा

सिनी ॥ ऋषीणां सत्रमगमद्गौतमीतीरवर्तिनाम् ॥ ३ ॥ दृष्ट्वा तत्र ऋषीन्क्षामान्सा जहासातिगर्विता ॥ या गत्वाऽऽश्रावय वौषडस्तु श्रौषडिति
स्थिरम् ॥ ४ ॥ विस्वरेण ब्रुवंतीं तां ते शेपुः स्राविणी भव ॥ ततो नद्यभवत्तत्र यक्षिणीति सुविश्रुता ॥ ५ ॥ ततो विश्वावसुः पूज्य ऋषीन्देवं त्रिलो
चनम् ॥ तत्र तु स्नानमात्रेण सत्रयागफलं लभेत् ॥ संगम्य चैव गौतम्या तां विशापामथाकरोत् ॥ ६ ॥ ततः प्रभृति तत्तीर्थं यक्षिणीसंगमं स्मृतम् ॥
तत्र स्नानादिदानेन सर्वान्कामानवाप्नुयात् ॥ ७ ॥ विश्वावसोः प्रसन्नोऽभूद्यत्र शंभुः शिवान्वितः ॥ शैवं तत्परमं तीर्थं दुर्गातीर्थं च विश्रुतम् ॥ ८ ॥
सर्वपापौघहरणं सर्वदुर्गतिनाशनम् ॥ सर्वेषां तीर्थमुख्यानां तद्धि सारं महामुने ॥ तीर्थं मुनिवरैः ख्यातं सर्वसिद्धिप्रदं नृणाम्॥९॥इति श्रीब्रह्मपुराणगत
गौतमीमाहात्म्ये तीर्थमाहात्म्ये यक्षिणीसंगमदुर्गादितीर्थवर्णनं नाम द्विषष्टितमोऽध्यायः ॥ ६२ ॥ ॥ ब्रह्मोवाच ॥ शुक्रतीर्थमिति ख्यातं सर्वसिद्धिकां
नृणाम् ॥ यस्य स्मरणमात्रेण सर्वकामानवाप्नुयात् ॥१॥ भरद्वाज इति ख्यातो मुनिः परमधार्मिकः ॥ तस्य पैठीनसी नाम भार्या सुकुलभूषणा ॥२॥
गौतमीतीरमध्यास्ते मातिव्रपत्यरायणा॥अग्नीषोमीयमैन्द्राग्नं पुरोडाशमकल्पयत्॥३॥ पुरोडाशे श्रप्यमाणे धूमात्कश्चिदजायत ॥ पुरोडाशं भक्षयित्वर
लोकत्रितयभीषणः ॥ ४ ॥ यज्ञं मे ह्यत्र को हांसि क्रोपात्त्वमिति तं मुनिः ॥ प्रोवाच सत्वरं क्रुद्धो भरद्वाजो द्विजोत्तमः ॥ तद्दृषेर्वचनं श्रुत्वा राक्षसः
प्रत्युवाच तम् ॥ ५ ॥ राक्षस उवाच ॥ ॥ हव्यघ्न इति विख्यातं भरद्वाज निबोध माम् ॥ संध्यासुतोऽहं ज्येष्ठश्च सुतः प्राचीनबर्हिषः ॥ ६ ॥ ब्रह्मणा
मे वरो दत्तो यज्ञान्खाद यथासुखम् ॥ ममानुजः कलिश्चापि बलवानतिभीषणः ॥ ७ ॥ अहं कृष्णः पिता कृष्णो माता कृष्णा तथाऽनुजः ॥ अहं
मखं हनिष्यामि यूपं छेत्स्यि कृतान्तकः ॥ ८ ॥ ॥ भरद्वाज उवाच ॥ ॥ रक्ष्यतां मे त्वया यज्ञः, प्रियो धर्मः सनातनः ॥ जाने त्वां यज्ञहन्तारं सद्विजं
रक्ष मे क्रतुम् ॥ ९ ॥ ॥ यज्ञघ्न उवाच ॥ ॥ भरद्वाज निबोधेदं वाक्यं मम समासतः ॥ ब्रह्मणाऽहं पुरा शप्तो देवदानवसंनिधौ ॥ १० ॥ ततः प्रसा
दितो देवो मया लोकपितामहः ॥ अमृतैः प्रोक्षयिष्यन्ति यदा त्वां मुनिसत्तमाः ॥ ११ ॥ तदा विशापो भविता हव्यघ्न त्वं न चान्यथा ॥ एवं करि
ष्यसि यदा ततः सर्वं भविष्यति ॥ यद्यदाकाङ्क्षितं ब्रह्मन्नेतन्मिथ्या कदाचन ॥ १२ ॥ ॥ ब्रह्मोवाच ॥ भरद्वाजः पुनः प्राह सखा मेऽसि महामते ॥
मखसंरक्षणं येन स्यान्मे वद करोमि तत् ॥ १३ ॥ संभूय देवा दैतेया मथन्धुः क्षीरसागरम् ॥ अलभन्तामृतं कष्टात्तदस्मत्सुलभं कथम् ॥ १४ ॥
प्रीत्या यदि प्रसन्नोऽसि सुलभं यद्वदस्व तत् ॥ तद्दृषेर्वचनं श्रुत्वा रक्षः प्राह तदा मुदा ॥ १५ ॥ ॥ रक्ष उवाच ॥ ॥ अमृतं गौतमीवारि अमृतं
स्वर्णमुच्यते ॥ अमृतं गोभवं चाऽऽज्यममृतं सोम एव च ॥ १६ ॥ एतैर्मामभिषिञ्चस्व अथ वैतैस्तथा त्रिभिः ॥ गङ्गाया वारिणाऽऽज्येन हिरण्येन

तथैव च ॥ सर्वेभ्योऽप्यधिकं दिव्यममृतं गौतमीजलम् ॥ १७ ॥ ॥ ब्रह्मोवाच ॥ ॥ एतदाकर्ण्य स ऋषिः परं संतोषमागतः ॥ पाणावादाय गङ्गा
याः सलिलामृतमादरात् ॥ १८ ॥ तेनाकरोद्दृषी रक्षो ह्यभिषिक्तं तदा मखे ॥ पुनश्च यूपे च पशावृत्विक्षु मखमण्डले ॥ १९ ॥ सर्वमे
वाभवच्छुक्लमभिषेकान्महात्मनः ॥ तद्रक्षोऽपि तदा शुक्लो भूत्वोत्पन्नो महाबलः ॥ २० ॥ यः पुरा कृष्णरूपोऽभूत्स तु शुक्लोऽभवत्क्षणात् ॥ यज्ञं सर्व
समाप्याथ भरद्वाजः प्रतापवान् ॥ २१ ॥ ऋत्विजोऽपि विसृज्याथ यूपं गंगोदकेऽक्षिपत् ॥ गंगामध्ये तद्धि यूपमद्याप्यास्ते महामते ॥ २२ ॥
अभिषिक्तं चामृतेन अभिज्ञानं तु तन्महत् ॥ तत्र तीर्थे पुना रक्षो भरद्वाजमुवाच ह ॥ २३ ॥ ॥ रक्ष उवाच ॥ ॥ अहं यामि भरद्वाज कृतः शुक्ल
स्त्वया पुनः ॥ तस्मात्तवात्र तीर्थे ये स्नानदानादिपूजनम् ॥ २४ ॥ कुर्युस्तेषामभीष्टानि भवेयुर्यत्फलं मखे ॥ स्मरणादपि पापानि नाशं यान्तु सदा
मुने ॥ २५ ॥ ततः प्रभृति तत्तीर्थं शुक्लतीर्थमिति स्मृतम् ॥ गौतम्यां दण्डकारण्ये स्वर्गद्वारमपावृतम् ॥ २६ ॥ उभयोस्तीरयोः सप्त सहस्राण्यप
राणि च ॥ तीर्थानां मुनिशार्दूल सर्वसिद्धिप्रदायिनाम् ॥ २७ ॥ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये शुक्लतीर्थादुभयतीरस्थ

सप्तसहस्रतीर्थवर्णनं नाम त्रिषष्टितमोऽध्यायः ॥ ६३ ॥ ॥ ब्रह्मोवाच ॥ ॥ चक्रतीर्थमिति ख्यातं स्मरणात्पापनाशनम् ॥ तस्यं प्रभावं वक्ष्यामि
शृणु यत्नेन नारद ॥ १ ॥ ऋषयः सप्त विख्याता वसिष्ठप्रमुखा मुने ॥ गौतम्यास्तीरमाश्रित्य सत्रयज्ञमुपासते ॥ २ ॥ तत्र विघ्न उपक्रान्ते रक्षोभि
रतिभीषणे ॥ मामभ्येत्याथ मुनयो रक्षःकृत्यं न्यवेदयन् ॥ ३ ॥ तदाऽहं प्रमदारूपं माययाऽऽसृज्य नारद ॥ यस्याश्च दर्शनादेव नाशं यान्त्यथ
राक्षसाः ॥ ४ ॥ एवमुक्ता तु तां प्रादामृषिभ्यः प्रमदां मुने ॥ मद्वाक्यादृषयो मायामादाय पुनरागमन् ॥ ५ ॥ अजैका या समाख्याता कृष्णलोहित
रूपिणी ॥ मुक्तकेशीत्यभिधया साऽऽस्तेऽद्यापि स्वरूपिणी ॥ ६ ॥ लोकत्रितयसंमोहदायिनी कामरूपिणी ॥ तद्बलात्स्वस्थमनसः सर्वे च मुनि
सत्तमाः ॥ ७ ॥ गौतमीं सरितां श्रेष्ठां पुनर्यज्ञाय दीक्षिताः ॥ पुनस्तन्मखनाशाय राक्षसाः समुपागमन् ॥ ८ ॥ यज्ञवाटान्तिके मायां दृष्ट्वा
राक्षसपुंगवाः ॥ ततो नृत्यन्ति गायन्ति हसन्ति च रुदन्ति च ॥ ९ ॥ माहेश्वरी महामाया प्रभावेणातिदर्पिता ॥ तेषां मध्ये दैत्यपतिः शम्बरो
नाम वीर्यवान् ॥ १० ॥ मायारूपां तु प्रमदां भक्षयामास नारद ॥ तदद्भुतमतीवाऽऽसीत्तन्मायाबलदर्शिनाम् ॥ ११ ॥ मखे विध्वंस्यमाने तु ते
विष्णुं शरणं ययुः ॥ प्रादाद्विष्णुश्चक्रमथो मुनीनां रक्षणाय तु ॥ १२ ॥ चक्रं तद्राक्षसानाजौ दैत्यांश्च दनुजांस्तथा ॥ चिच्छेद तद्भयादेव मृता राक्ष
सपुंगवाः ॥ १३ ॥ ऋषिभिस्तन्महासत्रं संपूर्णमभवत्तदा ॥ विष्णोः प्रक्षालितं चक्रं गङ्गाम्भोभिः सुदर्शनम् ॥ १४ ॥ ततः प्रभृति तत्तीर्थं चक्रतीर्थ

मुदाहृतम् ॥ तत्र स्नानेन दानेन सत्रयागफलं लभेत् ॥ १५ ॥ तत्र पञ्चशतान्यासंस्तीर्थानां पापहारिणाम् ॥ तेषु स्नानं तथा दानं प्रत्येकं मुक्ति
दायकम् ॥ १६ ॥ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये चक्रतीर्थादिपञ्चशततीर्थवर्णनं नाम चतुःषष्टितमोऽध्यायः ॥ ६४ ॥ ॥
ब्रह्मोवाच ॥ वाणीसंगममाख्यातं यत्र वागीश्वरो हरः ॥ तत्तीर्थं सर्वपापानां मोचनं सर्वकामदम् ॥ १ ॥ तत्र स्नानेन दानेन ब्रह्महत्यादिनाशनम् ॥ ब्रह्म
विष्णोश्च संवादे महत्त्वे च परस्परम् ॥ २ ॥ तयोर्मध्ये महादेवो ज्योतिर्मूर्तिरभूत्किल ॥ तत्रैव वागुवाचेदं दैवी पुत्र तयोः शुभा ॥ ३ ॥ अहमस्मि
महांस्तत्र अहमस्मीति वै मिथः ॥ देवी वाक्तावुभौ प्राह यस्त्वस्यान्तं तु पश्यति ॥ ४ ॥ स तु ज्येष्ठो भवेत्तस्मान्मा वादं कर्तुमर्हथः ॥ तद्वाक्या
द्विष्णुरगमदधोऽहं चोर्ध्वमेव च ॥ ५ ॥ ततो विष्णुः शीघ्रमेत्य ज्योतिःपार्श्व उपाविशत् ॥ अप्राप्यान्तमहं प्रायां दूराद्दूरतरं क्षुने ॥ ६ ॥ ततः श्रा
न्तो निवृत्तोऽहं द्रष्टुमीशं तु तं प्रभुम् ॥ तदैवं मम धीरासीद्दृष्टश्चान्तो मया भृशम् ॥ ७ ॥ अस्य देवस्य तद्विष्णोर्मम ज्यैष्ठ्यं स्फुटं भवेत् ॥ पुंन
श्चापि मम त्वेवं मतिरासीन्महामते ॥ ८ ॥ सत्यैर्वचनैः कथं वक्ष्ये पीडितोऽप्यनृतं वचः ॥ नानाविधेषु पापेषु नानृतात्पातकं परम् ॥ ९ ॥ सत्ये
र्वचनैरसत्यं वा वाचं वक्ष्ये कथं त्विति ॥ ततोऽहं पञ्चमं वक्त्रं गर्दभाकृतिभीषणम् ॥ १० ॥ कृत्वा तेनानृतं वक्ष्य इति ध्यात्वा चिरं तदा ॥
अवं तं हरिं तत्र आसीनं जगतां प्रभुम् ॥ ११ ॥ अस्य चान्तो मया दृष्टस्तेन ज्यैष्ठ्यं जनार्दन ॥ ममेति वदतः पार्श्वे उभौ तौ हरिशंकरौ ॥ १२ ॥
एकरूपत्वमापन्नौ सूर्याचन्द्रमसाविव ॥ तौ दृष्ट्वा विस्मितौ भीतश्चास्तवं तावुभावपि ॥ ततः क्रुद्धौ जगन्नाथौ वाचं तामिदमूचतुः ॥ १३ ॥ ॥
हरिहरावूचतुः ॥ दुष्टे त्वं निम्नगा भूया नानृतादस्ति पातकम् ॥ १४ ॥ ॥ ब्रह्मोवाच ॥ ततः सा विह्वला भूत्वा नदीभावमुपागता ॥ तद्दृष्ट्वा विस्मितो
भीतस्तामप्यवमदं तदा ॥ १५ ॥ यस्मादसत्यमुक्ताऽसि ब्रह्मवाचि स्थिता सती ॥ तस्माददृश्या त्वं भूयाः पापरूपाऽस्यसंशयम् ॥ १६ ॥ एतच्छ्रुत्वा
विदित्वा तु तौ देवौ प्रणतां तदा ॥ शिरापत्वं प्रार्थयन्ती तुष्टाव च पुनः पुनः ॥ १७ ॥ ततस्तुष्टौ देवदेवौ प्रार्थितौ त्रिदशार्चितौ ॥ प्रीत्या हरहार
देवं वाचं वाक्यमथोचतुः ॥ १८ ॥ ॥ हरिहरावूचतुः ॥ गङ्गया संगता भद्रे यदा त्वं लोकपावनी ॥ तदा पुनर्वपुस्ते स्यात्पवित्रं हि सुशोभने ॥
॥ १९ ॥ ॥ ब्रह्मोवाच ॥ तथेत्युक्त्वा साऽपि देवी गङ्गया संगताऽभवत् ॥ भागीरथी गौतमी च ततश्चापि स्वकं वपुः ॥ २० ॥ देवी सा व्यनम
द्ब्रह्मन्देवानामपि दुर्लभम् ॥ गौतम्यां सैव विख्याता नाम्ना वाणीति पुण्यदा ॥ २१ ॥ भागीरथ्यां सैव देवी सरस्वत्यभिधीयते ॥ उभयत्रापि
विख्यातः संगमो लोकपूजितः ॥ २२ ॥ सरस्वतीसंगमश्च वाणीसंगम एव च ॥ गौतम्या संगता देवी वाणी वाचा सरस्वती ॥ २३ ॥ सर्वत्र

पूजितं तीर्थं तत्र वाचा शिवं प्रभुम् ॥ देवेश्वरं पजयित्वा विशापमगममच्युतः ॥ २४ ॥ ब्रह्मा विधूय वाग्दौष्ट्यं स्वं च धामागमत्पुनः ॥ तस्मा
त्तत्र शुचिर्भूत्वा स्नात्वा तत्र च संगमे ॥ २५ ॥ वाग्वीश्वरं ततो दृष्ट्वा तावता मुक्तिमाप्नुयात् ॥ दानहोमादिकं किंचिदुपवासादिकां क्रियाम् ॥२६॥
यः कुर्यात्संगमे पुण्ये संसारे न भवेत्पुनः ॥ एकोनविंशतिशतं तीर्थानां तीरयोर्द्वयोः ॥ नानाजन्मार्जिताशेषपापक्षयविधायिनाम् ॥ २७ ॥ इति
श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये वाणीसंगमवागीश्वराभ्युभयतटस्थैकोनविंशतिशततीर्थवर्णनं नाम पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥
ब्रह्मोवाच ॥ विष्णुतीर्थमिति ख्यातं तत्र वृत्तमिदं शृणु ॥ मौद्गल्य इति विख्यातो मुद्गलस्य सुतो ऋषिः ॥ १ ॥ तस्य भार्या तु जाबाला नाम्ना
ख्याता सुपुत्रिणी ॥ पिता ऋषिस्तथा वृद्धो मुद्गलो लोकविश्रुतः ॥२॥ तस्य भार्या तथा ख्याता नाम्ना भागीरथी शुभा ॥ स मौद्गल्यः प्रातरेव गंगां
स्नाति यतव्रतः ॥ ३ ॥ नित्यमेव त्विदं कर्म तस्याऽऽसीन्मुनिसत्तम ॥ गंगातीरे कुशैर्मृद्भिः शमीपुष्पैरहर्निशम् ॥ ४ ॥ गुरूदितेन मार्गेण स्वमानस
सरोरुहे ॥ आवाहनं नित्यमेव विष्णोश्चक्रे स मौद्गलिः ॥ ५ ॥ तेनाऽऽहूतस्त्वरन्नेति लक्ष्मीभर्ता जगत्पतिः ॥ वैनतेयमथाऽऽरुह्य शंखचक्रगदाधरः
॥ ६ ॥ पूजितस्तेन ऋषिणा स मौद्गल्येन यत्नतः ॥ प्रब्रूते च कथाश्चित्रा मौद्गल्याय जगत्प्रभुः ॥ ७ ॥ ततोऽपराह्णसमये विष्णुः प्राह स मौद्ग
लिम् ॥ याहि वत्स स्वभवनं श्रान्तोऽसीति पुनः पुनः ॥ ८ ॥ एवमुक्तः स देवेन विष्णुना याति स द्विजः ॥ जगत्प्रभुस्ततो याति देवैर्युक्तः
स्वमन्दिरम् ॥ ९ ॥ मौद्गल्योऽपि तथाऽभ्येत्य किंचिदादाय नित्यशः ॥ स्वमेवं भवनं विद्वान्भार्यायै स्वार्जितं धनम् ॥ १० ॥ ददाति स महा
विष्णुचरणाब्जपरायणः ॥ मौद्गल्यस्य प्रिया साऽपि पतिव्रतपरायणा ॥ ११ ॥ शाकं मूलं फलं वाऽपि भर्त्राऽऽनीतं तु यत्नतः ॥ सुसंस्कृत्या
तिथीनां च बालानां च भर्तुरेव च ॥ १२ ॥ दत्त्वा तु भोजनं तेभ्यः पश्चाद्भुंक्ते यतव्रता ॥ भुक्तवत्स्वथ सर्वेषु रात्रौ नित्यं स मौद्गलिः ॥ १३ ॥
विष्णोः श्रुताः कथाश्चित्रास्तेभ्यो वक्त्यथ हर्षितः ॥ एवं बहुतिथे काले व्यतीते चातिविस्मिता ॥ मौद्गल्यस्य रहो भार्या भर्तारं वाक्यमब्रवीत् ॥
॥ १४ ॥ जाबालोवाच ॥ यदि ते विष्णुरभ्येति समीपं त्रिदशार्चितः ॥ तथाऽपि कष्टमस्माकं कस्मादिति जगत्प्रभुम् ॥ १५ ॥ तत्पृच्छ त्वं महा
प्राज्ञ यदाऽसौ विष्णुरेति च ॥ यस्मिंश्च स्मृतमात्रे तु जराजन्मरुजो मृतिः ॥ नाशं यान्ति कुतो दृष्टे तस्मात्पृच्छ जगत्पतिम् ॥ १६ ॥ ब्रह्मोवाच ॥
तथेत्युक्त्वा प्रियावाक्यान्मौद्गल्यो नित्यवद्धरिम् ॥ पूजयित्वा विनीतश्च पप्रच्छ स कृताञ्जलिः ॥ १७ ॥ मौद्गल्य उवाच ॥ त्वयि स्मृते जगन्नाथ
शोकदारिद्र्यदुष्कृतम् ॥ नाशं याति विपत्तिर्मे त्वयि दृष्टे कथं स्थिता ॥ १८ ॥ श्रीविष्णुरुवाच ॥ स्वकृतं भुज्यते भूतैः सर्वैः सर्वत्र सर्वदा ॥ न

कोऽपि कस्यचित्किंचित्करोत्यत्र हिताहिते ॥ १९ ॥ यादृशं चोप्यते बीजं फलं भवति तादृशम् ॥ रसालः स्यान्न निम्बस्य बीजाज्जात्वपि कुत्र
चित् ॥ २० ॥ न कृता गौतमीसेवा नार्चितौ हरिशंकरौ ॥ न दत्तं यैश्च विप्रेभ्यस्ते कथं भाजनं श्रियः ॥ २१ ॥ त्वया न दत्तं किंचिच्च ब्राह्म
णेभ्यो ममापि च ॥ ॥ यदीयते तदेवेह परस्मिंश्चोपतिष्ठति ॥ २२ ॥ मृद्भिर्वार्भिः कुशैर्मन्त्रैः शुचिकर्म सदैव यत् ॥ करोति तस्मात्पूतात्मा शरी
रस्य च शोषणात् ॥ २३ ॥ विना दानेन न क्वापि भोगावाप्तिर्नृणां भवेत् ॥ सत्कर्माचरणाच्छुद्धो विरक्तः स्यात्ततो नरः ॥ २४ ॥ ततोऽ
प्रतिहतज्ञानो जीवन्मुक्तस्ततो भवेत् ॥ सर्वेषां सुलभा मुक्तिर्मद्भक्त्या चेह पूर्वतः ॥ २५ ॥ भुक्तिर्दानादिना सर्वभूतदुःखनिबर्हणात् ॥ अथवा
लप्स्यसे मुक्त भक्त्या भुक्तिं न लप्स्यसे ॥ २६ ॥ मौद्गल्य उवाच ॥ भक्त्या मुक्तिः कथं भूयाद्भुक्तेर्मुक्तिः सुदुर्लभा ॥ जाता चेद्देहिनां मुक्तिः
किमन्येन प्रयोजनम् ॥ २७ ॥ भक्त्या मुक्तिः सर्वपूज्या तामिच्छेयं जगन्मय ॥ २८ ॥ विष्णुरुवाच ॥ एतदेवान्तरं ब्रह्मन्दीयते मामनुस्मरन् ॥
ब्राह्मणायाथवाऽर्थिभ्यस्तदेवाक्षयतां व्रजेत् ॥ २९ ॥ मामध्यात्वाऽथ यद्द्यात्तत्तन्मात्रफलप्रदम् ॥ तत्पुनर्दत्तमेवेह न भोगायात्र कल्पते ॥ ३० ॥
तस्मादेहि महाबुद्धे भोज्यं किंचिन्मम ध्रुवम् ॥ अथवा विप्रमुख्याय गौतमीतीरमाश्रितः ॥ ३१ ॥ ब्रह्मोवाच ॥ मौद्गल्यः प्राह तं विष्णुं देयं मम
न विद्यते ॥ नान्यत्किंचन देहादि यत्तत्त्वयि समर्पितम् ॥ ३२ ॥ ततो विष्णुर्गरुत्मन्तं प्राह शीघ्रं जगत्पतिः ॥ इहाऽऽनयस्व कणिशं मयायं
चार्पयिष्यति ॥ ३३ ॥ ततो योग्यानयं भोगान्प्राप्स्यते मनसः प्रियान् ॥ आकर्ण्य स्वामिनाऽऽदिष्टं तथा चक्रे स पक्षिराट् ॥ ३४ ॥ विष्णु
हस्ते कणान्प्रादात्स मौद्गल्यो यतव्रतः ॥ एतस्मिन्नन्तरे विष्णुर्विश्वकर्माणमब्रवीत् ॥ ३५ ॥ विष्णुरुवाच ॥ यावच्चास्य कुले सप्त पुरुषास्तावदेव
तु ॥ भवितारो महाबुद्धे तावत्कामा मनीषिताः ॥ गावो हिरण्यं धान्यानि वस्त्राण्याभरणानि च ॥ ३६ ॥ ब्रह्मोवाच ॥ यच्च किंचिन्मनःप्रीत्यै लोके
भवति भूषणम् ॥ तत्सर्वमाप मौद्गल्यो विष्णुगंगाप्रभावतः ॥ ३७ ॥ गृहं गच्छेति मौद्गल्यो विष्णुनोक्तस्ततो ययौ ॥ आश्रमे स्वस्य सर्वार्धं दृष्ट्वा
ऋषिरभाषत ॥ ३८ ॥ ऋषिरुवाच ॥ अहो दानप्रभावोऽयमहो विष्णोरनुस्मृतिः ॥ अहो गंगाप्रभावश्च कैर्वीचार्यो महानयम् ॥ ३९ ॥ ब्रह्मोवाच ॥
मौद्गल्यो भार्यया सार्धं पुत्रैः पौत्रैश्च बन्धुभिः ॥ पितृभ्यां बुभुजे भोगान्भुक्तिं मुक्तिमवाप च ॥ ४० ॥ ततः प्रभृति तत्तीर्थं मौद्गल्यं वैष्णवं तथा ॥
तत्र स्नानं च दानं च भुक्तिमुक्तिफलप्रदम्॥४१॥ तत्र श्रुतिः स्मृतिर्वाऽपि तीर्थस्य स्यात्कथंचन ॥ तस्य विष्णुर्भवेत्प्रीतः पापैर्मुक्तः सुखी भवेत्॥४२॥
एकादश सहस्राणि तीर्थानां तीरयोर्द्वयोः ॥ सर्वार्थदायिनां तत्र स्नानदानजपादिभिः ॥ ४३ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये

मौद्गल्यविष्णुतीर्थाद्येकादशसहस्रतीर्थवर्णनं नाम षट्षष्टितमोऽध्यायः ॥ ६६ ॥ ब्रह्मोवाच ॥ लक्ष्मीतीर्थमिति ख्यातं साक्षाल्लक्ष्मीविवर्धनम् ॥ अलक्ष्मीनाशनं पुण्यमाख्यानं शृणु नारद ॥ १ ॥ संवादश्च पुरा त्वासील्लक्ष्म्याः पुत्र दरिद्रया ॥ परस्परविरोधिन्यावुभे विश्वं समीयतुः ॥ २ ॥ ताभ्यामव्यापृतं वस्तु तन्नास्ति भुवनत्रये ॥ मम जैष्ठ्यं मम ज्यैष्ठ्यमित्यूचतुरुभे मिथः ॥ अहं पूर्वं समुद्भूता इत्याह श्रियमोजसा ॥ ३ ॥ ॥ श्रीलक्ष्मीरुवाच ॥ कुलं शीलं जीवितं वा देहिनामहमेव तु ॥ मया विना देहभाजो जीवन्तोऽपि मृता इव ॥ ४ ॥ ब्रह्मोवाच ॥ दरिद्रया च सा प्रोक्ता सर्वेभ्यो ह्यधिका ह्यहम् ॥ मुक्तिर्मदाश्रिता नित्यं दरिद्रैवं वचोऽब्रवीत् ॥ ५ ॥ कामः क्रोधश्च लोभश्च मदो मात्सर्यमेव च ॥ यत्राहमस्मि तत्रैते न तिष्ठन्ति कदाचन ॥ ६ ॥ न भयोद्भूतिरुन्माद इर्ष्या उद्धतवृत्तिता ॥ यत्राहमस्मि तत्रैते न तिष्ठन्ति कदाचन ॥७॥ दरिद्राया वचः श्रुत्वा लक्ष्मीस्तांप्रत्यभाषत ॥ ८ ॥ ॥ लक्ष्मीरुवाच ॥ अलंकृतो मया जन्तुः सर्वो भवति पूजितः ॥ निर्धनः शिवतुल्योऽपि सर्वैरप्यभिभूयते ॥ ९ ॥ देहीति वचनद्वारा देहस्थाः पञ्च देवताः ॥ सद्यो निर्गत्य गच्छन्ति धीश्रीह्रीशान्तिकीर्तयः ॥ १० ॥ तावद्गुणा गुरुत्वं च यावन्नार्थयते परम् ॥ अर्थी चेत्पुरुषो जातः क्व गुणाः क्व च गौरवम् ॥ ११ ॥ तावत्सर्वोत्तमो जन्तुस्तावत्सर्वगुणालयः ॥ नमस्यः सर्वलोकानां यावन्नार्थयते परम् ॥ १२ ॥ कष्टमेतन्महापापं निर्धनत्वं शरीरिणाम् ॥ न मानयति नो वक्ति न स्पृशत्यधनं जनः ॥ १३ ॥ अहमेव ततः श्रेष्ठा दरिद्रे शृणु मे वचः ॥ १४ ॥ ॥ ब्रह्मोवाच ॥ तल्लक्ष्मीवचनं श्रुत्वा दरिद्रा वाक्यमब्रवीत् ॥ १५ ॥ ॥ दरिद्रोवाच ॥ वक्तुं न लक्ष्मिज्येष्ठाऽहमिति वै लज्जसे मुहुः ॥ पापेषु रमसे नित्यं विहाय पुरुषोत्तमम् ॥ १६ ॥ विश्वस्त वञ्चका नित्यं भवती श्लाघते कथम् ॥ सुखं न तादृक्त्वत्प्राप्तौ पश्चात्तापो यथा गुरुः ॥ १७ ॥ न तथा जायते पुंसां सुरया दारुणो मदः ॥ त्वत्संनिधानमात्रेण यथा वै विदुषामपि ॥ १८ ॥ सदैव रमसे लक्ष्मि प्रायस्त्वं पापकारिषु ॥ अहं वसामि योग्येषु धर्मशीलेषु सर्वदा ॥ १९ ॥ शिवविष्ण्वनुरक्तेषु कृतज्ञेषु महत्सु च ॥ सदाचारेषु शान्तेषु गुरुसेवोद्यतेषु च ॥ २० ॥ सत्सु विद्वत्सु शूरेषु कृतबुद्धिषु साधुषु ॥ निवसामि सदा लक्ष्मि तस्माज्ज्यैष्ठ्यं मयि स्थितम् ॥ २१ ॥ ब्राह्मणेषु शुचिष्मंत्सु व्रतचारिषु भिक्षुषु ॥ निर्भयेषु वसिष्यामि लक्ष्मीस्त्वं शृणु ते स्थितिम् ॥ २२ ॥ राजघर्तिषु पापेषु निष्ठुरेषु खलेषु च ॥ पिशुनेषु च लुब्धेषु विकृतेषु शठेषु च ॥ २३ ॥ अनार्येषु कृतघ्नेषु धर्मघातिषु सर्वदा ॥ मित्रद्रोहिष्वनिष्टेषु भग्नचित्तेषु वर्तसे ॥२४॥ ब्रह्मोवाच ॥ एवं विवदमाने ते जग्मतुर्मामुभे अपि ॥ तयोर्वाक्यमुपश्रुत्य मयोक्ते ते उभे अपि ॥ २५ ॥ मत्तः पूर्वतरा पृथ्वी आपः पूर्वतरास्ततः॥ स्त्रीणां विवादं ता एव स्त्रियो जानन्ति नेतरे ॥ २६ ॥ विशेषतः पुनस्ताभ्यः

कमण्डलुभवाश्च वाः ॥ तत्रापि गौतमी देवी निश्चयं कथयिष्यति ॥ २७ ॥ सैव सर्वार्तिसंहर्त्री सैव संदेहकर्तरी ॥ ते मद्वाक्याद्भुवं गत्वा भूम्या
च सहिते अपि ॥ २८ ॥ अद्रिश्च सहिताः सर्वा गौतमीं ययुरापगाम् ॥ भूमिरामस्तयोर्वाक्यं गौतम्यै क्रमशः स्फुटम् ॥ २९ ॥ सर्वं निवेदय
मासुर्यथावृत्तं प्रणम्य ताम् ॥ दरिद्रायाश्च लक्ष्म्याश्च वाक्यं मध्यस्थवत्तदा ॥ ३० ॥ शृण्वत्सु लोकपालेषु शृण्वत्यां भुवि नारद ॥ शृण्वतीष्वप्सु
सा गङ्गा दरिद्रां वाक्यमब्रवीत् ॥ संप्रशस्य तथा लक्ष्मीं गौतमी वाक्यमब्रवीत् ॥३१॥ ॥ गौतम्युवाच ॥ ॥ ब्रह्मश्रीश्च तपःश्रीश्च यज्ञश्रीः कीर्तिसं
हिता ॥ धनश्रीश्च यशश्रीश्च विद्या प्रज्ञा सरस्वती ॥ ३२ ॥ भुक्तिश्रीश्चाथ मुक्तिश्च स्मृतिर्लज्जा धृतिः क्षमा ॥ सिद्धिस्तुष्टिस्तथा पुष्टिः शान्ति
रापस्तथा मही ॥ ३३ ॥ अहंशक्तिरयोषध्यः श्रुतिः शुद्धिर्विभावरी ॥ द्यौर्ज्योत्स्ना आशिषः स्वस्तिर्व्याप्तिर्माया उषा शिवा ॥ ३४ ॥ यत्किंचिद्वि
श्रुते लोके लक्ष्म्या व्याप्तं चराचरम् ॥ ब्राह्मणेष्वथ धीरेषु क्षमावत्स्वथ साधुषु ॥ ३५ ॥ विद्यायुक्तेषु चान्येषु भुक्तिमुक्त्यनुसारिषु ॥ यद्यद्रम्यं
सुन्दरं वा तत्तल्लक्ष्मीविजृम्भितम् ॥ ३६ ॥ किमत्र बहुनोक्तेन सर्वं लक्ष्मीमयं जगत् ॥ यस्मिन्कस्मिंश्च यत्किंचिदुत्कृष्टं परिदृश्यते ॥ ३७ ॥ लक्ष्मी
अर्थं सु तत्सर्वं तया हीनं न किंचन ॥ अत्रेमां सुन्दरीं देवीं स्पर्धयन्ती न लज्जसे ॥ ३८ ॥ गच्छ गच्छेति तां गङ्गा दरिद्रां वाक्यमब्रवीत् ॥ ततः
प्रभृति गंगाम्भो दरिद्रावैरकार्यभूत् ॥ ३९ ॥ तावद्दरिद्राभिभवो गंगा यावन्न सेव्यते ॥ ततः प्रभृति तत्तीर्थमलक्ष्मीनाशनं शुभम् ॥ ४० ॥ तत्र
स्नानेन दानेन लक्ष्मीवान्पुण्यवान्भवेत् ॥ तीर्थानां षट्सहस्राणि तस्मिंस्तीर्थे महामते ॥ देवर्षिमुनिजुष्टानां सर्वसिद्धिप्रदायिनाम् ॥ ४१ ॥
इति श्रीपद्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये लक्ष्मीतीर्थादिषट्सहस्रतीर्थवर्णनं नाम सप्तषष्टितमोऽध्यायः ॥ ६७ ॥ ॥
ब्रह्मोवाच ॥ भानुतीर्थमिति ख्यातं सर्वसिद्धिकरं नृणाम् ॥ तत्रेदं वृत्तमाख्यास्ये महापातकनाशनम् ॥ १ ॥ शर्यातिरिति विख्यातो राजा परम
धार्मिकः ॥ तस्य भार्या स्थविष्ठेति रूपेणाप्रतिमा भुवि ॥ २ ॥ मधुच्छन्दा इति ख्यातो विश्वामित्राकुलोद्भवः ॥ पुरोधास्तस्य नृपतेर्ब्रह्मर्षिः
शमिनां प्रभुः ॥ ३ ॥ दिशो विजेतुं स जगाम राजा पुरोधसा तेन नृपप्रवीरः ॥ पुरोधसं प्राह महानुभावं जित्वा दिशश्चाध्वनि सन्निविष्टः ॥ ४ ॥
पृच्छेदं केन खेदं गतोऽसि हेतुं वदस्वेति महानुभाव ॥ त्वमेव राज्ये मम सर्वमान्यः समस्तविद्यानिरवद्यबोधः ॥ ५ ॥ विधूतपापः परितोषशून्यः
किमन्यचेता इव लक्ष्यसे त्वम् ॥ जितेयमुर्वी विजिता नरेन्द्रा हर्षस्य हेतौ महतीह जाते ॥ ६ ॥ किं त्वं कृशो मे वद सत्यमेव द्विजातिवर्योत्तिम
हानुभाव ॥ संभाष्य शर्यातिरुवाच विप्रो मधुच्छन्दाः प्रेममयीं प्रियोक्तिम् ॥७॥ मधुच्छन्दा उवाच ॥ शृणु भूपाल मद्वाक्यं भार्यया यदुदीरितम् ॥

स्थिते यामे वयं यामो यामिनी चार्धगामिनी ॥ ८ ॥ स्वामिनी चास्य देहस्य कामिनी मां प्रतीक्षते ॥ स्मृत्वा तत्कामिनीवाक्यं शोषं याति कलेवरम् ॥९॥ विकारे स्मरसंजाते जीवातुर्नलिनानना ॥ ब्रह्मोवाच ॥ विहस्य चाब्रवीद्राजा पुरोधसमरिंदमः ॥१०॥ राजोवाच ॥ त्वं गुरुर्मम मित्रं च किमात्मानं विडम्बसे ॥ किमनेन महाप्राज्ञ मम वाक्येन मानद ॥ क्षणविध्वंसिनि सुखे का नामाऽऽस्था महात्मनाम् ॥ ११ ॥ ब्रह्मोवाच ॥ एतदाकर्ण्य मतिमान्मधुच्छन्दा वचोऽब्रवीत् ॥ १२ ॥ मधुच्छन्दा उवाच ॥ यत्राऽऽनुकूल्यं दंपत्योस्त्रिवर्गस्तत्र वर्धते ॥ तत्रेदं दूषणं राजन्भूषणं चातिमन्यताम् ॥ १३ ॥ ब्रह्मोवाच ॥ आजगाम स्वकं देशं महत्या सेनया वृतः ॥ परीक्षार्थं च तत्प्रेम पुर्यां वार्तामदीदिशत् ॥ १४ ॥ दिशो विजेतुं शर्यातौ याते राक्षसपुंगवः ॥ हत्वा रसातलं यातो राजानं सपुरोधसम् ॥ १५ ॥ राज्ञो भार्यां निश्चयाय प्रवृत्ता मुनिसत्तम ॥ वार्तां श्रुत्वा दूतमुखान्मधुच्छन्दःप्रिया पुनः ॥ १६ ॥ तदैवाभूद्गतप्राणा तद्विचित्रमिवाभवत् ॥ पुर्यां वृत्तं तु ते दृष्ट्वा दूता राज्ञे न्यवेदयन् ॥ १७ ॥ यत्कृतं राज पत्नीभिः प्रियया च पुरोधसः ॥ विस्मितो दुःखितो राजा पुनर्दूतानभाषत ॥ १८ ॥ राजोवाच ॥ शीघ्रं गच्छन्तु हे दूता ब्राह्मण्या यत्कलेवरम् ॥ रक्षन्तु वार्तां कुरुत राजाऽऽगन्ता पुरोधसा ॥ १९ ॥ ब्रह्मोवाच ॥ इति चिन्तातुरे राज्ञि वागुवाचाशरीरिणी ॥ २० ॥ आकाशवागुवाच ॥ विधास्ये त्यखिलं गंगा राजंस्तव समीहितम् ॥ सर्वाभिषंगशमनी पावनी भुवि गौतमी ॥ २१ ॥ ब्रह्मोवाच ॥ एतच्छ्रुत्वा स शर्यातिर्गौतमीतीरमाश्रितः ॥ ब्राह्मणेभ्यो धनं दत्त्वा तर्पयित्वा पितॄन्द्विजान् ॥२२॥ पुरोहितं द्विजश्रेष्ठं प्रेषयित्वा धनान्वितम् ॥ अन्यत्र तीर्थे सार्थेषु दानं देहि प्रयत्नतः॥ २३ ॥ एतत्सर्वं न जानाति राज्ञः कृत्यं पुरोहितः ॥ गते तस्मिन्गुरौ राजा वैश्वामित्रे महात्मनि ॥ २४ ॥ सर्वं बलं प्रेषयित्वा गंगातीरेऽग्निमाविशत् ॥ इत्युक्त्वा स तु राज्ञेन्द्रो गंगां भानुं सुरानपि ॥ २५ ॥ यदि दत्तं यदि हुतं यदि त्राता प्रजा मया ॥ तेन सत्येन सा साध्वी ममाऽऽयुष्येण जीवतु ॥ २६ ॥ इत्युक्त्वाऽग्नौ प्रविष्टे तु शर्यातौ नृपसत्तमे ॥ तदैव जीविता भार्या राज्ञस्तस्य पुरोधसः ॥ २७ ॥ अग्निप्रविष्टं राजानं श्रुत्वा विस्मय कारणम् ॥ पतिव्रतां तथा भार्यां मृतां जीवान्वितां पुनः ॥ २८ ॥ तदर्थं चापि राजानं त्यक्तात्मानं विशेषतः ॥ आत्मनश्च पुनः कृत्यमस्मर नृपतेर्गुरुः ॥ २९ ॥ अहंमप्यग्निमावेक्ष्य उतं यास्ये प्रियान्तिकम् ॥ अथवेह तपस्तप्स्ये ततो निश्चयवान्द्विजः ॥ ३० ॥ एतदेवाऽऽत्मनः कृत्यं मन्ये सुकृतमेव च ॥ जीवयामि च राजानं ततो यामि प्रियां पुनः ॥ ३१ ॥ एतदेव शुभं मे स्यात्ततस्तुष्टाव भास्करम् ॥ न ह्यन्यः कोऽपि देवोऽस्ति सर्वाभीष्टप्रदो रविः ॥ ३२ ॥ मधुच्छन्दा उवाच ॥ नमोऽस्तु तस्मै सूर्याय मुक्तयेऽमिततेजसे ॥ छन्दोमयाय देवाय ॐ कारार्थाय ते

नमः ॥३३॥ विरूपाय सुरूपाय त्रिगुणाय त्रिमूर्तये ॥ स्थित्युत्पत्तिविनाशानां हेतवे प्रभविष्णवे ॥३४॥ ब्रह्मोवाच ॥ ततः प्रसन्नः सूर्योऽभूद्वरयस्वेत्यभाषत ॥ ३५ ॥ मधुच्छन्दा उवाच ॥ राजानं देहि देवेश भार्यां च प्रियवादिनीम् ॥ आत्मनश्च शुभान्पुत्रान्राज्ञश्चैव शुभान्वरान् ॥ ३६ ॥ ब्रह्मोवाच ॥ ततः प्रादाज्जगन्नाथः शर्यातिं रत्नभूषितम् ॥ तां च भार्यां वरानन्यान्सर्वं क्षेममयं तथा ॥ ३७ ॥ ततो यातः प्रियाविष्टः प्रीतेन च पुरोधसा ॥ ययौ सुखी स्वकं देशं तत्तु तीर्थं शुभं स्मृतम् ॥ ३८ ॥ तत्र त्रीणि सहस्राणि तीर्थानि गुणवन्ति च ॥ ततः प्रभृति तत्तीर्थं भानुतीर्थमुदाहृतम् ॥ ३९ ॥ मृतसंजीवनं चैव शर्यातं चेति विश्रुतम् ॥ माधुच्छन्दसमाख्यातं स्मरणात्पापनुन्मुने ॥ ४० ॥ तेषु स्नानं च दानं च सर्वक्रतुफलप्रदम् ॥ मृतसंजीवनं तत्स्यादायुरारोग्यवर्धनम् ॥ ४१ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये भान्वादित्रिसहस्रतीर्थवर्णनं नामाष्टषष्टितमोऽध्यायः ॥ ६८॥ ॥ ब्रह्मोवाच ॥ खड्गतीर्थमिति ख्यातं गौतम्या उत्तरे तटे ॥ तत्र स्नानेन दानेन मुक्तिभागी भवेन्नरः ॥ १ ॥ तत्र वृत्तं प्रवक्ष्यामि शृणु नारद यत्नतः ॥ पैलूष इति विख्यातः कवयस्य सुतो द्विजः ॥ २ ॥ कुटुम्बभारात्परितो ह्यर्थार्थी परिधावति ॥ न किमप्याससादासौ ततो वैराग्यमास्थितः ॥ ३ ॥ अत्यन्तविमुखे दैवे व्यर्थीभूते तु पौरुषे ॥ न वैराग्यादन्यदस्ति पण्डितस्यावलम्बनम् ॥ ४ ॥ इति संचिन्तयामास तदाऽसौ निःश्वसन्मुहुः ॥ क्रमागतं धनं नास्ति पोष्याश्च बहवो मम ॥ ५ ॥ मानी चाऽऽत्मा न कष्टार्हो हा धिग्दुर्दैवचेष्टितम् ॥ स कदाचित्वृत्तियुतो वृत्तिभिः परिवर्तयन् ॥ ६ ॥ नालभच्च धनं वृत्तेर्विरागमगमत्तदा ॥ सेवा निषिद्धा या काचिद्गहना दुष्करं तपः ॥ ७ ॥ बलात्त्वाकर्षयंती मां तृष्णा सर्वत्र दुष्कृते ॥ त्वयाऽपकृतमज्ञानात्तस्मात्कृष्णे नमोऽस्तु ते ॥ ८ ॥ एवं विचिन्त्य मेधावी बंधछेदाय किं भवेत् ॥ इत्यालोच्य स पैलूषः पितरं वाक्यमब्रवीत् ॥ ९ ॥ ॥ पैलूष उवाच ॥ ज्ञानासिना क्रोधलोभौ संसृतिं चातिदुस्तराम् ॥ छेत्तीमां केन हे तात तमुपायं वद प्रभो ॥ १० ॥ ॥ कवष उवाच ॥ ईश्वराज्ज्ञानमन्विच्छेदित्येषा वैदिकी श्रुतिः ॥ तस्मादाराधयेशानं ततो ज्ञानमवाप्स्यसि ॥ ११ ॥ ॥ ब्रह्मोवाच ॥ तथेत्युक्त्वा स पैलूषो ज्ञानायेश्वरमार्चयत् ॥ ततस्तुष्टो महेशानो ज्ञानं प्रादाद्विजातये ॥ प्राप्तज्ञानो महाबुद्धिर्गाथाः प्रोवाच मुक्तिदाः ॥ १२ ॥ ॥ पैलूष उवाच ॥ क्रोधस्तु प्रथमं शत्रुर्निष्फलो देहनाशनः ॥ ज्ञानखड्गेन तं छित्त्वा परमं सुखमाप्नुयात् ॥ १३ ॥ तृष्णा बहुविधा माया बन्धनी पापकारिणी ॥ छित्त्वैतां ज्ञानखड्गेन सुखं तिष्ठति मानवः ॥ १४ ॥ सङ्गस्तु परमोऽधर्मो देवादीनामिति श्रुतिः ॥ असङ्गस्याऽऽत्मनोऽप्यस्य सङ्गोऽयं परमो रिपुः ॥ १५ ॥ छित्त्वैनं ज्ञानखड्गेन शिवैकत्वमवाप्नुयात् ॥ संशयः परमो नाशो

धर्मार्थानां विनाशकृत् ॥ १६ ॥ छित्त्वैनं संशयं जन्तुः परमेप्सितमाप्नुयात् ॥ पिशाचीव विशत्याशा निर्दहत्यखिलं सुखम् ॥ पूर्णाहन्तासिना छित्त्वा जीवन्मुक्तिमवाप्नुयात् ॥ १७ ॥ ॥ ब्रह्मोवाच ॥ ततो ज्ञानमवाप्यासौ गङ्गातीरं समाश्रितः ॥ ज्ञानखड्गेन निर्मोहस्ततो मुक्तिमवाप सः ॥ ॥ १८ ॥ तत्तः प्रभृति तत्तीर्थं खड्गतीर्थमिति स्मृतम् ॥ ज्ञानतीर्थं च कवषं पैलूषं सर्वकामदम् ॥ १९ ॥ इत्यादिपट्सहस्राणि तीर्थान्याहुर्महर्षयः ॥ अशेषपापतापौघहराणीष्टप्रदानि च ॥ २० ॥ इति श्रीब्रह्मपु० गौतमीमाहात्म्ये तीर्थमाहात्म्ये खड्गतीर्थवर्णनं नामैकोन सप्ततितमोऽध्यायः ॥ ६९ ॥ ॥ ब्रह्मोवाच ॥ आत्रेयमिति विख्यातमन्विन्द्रं तीर्थमुत्तमम् ॥ तस्य प्रभावं वक्ष्यामि भ्रष्टराज्यप्रदायकम् ॥ १ ॥ गौतम्या उत्तरे तीर आत्रेयो भगवानृषिः ॥ अन्वारेभेऽथ सत्राणि ऋत्विग्भिर्मुनिभिर्वृतः ॥ २ ॥ तस्य होताऽभवत्त्वग्निर्हव्यवाहन एव च ॥ एवं सत्रे तु संपूर्णे इष्टिं माहेश्वरीं पुनः ॥ ३ ॥ कृत्वैश्वर्यमगाद्विप्रः सर्वत्र गतिमेव च ॥ इन्द्रस्य भवनं रम्यं स्वर्गलोकं रसातलम् ॥ ४ ॥ स्वेच्छया याति विप्रेन्द्रः प्रभावात्तपसः शुभात् ॥ स कदाचिद्दिवं गत्वा इन्द्रलोकमगात्पुनः ॥ ५ ॥ तत्रापश्यत्सहस्राक्षं सुरैः परिवृतं शुभैः ॥ स्तूयमानं सिद्धसाध्यैः प्रेक्षन्तं नृत्यमुत्तमम् ॥ शृण्वानं मधुरं गीतमप्सरोभिश्च वीजितम् ॥ ६ ॥ उपोपविष्टैः सुरनायकैस्तैः संपूज्यमानं महदासनस्थम् ॥ जयन्तमङ्के विनिधाय सूनुं शच्या युतं प्राप्तरातिं महिष्ठम् ॥ ७ ॥ सतां शरण्यं वरदं महेन्द्रं समीक्ष्य विप्राधिपतिर्महात्मा ॥ विमोहितोऽसौ मुनिरिन्द्रलक्ष्म्या समीहयामास तदिन्द्रसज्यम् ॥ ८ ॥ संपूजितो देवगणैर्यथावत्स्वमाश्रमं वै पुमराजगाम ॥ समीक्ष्य तां शक्रपुरीं सुरम्यां रत्नैर्युतां पुण्यगुणैः सुपूर्णाम् ॥ ९ ॥ स्वमाश्रमं निष्प्रभहेमवर्ज्यं समीक्ष्य विप्रो विरमं जगाम ॥ समीहमानः सुरराज्यमाशु प्रियां तदोवाच महात्रिपुत्रः ॥ १० ॥ ॥ आत्रेय उवाच ॥ भोक्तुं न शक्तोऽस्मि फलानि मूलान्यनुत्तमान्यप्यतिसंस्कृतानि ॥ स्मृत्वाऽमृतं पुण्यतमं च तत्र भक्ष्यं च भोज्यं च वरासनानि ॥ स्तुतिं च दानं च सभां शुभां च अस्त्रं च वासांसि पुरीं वनानि ॥ ११ ॥ ब्रह्मोवाच ॥ ततो महात्मा तपसः प्रभावात्त्वष्टारमाहूय वचो बभाषे ॥ १२ ॥ ॥ आत्रेय उवाच ॥ ॥ इच्छेयमिन्द्रत्वमहं महात्मन्कुरुष्व शीघ्रं पदमैन्द्रमत्र ॥ ब्रूपेऽन्यथा चेन्मदुदीरितं त्वं भस्मीकरोम्येव न संशयोऽत्र ॥ १३ ॥ ॥ ब्रह्मोवाच ॥ ॥ तदत्रिवाक्यात्त्वरितः प्रजानां स्रष्टा विभुर्विश्वकर्मा तदैव ॥ चकार मेरुं च पुरीं सुराणां कल्पद्रुमान्कल्पलतां च धेनुम् ॥ १४ ॥ चकार वज्रादिविभूषितानि गृहाणि शुभ्राण्यतिचित्रितानि ॥ चकार सर्वावयवानवद्यां शचीं स्मरस्येव विहारशालाम् ॥ १५ ॥ सभां सुधर्माणमहो क्षणेन तथा चकाराप्सरसो मनोज्ञाः ॥ चकार चोच्चैःश्रवसं गजं च वज्रादि चास्त्राणि सुरानशेषान् ॥ १६ ॥ निवार्यमाणः प्रियया ऽऽत्रिपुत्रः शचीस

मामात्मवधूं चकार ॥ तदाऽत्रिपुत्रोऽत्रिमुखैः समेतो वज्रादिरूपं च चकार चास्त्रम् ॥१७॥ नृत्यादि गीतादि च सर्वमेव चकार शक्रस्य पुरे च दृष्टम् ॥ तत्सर्वमासाद्य तदा मुनीन्द्रः प्रहृष्टचेताः सुतरां बभूव ॥ १८ ॥ आपातरम्येष्वपि कस्य नाम भवत्यपेक्षा न हि गोचरेषु ॥ श्रुत्वा च दैत्या दनुजाः समेता रक्षांसि कोपेन युतानि सद्यः ॥ १९ ॥ स्वर्गं परित्यज्य कुतो हरिर्भुवं समागतो न्वेष मिथः सुखाय ॥ तस्माद्वयं याम इतो नु योद्धुं वृत्रस्य हन्तारमदीर्घसत्रम् ॥ २० ॥ ततः समागत्य तदाऽत्रिपुत्रं संवेष्टयामासुरथासुरास्ते ॥ संवेष्टयित्वा पुरमत्रिपुत्रकृतं तथा चेन्द्रपुराभिधानम् ॥ तैर्वध्यमानः शस्त्रपातैर्महद्भिस्ततो भीतो वाक्यमिदं जगाद ॥ २१ ॥ ॥ आत्रेय उवाच ॥ ॥ यो जात एव प्रथमो मनस्वान्देवो देवान्क्रतुना पर्यभूषत् ॥ यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः ॥ २२ ॥ ॥ ब्रह्मोवाच ॥ ॥ इत्यादिसूक्तेन रिपूनुवाच हरिं च तुष्टाव तदाऽत्रिपुत्रः ॥ ॥ २३ ॥ ॥ आत्रेय उवाच ॥ ॥ नाहं हरिर्नैव शची मदीया नेयं पुरी नैव वनं तदैन्द्रम् ॥ स एव चेन्द्रो वृत्रहन्ता स वज्री सहस्राक्षो गोत्रभिद्वज्रबाहुः ॥ २४ ॥ अहं तु विप्रो वेदविद्ब्रह्मवृन्दैः समाविष्टो गौतमीतीरसंस्थः ॥ यत्राऽऽयत्यां नाद्य वा सौख्यहेतुस्तच्चाकार्षं कर्म दुर्दैवयोगात् ॥ २५ ॥ ॥ असुरा ऊचुः ॥ ॥ संहरस्वेदमात्रेय यदिन्द्रस्य विडम्बनम् ॥ क्षेमस्ते भविता सत्यं नात्र कार्या विचारणा ॥ २६ ॥ ॥ ब्रह्मोवाच ॥ ॥ तदाऽऽत्रेयोऽब्रवीद्वाक्यं यथा वक्ष्यन्ति मामिह ॥ करोम्येव महाभागाः सत्येनाग्निं समालभे ॥ २७ ॥ एवमुक्त्वा स दैतेयांस्त्वष्टारं पुनरब्रवीत् ॥ २८ ॥ ॥ आत्रेय उवाच ॥ ॥ यत्कृतं त्वत्र मत्प्रीत्या ऐन्द्रं त्वष्टः पदं त्वया ॥ संहरस्व पुनः शीघ्रं रक्षतां ब्राह्मणं भवान् ॥ २९ ॥ पुनर्देहि पदं मह्यमाश्रमं मृगपक्षिणः ॥ वृक्षांश्च वारि यत्राऽऽसीन्न दिव्येन प्रयोजनम् ॥ सर्वमक्रममायातं न सुखाय मनीषिणाम् ॥ ३० ॥ ॥ ब्रह्मोवाच ॥ ॥ तथेत्युक्त्वा प्रजानाथस्त्वष्टा संहृतवांस्तदा ॥ दैत्याश्च जग्मुः स्वस्थानं कृत्वा देशमकण्टकम् ॥३१॥ त्वष्टा चापि ययौ स्थानं स्वकं संप्रहसन्निव ॥ आत्रेयोऽपि तदा शिष्यैः संवृतः सह भार्यया ॥ ३२ ॥ गौतमीतीरमाश्रित्य तपोनिष्ठस्तु निर्वृतः ॥ वर्तमाने महायज्ञे लज्जितो वाक्यमब्रवीत् ॥ ३३ ॥ ॥ आत्रेय उवाच ॥ ॥ अहो मोहस्य महिमा ममापि भ्रान्तचित्तता ॥ किं महेन्द्रपदं लब्धं किं मयाऽत्र पुरा कृतम् ॥ ३४ ॥ ॥ ब्रह्मोवाच ॥ ॥ एवं वदन्तमात्रेयं लज्जितं प्राप्तुवन्सुराः ॥ ३५ ॥ ॥ सुरा ऊचुः ॥ ॥ लज्जां जहि महाबाहो भविता ख्यातिरुत्तमा ॥ आत्रेयतीर्थे ये स्नानं प्राणिनः कुर्युरञ्जसा ॥ ३६ ॥ इन्द्रास्ते भवितारो वै स्मरणात्सुखभागिनः ॥ तत्र पञ्च सहस्राणि तीर्थान्याहुर्मनीषिणः ॥ ३७ ॥ अन्विन्द्रात्रेयदैतेयनामाभिः कीर्तितानि च ॥ तेषु स्नानं च दानं च सर्वमक्षयपुण्यदम् ॥ ३८ ॥ ॥ ब्रह्मोवाच ॥ इत्युक्त्वा विबुधा याताः संतुष्टश्चाभवन्मुनिः ॥ ३९ ॥ इति श्रीब्रह्म

पुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्येऽन्विन्द्रात्रेयादिपञ्चसहस्रतीर्थवर्णनं नाम सप्ततितमोऽध्यायः ॥७०॥ ब्रह्मोवाच ॥ कपिलासंगमं नाम तीर्थं त्रैलोक्यविश्रुतम् ॥ शृणु नारद वक्ष्यामि कथां पुण्यामनुत्तमाम् ॥१॥ कपिलो नाम तत्त्वज्ञो मुनिरासीन्महायशाः ॥ क्रूरश्चापि प्रसन्नश्च तपोव्रतपरायणः॥२॥ तपस्यन्तं मुनिश्रेष्ठं गौतमीतीरमाश्रितम् ॥ तमागत्य महात्मानं वामदेवादयोऽब्रुवन् ॥३॥ हत्वा वेनं ब्रह्मशापैर्नष्टधर्मे त्वराजके ॥ कपिलं सिद्धमाचार्यमूचुर्मुनिगणास्तदा ॥ ४ ॥ मुनिगणा ऊचुः ॥ गते वेदे गते धर्मे किं कर्तव्यं मुनीश्वर ॥५॥ ब्रह्मोवाच ॥ ततोऽब्रवीन्मुनिर्ध्यात्वा कपिलस्त्वागतान्मुनीन् ॥ ६ ॥ कपिल उवाच ॥ वेनस्योरुविमथ्यो वै ततः कश्चिद्भविष्यति ॥ ७ ॥ ब्रह्मोवाच ॥ तथैव चक्रुर्मुनयो वेनस्योरुं विमथ्य वै ॥ तत्रोत्पन्नो महापापः कृष्णो रौद्रपराक्रमः ॥ ८ ॥ तं दृष्ट्वा मुनयो भीता निषीदस्वेति चाब्रुवन् ॥ निषादः सोऽभवत्तस्मान्निषादाश्चाभवंस्ततः ॥ ९ ॥ वेनबाहुं ममंन्थुस्ते दक्षिणं धर्मसंहितम् ॥ ततः पृथुस्वरश्चैव सर्वलक्षणलक्षितः ॥ १० ॥ राजाऽभवत्पृथुः श्रीमान्ब्रह्मसामर्थ्यसंयुतः ॥ तमागत्य सुराः सर्वे अभिनन्द्य वराञ्शुभान् ॥ ११ ॥ तस्मै ददुस्तथाऽस्त्राणि मन्त्राणि गुणवन्ति च ॥ ततोऽब्रुवन्मुनिगणास्तं पृथुं कपिलेन च ॥ १२ ॥ मुनय ऊचुः ॥ आहारं देहि जीवेभ्यो भुवा ग्रस्तौषधीरपि ॥ १३ ॥ ब्रह्मोवाच ॥ ततः स धनुरादाय भुवमाह नृपोत्तमः ॥ १४ ॥ पृथुरुवाच ॥ ओषधीर्देहि या ग्रस्ताः प्रजानां हितकाम्यया ॥ १५ ॥ ब्रह्मोवाच ॥ तमुवाच मही भीता पृथुं तं पृथुलोचनम् ॥१६॥ मह्युवाच ॥ मयि जीर्णा महौषध्यः कथं दातुमहं क्षमा ॥ १७ ॥ ब्रह्मोवाच ॥ ततः सकोपो नृपतिस्तामाह पृथिवीं पुनः ॥ १८ ॥ पृथुरुवाच ॥ नो चेद्ददास्यद्य त्वां वै हत्वा दास्ये महौषधीः ॥ १९ ॥ भूमिरुवाच ॥ कथं हंसि स्त्रियं राजञ्ज्ञानी भूत्वा नृपोत्तम ॥ विना मया कथं चेमाः प्रजाः संधारयिष्यसि ॥ २० ॥ पृथुरुवाच ॥ यत्रोपकारोऽनेकानामेकनाशे भविष्यति ॥ न दोषस्तत्र पृथिवि तपसा धारये प्रजाः ॥ २१ ॥ न दोषमत्र पश्यामि नाऽऽचक्षे नर्थकं वचः ॥ यस्मिन्निपातिते सौख्यं बहूनामुपजायते ॥ मुनयस्तद्वधं प्राहुरश्वमेधशताधिकम् ॥ २२ ॥ ब्रह्मोवाच ॥ ततो देवाश्च ऋषयः सान्त्वयित्वा नृपोत्तमम् ॥ महीं च मातरं देवीमूचुः सुरगणास्तदा ॥ २३ ॥ देवा ऊचुः ॥ भूमे गोरूपिणी भूत्वा पयोरूपा महौषधीः ॥ देहि त्वं पृथवे राज्ञे ततः प्रीतो भवेन्नृपः ॥ प्रजासंरक्षणं च स्यात्ततः क्षेमं भविष्यति ॥ २४ ॥ ब्रह्मोवाच ॥ ततो गोरूपमास्थाय कपिला कपिलान्तिके ॥ दुदोह च महौषध्यो राजा वेनकरोद्भवः ॥ २५ ॥ यत्र देवाः सगन्धर्वा ऋषयः कपिलो मुनिः ॥ महीं गोरूपमापन्नां नर्मदायां महामुने ॥ २६ ॥ भागीरथ्यां सरस्वत्यां गोदावर्यां विशेषतः ॥ महानदीषु सर्वासु दुदुहेऽसौ पयो महत् ॥२७॥ सा दुह्यमाना पृथुना पुण्यतोयाऽभवन्नदी ॥ गौतम्या संगता चाभूत्त

दद्भुतमिवाभवत् ॥ २८ ॥ ततः प्रभृति तत्तीर्थं कपिलासंगमं विदुः ॥ तत्राष्टाशीतिः पूज्यानि सहस्राणि महामते ॥ २९ ॥ तीर्थान्याहुर्मुनिगणाः
स्मरणादपि नारद ॥ पावनानि जगत्यस्मिंस्तानि सर्वाण्यनुक्रमात् ॥ ३० ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये स्वयंभुनारदसंवादे तीर्थमाहात्म्ये
कपिलासंगमाद्यष्टाशीतिसहस्रतीर्थवर्णनं नामैकसप्ततितमोऽध्यायः ॥७१॥ ब्रह्मोवाच ॥ देवस्थानमिति ख्यातं तीर्थं त्रैलोक्यविश्रुतम् ॥ तस्य प्रभावं
वक्ष्यामि शृणु यत्नेन नारद ॥१॥ पुरा कृतयुगस्याऽऽदौ देवदानवसंगरे ॥ प्रवृत्ते वा सिंहिकेति विख्याता दैत्यसुन्दरी ॥ २ ॥ तस्याः पुत्रोमहादैत्यो
राहुर्नाम महाबलः ॥ अमृते तु समुत्पन्ने सैंहिकेये च भेदिते ॥ ३ ॥ तस्य पुत्रो महादैत्यो मेघहासु इति श्रुतः ॥ पितरं घातितं श्रुत्वा तपस्तेपेऽ
तिदुःखितः ॥ ४ ॥ तपस्यन्तं राहुसुतं गौतमीतीरमाश्रितम् ॥ देवाश्च ऋषयः सर्वे तमूचुरतिभीतवत् ॥ ५ ॥ देवर्षय ऊचुः ॥ तपो जहि महाबाहो
यत्ते मनसि संस्थितम् ॥ सर्वं भवतु नामेदं शिवगंगाप्रसादतः ॥ शिवगंगाप्रसादेन किं नामास्त्यत्र दुर्लभम् ॥ ६ ॥ मेघहास उवाच ॥ परिभूतः
पिता पूज्यो युष्माभिर्मम दैवतम् ॥ तस्यापि मम चात्यन्तं प्रीतिश्च क्रियते यदि ॥ ७ ॥ भवद्भिस्तपसोऽस्माच्च अहं वैरान्निवर्तये ॥ वैरानिर्यातनं
कार्यं पुत्रेण पितुरादरात् ॥ प्रार्थयन्ते भवन्तश्चेत्पूर्णास्तन्मे मनोरथाः॥८॥ब्रह्मोवाच॥ततः सुरगणाः सर्वे राहुं चक्रुर्ग्रहानुगम्॥तं चापि मेघहासं ते चक्रू
राक्षसपूजितम् ॥ ९ ॥ ततोऽभवद्राहुसुतो नैर्ऋताधिपतिः प्रभुः ॥ पुनश्चाऽऽह सुरान्दैत्यो मम ख्यातिर्यथा भवेत्॥१०॥तीर्थस्यास्य प्रभावश्च दातव्य
इति मे मतिः॥तथेत्युक्त्वा ददुर्देवाः सर्वमेव मनोगतम्॥११॥ दैत्येश्वरस्य देवर्षे तन्नाम्ना तीर्थमुच्यते ॥ देवा यतोऽभवन्सर्वे तत्र स्थाने महामते॥१२॥
देवस्थानं तु तत्तीर्थं देवानामपि दुर्लभम् ॥ यत्र देवेश्वरो देवो देवतीर्थं ततः स्मृतम् ॥ १३ ॥ तत्राष्टादश तीर्थानि दैत्यपूज्यानि नारद ॥ तेषु स्नानं
च दानं च महापातकनाशनम् ॥ १४ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये देवस्थानाद्यष्टादशतीर्थवर्णनं नाम द्विसप्ततितमोऽ
ध्यायः ॥ ७२ ॥ ॥ ब्रह्मोवाच ॥ सिद्धतीर्थमिति ख्यातं तत्र सिद्धेश्वरो हरः ॥ तस्य प्रभावं वक्ष्यामि सर्वसिद्धिकरं नृणाम् ॥ १ ॥ पुलस्त्यवं
शसंभूतो रावणो लोकरावणः ॥ दिशो विजित्य सर्वाश्च सोमलोकमजीगमत् ॥ २ ॥ सोमेन सह योत्स्यन्तं दशास्यमहमब्रवम् ॥ मन्त्रं दास्ये
निवर्तस्व सोमयुद्धादशानन ॥ ३ ॥ इत्युक्त्वाऽष्टोत्तरं मन्त्रं शतनामाभिरन्वितम् ॥ शिवस्य राक्षसेन्द्राय प्रादां नारद शान्तये ॥ ४ ॥ निःश्री
काणां विपन्नानां नानाक्लेशजुषां नृणाम् ॥ शरणं शिव एवात्र संसारेऽन्यो न कश्चन ॥ ५ ॥ ततो निवृत्तः स ह मन्त्रियुक्तस्तत्सोमलोकाज्जयमाप्य
रक्षः ॥ स पुष्पकारूढगतिः सगर्वो लोकान्पुनः प्राप जवादशास्यः ॥ ६ ॥ स प्रेक्षमाणो दिवमन्तरिक्षं भुवं च नागांश्च गजांश्च विप्रान् ॥ आलो

कयामास नगं महान्तं कैलासमावास उमापतेर्यः ॥ ७ ॥ दृष्ट्वा स्मयोत्फुल्लमनास्तु रावणस्तौ वै समागत्य तदाह धीरः ॥ ८ ॥ ॥ रावण उवाच ॥ कोवा गिरावत्र वसेन्महात्मा गिरिं नयाम्येनमथाधि भूमेः ॥ लङ्कागतोऽयं गिरिराशु शोभां लङ्काऽपि सत्यं श्रियमातनोति ॥ ९ ॥ ॥ ब्रह्मोवाच ॥ इत्थं वचो राक्षसमन्त्रिणौ तौ निशम्य रक्षोधिपतेश्च भावम् ॥ न युक्तमित्यूचतुरिष्टबुद्ध्या निशाचरस्तद्वचनं न मेने ॥ १० ॥ संस्थाप्य तत्पुष्प कमाशु रक्षः पुप्लाव कैलासगिरेश्च मूले ॥ हिन्दोलयामास गिरिं दशास्यो ज्ञात्वा भवः कृत्यमिदं चकार ॥ ११ ॥ जित्वा दिगीशांश्च सगर्वितस्य कैलासमान्दोलयतः सुरारेः ॥ अङ्गुष्ठकृत्यैव रसातलादिलोकांश्च यातस्य दशाननस्य ॥ १२ ॥ आलूनकायस्य गिरं निशम्य विहस्य देव्या सह दत्तमिष्टम् ॥ तस्मै प्रसन्नः कुपितोऽपि शंभुरयुक्तदातेति न संशयोऽत्र ॥ १३ ॥ ततोऽयमावाप्य वरान्सुवीरो भवप्रसादात्कुसुमं जगाम ॥ गच्छन्स लङ्कां भवपूजनाय गङ्गामगाच्छंभुजटाप्रसूताम् ॥ १४ ॥ संपूजयित्वा विविधैश्च मन्त्रैर्गङ्गाजलैः शंभुमदीनसत्त्वः ॥ असिं स लेभे शशिखण्डभूषा त्सिद्धिं च सर्वार्थिमभीप्सितां च ॥ १५ ॥ मद्दत्तमन्त्रं शशिरक्षणाय स साधयामास भवं प्रपूज्य ॥ सिद्धे तु मन्त्रे पुनरेव लङ्कामयात्स रक्षोधिपतिस्तु तुष्टः ॥ १६ ॥ ततः प्रभृत्येतदतिप्रभावं तीर्थं महासिद्धिदमिष्टदं च ॥ समस्तपापौघविनाशनं च सिद्धैरशेषैः परिसेवितं च ॥ १७ ॥ इति श्रीब्रह्म पुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये सिद्धतीर्थाद्यष्टोत्तरशततीर्थवर्णनं नाम त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥ ॥ ब्रह्मोवाच ॥ परुष्णीसंगमं नाम तीर्थं त्रैलोक्यविश्रुतम् ॥ तस्य स्वरूपं वक्ष्यामि सर्वपापविनाशनम् ॥ १ ॥ अत्रिराराधयामास ब्रह्मविष्णुमहेश्वरान् ॥ तेषु तुष्टेषु स प्राह पुत्रा यूयं भविष्यथ ॥ २ ॥ तथा चैका रूपवती कन्या मम भवेत्सुराः ॥ तथा पुत्रत्वमापुस्ते ब्रह्मविष्णुमहेश्वराः ॥ ३ ॥ कन्यां च जनयामास शुभाऽऽत्रेयीति नामतः ॥ दत्तः सोमोऽथ दुर्वासाः पुत्रास्तस्य महात्मनः ॥ ४ ॥ अग्नेरंगिरसो जातो ह्यङ्गारैराङ्गिरा यतः ॥ तस्मादाङ्गिरसे प्रदादात्रेयीमतिरोचिषम् ॥ ॥ ५ ॥ अग्नेः प्रभावात्परुषमात्रेयीं सर्वदाऽवदत् ॥ आत्रेय्यापि च शुश्रूषां कुर्वती सर्वदाऽभवत् ॥ ६ ॥ तस्यामांगिरसा जाता महाबलपराक्रमाः ॥ अङ्गिराः परुषं वादीदात्रेयीं नित्यमेव च ॥ ७ ॥ पुत्रास्त्वाङ्गिरसा नित्यं पितरं शमयन्ति ते ॥ सा कदाचिद्धर्तृवाक्यादुद्विग्ना परुषाक्षरात् ॥ कृताञ्जलिपुटा दीना प्राब्रवीच्छ्वशुरं गुरुम् ॥ ८ ॥ आत्रेय्युवाच ॥ आत्रिजाऽहं हव्यवाह भार्या तव सुतस्य वै ॥ शुश्रूष णपरा नित्यं पुत्राणां भर्तुरेव च ॥ ९ ॥ पतिर्मां परुषं वक्ति वृथैवोद्वीक्षते रुषा ॥ प्रशाधि मां सुरज्येष्ठ भर्तारं मम दैवतम् ॥ ॥ १० ॥ ॥ ज्वलन उवाच ॥ अङ्गारेभ्यः समुद्भूतो भर्ता ते ह्यंगिरा ऋषिः ॥ यथा शान्तो भवेद्रुद्र तथा नीतिर्विधीयताम् ॥

॥ ११ ॥ आग्नेयोऽग्निं समायातो तव भर्त्ता वरानने ॥ तदा त्वं जलरूपेण प्लावयेथा मदाज्ञया ॥ १२ ॥ ॥ आत्रेय्युवाच ॥ सहेयं परुषं वाक्यं मा भर्ताऽग्निं समाविशेत् ॥ भर्तरि प्रतिकूलानां योषितां जीवनेन किम् ॥ १३ ॥ इच्छेयं शान्तिवाक्यानि भर्तारं च लभे तथा ॥ १४ ॥ ॥ ज्वलन उवाच ॥ अग्निस्त्वप्सु शरीरेषु स्थावरे जंगमे तथा ॥ तव भर्तुरहं धाम नित्यं च जनको मतः ॥ १५ ॥ योऽहं सोऽहमिति ज्ञात्वा न चिन्तां कर्तुमर्हसि ॥ किंचाऽऽपो मातरो देव्यो ह्यग्निः श्वशुर इत्यपि ॥ इति बुद्ध्या विनिश्चित्य मा विषण्णा भव स्नुषे ॥ १६ ॥ ॥ आत्रेय्युवाच ॥ आपो जनन्य इति यद्भाषे अग्नेरहं तव पुत्रस्य भार्या ॥ कथं भूत्वा जननी चापि भार्या विरुद्धमेतज्जलरूपेण नाथ ॥ १७ ॥ ॥ ज्वलन उवाच ॥ आदौ तु पत्नी भरणात्तु भार्या जनेस्तु जाया स्वगुणैः कलत्रम् ॥ इत्यादिरूपाणि विभर्षि भद्रे कुरुष्व वाक्यं मदुदीरितं यत् ॥ ॥ १८ ॥ योऽस्यां प्रजातः स तु पुत्र एव सा तस्य मातैव न संशयोऽत्र ॥ तस्माद्वदन्ति श्रुतितत्त्वविज्ञाः सा नैव योषित्तनयेऽभिजाते ॥ १९ ॥ ॥ ब्रह्मोवाच ॥ श्वशुरस्य तु तद्वाक्यं श्रुत्वाऽऽत्रेयी तदैव तत् ॥ आग्नेयं रूपमापन्नमम्भसाऽप्लावयत्पतिम् ॥ २० ॥ उभौ तौ दंपती ब्रह्मन्संगतौ गांगवारिणा ॥ शान्तरूपधरौ चोभौ दंपती संबभूवतुः ॥ २१ ॥ लक्ष्म्या युक्तो यथा विष्णुरुमया शंकरो यथा ॥ रोहिण्या च यथा चन्द्रस्तथाऽभून्मिथुनं तदा ॥ २२ ॥ भर्तारं प्लावयन्ती सा दधाराम्बुमयं वपुः ॥ परुष्णी चेति विख्याता गंगया संगता नदी ॥ २३ ॥ गोशतार्पणजं पुण्यं परुष्णीस्नानतो भवेत् ॥ तत्र चाऽऽङ्गिरसाश्चक्रुर्यज्ञांश्च बहुदक्षिणान् ॥ २४ ॥ तत्र त्रीणि सहस्राणि तीर्थान्याहुः पुराणगाः ॥ उभयोस्तीरयोस्तात पृथग्यागफलं विदुः ॥ २५ ॥ तेषु स्नानं च दानं च वाजपेयाधिकं मतम् ॥ विशेषतस्तु गंगायाः परुष्ण्या सह संगमे ॥ २६ ॥ स्नानदानादिभिः पुण्यं यत्तद्वक्तुं न शक्यते ॥ २७ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये परुष्णीसंगमादित्रिसहस्रतीर्थवर्णनं नाम चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥ ॥ ब्रह्मोवाच ॥ मार्कण्डेयमिति ख्यातं तीर्थं पापविमोचनम् ॥ सर्वक्रतुफलं पुण्यमघौघविनिवारणम् ॥ १ ॥ तस्य प्रभावं वक्ष्यामि शृणु नारद यत्नतः ॥ मार्कण्डेयो भरद्वाजो वसिष्ठोऽत्रिश्च गौतमः ॥ २ ॥ याज्ञवल्क्यश्च जाबालिर्मुनयोऽन्येऽपि नारद ॥ एते शास्त्रप्रणेतारो वेदवेदांगपारगाः ॥ ३ ॥ पुराणन्यायमीमांसाकथासु परिनिष्ठिताः ॥ मिथः समूचुर्विद्वांसो मुक्तिं प्रति यथामति ॥ ४ ॥ केचिज्ज्ञानं प्रशंसन्ति केचित्कर्म तथोभयम् ॥ एवं विवदमानास्ते मामूचुरुभयं मतम् ॥ ५ ॥ मदीयं तु मतं ज्ञात्वा ययुश्चक्रगदाधरम् ॥ तस्य चापि मतं ज्ञात्वा ऋषयस्ते महौजसः ॥ ६ ॥ पुनर्विवदमानास्ते शंकरं प्रष्टुमुद्यताः ॥ गङ्गायां च भवं पूज्य तमेवार्थं शशंसिरे ॥ ७ ॥ कर्मणस्तु

प्रधानत्वमुवाच त्रिपुरान्तकः ॥ क्रियारूपं च तज्ज्ञानं क्रिया सैव तदुच्यते ॥ ८ ॥ तस्मात्सर्वाणि भूतानि कर्मणा सिद्धिमाप्नुयुः ॥ कमव
विश्वतोव्यापि तद्दते नास्ति किंचन ॥ ९ ॥ विद्याभ्यासो यज्ञकृतियोंगाभ्यासः शिवार्चनम् ॥ सर्वं कर्मैव नाकर्मी प्राणी क्वाप्यत्र विद्यते ॥ १० ॥
कर्मैव कारणं तस्मादन्यदुन्मत्तचेष्टितम् ॥ ऋषीणां यत्र संवादो यत्र देवो महेश्वरः ॥ ११ ॥ चकार निर्णयं सर्वं कर्मणाऽवाप्यते नृभिः ॥
मार्कण्डं मुख्यतः कृत्वा ततो मार्कण्डमुच्यते ॥ १२ ॥ तीर्थमृषिगणाकीर्णं गंगाया उत्तरे तटे ॥ पितॄणां पावनं पुण्यं स्मरणादपि सर्वदा ॥
॥ १३ ॥ तत्राष्टौ नवतिस्तात तीर्थान्याह जगन्मयः ॥ वेदेन चापि तत्प्रोक्तमृषयो मेनिरे च तत् ॥ १४ ॥ इति श्रीब्रह्मपुराणगतगौतमी
माहात्म्ये तीर्थमाहात्म्ये मार्कण्डेयाद्यष्टनवतितीर्थवर्णनं नाम पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥ ॥ ब्रह्मोवाच ॥ ॥ यायातमपरं तीर्थं यत्र कालं
जरः शिवः ॥ सर्वपापप्रशमनं व्युष्टिस्तत्रोच्यते मया ॥ १ ॥ ययातिर्नाहुषो राजा साक्षादिन्द्र इवापरः ॥ तस्य भार्याद्वयं चाऽऽसीत्कुल
लक्षणभूषितम् ॥ २ ॥ ज्येष्ठा तु देवयानीति नाम्ना शुक्रसुता शुभा ॥ शर्मिष्ठेति द्वितीया सा सुता स्याद्वृषपर्वणः ॥ ३ ॥ ब्राह्मण्योपि महाप्राज्ञा
देवयानी सुमध्यमा ॥ ययातेरभवद्भार्या सा तु शुक्रप्रसादतः ॥ ४ ॥ शर्मिष्ठा चापि तस्यैव भार्या या वृषपर्वजा ॥ देवयानी शुक्रसुता द्वौ पुत्रौ
समजीजनत् ॥ ५ ॥ यदुं च तुर्वसुं चैव देवपुत्रसमावुभौ ॥ शर्मिष्ठा च नृपाल्लेभे त्रीन्पुत्रान्देवसंनिभान् ॥ ६ ॥ द्रुह्युं चानुं च पूरुं च ययाते
र्नृपसत्तमात् ॥ देवयान्याः सुतौ ब्रह्मन्सदृशौ शुक्ररूपतः ॥ ७ ॥ शर्मिष्ठायास्तु तनयाः शक्राग्निवरुणप्रभाः ॥ देवयानी कदाचित्तु पितरं प्राह
दुःखिता ॥ ८ ॥ ॥ देवयान्युवाच ॥ मम त्वपत्यद्वितयमभाग्याया भृगूद्वह ॥ मम दास्याः सभाग्याया अपत्यत्रितयं पितः ॥ ९ ॥ तदे
तदनुमृश्याहं दुःखमत्यन्तमागता ॥ मरिष्ये दानवगुरो ययातिकृतविप्रियात् ॥ मानभङ्गाद्वरं तात मरणं हि मनस्विनाम् ॥ १० ॥
॥ ब्रह्मोवाच ॥ ॥ तदेतत्पुत्रिकावाक्यं श्रुत्वा शुक्रः प्रतापवान् ॥ कुपितोऽभ्याययौ शीघ्रं ययातिमिदमब्रवीत् ॥११॥ ॥ शुक्र उवाच ॥ ॥ यदिदं
विप्रियं मेऽद्य सुतायामादृतं त्वया ॥ रूपोन्मत्तेन राजेन्द्र तस्माद्वृद्धो भविष्यसि ॥१२॥ न च भोक्तुं न च त्यक्तुं शक्नोति विषयातुरः ॥ स्पृहयन्मन सै
वाऽऽस्ते निःश्वासोच्छ्वासनष्टधीः॥१३॥वृद्धत्वमेव मरणं जीवतामपि देहिनाम् ॥ तस्माच्छीघ्रं प्रयाहि त्वं जरां भूपातिदुर्धराम् ॥१४॥ ॥ ब्रह्मोवाच ॥
एतच्छ्रुत्वा ययातिस्तु शापं शुक्रस्य धीमतः ॥ कृताञ्जलिपुटो राजा ययातिः शुक्रमब्रवीत् ॥ १५ ॥ ॥ ययातिरुवाच ॥ ॥ नापराध्ये न संकुप्ये
नैवाधर्मं प्रवर्त्तये ॥ अधर्मकारिणः पापाः शास्त्रा एव महात्मनाम् ॥ १६ ॥ धर्ममेव चरन्तं वै कथं मां शप्तवानसि ॥ देवयानी द्विजश्रेष्ठ वृथा मां

वक्ति किंचन ॥ १७ ॥ तस्मान्न मम विप्रेन्द्र शापं दातुं त्वमर्हसि ॥ विद्वांसोऽपि हि निर्दोषे यदि कुप्यन्ति मोहिताः ॥ तदा न दोषो मूर्खाणां द्वेषा
ग्निप्लुष्टचेतसाम् ॥ १८ ॥ ॥ ब्रह्मोवाच ॥ ॥ ययातिवाक्याच्छुक्रोऽपि सस्मार सुतया कृतम् ॥ असकृद्विप्रियं तस्य दिवा रात्रौ प्रचण्डया ॥
॥ १९ ॥ गतकोपोऽहमित्युक्त्वा काव्यो राजानमब्रवीत् ॥२० ॥ ॥ शुक्र उवाच ॥ ॥ ज्ञानादज्ञानतो वापि स्वैरेपि न वदेऽनृतम् ॥ शापस्येमं करि
ष्यामि शृणुष्वानुग्रहं नृप ॥ २१ ॥ यस्मै पुत्राय संदातुं जरामिच्छसि मानद ॥ तस्य सा यात्वियं राजञ्जरा पुत्राय मद्वरात् ॥ २२ ॥ ॥ ब्रह्मो
वाच ॥ ॥ पुनर्ययातिः श्वशुरं शुक्रं प्राह विनीतवत् ॥ २३ ॥ ॥ ययातिरुवाच ॥ ॥ यो गृह्णाति मया दत्तां जरां भक्तिसमन्वितः ॥ स राजा
स्यादैत्यगुरो तदेतदनुमन्यताम् ॥ २४ ॥ यो मद्वाक्यं नाभिनन्देत्सुतो दैत्यगुरो दृढम् ॥ तं शपेयमनुज्ञाऽत्र दातव्यैव त्वया गुरो ॥ २५ ॥ ॥ ब्रह्मो
वाच ॥ ॥ एवमस्त्विति राजानमुवाच भृगुनन्दनः ॥ ततो ययातिः स्वं पुत्रमाहूयेदं वचोऽब्रवीत् ॥ २६ ॥ ॥ ययातिरुवाच ॥ ॥ यदो गृहाण
मे शापाज्जरां जातां सुतो भवान् ॥ ज्येष्ठः सर्वार्थवित्प्रौढः पुत्राणां धुरि संस्थितः ॥ पुत्री तेनैव जनको यस्तदाज्ञावशे स्थितः ॥ २७ ॥ ब्रह्मोवाच ॥
नेत्युक्त्वा च यदुस्तातं ययातिं भूरिदक्षिणम् ॥ ययातिश्च यदुं शप्त्वा तुर्वसुं काममब्रवीत् ॥ २८ ॥ नागृह्णात्तुर्वसुश्चापि पित्रा दत्तां जरां तदा ॥
तं शप्त्वा चाब्रवीद्द्रुह्यं गृहाणेमां जरां मम ॥ २९ ॥ द्रुह्युश्च नैच्छत्तां दत्तां जरां रूपविनाशिनीम् ॥ अनुमप्यब्रवीद्राजा गृहाणेमां जरां मम ॥ ३० ॥
अनुनेति तदोवाच शप्त्वा तं पूरमब्रवीत् ॥ अभिनन्द्य तदा पूरुर्जरां तां जगृहे पितुः ॥ ३१ ॥ सहस्रमेकं वर्षाणां यावत्प्रीतोऽभवत्पिता ॥ यौवने
यानि भोग्यानि वस्तूनि विविधानि च ॥ ३२ ॥ पुत्रयौवनसंतुष्टो ययातिर्बुभुजे सुखम् ॥ ततस्तृप्तोऽभवद्राजा सर्वभोगेषु नाहुषः ॥ ततो हर्षात्समा
हूय पूरुं पुत्रमथाब्रवीत् ॥ ३३ ॥ ॥ ययातिरुवाच ॥ ॥ तृप्तोऽस्मि सर्वभोगेषु यौवनेन तवानघ ॥ गृहाण यौवनं पुत्र जरां मे देहि कश्मलाम् ॥
॥ ३४ ॥ ॥ ब्रह्मोवाच ॥ ॥ नेत्युवाच तदा पूरुर्जरया क्षीयते मया ॥ विकारास्तात भावानां दुर्निवाराः शरीरिणाम् ॥ ३५ ॥ बलात्काला
गता सद्म जराऽप्यखिलदेहिभिः ॥ सा चेद्वरूपकाराय गृहीता त्यज्यते कथम् ॥ ३६ ॥ स्वीकृतत्यागपापाद्धि देहिनां मरणं वरम् ॥ अथवा तु
जरां राजंस्तपसा नाशयाम्यहम् ॥ ३७ ॥ ॥ ब्रह्मोवाच ॥ ॥ एवमुक्त्वा तु पितरं ययौ गङ्गामनुत्तमाम् ॥ गौतम्या दक्षिणे पारे ततस्तेपे तपो ॥ २५६ ॥
महत् ॥ ३८ ॥ ततः प्रीतोऽभवद्देवः कालेन महता शिवः ॥ लोकातीतमहोदारगुणसन्मणिभूषितम् ॥ किं ददामीति तं प्राह पूरुं स सुरसत्तमः ॥
॥ ३९ ॥ ॥ पूरुरुवाच ॥ ॥ शापप्राप्तां जरां नाथ पितुर्मम सुराधिप ॥ तां नाशयस्व देवेश पितृशापांश्च कोपतः ॥ मद्भ्रातॄञ्शापतो मुक्तान्कुरुष्व

सूरणूजित ॥ ४० ॥ ॥ ब्रह्मोवाच ॥ ॥ तथेत्युक्त्वा जगन्नाथः शापाज्जातां जरां तदा ॥ अनाशयज्जगन्नाथो भ्रातृंश्चक्रे विशापिनः ॥ ४१ ॥ ततः प्रभृति तत्तीर्थं जरारोगविनाशनम् ॥ अकालजजरादीनां स्मरणादपि नाशनम् ॥ ४२ ॥ तन्नाम्ना चापि विख्यातं कालंजरमुदाहृतम् ॥ यायातं नाहुषं पौरं शौक्रं शार्मिष्ठमेव च ॥ ४३ ॥ एवमादीनि तीर्थानि तत्राष्टोत्तरमेव च ॥ शतं विद्यान्महाबुद्धे सर्वसिद्धिकरं तथा ॥ ४४ ॥ तेषु स्नानं च दानं च श्रवणं पठनं तथा ॥ सर्वपापप्रशमनं भुक्तिमुक्तिप्रदं भवेत् ॥ ४५ ॥ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये कालंजरा द्यष्टोत्तरशततीर्थवर्णनं नाम षट्सप्ततितमोऽध्यायः ॥ ७६ ॥ ॥ ब्रह्मोवाच ॥ ॥ अप्सरोयुगमाख्यातमप्सरासंगमं ततः ॥ तीरे च दक्षिणे पुण्यं स्मरणात्सुभगो भवेत् ॥ १ ॥ मुक्तो भवत्यसंदेहं तत्र स्नानादिना नरः ॥ स्त्री सती संगमे तस्मिन्नृतुस्नाता च नारद ॥ २ ॥ वन्ध्याऽपि जनयेत्पुत्रं त्रिमासात्पतिना सह ॥ स्नानदानेन वर्तन्ती नान्यथा मद्वचो भवेत् ॥ ३ ॥ अप्सरोयुगमा ख्यातं तीर्थं येन च हेतुना ॥ तत्रेदं कारणं वक्ष्ये शृणु नारद यत्नतः ॥ ४ ॥ स्पर्धाऽऽसीन्महती ब्रह्मन्विश्वामित्रवसिष्ठयोः ॥ तप स्यन्तं गाधिसुतं ब्राह्मण्यार्थं यतव्रतम् ॥ ५ ॥ गंगाद्वारे समासीनं प्रेरितेन्द्रेण मेनका ॥ तं गत्वा तपसो भ्रष्टं कुरु भद्रे ममाऽऽज्ञया ॥ ६ ॥ तदोक्तेन्द्रेण सा मेना विश्वामित्रं तपश्च्युतम् ॥ कृत्वा कन्यां तथा दत्त्वा जगामेन्द्रपुरं पुनः॥ ७ ॥ तस्यां गतायां सस्मार गाधिपुत्रोऽखिलं कृतम् ॥ तं तु देशं परित्यज्य तीर्थं तु सुरवल्लभम् ॥ ८ ॥ जगाम दक्षिणां गंगां यत्र कालंजरो हरः ॥ तपस्यन्तं तदोवाच पुनरिन्द्रः सहस्रदृक् ॥ ९ ॥ उर्वशीं च ततो मेनां रम्भां चापि तिलोत्तमाम् ॥ नैवेत्यूचुर्भयत्रस्ताः पुनराह शचीपतिः ॥ १० ॥ गम्भीरां चातिगम्भीरामुभे ये गर्विते तदा ॥ ते ऊचतुरुभे देवं सहस्राक्षं पुरंदरम् ॥ ११ ॥ गम्भीरातिगम्भीरे ऊचतुः ॥ आवां गत्वा तपस्यन्तं गाधिपुत्रं महाद्युतिम् ॥ च्यावयावो नृत्यगीते रूपयौवनसंपदा ॥ १२ ॥ यासामपांगे हसिते वाचि विभ्रमसंपदि ॥ नित्यं वसति पञ्चेषुस्ताभिः कोऽत्र न जीयते ॥ १३ ॥ ब्रह्मोवाच ॥ तथेत्युक्ते सहस्राक्षे ते आगत्य महानदीम् ॥ ददृशाते तपस्यन्तं विश्वामित्रं महामुनिम् ॥ १४ ॥ मृत्योरपि दुराधर्षं भूमिस्थमिव धूर्जटिम् ॥ सहस्रमेकं वर्षाणामीक्षितुं न च शक्नुतः ॥ १५ ॥ दूरे स्थिते नृत्यगीतचाटुकाररते तदा ॥ विलोक्य मुनिशार्दूलस्ततः कोपाकुलोऽभवत् ॥ ॥ १६ ॥ प्रतीपाचरणं दृष्ट्वा क्रोधः कस्य न जायते ॥ निस्पृहोऽपि महाबाहुस्तमिन्द्रं प्रहसन्निव ॥ १७ ॥ आभ्यां मुक्तः तहस्राक्षो ह्यप्सरोभ्यां ब्रुव न्निव ॥ शशाप ते स गाधेयो द्रवरूपे भविष्यथः ॥ १८ ॥ द्रवितुं मां समायाते यतस्त्विह ततो लघु ॥ ततः प्रसादितस्ताभ्यां शापमोक्षं चकार

सः ॥ १९ ॥ भवेतां दिव्यरूपे वां गंगया संगते यदा ॥ तच्छापात्ते नदीरूपे तत्क्षणात्संबभूवतुः ॥ २० ॥ अप्सरोयुगमाख्यातं नदीद्वयमतोऽभवत् ॥
ताभ्यां परस्परं चापि ताभ्यां गंगासुसंगमः ॥ २१ ॥ सर्वलोकेषु विख्यातो भुक्तिमुक्तिप्रदः शिवः ॥ तत्राऽऽस्ते दृष्ट एवासौ सर्वसिद्धिप्रदायकः ॥
॥ २२ ॥ तत्र स्नात्वा तु तं दृष्ट्वा मुच्यते सर्वबन्धनात् ॥ २३ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्येऽप्सरोयुगसंगमतीर्थवर्णनं नाम
सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥ ब्रह्मोवाच ॥ कोटितीर्थमिति ख्यातं गंगाया दक्षिणे तटे ॥ यस्यानुस्मरणादेव सर्वपापैः प्रमुच्यते ॥ १ ॥ यत्र कोटी
श्वरो देवः सर्वं कोटिगुणं भवेत् ॥ कोटिद्वयं तत्र पूर्णं तीर्थानां शुभदायिनाम् ॥ २ ॥ तत्र व्युष्टिं प्रवक्ष्यामि शृणु नारद तन्मनाः ॥ कण्वस्य तु सुतो
ज्येष्ठो बाह्लीक इति विश्रुतः ॥ ३ ॥ काण्वश्चेति जनैः ख्यातो वेदवेदांगपारगः ॥ इष्टीः पार्वायणानीर्याः सभार्यो वेदपारगः ॥ ४ ॥ कुर्वन्नास्ते
स गौतम्यास्तीरस्थो लोकपूजितः ॥ प्रातःकाले सभार्योऽसौ जुह्वद्ग्नौ समाहितः ॥ ५ ॥ सर्वदाऽस्ते कदाचित्तु हवनाय समुद्यतः ॥ एकाहुतिं स
हुत्वा तु समिद्धे हव्यवाहने ॥ ६ ॥ आहुत्यन्तरदानाय हविर्द्रव्यं करेऽग्रहीत् ॥ एतस्मिन्नन्तरे वह्निरुपशान्तोऽभवत्तदा ॥ ७ ॥ ततश्चिन्तापर
काण्वः कर्तव्यं किं भवेदिति ॥ अन्तर्विचारयामास विषादं परमं गतः ॥ ८ ॥ आहुत्योश्च द्वयोर्मध्य उपशान्तो हुताशनः ॥ अग्न्यन्तरमुपादेयं
वैदिकं लौकिकं तथा ॥ ९ ॥ क्व होष्यं स्याद्द्वितीयं तु आहुत्यन्तरमेव च ॥ एवं मीमांसमाने तु दैवी वागब्रवीत्तदा ॥ १० ॥ अग्न्यन्तरं नैव
तेऽत्र उपादेयं भविष्यति ॥ यानि तत्र भविष्यन्ति शकलानि समीपतः ॥ ११ ॥ अर्धदग्धेषु काष्ठेषु विप्रराज प्रहूयताम् ॥ नेत्युवाच तदा काण्वः
सैव वागब्रवीत्पुनः ॥ १२ ॥ अग्नेः पुत्रो हिरण्यस्तु पिता पुत्रः स एव तु ॥ पुत्रे दत्तं प्रियायैव पितुः प्रीत्यै भविष्यति ॥ १३ ॥ पित्रे देयं सुते
दद्यात्कोटिप्रीतिगुणं भवेत् ॥ दैवी वागब्रवीदेवं ततः सर्वे महर्षयः ॥ १४ ॥ निश्चित्य धर्मसर्वस्वं तथा चक्रुर्यथोदितम् ॥ एतज्ज्ञात्वा जगत्यत्र
पुत्रे दत्तं पितुर्भवेत् ॥ १५ ॥ अपत्याद्युपकारेण पित्रोः प्रीतिर्यथा भवेत् ॥ तथा नान्येन केनापि जगत्येतद्धि विश्रुतम् ॥ १६ ॥ सुप्रसिद्धं
जगत्येतत्सर्वलोकेषु पूजितम् ॥ तस्मिन्दत्ते भवेत्पुण्यं सर्वं कोटिगुणं सुत ॥ १७ ॥ मनोग्लानिर्निवृत्तिश्च जायते च महत्सुखम् ॥ पुनरप्याह सा
वाणी काण्वेऽस्मिंस्तीर्थ उत्तमे ॥ १८ ॥ अभवत्तन्महत्तीर्थं काण्वपुण्यप्रभावतः ॥ लोकत्रयाश्रयाशेषतीर्थेभ्योऽपि महाफलम् ॥ १९ ॥ स्नान
दानादिकं किंचिद्भक्त्या कुर्वन्समाहितः ॥ फलं प्राप्स्यस्यशेषेण सर्वं कोटिगुणं मुने ॥ २० ॥ यत्किंचित्क्रियते चात्र स्नानदानादिकं नरैः ॥
सर्वं कोटिगुणं विद्यात्कोटितीर्थं ततो विदुः ॥ २१ ॥ यत्रैतद्वृत्तमाग्नेयं काण्वं पौत्रं हिरण्यकम् ॥ वाणीसंज्ञं कोटितीर्थं कोटितीर्थफलं यतः ॥ २२ ॥

कोटितीर्थस्य माहात्म्यमत्र वक्तुं न शक्यते ॥ वाचस्पतिप्रभृतिभिरथ वाऽन्यैः सुरैरपि ॥ २३ ॥ यत्रानुष्ठीयमानं हि सर्वं कर्म यथा तथा ॥
गोदावर्याः प्रसादेन सर्वं कोटिगुणं भवेत् ॥ २४ ॥ कोटितीर्थे द्विजाग्र्याय गामेकां यः प्रयच्छति ॥ तस्य तीर्थस्य माहात्म्याद्गोकोटिफलमश्नुते
॥ २५ ॥ तस्मिंस्तीर्थे शुचिर्भूत्वा भूमिदानं करोति यः ॥ श्रद्धायुक्तेन मनसा स्यात्तत्कोटिगुणोत्तरम् ॥ २६ ॥ सर्वत्र गौतमीतीरे प्रितॄणां
दानमुत्तमम् ॥ विशेषतः कोटितीर्थे तदनन्तफलप्रदम् ॥ अत्रैकन्यूनपंचाशत्तीर्थानि मुनयो विदुः ॥ २७ ॥ इति श्रीब्रह्मपुराणगत
गौतमीमाहात्म्ये तीर्थमाहात्म्ये काण्वाद्येकोनपञ्चाशत्तीर्थवर्णनं नामाष्टसप्ततितुमोऽध्यायः ॥ ७८ ॥ ॥ ब्रह्मोवाच ॥ नारसिंहमिति
ख्यातं गंगाया उत्तरे तटे ॥ तस्यानुभावं वक्ष्यामि सर्वरक्षाविधायकम् ॥ १ ॥ हिरण्यकशिपुः पूर्वमभवद्बलिनां वरः ॥ तपसा विक्रमे
णापि देवानामपराजितः ॥ २ ॥ हरिभक्तात्मजद्वेषकलुषीकृतमानसः ॥ आविर्भूय सभास्तम्भाद्विश्वात्मत्वं प्रदर्शयन् ॥ ३ ॥ तं हत्वा
नरसिंहस्तत्सैन्यमद्रावयत्तदा ॥ सर्वान्हत्वा महादैत्यान्क्रमेणाऽऽजौ महामृगः ॥ ४ ॥ रसातलस्थाञ्शत्रूंश्च जित्वा स्वर्लोकमीयिवान् ॥
तत्र जित्वा भुवं गत्वा दैत्यान्हत्वा नगस्थितान् ॥ ५ ॥ समुद्रस्थान्द्वीपसंस्थान्ग्रामस्थान्वनवासिनः ॥ नानारूपधरान्दैत्यान्निजघान मृगाकृतिः ॥
॥ ६ ॥ आकाशगान्वायुसंस्थाञ्ज्योतिर्लोकमुपागतान् ॥ वज्रपाताधिकनखः समुद्भूतमहासटः ॥ ७ ॥ दैत्यगर्भस्रावितर्जी निर्जिताशेषराक्षसः ॥
महानादैर्वीक्षितैश्च प्रलयानलसंनिभैः ॥ ८ ॥ चपेटैरन्त्रविक्षेपैरसुरान्पर्यचूर्णयत् ॥ एवं हत्वा बहुविधान्गौतमीमगमद्धरिः ॥ ९ ॥ स्वपदाम्बुज
संभूतां मनोनयननन्दिनीम् ॥ तत्राम्बर्य इति ख्यातो दण्डकाधिपते रिपुः ॥ १० ॥ देवानां दुर्जयो योद्धा बलेन महताऽऽवृतः ॥ तेनाभवन्महा
रौद्रं भीषणं लोमहर्षणम् ॥ ११ ॥ शस्त्रास्त्रवर्षणं युद्धं हरिणा दैत्यसूनुना ॥ निजघान हरिः श्रीमांस्तं रिपुं ह्युत्तरे तटे ॥ १२ ॥ गङ्गायां नारसिंहं तु
तीर्थं त्रैलोक्यविश्रुतम् ॥ स्नानदानादिकं तत्र सर्वपापग्रहार्दनम् ॥ १३ ॥ सर्वरक्षाकरं नित्यं जरामरणवारणम् ॥ यथा सुराणां सर्वेषां न
कोऽपि हरिणा समः ॥ १४ ॥ तीर्थानामप्यशेषाणां तथा तत्तीर्थमुत्तमम् ॥ तत्र तीर्थे नरः स्नात्वा कुर्यान्नृहरिपूजनम् ॥ १५ ॥ स्वर्गे मर्त्ये तले
वाऽपि तस्य किंचिन्न दुर्लभम् ॥ इत्याद्यष्टौ मुने तत्र महातीर्थानि नारद ॥ १६ ॥ पृथक्पृथक्तीर्थकोटिफलमाहुर्मनीषिणः ॥ अश्रद्धयाऽपि यत्राग्नि
स्मृते सर्वाघसंक्षयः ॥ १७ ॥ भवेत्साक्षान्नृसिंहोऽसौ सर्वदा यत्र संस्थितः ॥ तत्तीर्थसेवासंजातं फलं कैरिह वर्ण्यते ॥ १८ ॥ यथा न देवो नृहरे
रधिकः क्वापि वर्तते ॥ तथा नृसिंहतीर्थेन समं तीर्थं न कुत्रचित् ॥ १९ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये नारसिंहाद्यष्टती

र्थवर्णनं नामैकोनाशीतितमोऽध्यायः ॥ ७९ ॥ ॥ ब्रह्मोवाच ॥ पैशाचं तीर्थमाख्यातं गंगाया उत्तरे तटे ॥ पिशाचत्वात्पुरा विप्रो मुक्तिमाप महामते ॥ १ ॥ सुव्रतस्याऽऽत्मजो लोकेऽजीगर्तिरिति विश्रुतः ॥ कुटुम्बभारदुःखार्तो दुर्भिक्षेण तु पीडितः ॥ २ ॥ मध्यमं तु शुनःशेपं पुत्रं ब्रह्म विदांवरम् ॥ विक्रीतवान्क्षत्रियाय वधाय बहुलैर्धनैः ॥ ३ ॥ किं नामाऽऽपद्गतः पापं नाऽऽचरत्यपि पण्डितः ॥ शमितृत्वे धनं चापि जगृहे बहुलं मुनिः ॥ ४ ॥ विदारणार्थं च धनं जगृहे ब्राह्मणाधमः ॥ ततोऽतिसमाधेयमहारोगनिपीडितः ॥ ५ ॥ स मृतः कालपर्याये नरकेष्वथ पातितः ॥ भोगादृते न क्षयोऽस्ति प्राक्तनानामिहांहसाम् ॥ ६ ॥ किंकरैर्यमवाक्येन बहुयोन्यन्तरं गतः ॥ ततः पिशाचो ह्यभवद्दारुणो दारुणाकृतिः ॥ ७ ॥ शुष्ककाष्ठे तथाऽरण्ये निर्जले निर्जने तथा ॥ ग्रीष्मे ग्रीष्मदवव्याप्ते क्षिप्यते यमकिंकरैः ॥ ८ ॥ कन्यापुत्रमहीवाजिगवां विक्रयकारिणः ॥ नरकान्न निवर्तन्ते यावदाभूतसंप्लवम् ॥ ९ ॥ स्वकृताघविपाकेन दारुणैर्यमकिंकरैः ॥ संवाते पच्यमानोऽसौ रुरोदोच्चैः कृतं स्मरन् ॥ १० ॥ पथि गच्छन्कदाचित्स जीगर्तेर्मध्यमः सुतः ॥ शुश्राव रुदतो वाणीं पिशाचस्य मुहुर्मुहुः ॥ ११ ॥ पुत्रकेतुर्ब्रह्महन्तुर्जीगर्तेस्तु पितुस्तदा ॥ पापिनः पुत्रविक्रेतुर्ब्रह्महन्तुः पितुश्च ताम् ॥ १२ ॥ शुनःशेपस्तदोवाच को भवानतिदुःखितः ॥ जीगर्तिरब्रवीद्दुःखाच्छुनःशेपपिता ह्यहम् ॥ १३ ॥ पापीयसीं क्रियां कृत्वा योनिं प्राप्तोऽस्मि दारुणाम् ॥ नरकेष्वथ पक्वश्च पुनः प्राप्तोऽन्तरालकम् ॥ ये ये दुष्कृतकर्माणस्तेषां तेषामियं गतिः ॥ १४ ॥ जीगर्तिपुत्रस्तमुवाच दुःखात्सोहं सुतस्ते मम दोषेण तात ॥ विक्रीत्वा मां नरकानेवमाप्तस्ततः करिष्ये स्वर्गतं त्वामिदानीम् ॥ १५ ॥ एवं प्रतिज्ञाय स गाधिपुत्रपुत्रत्वमाप्तोऽथ मुनिप्रवीरः ॥ गङ्गामभिध्याय पितुश्च लोकाननुत्तमानीहमानो जगाम ॥ १६ ॥ अरोगदुःखानलधूर्पितानां निमज्जतां मोहमहासमुद्रे ॥ ॥ शरीरिणां नान्यदहो त्रिलोक्यामालम्बनं विष्णुपदीं विहाय ॥ १७ ॥ एवं विनिश्चित्य मुनिर्महात्मा समुद्दिधीर्षुः पितरं स दुर्गतेः ॥ शुचिस्ततो गौतमीमाशु गत्वा तत्र स्नात्वा संस्मरञ्छंभुविष्णू ॥ १८ ॥ ददौ जलं प्रेतरूपाय पित्रे पिशाचरूपाय सुदुःखिताय ॥ तदा नमात्रेण तदैव पूतोऽजीगर्तिरावाप वपुः सुपुण्यम् ॥ १९ ॥ विमानयुक्तः सुरसंघजुष्टं विष्णोः पदं प्राप सुतप्रभावात् ॥ गंगाप्रभावाच्च हरेश्च शंभो र्विधातुरर्कायुततुल्यतेजाः ॥ २० ॥ तद्वः प्रभृत्येतदतिप्रसिद्धं पैशाचनाशं च महागदं च॥महान्ति पापानि च नाशमाशु प्रयान्ति यस्य स्मरणेन पुंसाम् ॥ २१ ॥ तीर्थस्य चेदं गदितं तवाद्य माहात्म्येमतत्त्रिशतानि यत्र ॥ तीर्थान्यथान्यानि भवन्ति भुक्तिमुक्तिप्रदायीनिकिमन्यदत्र ॥ २२ ॥ सर्वसिद्धिदमाख्यातमित्याद्यत्र शतत्रयम् ॥ तीर्थानां मुनिजुष्टानां स्मरणादप्यभीष्टदम् ॥ २३ ॥ इति श्रीब्रह्मपुराणमतगौतमीमाहात्म्ये तीर्थमाहात्म्ये पैशाचादिशतत्रयतीर्थवर्णनं नामाशीतितमोऽध्यायः ॥ ८० ॥

॥ ब्रह्मोवाच ॥ ॥ निम्नभेदमिति ख्यातं सर्वपापप्रणाशनम् ॥ गङ्गाया उत्तरे पारे तीर्थं त्रैलोक्यविश्रुतम् ॥ १ ॥ यस्य संस्मरणेनापि सर्वपापक्षयो भवेत् ॥ वेदद्वीपस्य तत्रैव दर्शनाद्वेदविद्भवेत् ॥ २ ॥ उर्वशीं चकमे राजा ऐलः परमधार्मिकः ॥ को न मोहमुपायाति विलोक्य मदिरेक्षणाम् ॥ ३ ॥ सा प्रायाद्यत्र राजाऽसौ घृतं स्तोकं समश्नुते ॥ आनग्नदर्शनात्कृत्वा तस्याः कालावधिं नृपः ॥ ४ ॥ तां स्वीचकार ललनां यूनां रम्यां नवां नवाम् ॥ सुप्तायां शयने तस्यां समुत्तस्थौ पुरूरवाः ॥ ५ ॥ विलोक्य तं विवसनं तदैवांसौ विनिर्गता ॥ विद्युच्चञ्चलचित्तानां क्व स्थैर्यं ननु योषिताम् ॥ ६ ॥ [सा प्रायाद्यत्र राजासौ घृतं स्तोकं समश्नुते ॥ ईक्षांचक्रे स शर्वर्यां विवस्त्रो विस्मितो महान् ॥]एतस्मिन्नन्तरे राजा युद्धायागाद्रिपून्प्रति॥७॥ताञ्जित्वा पुनरप्यागादेवलोकं सुपूजितम् ॥ स चाऽऽगत्य महाराजो वसिष्ठाच्च पुरोधसः ॥ ८ ॥ उर्वश्या गमनं श्रुत्वा ततो दुःखसमन्वितः ॥ न जुहोति न चाश्नाति न शृणोति न पश्यति ॥ ९ ॥ एतस्मिन्नन्तरे तत्र मृतावस्थं नृपोत्तमम् ॥ बोधयामास वाक्यैश्च हेतुभूतैः पुरोहितः ॥ १० ॥ ॥ वसिष्ठ उवाच ॥ ॥ सा मृताऽद्य महाराज मा शुचस्त्वं महामते ॥ एवं स्थितं तु मा त्वां वै अशिवाः स्पृश्युराशुगाः ॥ ११ ॥ न वै स्त्रैणानि जानीषे हृदयानि महामते ॥ शालावृकाणां यादृंशि तस्मात्त्वं भूप मा शुचः॥१२॥को नाम ह्येके राजेन्द्र कामिनीभिर्न वञ्चितः ॥ वञ्चकत्वं नृशंसत्वं चञ्चलत्वं कुशीलता॥१३॥इति स्वाभाविकं यासां ताः कथं सुखहेतवः॥ कालेन को न निहतः कोऽर्थी गौरवमागतः ॥१४॥श्रिया न भ्रामितः को वा योषिद्भिः को न खण्डितः ॥ स्वप्नमायोपमा राजन्मदविप्लुतचेतसः॥१५॥सुखाय योषितः कस्यं ज्ञात्वैतद्धि स्थिरो भव ॥ विहाय शंकरं विष्णुं गौतमीं वा महामते ॥ दुःखिनां शरणं नान्यद्विद्यते भुवनत्रये॥१६॥ब्रह्मोवाच ॥ एतच्छ्रुत्वा ततो राज्ञा दुःखं संहृत्य यत्नतः ॥ गौतम्या मध्यसंस्थोऽसावैलः परमधार्मिकः ॥१७॥ तत्र चाऽऽराधयामास शिवं देवं जनार्दनम् ॥ ब्रह्माणं भास्करं गङ्गां देवानन्यांश्च यत्नतः ॥१८॥ यो विपन्नो न तीर्थानि देवताश्च न सेवते ॥ स कालवशगो जन्तुः कां दशामनुयास्यति॥१९॥तदीश्वरैकशरणो गौतमीसेवनोत्सुकः ॥ परां श्रद्धामुपगतः संसारास्थापराङ्मुखः ॥२०॥ ईजे यज्ञांश्च बहुलान्नृत्विग्भिर्बहुदक्षिणान् ॥ वेदद्वीपोऽभवत्तेन यज्ञद्वीपः स उच्यते ॥ २१ ॥ पौर्णमास्यां तु शर्वर्यां तत्राऽऽयाति सदोर्वशी ॥ तस्य दीपस्य यः कुर्यात्प्रदक्षिणमथो नरः ॥ २२ ॥ प्रदक्षिणीकृता तेन पृथिवी सागराम्बरा ॥ वेदानां स्मरणं तत्र यज्ञानां स्मरणं तथा ॥ २३ ॥ सुकृती तत्र यः कुर्याद्वेदयज्ञफलं लभेत ॥ ऐलतीर्थं तु तज्ज्ञेयं तदेव च पुरूरवम् ॥ २४ ॥ वासिष्ठं चापि तत्तु स्यान्निम्नभेदं तदुच्यते ॥ ऐले राज्ञि न किंचि

१ धनुश्चिह्नान्तर्गतपद्यमत्रासंगतमिव प्रतिभाति ।

त्स्यान्निम्नं सर्वेषु कर्मसु ॥ २५ ॥ यदेतन्निम्नमुर्वश्यां सर्वभावेन वर्तनम् ॥ तच्चापि भेदितं निम्नं वसिष्ठेन च गंगया ॥ २६ ॥ निम्नभेदमभूत्तेन
दृष्टाद्येष्टसिद्धिदम् ॥ तत्र सप्त शतान्याहुस्तीर्थानि गुणवन्ति च ॥ २७ ॥ तेषु स्नानं च दानं च सर्वक्रतुफलप्रदम् ॥ स्नानं कृत्वा निम्नभेदे यः
पश्यति सुरानिमान् ॥ २८ ॥ इह चामुत्र वा निम्नं न किंचित्तस्य विद्यते ॥ सर्वोन्नतिमवाप्यासौ मोदते दिवि शक्रवत् ॥ २९ ॥ ॥ इति श्रीब्रह्म
पुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये निम्नभेदादिसप्तशततीर्थवर्णनं नामैकाशीतितमोऽध्यायः ॥ ८१ ॥ ॥ ब्रह्मोवाच ॥ ॥ नन्दीतटमिति
ख्यातं तीर्थं वेदविदो विदुः ॥ तस्य प्रभावं वक्ष्यामि शृणु यत्नेन नारद ॥ १ ॥ अत्रिपुत्रो महातेजाश्चन्द्रमा इति विश्रुतः ॥ सर्वान्वेदांश्च विधिवद्ध
नुवेंदं यथाविधि ॥ २ ॥ अधीत्य जीवात्सर्वांश्च विद्याश्चान्या महामते ॥ गुरुपूजां करोमीति जीवमाह स चन्द्रमाः ॥ बृहस्पतिस्तदा प्राह चन्द्रं
शिष्यं मुदाऽन्वितः ॥ ३ ॥ ॥ बृहस्पतिरुवाच ॥ मम प्रिया तु जानीते तारा रतिसमप्रभा ॥४॥ ॥ ब्रह्मोवाच ॥ प्रष्टुं तां च तदा प्रायादन्तर्वेश्म स
चन्द्रमाः॥ तारां तारामुखीं दृष्ट्वा जगृहे तां करेण सः॥५॥स्ववेश्म प्रति तां लोभाद्बलादाकर्षयत्तदा ॥ तावद्धैर्यनिधिर्ज्ञानी मतिमान्विजितेन्द्रियः॥६॥
यावन्न कामिनीनेत्रवागुराभिर्निबध्यते ॥ विशेषतो रहःसंस्थां कामिनीमायतेक्षणाम् ॥ ७ ॥ विलोक्य न मनो याति कस्य कामेषु वश्यताम् ॥ अत
एवान्यपुरुषदर्शनं न कदाचन ॥ ८ ॥ कुलवध्वा रहः कार्यं भीतया शीलविप्लुतेः ॥ विज्ञाय तत्परिजनात्सहसोत्थाय निर्गतः ॥९॥ दृष्ट्वा तदुष्कृतं
कर्म बृहस्पतिरुदारधीः ॥ शशाप कोपाच्चाऽऽक्षिप्य वाग्भिर्विप्रियकारिभिः ॥ १० ॥ पराभिभूतामालोक्य कान्तां कः सोढुमीश्वरः ॥ युयुधे तेन
जीवोऽपि देवैश्चन्द्रमसा रुषा ॥ ११ ॥ न शापैर्हन्यते चन्द्रो नाऽऽयुधैः सुरमन्त्रितैः ॥ बृहस्पतिप्रणीतैश्च न मन्त्रैर्हन्यते शशी ॥ १२ ॥ तदा
चन्द्रस्तु तां तारां नीत्वा संस्थाप्य मन्दिरे ॥ बुभुजे बहुवर्षाणि रोहिणीं चाकुतोभयः ॥ १३ ॥ न जीयेत तदा दैवैर्न कोपैः शापमन्त्रकैः ॥ न राज
भिर्न ऋषिभिर्न साम्ना भेददण्डनैः ॥ १४ ॥ यदा भार्यां न लेभेऽसौ गुरुः सर्वप्रयत्नतः ॥ सर्वोपायक्षये जीवस्तदा नीतिमथास्मरत् ॥
॥ १५ ॥ अपमानं पुरस्कृत्य मानं कृत्वा तु पृष्ठतः ॥ स्वार्थमुद्धरते प्राज्ञः स्वार्थभ्रंशो हि मूर्खता ॥ १६ ॥ साध्यं केना
प्युपायेन जानद्भिः पुरुषैः फलम् ॥ वृथाभिमानिनः शीघ्रं विपद्यन्ते विमोहिताः ॥ १७ ॥ एवं निश्चित्य मेधावी शुक्रं गत्वा
न्यवेदयत् ॥ तमागतं कविर्ज्ञात्वा संमानेनाभ्यनन्दयत् ॥ १८ ॥ उपविष्टं सुविश्रान्तं पूजितं च यथाविधि ॥ पर्यपृच्छद्दैत्यगुरुस्तदा
गमनकारणम् ॥१९॥ गृहागतस्य विमुखाः शत्रवोऽप्युत्तमा न हि ॥ तस्मै स विस्तरेणाऽऽह भार्याहरणमादितः ॥२०॥ बृहस्पतेस्तदा वाक्यं श्रुत्वा

कोपान्वितः कविः ॥ अपराधं तु चन्द्रस्य मेने शिष्यस्य नारद ॥ अतिक्रममिमं श्रुत्वा कोपात्कविरथाब्रवीत् ॥ २१ ॥ शुक्र उवाच ॥ तदा
भोक्ष्ये तदा पास्ये तदा स्वप्स्ये तदा वदे ॥ यदाऽऽनये प्रियां भ्रातस्तव भार्यां परार्दिताम् ॥ २२ ॥ तामानीय भवं पूज्य चन्द्रं शप्त्वा गुरुद्रुहम् ॥
पश्चाद्भोक्ष्ये महाबाहो शृणु वाचं ग्रहेश्वर ॥ २३ ॥ ब्रह्मोवाच ॥ एवमुक्त्वा स जीवेन दैत्याचार्यो जगाम ह ॥ शिवमाराध्य यत्नेन परं सामर्थ्य
मासवान् ॥ २४ ॥ वरानवाप्य विविधाञ्छंकराद्भावपूजितात् ॥ शिवप्रसादादिति नाम देहिनामिह दुर्लभम् ॥ २५ ॥ जगाम शुक्रो जीवेन तारया
यत्र चन्द्रमाः ॥ वर्तते तं शशापोच्चैः शृणु त्वं चन्द्र मे वचः ॥ २६ ॥ यस्मात्पापतरं कर्म त्वया पापमदात्कृतम् ॥ कुष्ठी भूयास्ततश्चन्द्रं शशापैवं
रुषा कविः ॥ २७ ॥ कविशापप्रदग्धोऽभूत्तदैव मृगलाञ्छनः ॥ प्रायुः क्षयं न के नाम गुरुस्वामिसखिद्रुहः ॥२८॥ तत्याज तां स चन्द्रोऽपि तारां तु
जगृहे कविः ॥ शुक्रोऽपि देवानाहूय ऋषीन्पितृगणांस्तथा ॥२९॥ नदीर्नदांश्च विविधानोषधीश्च पतिव्रताः ॥ ततः संप्रष्टुमारेभे तारावृत्तविनिष्कयम्
॥ ३० ॥ ततः श्रुतिः सुरानाह गौतम्यां भक्तितस्त्वियम् ॥ स्नानं करोतु जीवेन तारा पूता भविष्यति ॥ ३१ ॥ रहस्यमेतत्परमं न वाच्यं यस्य कस्य
चित् ॥ सर्वास्वपि दशास्वेषा शरणं गौतमी नृणाम् ॥३२॥ तथाऽकरोच्चैव तारा भर्त्रा स्नानं यथाविधि ॥ पुष्पवृष्टिरभूत्तत्र जयशब्दो व्यवर्तत ॥ ३३॥
पुनर्वै देवा अददुः पुनर्मनुष्या उत ॥ राजानः सत्यं कृण्वाना ब्रह्मजायां पुनर्ददुः ॥३४॥ पुनर्दत्त्वा ब्रह्मजायां कृतां देवैरकल्मषाम् ॥ सर्वं क्षेममभूत्तत्र
तस्मात्तीर्थं महामुने ॥३५॥ तदभूत्सकलाघौघध्वंसनं सर्वकामदम् ॥ आनन्दं क्षेममभवत्सुराणामसुरारिणाम् ॥३६॥ बृहस्पतेश्च शुक्रस्य तारायाश्च
विशेषतः ॥ परमानन्दमापन्नो गुरुर्गंगामभाषत ॥ ३७ ॥ गुरुरुवाच ॥ त्वं गौतमि सदा पूज्या सर्वैरपि सुखप्रदा ॥ विशेषतस्तु सिंहस्थे मयि
त्रैलोक्यपावनी ॥ ३८ ॥ भविष्यसि सरिच्छ्रेष्ठे सर्वतीर्थैः समन्विता ॥ यानि कानि च तीर्थानि स्वर्गमृत्युरसातले ॥ त्वां स्नातुं तानि यास्यन्ति
मयि सिंहस्थितेऽम्बिके ॥ ३९ ॥ ब्रह्मोवाच ॥ धन्यं यशस्यमायुष्यमारोग्यश्रीविवर्धनम् ॥ सौभाग्यैश्वर्यजननं तीर्थमानन्दनामकम् ॥४०॥ तत्र पञ्च
सहस्राणि तीर्थान्याह स गौतमः ॥ स्मरणात्पठनाद्वाऽपि इष्टैः संयुज्यते सदा ॥ ४१ ॥ शिवस्यात्र निविष्टस्य नन्दी गङ्गातटेऽनिशम् ॥ साक्षा
च्चरत्यसौ धर्मस्तस्मान्नन्दीतटं स्मृतम् ॥ आनन्दमपि तत्तीर्थं सर्वानन्दविवर्धनात् ॥ ४२ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये
नन्दीतटतीर्थादिपञ्चसहस्रतीर्थवर्णनं नाम द्व्यशीतितमोऽध्यायः ॥ ८२ ॥ ब्रह्मोवाच ॥ भावतीर्थमिति प्रोक्तं यत्र साक्षाद्भवः स्थितः ॥ अशेषजग
दन्तस्थो भूतात्मा सच्चिदाकृतिः ॥ १ ॥ तत्रेमां शृणु वक्ष्यामि कथां पुण्यतमां शुभाम् ॥ सूर्यवंशकरः श्रीमान्क्षत्रियाणां धुरंधरः ॥ २ ॥ प्राचीनव

हिंराख्यातः सर्वधर्मेषु पारगः ॥ तिस्रः कोट्योऽर्धकोटिश्च वर्षाणां राज्य आस्थितः ॥३॥ तस्येदृशं व्रतं चाऽऽसीद्यदहं यौवनच्युतः ॥ भवेयं प्रियया
वाऽपि पुत्रैर्वा प्रियवस्तुभिः ॥४॥ वियुज्येयं ततो राज्यं त्यक्ष्येऽहं नात्र संशयः ॥ विवेकिनां कुलीनानामिदमेवोचितं नृणाम् ॥५॥ स्थीयते विजने
क्वापि विरक्तैर्विभवक्षये ॥ तस्मिन्प्रशासति महीं न वियोगः प्रियैः क्वचित् ॥ ६ ॥ नाऽऽधिव्याधी न दुर्भिक्षं न बन्धुकलहो नृणाम् ॥ तस्मिञ्शा
सति राज्यं तु न च कश्चिद्वियुज्यते ७ ॥ तत पुत्रार्थमकरोद्यज्ञं राजा महामतिः ॥ ततः प्रसन्नो भगवान्वरं प्रादाद्यथेप्सितम् ॥ ८ ॥ गौतमीती
रसंस्थाय राज्ञे देवो महेश्वरः ॥ पुत्रं देहीति राजा वै भवं प्राह स भार्यया ॥ ९ ॥ भवः प्राह नृपं प्रीत्या पश्य नेत्रं तृतीयकम् ॥ ततः पश्यति
राजेन्द्रे भवस्याक्षि तु मानद ॥ १० ॥ चक्षुर्दीप्त्याऽभवत्पुत्रो महिमा नाम विश्रुतः ॥ येनाकारि स्तुतिः पुण्या महिम्न इति विश्रुता ॥ ११ ॥
किमलभ्यं भगवति प्रसन्ने त्रिपुरान्तके ॥ यं नित्यमनुवर्तन्ते हरिब्रह्मादयः सुराः ॥ १२ ॥ प्राप्तपुत्रश्च नृपतिस्तीर्थश्रैष्ठ्यमयाचत ॥ महापापम
हारोगमहाव्यसनिनां नृणाम् ॥ १३ ॥ नानाविपद्गणार्तानां सर्वाभिमतलब्धये ॥ प्रादाज्ज्यैष्ठ्यं भवश्चापि भावतीर्थं तदुच्यते ॥ १४ ॥ तत्र
स्नानेन दानेन सर्वान्कामानवाप्नुयात् ॥ भवप्रसादादभवत्सुतः प्राचीनबर्हिषः ॥१५॥ महिमा गौतमीतीरे भावतीर्थं तदुच्यते ॥ तत्र सप्तति तीर्थानि
पुण्यान्यखिलदानि च ॥ १६ ॥ इति श्रीब्रह्मपुराणगतगौ० तीर्थमाहात्म्ये भावतीर्थादिसप्ततीर्थवर्णनं नाम त्र्यशीतितमोऽध्यायः ॥ ८३ ॥ ब्रह्मो
वाच ॥ सहस्रकुण्डमाख्यातं तीर्थं वेदविदो विदुः ॥ यस्य स्मरणमात्रेण सुखी संपद्यते नरः ॥ १ ॥ पुरा दाशरथी रामः सेतुं बद्ध्वा महार्णवे ॥
लंकां दग्ध्वा रिपून्हत्वा रावणादीन्रणे शरैः ॥ २ ॥ वैदेहीं च समासाद्य रामो वचनमब्रवीत् ॥ पश्यत्सु लोकपालेषु तस्याऽऽचार्ये पुरः स्थिते ॥ ३ ॥
अग्नौ शुद्धिगतां सीतां रामो लक्ष्मणसन्निधौ ॥ एहि वैदेहि शुद्धाऽसि अंकमारोढुमर्हसि ॥ ४ ॥ नेत्युवाच तदा श्रीमानंगदो हनुमांस्तथा ॥ अयो
ध्यायां तु वैदेहि सार्धं यामः सुहृज्जनैः ॥ ५ ॥ तत्र शुद्धिमवाप्याथ पुनर्भ्रातृषु मातृषु ॥ लौकिकेष्वपि पश्यत्सु ततः शुद्धा नृपात्मजा ॥ ६ ॥
अयोध्यायां सुपुण्येऽद्रि अङ्कमारोढुमर्हसि ॥ अस्याश्चरित्रविषये संदेहः कस्य जायते ॥ ७ ॥ लोकापवादस्तदपि निरस्यः स्वजनेषु हि ॥ तयो
र्वाक्यमनादृत्य लक्ष्मणः सविभीषणः ॥ ८ ॥ रामश्च जाम्बवांश्चैव तामाह्वयन्नृपात्मजाम् ॥ स्वस्तीत्युक्ता देवताभी राज्ञोऽङ्कं चाऽऽरुरोह सा ॥ ॥२६०॥
॥ ९ ॥ मुदितास्ते ययुः शीघ्रं पुष्पकेण विराजता ॥ अयोध्यां नगरीं प्राप्य तथा राज्यं स्वकं तु यत् ॥ १० ॥ मुदितास्तेऽभवन्सर्वे सदा रामानु
वर्तिनः ॥ ततः कतिपयाहेषु अनार्येभ्यो विरूपिकाम् ॥ ११ ॥ वाचं श्रुत्वा स तत्याज गुर्विणीं तामयोनिजाम् ॥ मिथ्यापवादमपि हि न सहन्ते

कुलोन्नताः ॥ १२ ॥ वाल्मीकेर्मुनिमुख्यस्य आश्रमस्य समीपतः ॥ तत्याज लक्ष्मणः सीतामदुष्टां रुदतीं रुदन् ॥ १३ ॥ नोल्लङ्घ्याऽऽज्ञा
गुरूणामित्यसौ तदकरोद्क्रिया ॥ ततः कतिपयाहेषु व्यतीतेषु नृपात्मजः ॥ १४ ॥ रामः सौमित्रिणा सार्धं हयमेधाय दीक्षितः ॥ तत्रैवाऽऽजग्मतु
रुभौ रामपुत्रौ यशस्विनौ ॥१५॥ लवः कुशश्च विख्यातौ नारदाविव गायकौ ॥ रामायणं समग्रं तद्गन्धर्वाविव सुस्वरौ ॥१६॥ रामस्य चरितं सर्वं
गायमानौ समीयतुः ॥ यज्ञवाटं राजसुतौ हेतुभिर्लक्षितौ तदा ॥ १७ ॥ रामपुत्रावुभौ शूरौ वैदेह्यास्तनयाविति ॥ तावानीय ततः पुत्रावभिषिच्य
यथाक्रमम् ॥ १८ ॥ अङ्कारूढौ ततः कृत्वा स्वस्वजे तौ पुनः पुनः ॥ संसारदुःखखिन्नानामगतीनां शरीरिणाम् ॥ १९ ॥ पुत्रालिङ्गनमेवात्र परं
विश्रान्तिकारणम् ॥ मुहुरालिङ्ग्य तौ पुत्रौ मुहुः स्वजति चुम्बति ॥ २० ॥ किमप्यन्तर्ध्यायति च निःश्वसत्यपि वै मुहुः ॥ प्राप्ता लंकावासिनस्तु
राक्षसा एतदंन्तरे ॥२१॥ सुग्रीवो हनुमांश्चैव अङ्गदो जाम्बवांस्तथा ॥ अन्ये च वानराः सर्वे विभीषणपुरःसराः ॥ २२ ॥ ते चाऽऽगत्य नृपं प्राप्ताः
सिंहासनमुपस्थितम् ॥ सीतामदृष्ट्वा हनुमानङ्गदः कनकाङ्गदः ॥ २३ ॥ क्व गताऽयोनिजा माता एको रामोऽत्र दृश्यते ॥ रामेण सा परित्यक्ता
इत्यूचुर्द्वारपालकाः ॥ २४ ॥ पश्यत्सु लोकपालेषु आर्ये तत्र प्रवादिनि ॥ अग्नौ शुद्धिं गता सीता किंतु राजा निरङ्कुशः ॥ २५ ॥ उत्पन्नैर्लौकिकै
र्वाक्यै रामस्त्यजति तां प्रियाम् ॥ मरिष्याव इति ह्युक्त्वा गौतमीं पुनरीयतुः ॥ २६ ॥ रामस्तौ पृष्ठतोऽभ्येत्य अयोध्यावासिभिः सह ॥ आगत्य
गौतमीं तत्राकुर्वंस्ते परमं तपः ॥ २७ ॥ स्मारं स्मारं निश्वसन्तस्तां सीतां लोकमातरम् ॥ संसारास्थाविरहिता गौतमीसेवनोत्सुकाः ॥ २८ ॥
लोकत्रयपतिः साक्षाद्रामोऽनुजसमन्वितः ॥ प्राप्तः स्नात्वा च गौतम्यां शिवाराधनतत्परः ॥ २९ ॥ परितापं जहौ सर्वं सहस्रपरिवारितः ॥ यत्र
चाऽऽसीत्स वृत्तान्तः सहस्रकुण्डमुच्यते ॥ ३० ॥ दशापराणि तीर्थानि तत्र सर्वार्थदानि च ॥ तत्र स्नानं च दानं च सहस्रफलदायकम् ॥ ३१ ॥
यत्र श्रीगौतमीतीरे वसिष्ठादिमुनीश्वरैः ॥ सर्वापत्तारकं होममकारयदघान्तकम् ॥ ३२ ॥ सहस्रसंख्यायुक्तेषु कुण्डेषु वसुधारया ॥ सर्वानपेक्षिता
न्कामानवापासौ महातपाः ॥ ३३ ॥ गौतम्याः सरिदम्बायाः प्रसादाद्राक्षसान्तकः ॥ सहस्रकुण्डाभिज्ञं तदभूत्तीर्थं महाफलम् ॥ ३४ ॥ इति
श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये सहस्रकुण्डादिदशतीर्थवर्णनं नाम चतुरशीतितमोऽध्यायः ॥ ८४ ॥ ॥ ब्रह्मोवाच ॥ कपिलाती
र्थमाख्यातं तदेवाऽऽङ्गिरसं स्मृतम् ॥ तदेवाऽऽदित्यथाख्यातं सैंहिकेयं तदुच्यते ॥ १ ॥ गौतम्या दक्षिणे पारे आदित्यान्मुनिसत्तम ॥ अयाजयन्न
ङ्गिरसो दक्षिणां ते भुवं ददुः ॥ २ ॥ अङ्गिरोभ्यस्तदाऽऽदित्यास्तपसेऽङ्गिरसो ययुः ॥ सा भूमिः सैंहिकी भूत्वा जनान्सर्वानभक्षयत् ॥ ३ ॥

तत्रसुस्ते जनाः सर्वे अङ्गिरोभ्यो न्यवेदयन् ॥ विभीता ज्ञानतो ज्ञात्वा भुवं तां सैंहिकीमिति ॥ ४ ॥ आदित्याननुगत्वाऽथ वाचमङ्गिरसोऽब्रुवन् ॥ भुवं गृह्णन्तु या दत्ता नेत्यादित्यास्तदाऽब्रुवन् ॥ ५ ॥ निवृत्तां दक्षिणां नैव प्रतिगृह्णन्ति सूरयः ॥ स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ॥ ६ ॥ षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः ॥ भूमेः स्वपरदत्ताया हरणान्नाधिकं क्वचित् ॥ ७ ॥ पापमस्ति महारौद्रं न स्वीकुर्मः पुनस्तु ताम् ॥ एवं यदा स्वदत्ताया हरणे किं तदा भवेत् ॥ ८ ॥ तथाऽपि क्रयरूपेण गृह्णीमो दक्षिणां भुवम् ॥ तथेत्युक्ते तु ते देवाः कपिलां शुभलक्षणाम् ॥ ९ ॥ गङ्गाया दक्षिणे पारे भुवः स्थाने तु तां ददुः ॥ भुक्तिमुक्तिप्रदः साक्षाद्विष्णुस्तिष्ठति मूर्तिमान् ॥ १० ॥ कापिलासंगमं तच्च सर्वाघौघविनाशनम् ॥ तत्राभवद्दानतोयादापगा कपिलाभिधा ॥ ११ ॥ सस्यवत्या अपि भुवो दानाद्दोदानमुत्तमम् ॥ लोकरक्षां चकारासौ कृत्वा विनिमयं मुनिः ॥ ॥ १२ ॥ यत्र तीर्थे च तद्भूतं गोतीर्थं तदुदाहृतम् ॥ पुण्यदं तत्र तीर्थानां शतमुक्तं मनीषिभिः ॥ १३ ॥ तत्र स्नानेन दानेन भूमिदानफलं भवेत् ॥ संगता गङ्गया तच्च कपिलासंगमं विदुः ॥ १४ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये कपिलासंगमादिशततीर्थवर्णनं नाम पञ्चाशीतितमोऽध्यायः ॥८५॥ ब्रह्मोवाच ॥ शङ्खह्रदं नाम तीर्थं यत्र शङ्खगदाधरः ॥ तत्र स्नात्वा च तं दृष्ट्वा मुच्यते भवबन्धनात् ॥ १ ॥ तत्रेदं वृत्तमाख्यास्ये भुक्तिमुक्तिप्रदायकम् ॥ पुरा कृतयुगस्याऽऽदौ ब्रह्मणः सामगायिनः ॥ २ ॥ ब्रह्माण्डागारसंभूता राक्षसा बहुरूपिणः ॥ ब्रह्माणं खादितुं प्राप्ता बलोन्मत्ता धृतायुधाः ॥ ३ ॥ तदाऽहमब्रवं विष्णुं रक्षणाय जगद्गुरुम् ॥ स विष्णुस्तानिं रक्षांसि हन्तुं चक्रेण चोद्यतः ॥ ४ ॥ छित्त्वा चक्रेण रक्षांसि शङ्खमापूरयत्तदा ॥ निष्कण्टकं तलं कृत्वा स्वर्गं निर्वैरमेव च ॥ ५ ॥ ततो हर्षप्रकर्षेण शङ्खमापूरयद्धरिः ॥ ततो रक्षांसि सर्वाणि ह्यनीनशुरशेषतः ॥ ६ ॥ यत्रैतद्वृत्तमखिलं विष्णुशङ्खप्रभावतः ॥ शंखतीर्थं तु तत्प्रोक्तं सर्वक्षेमकरं नृणाम् ॥ ७ ॥ सर्वाभीष्टप्रदं पुण्यं स्मरणान्मङ्गलप्रदम् ॥ आयुरारोग्यजननं लक्ष्मीपुत्रप्रवर्धनम् ॥ ८ ॥ स्मरणात्पठनाद्वाऽपि सर्वकामानवाप्नुयात् ॥ तीर्थानामयुतं तत्र सर्वपापनुदं मुने ॥ ९ ॥ तीर्थान्ययुतसंख्यानि सर्वपापहराणि च ॥ येषां प्रभावं जानाति वक्तुं नापि महेश्वरः ॥ १० ॥ पापक्षयप्रतिनिधिर्नैतेभ्योऽस्त्यपरः क्वचित् ॥ ११ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये शङ्खतीर्थाद्ययुततीर्थवर्णनं नाम षडशीतितमोऽध्यायः ॥ ८६ ॥ ॥ ब्रह्मोवाच ॥ किष्किन्धातीर्थमाख्यातं सर्वकामप्रदं नृणाम् ॥ सर्वपापप्रशमनं यत्र संनिहितो भवः ॥ १ ॥ तस्य स्वरूपं वक्ष्यामि यत्नेन शृणु नारद ॥ पुरा दाशरथी रामो रावणं लोकरावणम् ॥ २ ॥ किष्किन्धावासिभिः सार्धं

जघान रणमूर्धनि ॥ सपुत्रं सबलं हत्वा सीतामादाय शत्रुहा ॥ ३ ॥ भ्रात्रा सौमित्रिणा सार्धं वानरैश्च महाबलैः ॥ बिभीषणेन बलिना देवैः प्रत्यागतो
नृपः ॥ ४ ॥ कृतस्वस्त्ययनः श्रीमान्पुष्पकेण विराजितः ॥ यदासीद्धनराजस्य कामगेनाऽऽशुगामिना ॥ ५ ॥ अयोध्यामगमन्सर्वे गच्छन्गंगामप
श्यत ॥ रामो विरामः शत्रूणां शरण्यः शरणार्थिनाम् ॥ ६ ॥ गौतमीं तु जगत्पुण्यां सर्वकामप्रदायिनीम् ॥ मनोनयनसंतापनिवारणपरायणाम् ॥
॥ ७ ॥ तां दृष्ट्वा नृपतिः श्रीमान्गङ्गातीरमथाऽऽविशत् ॥ तां दृष्ट्वा प्राह नृपतिर्हर्षगद्गदया गिरा ॥ हरीन्सर्वानथाऽऽमन्त्र्य हनुमत्प्रमुखान्मुने ॥
॥ ८ ॥ ॥ राम उवाच ॥ अस्याः प्रभावाद्धरयो योऽसौ मम पिता प्रभुः ॥ सर्वपापविनिर्मुक्तस्ततो यातस्त्रिविष्टपम् ॥ ९ ॥ इयं जनित्री
सकलस्य जन्तोर्भुक्तिप्रदा मुक्तिमथापि दद्यात् ॥ पापानि हन्यादपि दारुणानि काऽन्याऽनयाऽस्त्यत्र नदी समाना ॥ १० ॥ हतानि शश्व
दुरितानि चैव अस्याः प्रभावादरयः सखायः ॥ विभीषणो मैत्रमुपैति नित्यं सीता च लब्धा हनुमांश्च बन्धुः ॥ ११ ॥ लङ्का च भग्ना सगणं हि
रक्षो हतं हि यस्याः परिसेवनेन ॥ यां गौतमो देववरं प्रपूज्य शिवं शरण्यं सजटामवाप ॥ १२ ॥ सेयं जनित्री सकलेप्सितानाममङ्गलानामपि
संनिहंत्री ॥ जगत्पवित्रीकरणैकदक्षा दृष्टाऽद्य साक्षात्सरितां सवित्री ॥ १३ ॥ कायेन वाचा मनसा सदैनां व्रजामि गङ्गां शरणं शरण्याम् ॥ वंदे
सतां मातरं सर्वभावाच्छंभोर्जटजूटकृताधिवासाम् ॥ १४ ॥ ॥ ब्रह्मोवाच ॥ एतत्समाकर्ण्य वचो नृपस्य तत्राऽऽप्लुवन्हरयः सर्व एव ॥ पूजां
चक्रुर्विधिवत्ते पृथक्च पुष्पैरनेकैः सर्वलोकोपहारैः ॥ १५ ॥ संपूज्य शर्वं नृपतिर्यथावत्स्तुत्वा वाक्यैः सर्वभावोपयुक्तैः ॥ ते वानरा मुदिताः सर्व
एव नृत्यं च गीतं च तथैव चक्रुः ॥ १६ ॥ सुखोषितस्तां रजनीं महात्मा प्रियानुयुक्तः संवृतः प्रेमवद्भिः ॥ दुःखं जहौ सर्वममित्रसंभवं किं नाऽऽ
प्यते गौतमीसेवनेन ॥ १७ ॥ सविस्मयः पश्यति भृत्यवर्गं गोदावरीं स्तौति च संप्रहृष्टः ॥ संमानयन्भृत्यगणं समग्रमवाम रामः कमपि प्रमो
दम् ॥ पुनः प्रभाते विमले तु सूर्ये बिभीषणो दाशरथिं बभाषे ॥ १८ ॥ विभीषण उवाच ॥ नाद्यापि तृप्तास्तु भवाम तीर्थे कंचिच्च कालं निव
साम चात्र ॥ वत्स्याम चात्रैव पराश्चतस्रो रात्रीरथो याम वृतास्त्वयोध्याम् ॥ १९ ॥ ॥ ब्रह्मोवाच ॥ तस्याथ वाक्यं हरयोऽनुमेनिरे तथैव
रात्रीरपराश्चतस्रः ॥ संपूज्य देवं सकलेश्वरं तं भ्रातृप्रियं तीर्थमथो जगाम ॥ २० ॥ सिद्धेश्वरं नाम जगत्प्रसिद्धं यस्य प्रसादात्प्रबलो दशास्यः ॥
एवं तु पश्चाहमथोषिरे ते स्वं स्वं प्रतिष्ठापितलिंगमर्च्य॥२१॥शुश्रूषणं तत्र करोति वायोः सुतोऽनुगामी हनुमान्नृपस्य ॥ गच्छन्नृपेन्द्रो हनुमन्तमाह
लिंगानि सर्वाणि विसर्जयस्व ॥ २२ ॥ मत्स्थापितान्युत्तममन्त्रविद्भिस्तथेतरैः शंकरकिंकरैश्च ॥ नोद्वास्य पूजां परशंकरेण बाह्यं समायोज्यमहो

भवस्य ॥ २३ ॥ तिष्ठन्ति सुस्थास्तदनादरेण ते खड्गपत्रादिषु संभवन्ति ॥ येऽश्रद्दधानाः शिवलिंगपूजां विधाय कृत्यं न समाचरन्ति ॥ २४ ॥ यथोचितं ते यमकिंकरैर्हि पच्यन्त एवाखिलदुर्गतीषु ॥ रामाज्ञया वायुसुतो जगाम दोर्भ्यां न चोत्पाटयितुं शशाक ॥ २५ ॥ ततः स्वपुच्छेन ग्रहीतुकामः संवेष्टच लिंगं तु विसृष्टकामः ॥ नैवाशकत्तन्महदद्भुतं स्यात्कपीश्वराणां नृपतेस्तथैव ॥ २६ ॥ कश्चालयेल्लब्धमहानुभावं महेशलिंगं पुरुषो मनस्वी ॥ तन्निश्चलं प्रेक्ष्य महानुभावो नृपप्रवीरः सहसा जगाम ॥ २७ ॥ विप्रानथाऽऽमन्त्र्य विधाय पूजां प्रदक्षिणीकृत्य च रामचन्द्रः ॥ शुद्धातिशुद्धेन हृदाऽखिलैस्तैर्लिङ्गानि संर्वाणि ननाम रामः ॥ २८ ॥ किष्किन्धवासिप्रवरैरशेषैः संसेवितं तीर्थमतो बभूव ॥ अत्राऽऽप्लुवादेव महान्ति पापान्यपि क्षयं यान्ति न संशयोऽत्र ॥२९॥ पुनश्च गंगां प्रणनाम भक्त्या प्रसीद मातर्मम गौतमीति ॥ जल्पन्मुहुर्विस्मितचित्तवृत्तिर्विलोकयन्प्रणम न्गौतमीं ताम् ॥ ३० ॥ ततः प्रभृत्येतदतीव पुण्यं किष्किन्धतीर्थं विबुधा वदन्ति ॥ पठेत्स्मरेद्वाऽपि शृणोति भक्त्या पापापहं किं पुनः स्नान दानैः ॥ ३१ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये किष्किन्धतीर्थवर्णनं नाम सप्ताशीतितमोऽध्यायः ॥ ८७ ॥ ॥ ब्रह्मोवाच ॥ व्यासतीर्थमिति ख्यातं प्राचेतसमतः परम् ॥ नातः परतरं किंचित्पावनं सर्वसिद्धिदम् ॥ १ ॥ दश मे मानसाः पुत्राः स्रष्टारो जगतामपि ॥ अन्तं जिज्ञासवस्ते वै पृथिव्या जग्मुरोजसा ॥ २ ॥ पुनः सृष्टाः पुनस्तेऽपि यातास्तान्समवेक्षितुम् ॥ नैव तेऽपि समायाता ये गतास्ते गता गताः ॥ ॥ ३ ॥ तदोत्पन्ना महाप्राज्ञा दिव्या आङ्गिरसो मुने ॥ वेदवेदांगतत्त्वज्ञाः सर्वशास्त्रविशारदाः ॥ ४ ॥ तेऽनुज्ञाता अंगिरसा गुरुं नत्वा तपोधनाः ॥ तपसे निश्चिताः सर्वे नैव पृष्ट्वा तु मातरम् ॥ ५ ॥ सर्वेभ्यो ह्यधिका माता गुरुभ्यो गौरवेण हि ॥ तदा नारद कोपेन सा शशाप निजात्मजान् ॥ ६ ॥ ॥ मातोवाच ॥ मामनादृत्य ये पुत्राः प्रवृत्ताश्चरितुं तपः ॥ सर्वैरपि प्रकारैस्ते सिद्धिं नेष्यन्ति तत्त्वतः ॥ ७ ॥ ॥ ब्रह्मोवाच ॥ नानादेशांश्च चिन्त्रा नास्तपःसिद्धिं न यान्ति च ॥ विघ्नमन्वेति तान्सर्वानितश्चेतश्च धावतः ॥ ८ ॥ क्वापि तद्राक्षसैर्विघ्नं क्वापि तन्मानुषैरभूत् ॥ प्रमदाभिः क्वचि च्चापि क्वापि तद्देहदोषतः ॥ ९ ॥ एवं तु भ्रममाणास्ते ययुः सर्वे तपोनिधिम् ॥ अगस्त्यं तपतां श्रेष्ठं कुम्भयोनिं जगद्गुरुम् ॥ १० ॥ नमस्कृत्वा ह्याङ्गिरसा ह्यग्निवंशसमुद्भवाः ॥ दक्षिणाशापतिं शान्तं विनीताः प्रष्टुमुद्यताः ॥ ११ ॥ ॥ आङ्गिरसा ऊचुः ॥ भगवन्केन दोषेण तपोऽस्माकं न सिध्यति ॥ नानाविधैरप्युपायैः कुर्वतां च पुनः पुनः ॥१२॥ किं कुर्मः कः प्रकारोऽत्र तपस्येव भवाम किम् ॥ उपायं ब्रूहि विप्रेन्द्र ज्येष्ठोऽसि तपसा ध्रुवम् ॥१३॥ ज्ञाताऽसि ज्ञानिनां ब्रह्मन्वक्ताऽसि वदतां वरः ॥ शान्तोऽसि यमिनां नित्यं दयावान्प्रियकृत्तथा ॥१४॥ अक्रोधनश्च न द्वेष्टा तस्माद्ब्रूहि

विवक्षितम् ॥ साहंकारा दयाहीना गुरुसेवाविवर्जिताः ॥ असत्यवादिनः क्रूरा न ते तत्त्वं विजानते ॥ १५ ॥ ॥ ब्रह्मोवाच ॥ अगस्त्यः प्राह तान्सर्वा
न्क्षणं ध्यात्वा शनैः शनैः ॥ १६ ॥ ॥ अगस्त्य उवाच ॥ शान्तात्मानो भवन्तो वै स्रष्टारो ब्रह्मणा कृताः ॥ न पर्याप्तं तपश्चाभूत्स्मरध्वं स्मयका
रणम् ॥ १७ ॥ ब्रह्मणा निर्मिताः पूर्वं ये गताः सुखमेधते ॥ ये गताः पुनरन्वेष्टुं ते च त्वाङ्गिरसोऽभवन् ॥ १८ ॥ ते यूयं च पुनः काले याता याताः
शनैः शनैः ॥ प्रजापतेरप्यधिका भवितारो न संशयः ॥ १९ ॥ इतो यान्तु तपस्तप्तुं गङ्गां त्रैलोक्यपावनीम् ॥ नोपायोऽन्योऽस्ति संसारे विना
गङ्गां शिवप्रियाम् ॥ २० ॥ तत्राऽऽश्रमे पुण्यदेशे ज्ञानदं पूजयिष्यथ ॥ स च्छेदयिष्यत्यखिलं संशयं वो महामतिः ॥ न सिद्धिः क्वापि केषांचि
द्विना सद्गुरुणा यतः ॥ २१ ॥ ब्रह्मोवाच ॥ तं तमूचुर्मुनिवरं ज्ञानदः कोऽभिधीयते ॥ ब्रह्मा विष्णुर्महेशो वा आदित्यो वाऽपि चन्द्रमाः ॥ २२ ॥
अग्निश्च वरुणः कः स्याज्ज्ञानदो मुनिसत्तम ॥ अगस्त्यः पुनरप्याह ज्ञानदः श्रूयतामयम् ॥ २३ ॥ या आपः सोऽग्निरित्युक्तो योऽग्निः सूर्यः स
उच्यते ॥ यश्च सूर्यः स वै विष्णुर्यश्च विष्णुः स भास्करः ॥ २४ ॥ यश्च ब्रह्मा स वै रुद्रो यो रुद्रः सर्वमेव तत् ॥ यस्य सर्वं
तु तज्ज्ञानं ज्ञानदः सोऽत्र कीर्त्यते ॥ २५ ॥ देशिकप्रेरकव्याख्याकृदुपाध्यायदेहदाः ॥ गुरवः सन्ति बहवस्तेषां ज्ञानप्रदो महान् ॥ २६ ॥
तदेव ज्ञानमत्रोक्तं येन भेदो विहन्यते ॥ एक एवाद्वयः शंभुरिन्द्रमित्राग्निनामभिः ॥ वदन्ति बहुधा विप्रा भ्रान्तोपकृतिहेतवे ॥ २७ ॥
ब्रह्मोवाच ॥ एतच्छ्रुत्वा मुनेर्वाक्यं गाथा गायन्त एव ते ॥ जग्मुः पञ्चोत्तरां गङ्गां पञ्च जग्मुश्च दक्षिणाम् ॥ २८ ॥ अगस्त्येनोदितान्देवान्पूजयन्तो
यथाविधि ॥ आसनेषु विशेषेण ह्यासीनास्तत्त्वचिन्तकाः ॥ २९ ॥ तेषां सर्वे सुरगणाः प्रीतिमन्तोऽभवन्मुने ॥ स्रष्टृत्वं तु युगादौ यत्कल्पितं वि
श्वयोनिना ॥ ३० ॥ अधर्मीणां निवृत्त्यर्थं वेदानां स्थापनाय च ॥ लोकानामुपकारार्थं धर्मकामार्थसिद्धये ॥ ३१ ॥ पुराणस्मृतिवेदार्थधर्मशास्त्रार्थ
निश्चये ॥ स्रष्टृत्वं जगतामिष्टं तादृग्रूपा भविष्यथ ॥ ३२ ॥ प्रजापतित्वं तेषां वै भविष्यति शनैः क्रमात् ॥ यदा ह्यधर्मो भवितां वेदानां च परा
भवः ॥३३॥ वेदानां व्यसनं तेभ्यो भाविव्यासास्ततस्तु ते ॥ यदा यदा तु धर्मस्य ग्लानिर्वेदस्य दृश्यते ॥३४॥ तदा तदा तु ते व्यासा भविष्यन्त्यु
पकारिणः ॥ तेषां यत्तपसः स्थानं गंगायास्तीरमुत्तमम् ॥ ३५ ॥ तत्र तत्र शिवो विष्णुरहमादित्य एव च ॥ अग्निरापः सर्वमिति तत्र संनिहितं
सदा ॥ ३६ ॥ नैतेभ्यः पावनं किंचिन्नेतेभ्यस्त्वधिकं क्वचित् ॥ तत्तदाकारतां प्राप्तं परं ब्रह्मैव केवलम् ॥ ३७ ॥ सर्वात्मकः शिवो व्यापी
सर्वभावस्वरूपधृक् ॥ विशेषतस्तत्र तीर्थे सर्वप्राण्यनुकम्पया ॥ ३८ ॥ सर्वैर्देवैरनुवृतस्तदनुग्रहकारकः ॥ धर्मव्यासास्तु ते ज्ञेया वेदव्यासास्त

थैव च ॥ ॥ ३९ ॥ तेषां तीर्थं तेन नाम्ना व्यपदिष्टं जगत्त्रये ॥ पापपंकक्षालनाम्भो मोहध्वान्तमदापहम् ॥ सर्वसिद्धिप्रदं पुंसां
व्यासतीर्थमनुत्तमम् ॥ ४० ॥ इति श्रीब्रह्मपुराणंगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये व्यासतीर्थवर्णनं नामाष्टाशीतितमोऽध्यायः ॥ ८८ ॥
॥ ॥ ब्रह्मोवाच ॥ ॥ वंजरासंगमं नाम तीर्थं त्रैलोक्यविश्रुतम् ॥ ऋषिभिः सेवितं नित्यं सिद्धै राजर्षिभिस्तथा ॥ १ ॥ दासत्वमगमत्पूर्वं नागानां
गरुडः खगः ॥ मातृदास्यात्तदा दुःखपरिसंतप्तमानसः ॥ कदाचिच्चिन्तयामास रहः स्थित्वा विनिश्वसन् ॥२॥ ॥ गरुड उवाच ॥ ॥ त एव धन्या
लोकेऽस्मिन्कृतपुण्यास्त एव हि ॥ नान्यसेवा कृता यैस्तु न येषां व्यसनागमः ॥३॥ सुखं तिष्ठन्ति गायन्ति स्वपंति च हसन्तिच ॥ स्वदेहप्रभवो
धन्या धिग्धिगन्यवशे स्थितान् ॥ ४ ॥ ॥ ब्रह्मोवाच ॥ ॥ इति चिन्तासमाविष्टो जननीमेत्य दुःखितः ॥ पर्यपृच्छदमेयात्मा वैनतेयोऽथ मातरम् ॥
॥ ५ ॥ ॥ गरुड उवाच ॥ ॥ कस्यापराधान्मातस्त्वं पितुर्वा मम वाऽन्यतः ॥ दासीत्वमाप्ता वद तत्कारणं मम पृच्छतः ॥ ६ ॥ ॥ ब्रह्मोवाच ॥ ॥
साऽब्रवीत्पुत्रमात्मीयमरुणस्यानुजं प्रियम् ॥ ७ ॥ विनतोवाच ॥ ॥ नैव कस्यापराधोऽस्ति त्वापराधो मयोदितः ॥ यस्या वाक्यं विपर्येति सा
दासी स्यान्मयोदितम् ॥ ८ ॥ कद्रूश्चापि तथैवाहं सा मया संयुता ययौ ॥ कद्रवा ममाभवद्वादश्छद्मनाऽहं तया जिता ॥ ९ ॥ विधिर्हि बलवांस्तात
कां कां चेष्टां न चेष्टते ॥ एवं दासीत्वमगमं कद्रवाः कश्यपनन्दन ॥ यदा दासी तु जाताऽहं दासोऽभूस्त्वं द्विजन्मज ॥ १० ॥ ॥ ब्रह्मोवाच ॥ ॥
तूष्णीं तदा बभूवासौ गरुडोऽतीव दुःखितः ॥ न किंचिदूचे जननीं चिन्तयन्भवितव्यताम् ॥ ११ ॥ कद्रूः कदाचित्सा प्राह पुत्राणां हितमिच्छती ॥
आत्मनो भूतिमिच्छन्ती विनतां खगमातरम् ॥ १२ ॥ ॥ कद्रूरुवाच ॥ ॥ पुत्रः सूर्यं नमस्कर्तुं तव यात्यनिवारितः ॥ अहो लोकत्रयेऽप्यस्मि
न्धन्याऽसि वत दास्यपि ॥ १३ ॥ ब्रह्मोवाच ॥ ॥ स्वदुःखं गूहमाना सा कद्रूं प्राह सुविस्मिता ॥ १४ ॥ विनतोवाच ॥ ॥ तव पुत्रास्तु किमिति
रविं द्रष्टुं न यान्ति च ॥ १५ ॥ ॥ कद्रूरुवाच ॥ ॥ पुत्रान्मदीयान्सुभगे नय नागालयं प्रति ॥ समुद्रस्य समीपे तु तदास्ते शीतलं सरः ॥
॥ १६ ॥ ॥ ब्रह्मोवाच ॥ ॥ सुपर्णस्त्ववहन्नागान्कद्रूं च विनता तथा ॥ ततः प्रोवाच मुदिता वैनतेयस्य मातरम् ॥ १७ ॥ सुराणां नेतु निलयं
गरुडो मत्सुतानिति ॥ सर्पमाता पुनः प्राह गरुडं विनयान्वितम् ॥ १८ ॥ ॥ सर्पमातोवाच ॥ ॥ पुत्रा मे द्रष्टुमिच्छन्ति हंसं त्रिजगतां गुरुम् ॥
नमस्कृत्वा ततः सूर्यमेष्यन्ति निलयं मम ॥ विनते नय पुत्रान्मे सूर्यमण्डलमन्वहम् ॥ १९ ॥ ॥ ब्रह्मोवाच ॥ ॥ सा वेपमाना विनता दीना
कद्रूमभाषत ॥ २० ॥ ॥ विनतोवाच ॥ ॥ नाहं क्षमा सर्पमातः पुत्रान्मे नेष्यते सुतान् ॥ दृष्ट्वा दिनकरं देवं पुनरेव प्रयान्तु ते ॥ २१ ॥ ॥

॥ ब्रह्मोवाच ॥ ॥ विनता स्वसुतं प्राह विहगानामधीश्वरम् ॥ नमस्कर्तुमथेच्छन्ति नागाः स्वामित्वमागताः ॥ २२ ॥ भास्वन्तमित्युवाचेयं मां सर्पजननी हठात् ॥ तथेत्युक्त्वा स गरुडो मामारोहन्तु पन्नगाः ॥ २३ ॥ तदाऽऽरूढं सर्पसैन्यं गरुडं विहगाधिपम् ॥ शनैः शनैरुपगमद्यत्र देवो दिवाकरः ॥ ते दह्यमानास्तीक्ष्णेन भानुतापेन विव्यथुः ॥ २४ ॥ ॥ सर्पा ऊचुः ॥ ॥ निवर्तस्व महाप्राज्ञ पतङ्गाय नमो नमः ॥ अलं सूर्यस्य सदनं दग्धाः सूर्यस्य तेजसा ॥ यामस्त्वया वा गरुड विहाय त्वामथापि वा ॥ २५ ॥ ॥ ब्रह्मोवाच ॥ ॥ एवं नागैरुच्यमान आदित्यं दर्शयामि वः ॥ इत्युक्त्वा गगनं शीघ्रं जगमाऽऽदित्यसंमुखः ॥ २६ ॥ दग्धभोगा निपेतुस्ते द्वीपं तं वीरणं प्रति ॥ बहवः शतसाहस्राः पीडिता दग्धविग्रहाः ॥ ॥ २७ ॥ श्रुत्वार्तनादं पुत्राणं प्रतितानां भुवस्तले ॥ आश्वासितुं समायाता तान्सा कद्रूः सुविह्वला ॥ २८ ॥ उवाच विनतां कद्रूस्तव पुत्रोऽतिदुष्कृतम् ॥ कृतंवान्नतिदुर्मेधा येषां शान्तिर्न विद्यते ॥ २९ ॥ नान्यथा कर्तुमायाति स्वामिवाक्यं फणीश्वरः ॥ स काश्यपो बृहत्तेजा यद्यत्र स्यादनामयम् ॥ ३० ॥ भवेच्चैवं कथं शान्तिः पुत्राणां मम भामिनि ॥ कद्रवास्तद्वचनं श्रुत्वा विनता ह्रीतिभीतवत् ॥ ३१ ॥ पुत्रमाह महात्मानं गरुडं विहगाधिपम् ॥ ३२ ॥ ॥ विनतोवाच ॥ ॥ नेदं युक्ततरं पुत्र भूषणं विनयेन हि ॥ वर्तितुं युक्तमित्युक्तं वैपरीत्यं न युज्यते ॥ ३३ ॥ नामित्रेष्वपि कर्तव्यं सद्भिर्जिह्मं कदाचन ॥ श्रोत्रिये चान्त्यजे वाऽपि समं चन्द्रः प्रकाशते ॥३४॥ कुर्वन्त्यनिष्टं कपटैस्त एव मम पुत्रक ॥ असह्यं कर्तुं ये साक्षादशक्ताः पुरुषाधमाः॥३५॥ब्रह्मोवाच ॥विनता च ततः प्राह कथं तां सर्पमातरम्॥३६॥विनतोवाच ॥ किं कृत्वा शान्तिरभ्येति पुत्राणां ते करोमि तत् ॥ जरयातु गृहीतास्ते वद शान्तिं करोमि तत् ॥३७॥ ब्रह्मोवाच ॥ कद्रूरप्याह विनतां रसातलगतं पयः ॥ तेनाभिषेचितानां मे पुत्राणां शान्तिरेष्यति ॥ ३८ ॥ कद्रवास्तद्वचनं श्रुत्वा रसांतलगतं पयः ॥ क्षणेनैव समानीय नागांस्तानभ्यषेचयत् ॥ ततः प्रोवाच गरुडो मघवानं शतक्रतुम् ॥ ३९ ॥ ॥ गरुड उवाच ॥ मेघाश्चाप्यत्र वर्षन्तु त्रैलोक्यस्योपकारिणः ॥ ४० ॥ ॥ ब्रह्मोवाच ॥ तथा ववर्ष पर्जन्यो नागानामभयच्छवम् ॥ रसातलभवं गाङ्गं नागसंजीवनं पयः ॥ ४१ ॥ जराशोकविनाशार्थमानीतं गरुडेन यत् ॥ यत्राभिषेक्ता नागास्तन्नागालयमुच्यते ॥ ४२ ॥ गरुडेन यतो वारि आनीतं तद्रसातलात् ॥ तद्गाङ्गं वारि सर्वेषां सर्वौघविनाशनम् ॥ ४३ ॥ जराया वारणं यस्मान्नागानामभयच्छवम् ॥ रसातलभवं गाङ्गं नागसंजीवनं यतः ॥ ४४ ॥ जराशोकविनाशार्थं गङ्गाया दक्षिणे तटे ॥ साक्षादमृतसंवाहा वंजरा साऽभवन्नदी ॥ ४५ ॥ जरादारिद्र्यसंतापहारिणी क्लेशवारिणी ॥ रसातलभवा गङ्गा मर्त्यलोकभवा तु या ॥ ४६ ॥ तयोश्च संगमो यः स्यात्किं पुनस्तत्र वर्ण्यते ॥ यस्यानुस्मरणादेव नाशं यान्त्यघ

संचयाः ॥ ४७ ॥ तत्र च स्नानदानानां फलं को वक्तुमीश्वरः ॥ संपादं तत्र तीर्थानां लक्षमाहुर्मनीषिणः ॥ ४८ ॥ सर्वसंपत्तिदातॄणां सर्वपापौघहारिणाम् ॥ वंजरासंगमसमं तीर्थं क्वापि न विद्यते ॥ यदनुस्मरणेनापि विपद्यन्ते विपत्तयः ॥ ४९ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये वंजरासंगमादिसपादलक्षतीर्थवर्णनं नामैकोननवतितमोऽध्यायः ॥ ८९ ॥ ॥ ब्रह्मोवाच ॥ देवागमं नाम तीर्थं सर्वकामप्रदं शिवम् ॥ भुक्तिमुक्तिप्रदं नृणां पितॄणां तृप्तिकारकम् ॥ १ ॥ तत्र वृत्तं समाख्यास्ये तव यत्नेन नारद ॥ देवानामसुराणां च स्पर्धाऽभूद्धनहेतवे ॥ २ ॥ स्वर्गः सुराणामभवदसुराणामिलाऽभवत् ॥ कर्मभूमिमवष्टभ्य ह्यसुराः सर्वतोऽभवन् ॥ ३ ॥ देवानां यज्ञभागांश्च दातॄन्घ्नन्त्यसुरास्ततः ॥ ततः सुरगणाः सर्वे यज्ञभागैर्विना कृताः ॥ ४ ॥ व्यथिता मामुपाजग्मुः किं कृत्यमिति चाब्रुवन् ॥ मया चोक्ताः सुरगणा युद्धे जित्वाऽसुराम्बलात् ॥ ५ ॥ भुवं प्राप्स्यथ कर्माणि हवींषि च यशांसि च ॥ तथेत्युक्त्वा गता देवा भूमिं ते समरार्थिनः ॥ ६ ॥ दैत्याश्च दानवाश्चैव राक्षसा बलदर्पिताः ॥ एकीभूत्वा ययुस्तेऽपि जयिनो युद्धकाङ्क्षिणः ॥ ७ ॥ अहिर्बुध्न्यो बलिस्त्वाष्ट्रर्नमुचिः शंम्बरो मयः ॥ एते चान्ये च बहवो योद्धारो बलदर्पिताः ॥ ॥ ८ ॥ अग्निरिन्द्रोऽथ वरुणस्त्वष्टा पूषा तथाऽश्विनौ ॥ मरुतो लोकपालाश्च नानायुद्धविशारदाः ॥ ९ ॥ ते दानवाः सर्व एव याम्यां वै दिशि संगरे ॥ अकुर्वन्त महायत्नं दक्षिणार्णवसंस्थिताः ॥ १० ॥ त्रिकूटः पर्वतश्रेष्ठो राक्षसानां पुराऽभवत् ॥ तद्वनेन ययुः सर्वे तैः सार्धं दक्षिणार्णवम् ॥ ११ ॥ सर्वेषां मेलनं यत्र पर्वतो मलयस्तु सः ॥ मलयस्यापि देशोऽसौ देवारीणामभूत्तदा ॥ १२ ॥ देवानां गौतमीतीरे तत्र संनिहितः शिवः ॥ इति तेषां समायोगो देवानामभवत्किल ॥ १३ ॥ देवाः स्वरथमारूढास्तत्र तत्र समागमन् ॥ गौतम्याः सरिदम्बायाः पुलिने विमलाशयाः ॥ १४ ॥ प्रसन्नाऽभीष्टदा या स्यात्पितॄणामखिलस्य तु ॥ ततो देवगणाः सर्वे स्तुत्वा देवं महेश्वरम् ॥ अभयं चिन्तयामासुस्ते सर्वेऽथ परस्परम् ॥ १५ ॥ ॥ देवा ऊचुः ॥ अत्राप्युपायः कोऽस्माकं निर्जितानां पुरैर्हि यत् ॥ एकमेवात्र नः श्रेयो विजयो वाऽथवा मृतिः ॥ सपत्नैरभिभूतानां जीवितं धिङ्मनस्विनाम् ॥ १६ ॥ ॥ ब्रह्मोवाच ॥ एतस्मिन्नन्तरे पुत्र वागुवाचाशरीरिणी ॥ १७ ॥ आकाशवागुवाच ॥ क्लेशेनालं सुरगणा गौतमीमाशु गच्छत ॥ भक्त्या हरिहरौ तत्र समाराधयतेश्वरौ ॥ १८ ॥ गोदावर्यास्तयोश्चैव प्रसादात्किंतु दुष्करम् ॥ १९ ॥ ॥ ब्रह्मोवाच ॥ हरीशाभ्यां प्रसन्नाभ्यां देवा जयमभीप्सितम् ॥ अवाप्य सर्वतो जग्मुः पालयन्तो दिवौकसः ॥ २० ॥ यत्र देवागमो जातस्तत्तीर्थं तेन विश्रुतम् ॥ देवागमं प्रशंसन्ति मुनयस्तत्त्वदर्शिनः ॥ २१ ॥

तत्राशीतिसहस्राणि शिवलिंगानि नारद ॥ देवागमः पर्वतोऽसौ प्रिय इत्यपि कथ्यते ॥ ततः प्रभृति तत्तीर्थं देवप्रियमतो विदुः ॥ २२ ॥ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये देवागमतीर्थवर्णनं नाम नवतितमोऽध्यायः ॥ ९० ॥ ॥ ब्रह्मोवाच ॥ ॥ कुशतर्पणमात्स्नातं प्रणीतासंगमं तथा ॥ तीर्थं सर्वेषु लोकेषु भुक्तिमुक्तिप्रदायकम् ॥ १ ॥ तस्य स्वरूपं वक्ष्यामि शृणु पापहरं शुभम् ॥ विन्ध्यस्य दक्षिणे पार्श्वे सह्यो नाम महागिरिः ॥ २ ॥ यदङ्घ्रिभ्योऽभवन्नद्यो गोदाभीमरथीमुखाः ॥ यत्राभवत्तद्विरजमेकवीरा च यत्र सा ॥ ३ ॥ न तस्य महिमा केश्चिदपि शक्योऽनुवर्णितुम् ॥ तस्मिन्गिरौ पुण्यदेशे शृणु नारद यत्नतः ॥ ४ ॥ गुह्याद्गुह्यतरं वक्ष्ये साक्षाद्वेदोदितं शुभम् ॥ यन्न जानन्ति मुनयो देवाश्च पितरोऽसुराः ॥ ५ ॥ तदहं प्रीतये वक्ष्ये श्रवणात्सर्वकामदम् ॥ परः स पुरुषो ज्ञेयो ह्यव्यक्तोऽक्षर एव तु ॥ ६ ॥ अपरश्च क्षरस्तस्मात्प्रकृत्यन्वित एव च ॥ निराकारात्साचेतनः पुरुषः समजायत ॥ ७ ॥ तस्मादापः समुद्भूता अद्यश्च पुरुषस्ततः ॥ ताभ्यो मज्जं समुद्भूतं तत्राहमभवं मुने ॥ ८ ॥ पृथिवी वायुराकाश आपो ज्योतिस्तथैव च ॥ एते मत्तः पूर्वतरा एकदैवाभवन्मुने ॥ ९ ॥ एतानेव प्रपश्यामि नान्यत्स्थावरजंगमम् ॥ नैव वेदास्तदा चाऽऽसन्नाहं द्रष्टाऽस्मि किंचन ॥ १० ॥ यस्मादहं समुद्भूतो न पश्येयं तमप्यथ ॥ तूष्णीं स्थिते मयि तदा अश्रौषं वाचमुत्तमाम् ॥ ११ ॥ अकाशवागुवाच ॥ ब्रह्मन्कुरु जगत्सृष्टिं स्थावरस्य चरस्य च ॥ १२ ॥ ब्रह्मोवाच ॥ ततोऽहमेवं वाचं पौरुषीं तत्र नारद ॥ कथं स्रक्ष्ये क्व वा स्रक्ष्ये केन स्रक्ष्य इदं जगत् ॥ १३ ॥ सैव वागब्रवीद्दैवी प्रकृतिर्याऽभिधीयते ॥ विष्णुना प्रेरिता माता जगदीशा जगन्मयी ॥ १४ ॥ आकाशवागुवाच ॥ यज्ञं कुरु ततः शक्तिस्ते भवित्री न संशयः ॥ यज्ञो वै विष्णुरित्येषा श्रुतिर्ब्रह्मन्सनातनी ॥ १५ ॥ किं यज्ञेनासाध्यं स्यादिह लोके परत्र च ॥ १६ ॥ ब्रह्मोवाच ॥ पुनस्तामब्रवं देवीं क्व वा केनेति तद्वद ॥ यज्ञः कार्यो महाभागे ततः सोवाच मां प्रति ॥ १७ ॥ आकाशवागुवाच ॥ ओंकारभूता या देवी मातृकल्पा जगन्मयी ॥ कर्मभूमौ यजस्वेह यज्ञेशं यज्ञपूरुषम् ॥ १८ ॥ स एव साधनं ते स्यात्तेन तं यज सुव्रत ॥ यज्ञः स्वाहा स्वधा मन्त्रा ब्राह्मणा हविरादिकम् ॥ १९ ॥ हरिरेवाखिलं तेन सर्वं विष्णोरवाप्यते ॥ २० ॥ ब्रह्मोवाच ॥ पुनस्तामब्रवं देवीं कर्मभूः क्व विधीयते ॥ तदा नारद नैवाऽसीद्भागीरथ्यथ नर्मदा ॥ २१ ॥ यमुना नैव ताप्पी सा सरस्वत्यथ गौतमी ॥ समुद्रो वा नदः कश्चिन्न सरः सरितोऽमलाः ॥ सा शक्तिः पुनरप्येवं मामुवाच पुनः पुनः ॥ २२ ॥ दैवी वागुवाच ॥ सुमेरोर्दक्षिणे पार्श्वे तथा हिमवतो गिरेः ॥ दक्षिणे चापि विन्ध्यस्य सह्याच्चैवाथ दक्षिणे ॥ सर्वस्य सर्वकाले तु कर्मभूमिः शुभोदया ॥

॥ २३ ॥ ब्रह्मोवाच ॥ तच्तु वाक्यमथो श्रुत्वा त्यक्त्वा मेरुं महागिरिम् ॥ तं प्रदेशमथाऽऽगत्य स्थातव्यं क्वेत्यचिन्तयम् ॥ ततो मामब्रवीत्सैव
विष्णोर्वाण्यशरीरिणी ॥ २४ ॥ आकाशवाग्uवाच ॥ इतो गच्छ इतस्तिष्ठ तथोपविश चात्र हि ॥ संकल्पं कुरु यज्ञस्य स ते यज्ञः समाप्यते
॥ २५ ॥ कृते चैवाथ संकल्पे यज्ञार्थे सुरसत्तम ॥ यद्वदन्त्यखिला वेदा विधे तत्तत्समाचर ॥ २६ ॥ ब्रह्मोवाच ॥ इतिहासपुराणानि यदन्य
च्छब्दगोचरम् ॥ स्वतो मुखे मम प्रायादभूच्च स्मृतिगोचरम् ॥ २७ ॥ वेदार्थश्च मया सर्वो ज्ञातोऽसौ तत्क्षणेन च ॥ ततः पुरुषसूक्तं तदस्मरं
लोकविश्रुतम् ॥ २८ ॥ यज्ञोपकरणं सर्वं तदुक्तं च त्वकल्पयम् ॥ तदुक्तेन प्रकारेण यज्ञपात्राण्यकल्पयम् ॥ २९ ॥ अहं स्थित्वा यत्र देशे
शुचिर्भूत्वा यतात्मवान् ॥ दीक्षितो विप्रदेशोऽसौ मन्नाम्ना तु प्रकीर्तितः ॥ ३० ॥ मद्देवयजनं पुण्यं नाम्ना ब्रह्मगिरिः स्मृतः चतुर्विंशतिपर्यन्तं योज
नानि महामुने ॥ ३१ ॥ मद्देवयजनं पुण्यं पूर्वतो ब्राह्मणो गिरेः ॥ तत्र मध्ये वेदिकाया गार्हपत्योऽथ दक्षिणः ॥ ३२ ॥ तथा चाऽऽहवनीयश्च
वह्नीनेवमकल्पयम् ॥ विना पत्न्या न सिध्येत यज्ञः श्रुतिनिदर्शनात् ॥ ३३ ॥ शरीरमात्मनोऽर्हं वै द्वेधा चाकरवं मुने ॥ पूर्वार्धेन ततः पत्नी ममा
भूद्यज्ञसिद्धये ॥ ३४ ॥ उत्तरेण त्वहं तद्वदर्धो जाया इति श्रुतेः ॥ कालं वसन्तमुत्कृष्टमाज्यरूपेण नारद ॥ ३५ ॥ अकल्पयं तथा चेध्मं ग्रीष्मं
चापि शरद्धविः ॥ ऋतुं च प्रावृषं पुत्र तदा बर्हिरकल्पयम् ॥ ३६ ॥ छन्दांसि सप्त वै तत्र तदा परिधयोऽभवन् ॥ कलाकाष्ठानिमेषा हि समित्पा
त्रकुशाः स्मृताः ॥ ३७ ॥ योऽनादिश्च त्वनन्तश्च स्वयं कालोऽभवत्तदा ॥ यूपरूपेण देवर्षे योक्त्रं च पशुबन्धनम् ॥ ३८ ॥ सत्त्वादित्रिगुणाः
पाशा नैव तत्राभवत्पशुः ॥ ततोऽहमब्रवं वाचं वैष्णवीमशरीरिणीम् ॥ ३९ ॥ विनैव पशुना नायं यज्ञः परिसमाप्यते ॥ ततो मामवदद्देवी सैव
नित्याऽशरीरिणी ॥ ४० ॥ आकाशवाग्uवाच ॥ पौरुषेणाथ सूक्तेन स्तुहि तं पुरुषं परम् ॥ ४१ ॥ ब्रह्मोवाच ॥ तथेत्युक्त्वा स्तूयमाने देवदेवे जना
र्दने ॥ मम चोत्पादके भक्त्या सूक्तेन पुरुषस्य हि ॥ ४२ ॥ सा च मामब्रवीद्देवी ब्रह्मन्मां त्वं पशुं कुरु ॥ तदा विज्ञाय पुरुषं जनकं मम चाव्ययम्
॥ ४३ ॥ कालयूपस्य पार्श्वे तं गुणपाशैर्निवेशितम् ॥ बहिःस्थितमहं प्रौक्षं पुरुषं जातमग्रतः ॥ ४४ ॥ एतस्मिन्नन्तरे तत्र तस्मात्सर्वमभूदिदम् ॥
ब्राह्मणास्तु मुखात्तस्याभवन्बाह्वोश्च क्षत्रियाः ॥ ४५ ॥ मुखादिन्द्रस्तथाऽग्निश्च श्वसनः प्राणतोऽभवत् ॥ दिशः श्रोत्रात्तथा शीर्ष्णः सर्वः स्वर्गोऽभव
त्तदा ॥ ४६ ॥ मनसश्चन्द्रमा जातः सूर्योऽभूच्चक्षुषस्तथा ॥ अन्तरिक्षं तथा नाभेरूरुभ्यां विश एव च ॥ ४७ ॥ पद्भ्यां शूद्रश्च संजातस्तथा भूमिर
जायत ॥ ऋषयो रोमकूपेभ्य ओषध्यः केशतोऽभवन् ॥ ४८ ॥ ग्राम्यारण्याश्च पशवो नखेभ्यः सर्वतोऽभवन् ॥ कृमिकीटपतंगादि पायूपस्थादजायत

॥ ४९ ॥ स्थावरं जंगमं किंचिद्दृश्यादृश्यं च किंचन ॥ तस्मात्सर्वमभूदेवा मत्तश्चाप्यभवत्पुनः ॥ एतस्मिन्नन्तरे सैव विष्णोर्वाग
ब्रवीच्च माम् ॥ ५० ॥ अकाशवागुवाच ॥ सर्वं संपूर्णमभवत्सृष्टिर्जाता तथेप्सिता ॥ इदानीं जुहुधि ह्यग्नौ पात्राणि च समानि च ॥ ५१ ॥
विसर्जय तथा यूपं प्रणीताश्च कुशांस्तथा ॥ ऋत्विग्यूपं यज्ञरूपमुद्देश्यं ध्येयमेव च ॥ ५२ ॥ स्रुवं च पुरुषं पाशान्सर्वं ब्रह्मन्विसर्जय
॥ ५३ ॥ ब्रह्मोवाच ॥ तद्वाक्यसमकालं तु क्रमशो यज्ञयोनिषु ॥ गार्हपत्ये दक्षिणाग्नौ तथा चैव महामुने ॥ ५४ ॥
पूर्वस्मिन्नपि चैवाग्नौ क्रमशो जुह्वतस्तदा ॥ तत्र तत्र जगद्योनिमनुसंधाय पूरुषम् ॥ ५५ ॥ मन्त्रपूतं शुचिः सम्यग्यज्ञदेवो जगन्मयः ॥ लोकनाथो
विश्वकर्ता कुण्डानां तत्र संनिधौ ॥ ५६ ॥ शुक्लरूपधरो विष्णुर्भवेदाहवनीयके ॥ श्यामो विष्णुर्दक्षिणाग्नेः पीतो गृहपतेः कवेः ॥ ५७ ॥ सर्वकालं
तेषु विष्णुरतो देशेषु संस्थितः ॥ न तेन रहितं किंचिद्विष्णुना विश्वयोनिना ॥ ५८ ॥ प्रणीतायाः प्रणयनं मन्त्रैश्चाकरवं ततः ॥ प्रणीतोदकमप्येत
त्प्रणीतेति नदी शुभा ॥ ५९ ॥ व्यसर्जयं प्रणीतां तां मार्जयित्वा कुशैरथ ॥ मार्जने क्रियमाणे तु प्रणीतोदकबिन्दवः ॥ ६० ॥ पतितास्तत्र
तीर्थानि जातानि गुणवन्ति च ॥ संजाता मुनिशार्दूल स्नानात्क्रतुफलप्रदा ॥ ६१ ॥ याऽलंकृता सर्वकालं देवदेवेन शार्ङ्गिणा ॥ सोपानपंक्तिः
सर्वेषां वैकुण्ठारोहणाय सा ॥ ६२ ॥ संमार्जिताः कुशा यत्र पतिता भूतले शुभे ॥ कुशतर्पणमाख्यातं बहुपुण्यफलप्रदम् ॥ ६३ ॥ कुशैश्च तर्पिता
सर्वे कुशतर्पणमुच्यते ॥ पश्चाच्च संगताः तत्र गौतमी कारणान्तरात् ॥ ६४ ॥ प्रणीतायां महाबुद्धे प्रणीतासंगमोऽभवत् ॥ कुशतर्पणदेशे तु तत्ती
र्थं कुशतर्पणम् ॥ ६५ ॥ तत्रैव कल्पितो यूपो मया विन्ध्यस्य चोत्तरे ॥ विसृष्टो लोकपूज्योऽसौ विष्णोरासीत्समाश्रयः ॥ ६६ ॥ अक्षयश्चाभ
वच्छ्रीमानक्षयोऽसौ वटोऽभवत् ॥ नित्यश्च कालरूपोऽसौ स्मरणात्क्रतुपुण्यदः ॥ ६७ ॥ मद्देवयजनं चेदं दण्डकारण्यमुच्यते ॥ संपूर्णे तु क्रतौ
विष्णुर्मया भक्त्या प्रसादितः ॥ ६८ ॥ यो विराडुच्यते वेदे यस्मात्पूर्तमजायत ॥ यस्माच्च मम चोत्पत्तिर्यस्येदं विकृतं जगत् ॥ ६९ ॥ तमहं देव
देवेशमभिवन्द्य व्यसर्जयम् ॥ योजनानि चतुर्विंशन्मद्देवयजनं शुभम् ॥ ७० ॥ तस्मादद्यापि कुण्डानि सन्ति च त्रीणि नारद ॥ यज्ञेश्वरस्वरू
पाणि विष्णोर्वै चक्रपाणिनः ॥ ७१ ॥ ततः प्रभृति चाऽऽख्यातं मद्देवयजनं च तत् ॥ तत्रस्थः कृमिकीटादिः सोऽप्यन्ते मुक्तिभाजनम् ॥ ७२ ॥
धर्मबीजं मुक्तिबीजं दण्डकारण्यमुच्यते ॥ विशेषाद्गौतमीश्लिष्टो देशः पुण्यतमोऽभवत् ॥ ७३ ॥ प्रणीतासंगमे चापि कुशतर्पण. एव वा ॥ स्नानदा
नादि यः कुर्यात्स गच्छेत्परमं पदम् ॥ ७४ ॥ स्मरणं पठनं वाऽपि श्रवणं चापि भक्तितः ॥ सर्वकामप्रदं पुंसां भुक्तिमुक्तिप्रदं विदुः ॥ ७५ ॥

उभयोस्तीरयोस्तत्र तीर्थान्याहुर्मनीषिणः ॥ षडशीतिसहस्राणि तेषु पुण्यं पुरोदितम् ॥ ७६ ॥ वाराणस्या अपि मुने कुशतर्पणमुत्तमम् ॥
नानेन सदृशं तीर्थं विद्यते सचराचरे ॥ ७७ ॥ ब्रह्महत्यादिपापानां स्मरणादपि नाशनम् ॥ तीर्थमेतन्मुने प्रोक्तं स्वर्गद्वारं महीतले ॥ ७८ ॥
॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये प्रणीतासंगमकुशतर्पणादिषडशीतिसहस्रतीर्थवर्णनं नामैकनवतितमोऽध्यायः ॥ ९१ ॥
॥ ब्रह्मोवाच ॥ मन्युतीर्थमिति ख्यातं सर्वपापप्रणाशनम् ॥ सर्वकामप्रदं नृणां स्मरणादघनाशनम् ॥ १ ॥ तस्य प्रभावं वक्ष्यामि शृणु
ष्वावहितो मुने ॥ देवानां दानवानां च संगरोऽभून्मिथः पुरा ॥ २ ॥ तत्राजयन्नैव सुरा दानवा जयिनोऽभवन् ॥ पराङ्मुखाः सुरगणाः संगराद्भृतचे
तसः ॥ ३ ॥ मामभ्येत्य समूचुस्ते देहि नोऽभयकारणम् ॥ तानहं प्रत्यवोचं वै गङ्गां गच्छत सर्वशः ॥ ४ ॥ तत्र वै गौतमीतीरे स्तुत्वा देवं महेश्वर
म् ॥ अनपायनिरायाससहजानन्दसुन्दरम् ॥ ५ ॥ लप्स्यते सर्वविबुधा जयहेतुर्महेश्वरात् ॥ तथेत्युक्त्वा सुरगणाः स्तुवन्ति स्म महेश्वरम् ॥ ६ ॥
तपोऽतप्यन्त केचिद्वै ननृतुश्च तथाऽपरे ॥ अस्नापयंश्च केचिच्चापूजयंश्च तथाऽपरे ॥ ७ ॥ ततः प्रसन्नो भगवाञ्छूलपाणिर्महेश्वरः ॥ देवानथाब्रवी
त्तुष्टो ब्रियतां यदभीप्सितम् ॥ ८ ॥ देवा ऊचुः सुरपतिं विजयाय ददस्व नः ॥ पुरुषं परमश्लाघ्यं रणेषु पुरतः स्थितम् ॥ ९ ॥ यद्बाहुबलमाश्रित्य
भवामः सुखिनो वयम् ॥ तथेत्युवाच भगवान्देवान्प्रति महेश्वरः ॥ १० ॥ आत्मनस्तेजसा कश्चिन्निर्मितः परमेष्ठिना ॥ मन्युनामानमत्युग्रं देवसै
न्यपुरोगमम् ॥ ११ ॥ तं लब्ध्वा त्रिदशाः सर्वे शिवं नत्वा स्वमालयम् ॥ मन्युना सह चाभ्येत्य पुनर्युद्धाय तस्थिरे ॥ १२ ॥ युद्धे स्थित्वा तु दनुजै
र्दैतेयैश्च महाबलैः ॥ विबुधा जातसंनद्धा मन्युमूचुः पुरः स्थिताः ॥ १३ ॥ ॥ देवा ऊचुः ॥ सामर्थ्यं तव पश्यामः पश्चाद्योत्स्यामहे परैः ॥ तस्मा
द्दर्शय चाऽऽत्मानं मन्योऽस्माकं युयुत्सताम् ॥ १४ ॥ ॥ ब्रह्मोवाच ॥ तद्देववचनं श्रुत्वा मन्युराह स्मयन्निव ॥ १५ ॥ ॥ मन्युरुवाच ॥ जनिता
मम देवेशः सर्वज्ञः सर्वदृक्प्रभुः ॥ यः सर्वं वेत्ति सर्वेषां धाम नाम मनःस्थितम् ॥ १६ ॥ नैव कश्चिच्च तं वेत्ति यः सर्वं वेत्ति सर्वदा ॥ अमूर्तं मूर्तम
प्येतद्वेत्ति कर्ता जगन्मयः ॥ १७ ॥ परोऽसौ भगवान्साक्षात्तथा दिव्यन्तरिक्षगः ॥ कस्तस्य रूपं यो वेद कस्य कर्ता जगन्मयः ॥ १८ ॥ एवंविधा
दृढं जातो मां कथं वेत्तुमर्हथ ॥ अथवा द्रष्टुकामा वै भवन्तो माऽनुपश्यत ॥ १९ ॥ ॥ ब्रह्मोवाच ॥ इत्युक्त्वा दर्शयामास मन्यू रूपं स्वकं महत् ॥
तार्तीयचक्षुषोद्भूतं भवस्य परमेष्ठिनः ॥ २० ॥ तेजसा संभृतं रूपं यतः सर्वं तदुच्यते ॥ पौरुषं पुरुषेष्वेव अहंकारश्च जन्तुषु ॥ २१ ॥ क्रोधः
सर्वस्य यो भीम उपसंहारकृद्भवेत् ॥ तं शंकरप्रतिनिधिं ज्वलन्तं निजतेजसा ॥ २२ ॥ सर्वायुधधरं दृष्ट्वा प्रणेमुः सर्वदेवताः ॥ वित्रेसुर्दैत्यदनु

जाः कृताञ्जलिपुटाः सुराः ॥ २३ ॥ भूत्वा मन्युमथोचुस्ते त्वं सेनानीः प्रभो भव ॥ त्वया दत्तमिदं राज्यं मन्यो भोक्ष्यामहे वयम् ॥ २४ ॥ तस्मा
त्सर्वेषु कार्येषु जेता त्वं जयवर्धनः ॥ त्वमिन्द्रस्त्वं च वरुणो लोकपालास्त्वमेव च ॥ २५ ॥ अस्मासु सर्वदेवेषु प्रविश त्वं जयाय वै ॥ मन्युः प्रो
वाच तान्सर्वान्विना मत्तो न किंचन ॥ २६ ॥ सर्वेष्वन्तः प्रविष्टोऽहं न मां जानाति कश्चन ॥ स एव भगवान्मन्युस्ततो जातः पृथक्पृथक् ॥२७॥
स एव रुद्ररूपी स्याद्रुद्रो मन्युः शिवोऽभवत् ॥ स्थावरं जङ्गमं चैव सर्वं व्याप्तं हि मन्युना ॥ २८ ॥ तमवाप्य सुराः सर्वे जयमापुश्च संगरे ॥
जयो मन्युश्च शौर्यं च ईशतेजःसमुद्भवम् ॥ २९ ॥ मन्युना जयमाप्याथ कृत्वा दैत्यैश्च संगमम् ॥ यथागतं ययुः सर्वे मन्युना परिरक्षिताः ॥३०॥
यत्र वै गौतमीतीरे शिवमाराध्य ते सुराः ॥ मन्युमापुर्जयं चैव मन्युतीर्थं तदुच्यते ॥३१ ॥ उत्पत्तिं च तथा मन्योर्यो नरः शृणुयात्सदा स्मरेत् ॥ विजयो
जायते तस्य न कैश्चित्परिभूयते ॥ ३२ ॥ न मन्युतीर्थसदृशं पावनं हि महामुने ॥ यत्र साक्षान्मन्युरूपी सर्वदा शंकरः स्थितः ॥ तत्र स्नानं च दानं
च स्मरणं सर्वकामदम् ॥ ३३ ॥ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये मन्युतीर्थवर्णनं नाम द्विनवतितमोऽध्यायः ॥ ९२ ॥
॥ ब्रह्मोवाच ॥ ॥ सारस्वतं नाम तीर्थं सर्वकामफलप्रदम् ॥ भुक्तिमुक्तिप्रदं नृणां सर्वपापप्रणाशनम् ॥ १ ॥ सर्वरोगापशमनं सर्वसिद्धिप्रदायकम् ॥
तत्रेमं शृणु वृत्तान्तं विस्तरेणाथ नारद ॥ २ ॥ पुष्पोत्कटात्पूर्वभागे पर्वतो लोकविश्रुतः ॥ शुभ्रो नाम गिरिश्रेष्ठो गौतम्या दक्षिणे तटे ॥ ३ ॥
शाकल्य इति विख्यातो मुनिः परमनैष्ठिकः ॥ तस्मिञ्शुभ्रे पुण्यगिरौ तपस्तेपे ह्यनुत्तमम् ॥ ४ ॥ तपस्यन्तं द्विजश्रेष्ठं गौतमीतीरमाश्रितम् ॥ सर्वे
भूतगणा नित्यं प्रणमन्ति स्तुवन्ति तम् ॥५॥ अग्निशुश्रूषणपरं वेदाध्ययनतत्परम् ॥ ऋषिगन्धर्वसुमनःसेविते तत्र पर्वते ॥६॥ तस्मिन्गिरौ महापुण्ये
देवद्विजभयंकरः ॥ यज्ञद्वेषी ब्रह्महन्ता परशुर्नाम राक्षसः ॥ ७ ॥ कामरूपी विचरति नानारूपधरो वने ॥ क्षणं च ब्रह्मरूपेण कदाचिद्व्याघ्ररूप
धृक् ॥ ८ ॥ कदाचिद्देवरूपेण कदाचित्पशुरूपधृक् ॥ कदाचित्प्रमदारूपः कदाचिन्मृगरूपतः ॥ ९ ॥ कदाचिद्बालरूपेण एवं चरति पापकृत् ॥
यत्राऽऽस्ते ब्राह्मणो विद्वाञ्शाकल्यो मुनिसत्तमः ॥ १० ॥ तमायाति महापापी परशू राक्षसाधमः ॥ शुचिष्मन्तं द्विजश्रेष्ठं परशुर्नित्यमेव च॥११॥
नेतुं हन्तुं प्रवृत्तोऽपि न शशाक स पापकृत् ॥ स कदाचिद्द्विजश्रेष्ठो देवानभ्यर्च्य यत्नतः ॥ १२ ॥ भोक्तुकामः किलाऽऽयातस्तत्रायात्परशुर्मुने ॥
ब्रह्मरूपधरो भूत्वा शिथिलः पलितोऽबली ॥ कन्यामादाय कांचिच्च शाकल्यं वाक्यमब्रवीत् ॥ १३ ॥ ॥ परशुरुवाच ॥ ॥ भोजनस्यार्थिनं
विद्धि मां च कन्यामिमां द्विज ॥ आतिथ्यकाले संप्राप्तं कृतकृत्योऽसि मानद ॥ १४ ॥ त एव धन्या लोकेऽस्मिन्येषामतिथयो गृहात् ॥ पूर्णाभि

लाषा निर्यान्ति जीवन्तोऽपि मृताः परे ॥ १५ ॥ भोजने तूपविष्टे च आत्मार्थं कल्पितं तु यत् ॥ अतिथिभ्यस्तु यो दद्यादत्ता तेन वसुंधरा ॥१६॥
॥ ब्रह्मोवाच ॥ ॥ एतच्छ्रुत्वा तु शाकल्यो ददामीत्येवमब्रवीत् ॥ आसने चोपवेश्याथाज्ञानात्तं परशुं द्विजम् ॥ १७ ॥ यथान्यायं पूजयित्वा शाक
ल्यो भोजनं ददौ ॥ आपोशनं करे कृत्वा परशुर्वाक्यमब्रवीत् ॥ १८ ॥ ॥ परशुरुवाच ॥ ॥ दूरादभ्यागतं श्रान्तमनुगच्छन्ति देवताः ॥ तस्मिं
स्तृप्ते तु तृप्ताः स्युरतृप्ते तु विपर्ययः ॥ १९ ॥ अतिथिश्चापवादी च द्वावेतौ विश्वबान्धवौ ॥ अपवादी हरेत्पापमातिथिः स्वर्गदायकः ॥ २० ॥
अभ्यागतं पथि श्रान्तं सावज्ञं योऽभिवीक्षते ॥ तत्क्षणादेव नश्यन्ति तस्य धर्मयशःश्रियः ॥ २१ ॥ तस्मादभ्यागतः श्रान्तो याचेऽहं त्वां द्विजो
त्तम ॥ दास्यसे यदि मे कामं तद्ब्रोक्ष्येऽहं न चान्यथा ॥ २२ ॥ ॥ ब्रह्मोवाच ॥ ॥ दत्तमित्येव शाकल्यो भुङ्क्ष्वेत्येवाऽऽह राक्षसम् ॥ ततः
प्रोवाच परशुरहं राक्षससत्तमः ॥ २३ ॥ नाहं द्विजस्तव रिपुर्न वृद्धः पलितः कृशः ॥ बहूनि मे व्यतीतानि वर्षाणि त्वां प्रपश्यतः ॥ २४ ॥ शुष्य
न्ति मम गात्राणि ग्रीष्मे स्वल्पोदकं यथा ॥ तस्मान्नेष्ये सानुगं त्वां भक्षयिष्ये द्विजोत्तम ॥ २५ ॥ ॥ ब्रह्मोवाच ॥ ॥ श्रुत्वा परशुवाक्यं तच्छा
कल्यो वाक्यमब्रवीत् ॥ २६ ॥ ॥ शाकल्य उवाच ॥ ॥ ये महाकुलसंभूता विज्ञातसकलागमाः ॥ तत्प्रतिश्रुतमभ्येति न जात्वत्र विपर्ययम् ॥
॥ २७ ॥ यथोचितं कुरु सखे तथाऽपि शृणु मे वचः ॥ निहन्तुमप्युद्यतेषु वक्तव्यं हितमुत्तमम् ॥ २८ ॥ ब्राह्मणोऽहं व्रतभृः सर्वतो रक्षको हरिः ॥
पादौ रक्षतु मे विष्णुः शिरो देवो जनार्दनः ॥ २९ ॥ बाहू रक्षतु वाराहः पृष्ठं रक्षतु धर्मराट् ॥ हृदयं रक्षतात्कृष्णो ह्यङ्गुली रक्षतान्मृगः ॥ ३० ॥
मुखं रक्षतु वागीशो नेत्रे रक्षतु पक्षिगः ॥ श्रोत्रं रक्षतु वित्तेशः सर्वतो रक्षताद्भवः ॥ नानापत्स्वेकशरणं देवो नारायणः स्वयम् ॥ ३१ ॥ ॥ ब्रह्मो
वाच ॥ ॥ एवमुक्ता तु शाकल्यो नय वा भक्ष वा सुखम् ॥ मां राक्षसेन्द्र परशो त्वमिदानीमतन्द्रितः ॥ ३२ ॥ राक्षसस्तस्य वचनाद्भक्षणाय
समुद्यतः ॥ नास्त्येव हृदये नूनं पापिनां करुणाकणः ॥ ३३ ॥ दंष्ट्राकरालवदनो गत्वा तस्यान्तिकं तदा ॥ ब्राह्मणं तं निरीक्ष्यैवं परशुर्वाक्यम
ब्रवीत् ॥ ३४ ॥ ॥ परशुरुवाच ॥ ॥ शंखचक्रगदापाणिं त्वां पश्येऽहं द्विजोत्तम ॥ सहस्रपादशिरसं सहस्राक्षकरं विभुम् ॥ ३५ ॥ सर्वभूतैकनि
लयं छन्दोरूपं जगन्मयम् ॥ त्वामद्य विप्र पश्यामि नास्ति ते पूर्वकं वपुः ॥ ३६ ॥ तस्मात्प्रसादये विप्र त्वमेव शरणं भव ॥ ज्ञानं देहि महाबुद्धे
तीर्थं ब्रूह्यघनिष्कृतिम् ॥ ३७ ॥ महतां दर्शनं ब्रह्मञ्जायते नहि निष्फलम् ॥ द्वेषादज्ञानतो वाऽपि प्रसङ्गाद्वा प्रमादतः ॥३८॥ अयसः स्पर्शसंस्पर्शो
रुक्मत्वायैव जायते॥३९॥ब्रह्मोवाच॥एतद्वाक्यं समाकर्ण्य राक्षसेन समीरितम् ॥ शाकल्यः कृपया प्राह वरदा सा सरस्वती ॥४०॥ तवाचिराद्दैत्यपते

ततः स्तुहि जनार्दनम्॥मनोरथफलप्राप्तौ नान्यन्नारायणस्तुतेः॥४१॥किंचिदप्यस्ति लोकेऽस्मिन्कारणं शृणु राक्षस ॥ प्रसन्ना तव सा देवी मद्वाक्याच्च भविष्यति ॥४२॥ ब्रह्मोवाच ॥ तथेत्युक्त्वा स परशुर्गङ्गां त्रैलोक्यपावनीम् ॥ स्नात्वा शुचिर्यतमना गङ्गामभिमुखः स्थितः ॥४३॥ तत्रापश्यद्दिव्य रूपां दिव्यगन्धानुलेपनाम् ॥ सरस्वतीं जगद्धात्रीं शाकल्यवचने स्थिताम् ॥४४॥ जगज्जाड्यहरां विश्वजननीं भुवनेश्वरीम् ॥ तामुवाच विनीतात्मा परशुर्गतकल्मषः ॥ ४५ ॥ . ॥ परशुरुवाच ॥ गुरुः शाकल्य इत्याह माकान्तं स्तुहि विध्वजम् ॥ तव प्रसादात्सा शक्तिर्यथा मे स्यात्तथा कुरु ॥ ४६ ॥ ब्रह्मोवाच ॥ तथाऽस्त्विति च सा प्राह परशुं श्रीसरस्वती ॥ सरस्वत्याः प्रसादेन परशुस्तं जनार्दनम् ॥ ४७ ॥ तुष्टाव विविधैर्वाक्यै स्ततस्तुष्टोऽभवद्धरिः ॥ वरं प्रादाद्राक्षसाय कृपासिन्धुर्जनार्दनः ॥ ४८ ॥ ॥ जनार्दन उवाच ॥ यद्यन्मनोगतं रक्षस्तत्तत्सर्वं भविष्यति ॥ ४९ ॥ ॥ ब्रह्मोवाच ॥ शाकल्यस्य प्रसादेन गौतम्याश्च प्रसादतः ॥ सरस्वत्याः प्रसादेन नरसिंहप्रसादतः ॥ ५० ॥ पापिष्ठोऽपि तदा रक्षः परशुर्दिवमीयि वान् ॥ सर्वतीर्थाङ्घ्रिपद्मस्य प्रसादाच्छार्ङ्गधन्वनः॥५१॥ततः प्रभृति तत्तीर्थसारस्वतमिति श्रुतम् ॥ तत्र स्नानेन दानेन विष्णुलोके महीयते॥५२॥ वाग्जयैष्णवशाकल्यपरशुप्रभवाणि हि ॥ बहून्यभूवंस्तीर्थानि तस्मिन्वै श्वेतपर्वते ॥ ५३ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये श्वेतपर्वतस्थंशाकल्यादितीर्थवर्णनं नाम त्रिनवतितमोऽध्यायः ॥ ९३ ॥ ॥ ब्रह्मोवाच ॥ चिच्चिकातीर्थमित्युक्तं सर्वरोगविनाशनम् ॥ सर्वचिन्तांप्रह रणं सर्वशान्तिकरं नृणाम् ॥ १ ॥ तस्य स्वरूपं वक्ष्यामि शुभ्रे तस्मिन्नगोत्तमे ॥ गङ्गाया उत्तरे पारे यत्र देवो गदाधरः ॥ २ ॥ चिच्चिकः पक्षिराट् तत्र भेरुण्डो योऽभिधीयते ॥ सदा वसति तत्रैव मांसाशी श्वेतपर्वते ॥ ३ ॥ नानापुष्पफलाकीर्णैः सर्वर्तुकुसुमैर्नगैः ॥ सेविते द्विजमुख्यैश्च गौतम्या चोपशोभिते ॥ ४ ॥ सिद्धचारणगन्धर्वकिंनरामरसंकुले ॥ तत्समीपे नगः कश्चिद्द्विपदां च चतुष्पदाम् ॥ ५ ॥ रोगार्तिक्षुत्तृषाचिन्तामरणानां न भाजनम् ॥ एवं गुणान्विते शैले नानामुनिगणावृते ॥ ६ ॥ पूर्वदेशाधिपः कश्चित्पवमान इति श्रुतः ॥ क्षत्रधर्मरतः श्रीमान्देवब्राह्मणपालकः ॥ ७ ॥ बलेन महता युक्तः सपुरोधा वनं ययौ ॥ रेमे स्त्रीभिर्मनोज्ञाभिर्नृत्यवाद्यैर्जवैः सुखैः ॥ ८॥ स च एवं धनुष्पाणिर्मृगयाशीलिभिर्वृतः ॥ एवं भ्रम न्कदाचित्स श्रान्तो द्रुममुपागतः ॥ ९ ॥ गौतमीतीरसंभूतं नानापक्षिगणैर्वृतम् ॥ आश्रमाणां गृहपतिं धर्मज्ञमिव सेवितम् ॥ १० ॥ तमाश्रित्य नगश्रेष्ठं पवमानो नृपोत्तमः ॥ स विश्रान्तो जनवृत ईक्षां चक्रे नगोत्तमम् ॥ ११ ॥ तत्रापश्यद्विजं स्थूलं द्विमुखं शोभनाकृतिम् ॥ चिन्ताविष्टं तथा श्रान्तं तमपृच्छन्नृपोत्तमः ॥ १२ ॥ ॥ राजोवाच ॥ को भवान्द्विमुखः पक्षी चिन्तावानिव लक्ष्यते ॥ नैवात्र कश्चिद्दुःखार्तः कस्मात्ते दुःखमागतम

॥ १३ ॥ ॥ ब्रह्मोवाच ॥ ततः प्रोवाच नृपतिं पवमानं शनैः शनैः ॥ समाश्वस्तमनाः पक्षी चिच्चिको निःश्वसन्मुहुः ॥ १४ ॥ चिच्चिक उवाच ॥ मत्तो भयं न चान्येषां मम वाऽन्योपपादितम् ॥ नानापुष्पफलाकीर्णं मुनिभिः परिसेवितम् ॥ १५ ॥ पश्येयं शून्यमेवाद्रिं ततः शोचामि मामहम् ॥ न लभामि सुखं किंचिन्न तृप्यामि कदाचन ॥ निद्रां प्राप्नोमि न क्वापि न विश्रान्तिं न निर्वृतिम् ॥ १६ ॥ ॥ ब्रह्मोवाच ॥ द्विमुखस्य द्विजस्योक्तं श्रुत्वा राजाऽतिविस्मितः ॥ १७ ॥ ॥ राजोवाच ॥ को भवान्किं कृतं पापं कस्माच्छून्यश्च पर्वतः ॥ एकेनास्येन तृप्यन्ति प्राणिनोऽत्र नगोत्तमे ॥ १८ ॥ किमुताऽऽस्यद्वयेन त्वं न तृप्तिमुपयास्यसि ॥ किंवा ते दुष्कृतं प्राप्तमिह जन्मन्यथो पुरा ॥ १९ ॥ तत्सर्वं शंस मे सत्यं त्रास्ये त्वां महतो भयात् ॥ २० ॥ ॥ ब्रह्मोवाच ॥ राजानं तं द्विजः प्राह निःश्वसन्नथ चिच्चिकः ॥ २१ ॥ ॥ चिच्चिक उवाच ॥ वक्ष्येऽहं त्वां पूर्ववृत्तं पवमान शृणुष्व तत् ॥ अहं द्विजातिप्रवरो वेदवेदांगपारगः ॥ २२ ॥ कुलीनो विदितः प्राज्ञः कार्यहन्ता कलिप्रियः ॥ वदे पुरस्तथा पृष्ठे अन्यदन्यच्च जन्तुषु ॥ २३ ॥ परवृद्ध्या सदा दुःखी मायया विश्ववञ्चकः ॥ कृतघ्नः सत्यरहितः परनिन्दाविचक्षणः ॥ २४ ॥ मित्रस्वामिगुरुद्रोही दम्भाचारोऽतिनिर्घृणः ॥ मनसा कर्मणा वाचा तापयामि जनान्बहून् ॥ २५ ॥ अयमेव विनोदो मे सदा यत्परहिंसनम् ॥ युग्मभेदं गणोच्छेदं मर्यादाभेदनं सदा ॥ २६ ॥ करोमि निर्विचारोऽहं विद्वत्सेवापराङ्मुखः ॥ न मया सदृशः कश्चित्पातकी भुवनत्रये ॥ २७ ॥ तेनाहं द्विमुखो जातस्तापनाद्दुःखभाग्यहम् ॥ तस्माद्दुःखेन संतप्तः शून्योऽयं पर्वतो मम ॥ २८ ॥ अन्यच्च शृणु भूपाल वाक्यं धर्मार्थसंहितम् ॥ ब्रह्महत्यासमं पापं तद्विना तदवाप्यते ॥ २९ ॥ क्षत्रियः संगरं गत्वा अथवाऽन्यत्र संगरात् ॥ पलायन्तं न्यस्तशस्त्रं विश्वस्तं च पराङ्मुखम् ॥ ३० ॥ अविज्ञातं चोपविष्टं बिभेमीति च वादिनम् ॥ तं यदि क्षत्रियो हन्यात्स तु स्याद्ब्रह्मघातकः ॥ ३१ ॥ अधीतं विस्मरति यस्त्वं करोति तथोत्तमम् ॥ अनादरं च गुरुषु तमाहुर्ब्रह्मघातकम् ॥ ३२ ॥ प्रत्यक्षे च प्रियं वक्ति परोक्षे परुषाणि च ॥ अन्यद्वदि वचस्यन्यत्करोत्यन्यत्सदैव यः ॥ ३३ ॥ गुरूणां शपथं कर्ता द्वेष्टा ब्राह्मणनिन्दकः ॥ मिथ्या विनीतः पापात्मा स तु स्याद्ब्रह्मघातकः ॥ ३४ ॥ देवं वेदमथाध्यात्मं धर्मब्राह्मणसंगतिम् ॥ एतान्निन्दति यो द्वेषात्स तु स्याद्ब्रह्मघातकः ॥३५॥ एवं भूतोऽप्यहं राजन्दम्भार्थं लज्जया तथा ॥ सद्वृत्त इव वर्तेऽहं तस्माद्राजन्द्विजोऽभवम् ॥३६॥ एवं भूतोऽपि सत्कर्म किंचित्कर्ताऽस्मि कुत्रचित् ॥ तेनाहं कर्मणा राजन्स्वतः स्मर्ता पुरा कृतम्॥३७॥ ब्रह्मोवाच ॥ तच्चिच्चिकवचः श्रुत्वा पावमानः सुविस्मितः॥ कर्मणा केन ते मुक्तिरित्याह नृपतिर्द्विजम् ॥३८॥ इति तस्य वचः श्रुत्वा नृपतिं प्राह पक्षिराट्

॥ ३९ ॥ चिञ्चिक उवाच ॥ अस्मिन्नेव नगश्रेष्ठे गौतम्या उत्तरे तटे ॥ मदाधरं नाम तीर्थं सर्वपापप्रणाशनम् ॥ ४० ॥ तद्धि तीर्थं पुण्यतमं तत्र मां
नय सुव्रत ॥ सर्वकामप्रदं चेति महद्भिर्मुनिभिः श्रुतम् ॥ ४१ ॥ न गौतम्यास्तथा विष्णोरपरं क्लेशनाशनम् ॥ सर्वभावेन तत्तीर्थं पश्येयमिति
मे मतिः ॥ ४२ ॥ मत्कृतेन प्रयत्नेन नेतच्छक्यं कदाचन ॥ कथमाकाङ्क्षितप्राप्तिर्भवेद्दुष्कृतकर्मणाम् ॥ ४३ ॥ सप्रयत्नोऽप्यहं वीर न पश्ये तत्सु
दुष्करम् ॥ तस्मात्तव प्रसादाच्च पश्येयं हि गदाधरम् ॥ ४४ ॥ अविज्ञापितदुःखज्ञं करुणावरुणालयम् ॥ यस्मिन्दृष्टे भवक्लेशा न दृश्यन्ते पुन
र्नरैः ॥ ४५ ॥ दृष्ट्वैव तं दिवं यास्ये प्रसादात्तव सुव्रत ॥ ४६ ॥ ब्रह्मोवाच ॥ एवमुक्तः स नृपतिश्चिञ्चिकेन द्विजन्मना ॥ दर्शयामास तं देवं तां
च गङ्गां द्विजन्मने ॥ ४७ ॥ ततः स चिञ्चिकः प्राह गंगां त्रैलोक्यपावनीम् ॥ ४८ ॥ चिञ्चिक उवाच ॥ गंगे गौतमि यावत्त्वां त्रिजगत्पावनीं
नरः ॥ न पश्यत्युच्यते तावदिहामुत्रापि पातकी ॥४९॥ तस्मात्सर्वागसमपि मामुद्धर सरिद्वरे ॥ संसारे देहिनामन्या न गतिः काऽपि कुत्रचित् ॥
त्वां विना विष्णुचरणसरोरुहसमुद्भवे ॥ ५० ॥ ब्रह्मोवाच ॥ इति श्रद्धाविशुद्धात्मा गंगैकशरणो द्विजः ॥ स्नानं चक्रे स्मरन्नन्तर्गंगे त्रायस्व
मामिति ॥ ५१ ॥ गदाधरं ततो नत्वा पश्यत्सु नगवासिषु ॥ पवमानाभ्यनुज्ञातस्तदैव दिवमाक्रमत् ॥ ५२ ॥ पवमानः स्वनगरं प्रययौ
सानुगस्ततः ॥ ततः प्रभृति तत्तीर्थं पावमानं सचिञ्चिकम् ॥ ५३ ॥ गदाधरं कोटितीर्थमिति वेदविदो विदुः ॥ कोटिकोटिगुणं कर्म कृतं तत्र भवे
नृणाम् ॥ ५४ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये पावमानचिञ्चिकगदाधरकोटितीर्थवर्णनं नाम चतुर्नवतितमोऽध्यायः ॥९४॥
ब्रह्मोवाच ॥ भद्रतीर्थमिति प्रोक्तं सर्वारिष्टनिवारणम् ॥ सर्वपापप्रशमनं महाशान्तिप्रदायकम् ॥ १ ॥ आदित्यस्य प्रिया भार्या उषा त्वाष्ट्री
पतिव्रता ॥ छायाऽपि भार्या सवितुस्तस्याः पुत्रः शनैश्चरः ॥ २ ॥ तस्य स्वसा विष्टिरिति भीषणा पापरूपिणी ॥ तां कन्यां सविता कस्मै
ददामीति मतिं दधे ॥ ३ ॥ यस्मै यस्मै दातुकामः सूर्यो लोकगुरुः प्रभुः ॥ तच्छ्रुत्वा भीषणा चेति किं कुर्मो भार्ययाऽनया ॥ ४ ॥ एवं तु वर्तमाने सा
पितरं प्राह दुःखिता ॥ ५ ॥ विष्टिरुवाच ॥ बालामेव पिता यस्तु दद्यात्कन्यां सुरूपिणे ॥ स कृतार्थो भवेल्लोके न चेद्दुष्कृतवान्पिता ॥ ६ ॥
चतुर्थाद्वत्सरादूर्ध्वं यावन्न दशमात्ययः ॥ तावद्विवाहः कन्यायाः पित्रा कार्यः प्रयत्नतः ॥ ७ ॥ श्रीमते विदुषे यूने कुलीनाय यशस्विने ॥
उदाराय सनाथाय कन्या देया वराय वै ॥ ८ ॥ एतच्चेदन्यथा कुर्यात्पिता स निरयी सदा ॥ धर्मस्य साधनं कन्या विदुषामपि भास्कर ॥ ९ ॥
नरकस्येव मूर्खाणां कामोपहतचेतसाम् ॥ एकतः पृथिवी कृत्स्ना सशैलवनकानना ॥ १० ॥ स्वलंकृतोपधिहीना सुकन्या चैकतः स्मृता ॥ विक्री

त्रितीर्थवर्णनंनाम षण्णवतिमोऽध्यायः॥९६॥ब्रह्मोवाच॥ विप्रतीर्थमिति ख्यातं तथा नारायणं विदुः॥तस्याऽऽख्यानं प्रवक्ष्यामि शृणु विस्मयकारकम्॥
॥१॥ अन्तर्वेद्यां द्विजः कश्चिद्ब्राह्मणो वेदपारगः ॥ तस्य पुत्रा महाप्राज्ञा गुणरूपदयान्विताः ॥२॥ तेषां कनीयान्यो भ्राता शान्तो गुणगणैर्वृतः ॥
आसन्दिव इति ख्यातः सर्वज्ञानो महामतिः॥ ३ ॥ आसन्दिवविवाहार्थं पिता यत्नमथाकरोत् ॥ एतस्मिन्नन्तरे रात्रौ सुप्तं तं द्विजपुत्रकम् ॥ ४ ॥
अविष्णुस्मरणं सौम्यशिरस्कमसमाहितम् ॥ आसन्दिवं क्रूररूपा राक्षसी कामरूपिणी ॥ ५ ॥ तमादायागमच्छीघ्रं गौतम्या दक्षिणे तटे ॥ श्रीगि
रेरुत्तरे पारे बहुब्राह्मणसेवितम् ॥ ६ ॥ नगरं धर्मनिलयं लक्ष्म्या निलयमेव च ॥ तत्र राजा बृहत्कीर्तिः सर्वक्षत्रगुणान्वितः ॥ ७ ॥ तस्यामितक्षेम
सुभिक्षयुक्तं निशावसाने द्विजपुत्रयुक्ता ॥ सा राक्षसी तत्पुरमाससाद मनोज्ञरूपाणि विभर्ति नित्यम् ॥ ८ ॥ सा कामरूपेण चरत्यशेषां महीमिमां
तेन समं द्विजेन ॥ गोदावरीदक्षिणतीरभागे वृद्धाकृतिस्तं द्विजमाह भीमा ॥ ९ ॥ ॥ राक्षस्युवाच ॥ एषा तु गंगा द्विजमुख्य संध्या उपास्यतां वि
प्रवरैः समेत्य ॥ यथोचितं विप्रवरास्तु काले नोपासते यत्नत एव संध्याम् ॥ १० ॥ जीवन्त एवाभिहिता मुनीश्वरैरन्त्यावसायिप्रवरास्त एते ॥
अहं जविन्नी तव चेति वाच्यं नो चेदिदानीं त्वमुपैषि नाशम् ॥ ११ ॥ मद्वाक्यकर्ताऽसि यदि द्विजेन्द्र सुखं करिष्ये तव यत्प्रियं च ॥ पुनश्च देशं
निलयं सुहृंश्च संप्रापयिष्ये ननु सत्यमेतत् ॥ १२ ॥ ॥ ब्रह्मोवाच ॥ स प्राह का त्वं द्विजपुंगवोऽपि सोवाच तं राक्षसी कामरूपा ॥ विश्वासयन्ती
शपथैरनेकैस्तं भ्रान्तचित्तं मुनिराजपुत्रम् ॥ १३ ॥ कंकालिनी नाम जगत्प्रसिद्धा विप्रोऽपि तामाह मित्रेरितं यत् ॥ तदेव कर्ताऽस्मि न संशयो
त्र यत्प्रियं वच्मि करोमि चैव ॥ १४ ॥ ॥ ब्रह्मोवाच ॥ तद्विप्रवचनं श्रुत्वा राक्षसी कामरूपिणी ॥ वृद्धा तथाऽपि चार्वंगी दिव्यालंकारभूषणा ॥
॥ १५ ॥ द्विजमादाय सर्वत्र ययौ तोऽयं गुणाकरः ॥ एवं वदन्ती सर्वत्र याति वक्ति करोति च ॥ १६ ॥ तं विप्रं रूपसौभाग्यवयोविद्याविभूषितं
म ॥ तां च वृद्धां गुणोपेतामवस्त्र मातेति मेनिरे ॥ १७ ॥ तत्र द्विजवरः कश्चित्स्वां कन्यां भूषणान्विताम् ॥ राक्षसीं तां पुरस्कृत्य प्रादात्तस्मै द्विज
न्मने ॥ १८ ॥ सा कन्या तं पतिं प्राप्य कृतार्थाऽस्मीत्यचिन्तयत् ॥ स द्विजोऽपि गुणैर्युक्तां पत्नीं दृष्ट्वा सुदुःखितः ॥ १९ ॥ ॥ द्विज उवाच ॥
मामियं भक्षयेदेव राक्षसी पापरूपिणी ॥ किं करोमि क्व गच्छामि कस्यैतत्कथयामि वा ॥ २० ॥ महत्संकटमापन्नं रक्षयिष्यति कोऽत्र माम् ॥
भार्या ममेयं कल्याणी गुणरूपवयोयुता ॥ एनामप्यशुभाऽकस्माद्भक्षयिष्यति राक्षसी ॥ २१ ॥ ॥ ब्रह्मोवाच ॥ एतस्मिन्नन्तरे तत्र भार्या सा
गुणशालिनी ॥ वृद्धाऽप्यतिदुराधर्षा सा गता कुत्रचित्तदा ॥ २२ ॥ प्रश्रयावनता भूत्वा बाला चापि पतिव्रता ॥ भर्तारं दुःखितं ज्ञात्वा पतिं

प्राह रहः शनैः ॥ २३ ॥ ॥ भार्योवाच ॥ कस्मात्ते दुःखमापन्नं स्वामिंस्तत्त्वं वदस्व मे ॥ २४ ॥ ॥ ब्रह्मोवाच ॥ शनैः प्रोवाच तां भार्यां यथाव
त्पूर्वविस्तरम् ॥ किमकथ्यं प्रिये मित्रे कुलीनायां च योषिति ॥ २५ ॥ भर्तृवाक्यं निशम्येदं प्रोवाच वदतां वरा ॥ २६ ॥ ॥ भार्योवाच ॥ अना
त्मनः सर्वतोऽपि भयमस्ति गृहेष्वपि ॥ कुतो भयं ह्यात्मवतां किं पुनर्गौतमीतटे ॥ २७ ॥ वसतां विष्णुभक्तानां विरक्तानां विवेकिनाम् ॥ अत्र
स्नात्वा शुचिर्भूत्वा स्तुहि देवमनामयम् ॥ २८ ॥ ॥ ब्रह्मोवाच ॥ एतदाकर्ण्य गङ्गायां स्नात्वा विगतकल्मषः ॥ तुष्टाव गौतमीतीरे द्विजो नारायणं
तथा ॥२९॥ ॥ द्विज उवाच ॥ त्वमन्तरात्मा जगतोऽस्य नाथ त्वमेव कर्तास्य मुकुन्द हर्ता ॥ त्वं पालकः पालयसे न दीनमनाथबन्धो नरसिंह
कस्मात् ॥ ३० ॥ श्रुत्वैतत्प्रार्थनं तस्य जगच्छोकनिवारणः ॥ नारायणोऽपि तां पापां निजघान स राक्षसीम् ॥ ३१ ॥ सुदर्शनेन चक्रेण सहस्रा
रेण भास्वता ॥ तस्मै प्रादाद्वरानिष्टान्प्रापयच्च गुरुं प्रभुः ॥ ३२ ॥ ततः प्रभृति तत्तीर्थं विप्रं नारायणं विदुः ॥ स्नानदानेन पूजाद्यैर्यत्र सिध्यति
वाञ्छितम् ॥ ३३ ॥ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये विप्रनारायणतीर्थवर्णनं नाम सप्त नवतितमोऽध्यायः ॥ ९७ ॥ ॥
ब्रह्मोवाच ॥ भानुतीर्थमिति ख्यातं त्वाष्टं माहेश्वरं तथा ॥ ऐन्द्रं याम्यं तथाऽऽग्नेयं सर्वपापप्रणाशनम् ॥ १ ॥ अभिष्टुत इति ख्यातो राजाऽऽसीत्त्रि
यदर्शनः ॥ हयमेधेन पुण्येन यष्टुमारब्धवान्सुरान् ॥२ ॥ तत्रर्त्विजः षोडशासन्वसिष्ठात्रिपुरोगमाः ॥ क्षत्रिये यजमाने तु यज्ञभूमिः कथं भवेत् ॥३॥
ब्राह्मणे दीक्षिते राजा भुवं दास्याति यज्ञियाम् ॥ भूपतौ दीक्षिते दाता को भवेत्को नु याचते ॥ ४ ॥ याञ्चेयमखिलाशर्मजननी पापरू
पिणी ॥ केनाप्यतो न कार्यैव क्षत्रियेण विशेषतः ॥ ५ ॥ एवं मीमांसमानेषु ब्राह्मणेषु परस्परम् ॥ तत्र प्राह महाप्राज्ञो वसिष्ठो धर्मवित्तमः ॥
॥ ६ ॥ ॥ वसिष्ठ उवाच ॥ राज्ञि दीक्षायमाणे तु सूर्यो याच्यो भुवं प्रति ॥ देहि मे देव सवितर्यजनं देवतोचितम् ॥ ७ ॥
दैवं क्षत्रमसि ब्रह्मन्भूतनाथ नमोऽस्तु ते ॥ याचितः सविता राज्ञा देवानां यजनं शुभम् ॥ ८ ॥ ददात्येव ततो राजन्प्रार्थयेशं दिवाकरम् ॥ ९ ॥ ॥
॥ ब्रह्मोवाच ॥ ॥ तथेत्युक्त्वाऽभिष्टुतोऽथ देवदेवं दिवाकरम् ॥ श्रद्धया प्रार्थयामास हरीशाजात्मकं रविम् ॥ १० ॥ ॥ राजोवाच ॥ ॥ देवानां
यजनं देहि सवितस्ते नमोऽस्तु ते ॥ ११ ॥ ॥ ब्रह्मोवाच ॥ ॥ क्षत्रं दैवं यतः सूर्यो दत्ता भूर्भूपतेस्ततः ॥ सविता देवदेवेशो ददामीत्यभ्यभाषत ॥
॥ १२ ॥ एवं करोति यो यज्ञं तस्य रिष्टिर्न काचन ॥ तथा वाजिमखे सत्रे ब्राह्मणैर्वेदपारगैः ॥ १३ ॥ प्रारब्धेऽभिष्टुता राज्ञा यत्रागाद्भूपतिं रविः ॥
देवानां यजनं दातुं भानुतीर्थं तदुच्यते ॥ १४ ॥ तं देवक्रतुमुत्कृष्टं हयमेधं सुरैर्युतम् ॥ दैत्याश्च दनुजाश्चैव तथाऽन्ये यज्ञघातकाः ॥ १५ ॥ ब्रह्मवेप

धराः सर्वे गायन्तः सामगा इव ॥ तेऽपि तत्र महाप्राज्ञाः प्राविशन्ननिवारिताः ॥ १६ ॥ चमसानि च पात्राणि चषालं साममेव च ॥ सोमपानं हवि
स्त्यागमृत्विजो भूपतिं तथा ॥१७॥ निन्दन्ति निक्षिपन्त्यन्ये हसन्त्यन्ये तथाऽसुराः॥तेषां चेष्टां न जानन्ति विश्वरूपं विना मुने ॥१८॥ विश्वरूपो
ऽपि पितरं प्राह दैत्या इमे इति ॥ तत्पुत्रवचनं श्रुत्वा त्वष्टा प्राह सुरानिदम् ॥ १९ ॥ ॥ त्वष्टोवाच ॥ ॥ गृहीत्वा वारिदर्भांश्च प्रोक्षयध्वं समन्ततः ॥
ये निन्दन्ति मखं पुण्यं चमसं सोममेव च ॥ २० ॥ मया त्वपहृताः सर्वं इत्युक्त्वा परिषिञ्चत ॥ २१ ॥ ॥ ब्रह्मोवाच ॥ ॥ तथा चक्रुः
सुरगणास्त्वष्टा चापि तथाऽकरोत् ॥ भस्मीभूतास्ततः सर्वे कांदिशीकास्ततोऽभवन् ॥ २२ ॥ हता मया महापापा इत्युक्त्वा वार्यवाक्षिपत् ॥ ततः
क्षीणायुषो दैत्याः प्रातिष्ठन्कुपितास्ततः ॥ २३ ॥ यत्रैतत्प्राक्षिपद्वारि त्वष्टा लोकप्रजापतिः ॥ त्वाष्ट्रं तीर्थं तदाख्यातं सर्वपापप्रणाशनम् ॥
॥ २४ ॥ त्वष्टुर्वाक्याच्च्युतान्दैत्यान्निजघान यमस्तदा ॥ कालदण्डेन चक्रेण कालपाशेन मन्युना ॥ २५ ॥ यत्र ते निहता दैत्यास्तत्तीर्थं
याम्यमुच्यते ॥ यत्राभवत्क्रतुः पूर्णो हुत्वाऽग्नौ चामृतं बहु ॥ २६ ॥ धाराभिः शरमानाभिरखण्डाभिर्महाध्वरे ॥ यत्राभवद्ध्व्यवाहस्तृप्तस्तस्य ह्यभि
ष्टुतः ॥ २७ ॥ आग्नितीर्थं तदाख्यातमश्वमेधफलप्रदम् ॥ इन्द्रो मरुद्भिर्नृपतिं प्राहेदं वचनं शुभम् ॥ २८ ॥ त्वं सम्राड्भविता राजन्नुभयोरपि
लोकयोः ॥ सखा मम प्रियो नित्यं भविता नात्र संशयः ॥२९॥ स कृतार्थो मर्त्यलोक इन्द्रतीर्थे च तर्पणम् ॥ कुर्यात्पितॄणां प्रीत्यर्थं यमतीर्थे विशे
षतः ॥ ३० ॥ माहेश्वरं तु तत्तीर्थं पूजितोऽभिष्टुतः शिवः ॥ भक्तियुक्तेन विप्रैश्च सर्वकर्मविशारदैः ॥३१॥ वैदिकैर्लौकिकैश्चैव मन्त्रैः पूज्यं महेश्वरम् ॥
नृत्यैर्गीतैस्तथा वाद्यैरमृतैः पञ्चसंभवैः ॥ ३२ ॥ उपचारैश्च बहुभिर्दण्डपातप्रदक्षिणैः ॥ धूपैर्दीपैश्च नैवेद्यैः पुष्पैर्गन्धैः सुगन्धिभिः ॥ ३३ ॥ पूजया
मास देवेशं विष्णुं शंभुं धियैकया ॥ ततः प्रसन्नौ देवेशौ वरान्ददतुरोजसा ॥ ३४ ॥ अभिष्टुते नरेन्द्राय भुक्तिमुक्ती उभे अपि ॥ माहात्म्यमस्य
तीर्थस्य तथा ददतुरुत्तमम् ॥ ३५ ॥ ततःप्रभृति तत्तीर्थं शैवं वैष्णवमुच्यते ॥ तत्र स्नानं च दानं च सर्वकामप्रदं विदुः ॥ ३६ ॥ इमानि सर्वतीर्थानि
स्मरेदपि पठेत वा ॥ विमुक्तः सर्वपापेभ्यः शिवविष्णुपुरं व्रजेत ॥ ३७ ॥ भानुतीर्थं विशेषेण स्नानं सर्वार्थसिद्धिदम् ॥ तत्र तीर्थे महापुण्यं तीर्थानां
शतमत्र हि ॥ ३८ ॥ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये भान्वादिशततीर्थवर्णनं नामाष्टनवतितमोऽध्यायः ॥ ९८ ॥ ॥
॥ ब्रह्मोवाच ॥ ॥ भिल्लतीर्थमिति ख्यातं रोगघ्नं पापनाशनम् ॥ महादेवपदाम्भोजयुगभक्तिप्रदायकम् ॥ १ ॥ तत्राप्येवंविधां पुण्यां कथां शृणु महा
मते ॥ गङ्गाया दक्षिणे तीरे श्रीगिरेरुत्तरे तटे ॥ २ ॥ आदिकेश इति ख्यात ऋषिभिः परिपूजितः ॥ महादेवो लिङ्गरूपी सदाऽऽस्ते सर्वकामदः ॥
॥ ३ ॥ सिन्धुद्वीप इति ख्यातो मुनिः परमधार्मिकः ॥ तस्य भ्राता वेद इति स चापि परमो ऋषिः ॥ ४ ॥ तमादिकेशं वै देवं त्रिपुरारिं त्रिलोच

नम् ॥ नित्यं पूजयते भक्त्या प्राप्ते मध्यंदिने रवौ ॥ ५ ॥ भिक्षाटनाय वेदोऽपि याति ग्रामं विचक्षणः ॥ याते तस्मिन्द्विजवरे व्याधः परमधा
र्मिकः ॥ ६ ॥ तस्मिन्गिरिवरे पुण्ये मृगयां याति नित्यशः ॥ अटित्वा विविधान्देशान्मृगान्हत्वा यथासुखम् ॥ ७ ॥ न्यस्य मांसं धनुष्कोट्यां
श्रान्तो व्यांघ्रः शिवं प्रभुम् ॥ ८ ॥ आदिकेशं समागत्य न्यस्य मांसं ततो बहिः ॥ गङ्गां गत्वा मुखे वारि गृहीत्वाऽऽगत्य तं शिवम् ॥ ९ ॥ यस्य
कस्यापि पत्राणि करेणाऽऽदाय भक्तितः ॥ अपरेण च मांसानि नैवेद्यार्थं च तन्मनाः ॥१०॥ आदिकेशं समागत्य वेदेनार्चितमोजसा ॥ पादेनाऽऽ
हत्य तां पूजां मुखान्नीतेन वारिणा ॥ ११ ॥ स्नापयित्वा शिवं देवमर्चयित्वा तु पत्रकैः ॥ कल्पयित्वा तु तन्मांसं शिवो मे प्रीयतामिति ॥ १२ ॥ नैव
किंचित्स जानाति शिवभक्तिं विना शुभाम् ॥ ततो याति स्वकं स्थानं मांसेन तु यथागतम् ॥ १३ ॥ करोत्येतादृगागत्याऽऽगत्य प्रत्यहमेव सः ॥
तथाऽपीशस्तुतोषास्य विचित्रा हीश्वरस्थितिः ॥ १४ ॥ यावन्नायात्यसौ भिल्लः शिवस्तावन्न सौख्यभाक् ॥ भक्तानुकम्पितां शंभोर्मानातीतां तु वेत्ति
कः ॥ १५ ॥ संपूजयत्यादिकेशमुमया प्रत्यहं शिवम् ॥ एवं बहुतिथे काले याते वेदश्चुकोप ह ॥ १६ ॥ पूजां मन्त्रवतीं चित्रां शिवभक्तिसमन्वि
ताम् ॥ को नु विध्वंसते पापो मत्तः स वधमाप्नुयात् ॥ १७ ॥ गुरुदेवद्विजस्वामिद्रोही वध्यो मुनेरपि ॥ सर्वस्यापि वधार्होऽसौ शिवस्य द्रोहकृ
न्नरः ॥ १८ ॥ एवं निश्चित्य मेधावी वेदः सिन्धोस्तथाऽनुजः ॥ कस्येयं पापचेष्टा स्यात्पापिष्ठस्य दुरात्मनः ॥१९॥ पुष्पैर्वन्यभवैर्दिव्यैः कन्दैर्मूल
फलैः शुभैः॥कृतां पूजां स विध्वस्य ह्यन्यां पूजां करोति यः॥२०॥मांसेन तरुपत्रैश्च स च वध्यो भवेन्मम॥एवं संचिन्त्य मेधावी गोपयित्वा तनुं तदा
॥२१॥तं पश्येयमहं पापं पूजाकर्तारमीश्वरे ॥ एतस्मिन्नन्तरे प्रायाद्व्याधो देवं यथा पुरा ॥२२॥ नित्यवत्पूजयन्तं तमादिकेशस्तदाऽब्रवीत् ॥ २३ ॥
॥ आदिकेश उवाच ॥ भो भो व्याध महाबुद्धे श्रान्तोऽसीति पुनः पुनः ॥ चिराय कथमायातस्त्वां विना तात दुःखितः ॥ न विन्दामि सुखं किंचि
त्समाश्वसिहि पुत्रक ॥ २४ ॥ ॥ ब्रह्मोवाच ॥ तमेवंवादिनं देवं वेदः श्रुत्वा विलोक्य तु ॥ चुकोप विस्मयाविष्टो न च किंचिदुवाच ह ॥ २५ ॥
व्याधश्च नित्यवत्पूजां कृत्वा स्वभवनं ययौ ॥ वेदश्च कुपितो भूत्वा आगत्येशमुवाच ह ॥ २६ ॥ ॥ वेद उवाच ॥ अयं व्याधः पापरतः क्रिया
ज्ञानविवर्जितः ॥ प्राणिहिंसारतः क्रूरो निर्दयः सर्वजन्तुषु ॥ २७ ॥ हीनजातिरकिंचिज्ज्ञो गुरुक्रमविवर्जितः ॥ सदाऽनुचितकारी चानिर्जिताखिल
गोगणः ॥ २८ ॥ तस्याऽऽत्मानं दर्शितवान्न मां किंचन वक्ष्यसि ॥ पूजां मन्त्रविधानेन करोमीश यतव्रतः ॥ २९ ॥ त्वदेकशरणो नित्यं भार्या
पुत्रविवर्जितः ॥ व्याधो मांसेन दुष्टेन पूजां तव करोत्यसौ ॥ ३० ॥ तस्य प्रसन्नो भगवान्न ममेति महाद्भुतम् ॥ शास्तिमस्य करिष्यामि भिल्लस्य

ह्यपकारिणः ॥ ३१ ॥ मृदोः कोऽपि भवेत्प्रीतः कोऽपि तद्द्रुरात्मनः ॥ तस्मादहं मूर्ध्नि शिलां पातयेयमसंशयम् ॥ ३२ ॥ ॥ ब्रह्मोवाच ॥ इत्यु
क्तवंति वे वेदे विहस्येशोऽब्रवीदिम् ॥ ३३ ॥ आदिकेश उवाच ॥ श्वः प्रतीक्षस्व पश्चान्मे शिलां पातय मूर्धनि ॥ ३४ ॥ ॥ ब्रह्मोवाच ॥ तथेत्यु
क्त्वा स वेदोऽपि शिलां संत्यज्य बाहुना ॥ उपसंहृत्य तं कोपं श्वः करोमीत्युवाच ह ॥ ३५ ॥ ततः प्रातः समागत्य कृत्वा स्नानादिकर्म च ॥
वेदोऽपि नित्यवत्पूजां कुर्वन्पश्यति मस्तके ॥ ३६ ॥ लिङ्गस्य सव्रणां भीमां धारां च रुधिरप्लुताम् ॥ वेदः स विस्मितो भूत्वा किमिदं लिङ्गमूर्ध
नि ॥ ३७ ॥ महोत्पातो भवेत्कस्य सूचयेदित्यचिन्तयत् ॥ मृद्भिश्च गोमयेनापि कुशैस्तं गांगवारिभिः ॥ ३८ ॥ प्रक्षालयित्वा तां पूजां कृतवा
न्नित्यवत्तदा ॥ एतस्मिन्नन्तरे प्रायाद्वाघो विगतकल्मषः ॥ ३९ ॥ मूर्धानं व्रणसंयुक्तं सरक्तं लिंगमस्तके ॥ शंकरस्याऽऽदिकेशस्य ददृशेऽन्तर्गत
स्तदा ॥ ४० ॥ दृष्ट्वैव किमिदं चित्रमित्युक्त्वा निशितैः शरैः ॥ आत्मानं भेदयामास शतधा च सहस्रधा ॥ ४१ ॥ स्वामिनो वैकृतं दृष्ट्वा कः क्षमे
तोत्तमाशयः ॥ मुहुर्निनिन्द चाऽऽत्मानं मयि जीवत्यभूदिदम् ॥ ४२ ॥ कष्टमापतितं कीदृगहो दुर्विधिवैशसात् ॥ तत्कर्म तस्य संवीक्ष्य महादेवोऽ
तिविस्मितः ॥ ततः प्रोवाच भगवान्वेदं वेदविदां वरम् ॥ ४३ ॥ आदिकेश उवाच ॥ पश्य व्याधं महाबुद्धे भक्तं भावेन संयुतम् ॥ त्वं तु मृद्भिः
कुशैर्वार्भिर्मूर्धानं स्पृष्टवानसि ॥ ४४ ॥ अनेन सहसा ब्रह्मन्ममाऽऽत्माऽपि निवेदितः ॥ भक्तिः प्रेमाथवा शक्तिर्विचारो यत्र विद्यते ॥ तस्मादस्मै
वरान्दास्ये पश्चात्तुभ्यं द्विजोत्तम ॥ ४५ ॥ ब्रह्मोवाच॥वरेण च्छन्दयामास व्याधं देवो महेश्वरः॥ व्याधः प्रोवाच देवेशं निर्माल्यं तव यद्भवेत् ॥४६॥
तदस्माकं भवेन्नाथ मन्नाम्ना तीर्थमुच्यताम् ॥ सर्वक्रतुफलं तीर्थं स्मरणादेव जायताम् ॥ ४७ ॥ ब्रह्मोवाच ॥ तथेत्युवाच देवेशस्ततस्तत्तीर्थमुत्त
मम् ॥ भिल्लतीर्थं समस्ताघसंघावच्छेदकारणम् ॥ ४८ ॥ श्रीमहादेवचरणमहाभक्तिविधायकम् ॥ अभवत्स्नानदानाद्यैर्मुक्तिमुक्तिप्रदायकम् ॥ वेद
स्यापि वरान्प्रादाच्छिवो नानाविधान्बहून् ॥ ४९ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये भिल्लतीर्थमहिमवर्णनं नामैकोन
शतमोऽध्यायः ॥ ९९ ॥ ब्रह्मोवाच ॥ चक्षुस्तीर्थमिति ख्यातं रूपसौभाग्यदायकम् ॥ यत्र योगेश्वरो देवो गौतम्या दक्षिणे तटे ॥ १ ॥ पुरं
भौवनमाख्यातं गिरिमूर्ध्न्यभिधीयते ॥ यत्रासौ भौवनो राजा क्षत्रधर्मपरायणः ॥ २ ॥ तस्मिन्पुरवरे कश्चिद्ब्राह्मणो वृद्धकौशिकः ॥ तत्पुत्रो
गौतम इति ख्यातो वेदविदुत्तमः ॥ ३ ॥ तस्य मातुर्मनोदोषाद्विपरीतोऽभवद्द्विजः ॥ सखा तस्य वणिक्कश्चिन्मणिकुण्डल उच्यते ॥ ४ ॥ तेन सख्यं
द्विजस्याऽऽसीद्विषमं द्विजवैश्ययोः ॥ श्रीमद्दरिद्रयोर्नित्यं परस्परहितैषिणोः ॥ ५ ॥ कदाचिद्गौतमो वैश्यं वित्तेशं मणिकुण्डलम् ॥ प्राहेदं वचनं

प्रीत्या रहः स्थित्वा पुनः पुनः ॥ ६ ॥ गौतम उवाच ॥ गच्छामो धनमादातुं पर्वतानुधनिपि ॥ यौवनं तद्वृथा ह्येयं विना सौख्यानुकूल्यतः ॥ धनं विना तत्कथं स्यादहो धिङ्निर्धनं नरम् ॥ ७ ॥ ब्रह्मोवाच ॥ कुण्डलो द्विजमाहेदं मत्पित्रोपार्जितं धनम् ॥ बह्वस्ति किं धनेनाद्य करिष्ये द्विज सत्तम ॥ द्विजः पुनरुवाचेदं मणिकुण्डलमोजसा ॥ ८ ॥ गौतम उवाच ॥ धर्मार्थज्ञानकामानां को नु तृप्तः प्रशस्यते ॥ उत्कर्षप्राप्तिरेवैषां सखे श्लाघ्या शरीरिणाम् ॥ ९ ॥ स्वेनैव व्यवसायेन धन्या जीवन्ति जन्तवः ॥ परदत्तार्थसंतुष्टाः कष्टजीविन एव ते ॥ १० ॥ सं पुत्रः शस्यते लोके पितृभिश्चाभिनन्द्यते. ॥ यः पैत्र्यमभिलिप्सेत न वाचाऽपि तु कुण्डल ॥ ११ ॥ स्वबाहुबलमाश्रित्य योऽर्थानर्जयते सुतः ॥ स कृतार्थो भवेल्लोके पैत्र्यं वित्तं न तु स्पृशेत् ॥ १२ ॥ स्वयमार्ज्य सुतो वित्तं पित्रे दास्यति बन्धवे ॥ तं तु पुत्रं विजानीयादितरो योनि कीटकः ॥ १३ ॥ ब्रह्मोवाच ॥ एतच्छ्रुत्वा तु तद्वाक्यं ब्राह्मणस्याभिलाषिणः ॥ तथेति मत्वा तद्वाक्यं रत्नान्यादाय सत्वरः ॥ १४ ॥ आत्मकीयानि वित्तानि गौतमाय न्यवेदयत् ॥ धनेनैतेन देशांश्च परिभ्रम्य यथासुखम् ॥ १५ ॥ धनान्यादाय वित्तानि पुनरेष्यामहे गृहम् ॥ सत्यमेव वणिग्वक्ति स तु विप्रः प्रतारकः ॥ १६ ॥ पापात्मा पापचित्तं च न बुबोध वणिग्द्विजम् ॥ तौ परस्परमामन्त्र्य माता पित्रोरजानतोः ॥ ॥ १७ ॥ देशाद्देशान्तरं यातौ धनार्थं तौ वणिग्द्विजौ ॥ वणिग्घस्तस्थितं वित्तं ब्राह्मणो हर्तुमिच्छति ॥ १८ ॥ ॥ ब्राह्मण उवाच ॥ येन केनाप्युपायेन तद्धनं हि समाहरे ॥ अहो पृथिव्यां रम्याणि नगराणि सहस्रशः ॥ १९ ॥ इष्टप्रदात्र्यः कामस्य देवता इव योषितः ॥ मनोहरास्तत्र तत्र सन्ति किं क्रियते मया ॥ २० ॥ धनमाहृत्य यत्नेन योषिद्भ्यो यदि दीयते ॥ भुज्यन्ते तास्ततो नित्यं सफलं जीवितं हि तत् ॥ २१ ॥ नृत्यगीतरतो नित्यं पण्यस्त्रीभिरलंकृतः ॥ भोक्ष्ये कथं तु तद्वित्तं वैश्यान्मद्धस्तमागतम् ॥ २२ ॥ ब्रह्मोवाच ॥ एवं चिन्तयमानोऽसौ गौतमः प्रहसन्निव ॥ मणिकुण्डलमाहेदमधर्मादेत्र जन्तवः ॥ ॥ २३ ॥ वृद्धिं सुखमभीष्टानि प्राप्नुवन्ति न संशयः ॥ धर्मिष्ठाः प्राणिनो लोके दृश्यन्ते दुःखभागिनः ॥ २४ ॥ तस्माद्धर्मेण किं तेन दुःखैकफलहेतुना ॥ २५ ॥ ॥ ब्रह्मोवाच ॥ नेत्युवाच ततो वैश्यः सुखं धर्मे प्रतिष्ठितम् ॥ पापे दुःखं भयं शोको दारिद्र्यं क्लेश एव च ॥ यतो धर्मस्ततो मुक्तिः स्वधर्मः किं विनश्यति ॥ २६ ॥ ॥ ब्रह्मोवाच ॥ एवं विवदतोस्तत्र संपरायस्तयोरभूत् ॥ यस्य पक्षो भवेज्ज्यायान्स परार्थमवाप्नुयात् ॥ २७ ॥ पृच्छावः कस्य प्राबल्यं धर्मिणो वाऽप्यधर्मिणः ॥ वेदात्तु लौकिकं ज्येष्ठं लोके धर्मात्सुखं भवेत् ॥ २८ ॥ एवं विवदमानौ तावूचतुः सकलज्ञनान् ॥ धर्मस्य वाऽप्यधर्मस्य प्राबल्यमनयोर्भुवि ॥ २९ ॥ तद्वदन्तु यथावृत्तमेवमूचतुरोजसा ॥

एवं तत्रोचिरे केचिद्ये धर्मेणानुवर्तिनः ॥ ३० ॥ अनुभूयते च तैर्दुःखं पापिष्ठा सुखिनो जनाः ॥ संपराये धनं सर्वं जितं विप्रे न्यवेदयत् ॥ ३१ ॥ मणिमान्धर्मविच्छ्रेष्ठः पुनर्धर्मं प्रशंसति ॥ मणिमन्तं द्विजः प्राह किं धर्ममनुशंससि ॥ ब्रह्मोवाच ॥ तथेति चेत्याह वैश्यो ब्राह्मणः पुनरब्रवीत् ॥३२॥ ॥ ब्राह्मण उवाच ॥ जितं मया धनं वैश्य निर्लज्जः किंनु भाषसे ॥ मयैव विजितो धर्मो यथेष्टाचरणात्मकः ॥ ३३ ॥ ॥ ब्रह्मोवाच ॥ तद्ब्राह्मणवचः श्रुत्वा वैश्यः सस्मित ऊचिवान् ॥ ३४ ॥ ॥ वैश्य उवाच ॥ पुलाका इव धान्येषु पुत्तिका इव पक्षिषु ॥ तथैव तान्सखे मन्ये येषां धर्मो न विद्यते ॥ ३५ ॥ चतुर्णां पुरुषार्थानां धर्मः प्रथम उच्यते ॥ पश्चादर्थश्च कामश्च स धर्मो मयि तिष्ठति ॥ कथं ब्रूषे द्विजश्रेष्ठ मया विजितमित्यदः ॥ ॥ ३६ ॥ ॥ ब्रह्मोवाच ॥ द्विजो वैश्यं पुनः प्राह हस्ताभ्यां जायतां पणः ॥ तथेति मन्यते वैश्यस्तौ गत्वा पुनरूचतुः ॥ ३७ ॥ पूर्ववल्लौकिका न्गत्वा जितमित्यब्रवीद्द्विजः ॥ करौ छित्त्वा ततः प्राह कथं धर्मं तु मन्यसे ॥ आक्षिप्तो ब्राह्मणेनैवं वैश्यो वचनमब्रवीत् ॥३८॥ ॥ वैश्य उवाच ॥ धर्ममेव परं मन्ये प्राणैः कण्ठगतैरपि ॥ माता पिता सुहृद्बन्धुर्धर्म एव शरीरिणाम् ॥ ३९ ॥ ॥ ब्रह्मोवाच ॥ एवं विवदमानौ तावर्थवान्ब्राह्मणोऽ भवत् ॥ विमुक्तो वैश्यकस्तत्र बाहुभ्यां च धनेन च ॥ ४० ॥ एवं भ्रमन्तौ संप्राप्तौ गङ्गां योगेश्वरं हरिम् ॥ यदृच्छया मुनिश्रेष्ठ मिथस्तावूचतुः पुनः ॥ ४१ ॥ वैश्यो गङ्गां तु योगेशं धर्ममेव प्रशंसति ॥ अतिकोपाद्द्विजो वैश्यमाक्षिपन्पुनरब्रवीत् ॥ ४२ ॥ ॥ ब्राह्मण उवाच ॥ गतं धनं करौ छिन्नावविशिष्टोऽसुभिर्भवान् ॥ त्वमन्यथा यदि ब्रूष आहरिष्येऽसिना शिरः ॥ ४३ ॥ ॥ ब्रह्मोवाच ॥ विहस्य पुनरांहेदं वैश्यो गौतममञ्जसा ॥ ४४ ॥ ॥ वैश्य उवाच ॥ धर्ममेव परं मन्ये यथेच्छसि तथा कुरु ॥ ब्राह्मणांश्च गुरून्देवान्वेदान्धर्मं जनार्दनम् ॥४५॥ यस्तु निन्दयते पापो नासौ स्पृश्यो ऽथ पापकृत् ॥ उपेक्षणीयो दुर्वृत्तः पापात्मा धर्मदूषकः ॥ ४६ ॥ ॥ ब्रह्मोवाच ॥ ततः प्राह स कोपेन धर्मं यद्यनुशंससि ॥ आवयोः प्राणयोरत्र पणः स्यादिति वै मुने ॥ ४७ ॥ एवमुक्ते गौतमेन तथेत्याह वणिक्तदा ॥ पुनरप्यूचतुरुभौ लोकाँल्लोकास्तथोचिरे ॥ ४८ ॥ योगेश्वरस्य पुरतो गौतम्या दक्षिणे तटे ॥ तं निपात्य विशं विप्रश्चक्षुरुत्पाट्य चाब्रवीत् ॥ ४९ ॥ ॥ विप्र उवाच ॥ गतोऽसीमां दशां वैश्य नित्यं धर्मप्रशंसया ॥ गतं धनं गतं चक्षुश्छेदितौ करपल्लवौ ॥ पृष्टोऽसि मित्र गच्छामि मैवं ब्रूयाः कथान्तरे ॥ ५० ॥ ब्रह्मोवाच ॥ तस्मिन्प्रयाते वैश्योऽसौ चिन्तया मास चेतसि ॥ हा कष्टं मे किमभवद्धर्मैकमनसो हरे ॥ ५१ ॥ स कुण्डलो वणिक्श्रेष्ठो निर्धनो गतबाहुकः ॥ गतनेत्रः शुचं प्राप्तो धर्ममेवानुसं स्मरन् ॥ ५२ ॥ एवं बहुविधां चिन्तां कुर्वन्नास्ते महीतले ॥ निश्चेष्टोऽथ निरुत्साहः पतितः शोकसागरे ॥ ५३ ॥ दिनावसाने शर्वर्यामुदिते

चन्द्रमण्डले ॥ एकादश्यां शुक्लपक्षे तत्राऽऽयाति विभीषणः ॥ ५४ ॥ स तु योगेश्वरं देवं पूजयित्वा यथाविधि ॥ स्नात्वा तु गौतमीं गङ्गां सपुत्रो
राक्षसैर्वृतः ॥ ५५ ॥ विभीषणस्य हि सुतो विभीषण इवापरः ॥ वैभीषणिरिति ख्यातस्तमपश्यदुवाच ह ॥ ५६ ॥ वैश्यस्य वचनं
श्रुत्वा यथावृत्तं स धर्मवित् ॥ पित्रे निवेदयामास लङ्केशाय महात्मने ॥ स तु लङ्केश्वरः प्राह पुत्रं प्रीत्या गुणाकरम् ॥ ५७ ॥
विभीषण उवाच ॥ श्रीमान्रामो मम गुरुस्तस्यं मान्यः सखा मम ॥ हनुमानिति विख्यातस्तेनाऽऽनीतो गिरिर्महान् ॥ ५८ ॥ पुरा कार्यान्तरे प्राप्ते
सर्वौषध्याश्रयोऽचलः ॥ जाते कार्ये तमादाय हिमवन्तमथागमत् ॥ ५९ ॥ विशल्यकरणी चेति मृतसंजीवनीति च ॥ तदाऽऽनीय महाबुद्धी रामाया
क्लिष्टकर्मणे ॥ ६० ॥ निवेदयित्वा तत्साध्यं तस्मिन्वृत्ते समागतः ॥ पुनर्गिरिं समादाय आगच्छद्देवपर्वतम् ॥ ६१ ॥ तामानीयास्य हृदये निवेश
य हरिं स्मरन् ॥ ततः प्राप्स्यत्ययं सर्वमपेक्षितमुदारधीः ॥ ६२ ॥ गच्छतस्तस्य वेगेन विशल्यकरणी पुनः ॥ अपतद्गौतमीतीरे यत्र योगेश्वरो
हरिः ॥ ६३ ॥ वैभीषणिरुवाच ॥ तामोषधीं मम पितर्दर्शयाऽऽशु विलम्ब मा ॥ परार्तिशमनादन्यच्छ्रेयो न भुवनत्रये ॥ ६४ ॥ ॥ ब्रह्मोवाच ॥
विभीषणस्तथेत्युक्त्वा तां पुत्रस्याप्यदर्शयत् ॥ इषेत्वेत्यस्य वृक्षस्य शाखां चिच्छेद तत्सुतः ॥ वैश्यस्य चापि वै प्रीत्या सन्तः परहिते स्ताः ॥
॥ ६५ ॥ ॥ विभीषण उवाच ॥ यत्रापतन्नगे चास्मिन्स वृक्षस्तु प्रतापवान् ॥ तस्य शाखां समादाय हृदयेऽस्य निवेशय ॥ तत्स्पृष्टमात्र एवासौ
स्वकं रूपमवाप्नुयात् ॥ ६६ ॥ ॥ ब्रह्मोवाच ॥ एतच्छ्रुत्वा पितुर्वाक्यं वैभीषणिरुदारधीः ॥ तथा चकार वै सम्यक्काष्ठखण्डं न्यवेशयत् ॥ ६७ ॥
हृदये स तु वैश्योऽपि सचक्षुः सकरोऽभवत् ॥ मणिमन्त्रौषधीनां हि वीर्यं कोऽपि न बुध्यते ॥ ६८ ॥ तदेव काष्ठमादाय धर्ममेवानुसंस्मरन् ॥
स्नात्वा तु गौतमीं गङ्गां तथा योगेश्वरं हरिम् ॥ ६९ ॥ नमस्कृत्वा पुनरगात्काष्ठखण्डेन वैश्यकः ॥ परिभ्रमन्नृपपुरं महापुरमिति श्रुतम् ॥ ७० ॥
महाराज इति ख्यातस्तत्र राजा महाबलः ॥ तस्य नास्ति सुतः कश्चित्पुत्रिका नष्टलोचना ॥ ७१ ॥ सैव तस्य सुता पुत्रस्तस्यापि व्रतमीदृशम् ॥
देवो वा दानवो वाऽपि ब्राह्मणः क्षत्रियो भवेत् ॥ ७२ ॥ वैश्यो वा शूद्रयोनिर्वा सगुणो निर्गुणोऽपि वा ॥ तस्मै देयो इयं पुत्री यो नेत्रे आहरिष्य
ति ॥ ७३ ॥ राज्येन सह देयेयमिति राजा ह्यघोषयत् ॥ अहर्निशमसौ वैश्यः श्रुत्वा घोषमथाब्रवीत् ॥ ७४ ॥ ॥ वैश्य उवाच ॥ अहं नेत्रे आह
रिष्ये राजपुत्र्या असंशयम् ॥ ७५ ॥ ॥ ब्रह्मोवाच ॥ तं वैश्यं तरसाऽऽदाय महाराज्ञे न्यवेदयत् ॥ तत्काष्ठस्पर्शमात्रेण सनेत्राऽभून्नृपात्मजा ॥७६॥
ततः सविस्मयो राजा को भवानिति चाब्रवीत् ॥ वैश्यो राज्ञे यथावृत्तं न्यवेदयदशेषतः ॥ ७७ ॥ ॥ वैश्य उवाच ॥ ब्राह्मणानां प्रसादेन धर्मस्य

तपस्तस्तथा ॥ दानप्रभावाद्यज्ञैश्च विविधैर्भूरिदक्षिणैः ॥ दिव्योषधिप्रभावेन मम सामर्थ्यमीदृशम् ॥ ७८ ॥ ॥ ब्रह्मोवाच ॥ एतद्वैश्यवचः श्रुत्वा वि
स्मितोऽभून्महीपतिः ॥ ७९ ॥ ॥ राजोवाच ॥ अहो महानुभावोऽयं प्रायो वृन्दारको भवेत् ॥ अन्यथैतादृगन्यस्य सामर्थ्यं दृश्यते कथम् ॥
तस्मादस्मै तु तां कन्यां प्रदास्ये राज्यपूर्विकाम् ॥ ८० ॥ ॥ ब्रह्मोवाच ॥ इति संकल्प्य मनसि कन्यां राज्यं च दत्तवान् ॥ विहारार्थं गतः स्वैरं परं
खेदमुपागतः ॥ ८१ ॥ न मित्रेण विना राज्यं न मित्रेण विना सुखम् ॥ तमेव सततं विप्रं चिन्तयन्वैश्यनन्दनः ॥ ८२ ॥ एतदेव सुजातानां लक्षणं
भुवि देहिनाम् ॥ कृपार्द्रं यन्मनो नित्यं तेषामप्यहितेषु हि ॥ ८३ ॥ महानृपो वनं प्रायात्स राजा मणिकुण्डलः ॥ तस्मिञ्शासति राज्यं तु कदाचि
द्गौतमं द्विजम् ॥ ८४ ॥ हृतस्वं द्यूतकैः पापैरपश्यन्मणिकुण्डलः ॥ तमादाय द्विजं मित्रं पूजयामास धर्मवित् ॥ ८५ ॥ धर्माणां तु प्रभावं तं
तस्मै सर्वं न्यवेदयत् ॥ स्नापयामास गंगायां तं सर्वाघनिवृत्तये ॥ ८६ ॥ तेन विप्रेण सर्वैस्तैः स्वकीयैर्गोत्रजैर्वृतः ॥ वैश्यैः स्वदेशसंभूतैर्ब्राह्मणस्य
तु बान्धवैः ॥ ८७ ॥ वृद्धकौशिकमुख्यैश्च तस्मिन्योगेश्वरान्तिके ॥ यज्ञानिष्ट्वा सुरान्पूज्य ततः स्वर्गमुपेयिवान् ॥ ८८ ॥ ततः प्रभृति तत्तीर्थं
मृतसंजीवनं विदुः ॥ चक्षुस्तीर्थं सयोगेशं स्मरणादपि पुण्यदम् ॥ मनःप्रसादजननं सर्वदुःखविनाशनम् ॥ ८९ ॥ इति श्रीब्रह्मपुराणगतगौतमी
माहात्म्ये तीर्थमाहात्म्ये चक्षुस्तीर्थादिवर्णनं नाम शततमोऽध्यायः ॥ १०० ॥ ॥ ब्रह्मोवाच ॥ उर्वशीतीर्थमाख्यातमश्वमेधफलप्रदम् ॥ स्नानदान
महादेववासुदेवार्चनादिभिः ॥ १ ॥ महेश्वरो यत्र देवो यत्र शार्ङ्गधरो हरिः ॥ प्रमतिर्नाम राजाऽऽसीत्सार्वभौमः प्रतापवान् ॥ २ ॥ रिपूञ्जित्वा जगा
माऽऽशु इन्द्रलोकं सुरैर्वृतम् ॥ तत्रापश्यत्सुरपतिं मरुद्भिः सह नारद ॥ ३ ॥ जहासेन्द्रं पाशहस्तं प्रमतिः क्षत्रियर्षभः ॥ तं हसन्तमथाऽऽलक्ष्य
हरिः प्रमतिमब्रवीत् ॥ ४ ॥ ॥ इन्द्र उवाच ॥ देवालये महाबुद्धे मरुद्भिः क्रीडितैरलम् ॥ दिशो जित्वा दिवं प्राप्तः कुरु क्रीडां मया सह ॥ ५ ॥
ब्रह्मोवाच ॥ सकषायं हरिवचो निशम्य प्रमतिर्नृपः ॥ तथेत्युवाच देवेन्द्रं निष्कृतिं कां तु मन्यसे ॥ तच्छ्रुत्वा प्रमतेर्वाक्यं सुरराण्नृपमब्रवीत् ॥ ६ ॥
॥ इन्द्र उवाच ॥ ॥ उर्वश्येव पणोऽस्माकं प्राप्या या निखिलैर्मखैः ॥ उर्वशीं निष्कृतिं मन्ये त्वं राजन् किं नु मन्यसे ॥ ७ ॥ ॥ ब्रह्मोवाच ॥ ॥
एतच्छ्रुत्वेन्द्रवचनं प्रमतिः प्राह गर्वितः ॥ यद्ब्रवीषि सुरेशान तन्मन्येऽहं शतक्रतो ॥ ८ ॥ प्राहेन्द्रः प्रमतिं तद्वन्निष्कृत्यै दक्षिणं करम् ॥ सवर्म सशरं
धर्म्यं देहि दीव्यामहे वयम् ॥ ९ ॥ ॥ ब्रह्मोवाच ॥ ॥ तावेवं संविदं कृत्वा देवनायोपतस्थतुः ॥ प्रमतिर्जितवांस्तत्र उर्वशीं दैवतस्त्रियम् ॥ तां जित्वा
प्रमतिः प्राह संरम्भात्तं शतक्रतुम् ॥ १० ॥ ॥ प्रमतिरुवाच ॥ ॥ निष्कृत्यै पुनरन्यन्मे पश्चादीव्ये त्वया विभो ॥ ११ ॥ ॥ इन्द्र उवाच ॥ ॥

देवयोग्यमथो वज्रं जैत्रं सरथमुत्तमम् ॥ दीव्येऽहं तेन नृपते करेणाप्यविचारयन् ॥ १२ ॥ ॥ ब्रह्मोवाच ॥ ॥ स गृहीत्वा तदा पाशानन्यांश्च मणि
भूषितान् ॥ जितमित्यब्रवीच्छक्रं प्रमतिः प्रहसंस्तदा ॥ १३ ॥ एतस्मिन्नन्तरे प्रायादज्ञस्तत्र नारद ॥ विश्वावसुरिति ख्यातो गन्धर्वाणां महेश्वरः ॥
॥ १४ ॥ ॥ विश्वावसुरुवाच ॥ ॥ गन्धर्वविद्यया राजंस्तया दीव्यामहे त्वया ॥ तथेत्युक्त्वा स नृपतिर्जितमित्यब्रवीत्तदा ॥ १५ ॥ तौ जित्वा
नृपतिर्मौर्ख्यादैवेन्द्रं प्राह कश्मलम् ॥ १६ ॥ ॥ प्रमतिरुवाच ॥ ॥ रणे वा देवने वाऽपि न त्वं जेता कथंचन ॥ महेन्द्र सततं तस्मादस्मदाराधको
भव ॥ वद केन प्रकारेण जाता देवेन्द्रता तव ॥ १७ ॥ ॥ ब्रह्मोवाच ॥ ॥ तथा प्राहोर्वशीं गर्वाद्गच्छ कर्मकरी भव ॥ उर्वशी प्राह देवेषु यथा वर्ते
तथा त्वयि ॥ वर्तेय सर्वभावेन न मां धिक्कर्तुमर्हसि ॥ १८ ॥ ॥ ब्रह्मोवाच ॥ ॥ ततस्तां प्रमतिः प्राह त्वादृश्यः सन्ति चारिकाः ॥ त्वं किं विल
ज्जसे भद्रे गच्छ कर्मकरी भव ॥१९॥ एतच्छ्रुत्वा नृपेणोक्तं गन्धर्वाधिपतिस्तदा ॥ चित्रसेन इति ख्यातः सुतो विश्वावसोर्बली ॥ २० ॥ ॥ चि
त्रसेन उवाच ॥ ॥ दीव्येऽहं वै त्वया राजन्सर्वेणानेन भूपते ॥ राज्येन जीवितेनापि मदीयेन तवापि च ॥ २१ ॥ ॥ ब्रह्मोवाच ॥ ॥ तथेत्युक्ता
पुनरुभौ चित्रसेननृपोत्तमौ ॥ दीव्येतामभिसंरब्धौ चित्रसेनोऽजयत्तदा ॥ २२ ॥ गान्धर्वैस्तं महापाशैर्बबन्ध नृपतिं तदा ॥ चित्रसेनोऽजयत्सर्वमुव
शीमुख्यमादितः ॥ २३ ॥ राज्यं कोशं बलं चैव यदन्यद्वसु किंचन ॥ चित्रसेनस्य तज्जातं यदासीत्प्रमतेर्धनम् ॥ २४ ॥ तस्य पुत्रो बाल एव पुरोध
सुवाच ह ॥ वैश्वामित्रं महाप्राज्ञं मधुच्छन्दसमोजसा ॥२५॥ ॥ प्रमतिपुत्र उवाच ॥ ॥ किं मे पित्रा कृतं पापं क्व वा बद्धो महामतिः ॥ कथमेष्यति
स्वं स्थानं कथं पाशैर्विमोक्ष्यते ॥२६॥ ॥ ब्रह्मोवाच ॥ ॥ सुमतेर्वचनं श्रुत्वा ध्यात्वा स मुनिसत्तमः ॥ मधुच्छन्दा जगादेदं प्रमतेर्वर्तनं तदा ॥ २७ ॥
॥ मधुच्छन्दा उवाच ॥ ॥ देवलोके तव पिता बद्ध आस्ते महामते ॥ कैतवैर्बहुदोषैश्च भ्रष्टराज्यो बभूव ह ॥ २८ ॥ यो याति कैतवसभां स
चापि क्लेशभाग्भवेत् ॥ द्यूतमद्यामिषादीनि व्यसनानि नृपात्मज ॥ २९ ॥ पापिनामिह जायन्ते सदा पापात्मकानि हि ॥ एकैकमप्यनर्थाय पापाय
नरकाय च ॥ ३० ॥ यानासनाभिलाषाद्यैः कृतैः कैतववर्तिभिः ॥ कुलीनाः कलहप्रीताः किं पुनः कितवो जनः ॥ ३१ ॥ कितवस्य तु या जाया
तप्यते नित्यमेव सा ॥ स चापि कितवः पापो योषितं वीक्ष्य तप्यते ॥ ३२ ॥ तां दृष्ट्वा विगतानन्दो नित्यं वदति पापकृत ॥ अहो संसारचक्रेऽ
स्मिन्मया तुल्यो न पातकी ॥ ३३ ॥ न किंचिदपि यस्याऽऽस्ते लोके विषयजं सुखम् ॥ लोकद्वयेऽपि न सुखी कितवः कोऽपि दृश्यते ॥ ३४ ॥
विभाति च तथा नित्यं लज्जया दग्धमानसः ॥ गतधर्मो निरानन्दो ग्रस्तगर्वस्तथाऽटति ॥ ३५ ॥ अकैतवी च या वृत्तिः सा प्रशस्ता द्विजन्म

नाम् ॥ कृषिगोरक्ष्यवाणिज्यमपि कुर्यान्न कैतवम् ॥३६॥ यस्तु कैतववृत्त्या हि धनमाहर्तुमिच्छति ॥ धर्मार्थकामाभिज्ञैनैः स विमुच्येत पौरुषात् ॥
॥ ३७ ॥ वेदेऽपि दूषितं कर्म तव पित्रा तदाऽऽहृतम् ॥ तस्मात्किं कुर्महे वत्स यदुक्तं ते विधीयते ॥ ३८ ॥ विधातृविहितं मार्गं को नु वाऽत्येति
पण्डितः ॥ ३९ ॥ ॥ ब्रह्मोवाच ॥ ॥ एतत्पुरोधसो वाक्यं श्रुत्वा सुमतिरब्रवीत् ॥ ४० ॥ ॥ सुमतिरुवाच ॥ ॥ किं कृत्वा प्रमतिस्तातः पुना
राज्यमवाप्नुयात् ॥ ४१ ॥ ॥ ब्रह्मोवाच ॥ ॥ पुनर्ध्यात्वा मधुच्छन्दाः सुमतिं चेदमब्रवीत् ॥ ४२ ॥ गौतमीं याहि वत्स त्वं तत्र पूजय शंकरम् ॥
अदितिं वरुणं विष्णुं ततःपाशाद्विमोक्ष्यते॥४३॥ब्रह्मोवाच॥तथेत्युक्त्वा जगामाऽऽशु गङ्गां नत्वा जनार्दनम्॥पूजयामास शंभुं च तपस्तेपे यतव्रतः॥४४॥
सहस्रमेकं वर्षाणां बद्धं पितरमात्मनः ॥ मोचयामास देवेभ्यः पुना राज्यमवाप सः ॥४५॥ शिवेशाभ्यां मुक्तपाशो राज्यं प्रापं सुतात्स्वकात् ॥ अ
वाप्य विद्यां गान्धर्वीं प्रियश्चाऽऽसीच्छतक्रतोः ॥ ४६ ॥ शांभवं वैष्णवं चैव उर्वशीतीर्थमेव च ॥ ततःप्रभृति तत्तीर्थं कैतवं चेति विश्रुतम् ॥ ४७ ॥
शिवविष्णुसरिन्मातृप्रसादादाप्यते न किम् ॥ तत्र स्नानं च दानं च बहुपुण्यफलप्रदम् ॥ पापपाशविमोक्षं तु सर्वदुर्गतिनाशनम् ॥ ४८ ॥ इति श्री
ब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये उर्वश्यादितीर्थवर्णनं नामैकाधिकशततमोऽध्यायः ॥ १०१ ॥ ॥ ब्रह्मोवाच ॥ ॥ सामुद्रं तीर्थमाख्यातं
सर्वतीर्थफलप्रदम् ॥ तस्य स्वरूपं वक्ष्यामि शृणु नारद तन्मनाः ॥ १ ॥ विमृष्टा गौतमेनासौ गंगा पापप्रणाशिनी ॥ लोकानामुपकारार्थं प्रायात्पू
र्वार्णवं प्रति ॥ २ ॥ आगच्छन्ती देवनदी कमण्डलुधृता मया ॥ शिरसा च धृता देवी शंभुना परमात्मना ॥ ३ ॥ विष्णुपादप्रसूतां तां ब्राह्मणेन
महात्मना ॥ आनीतां मर्त्यभवनं स्मरणादघनाशिनीम् ॥ ४ ॥ गुरोर्गुरुतमां सिन्धुर्दृष्ट्वा कृत्यमचिन्तयत् ॥ या वन्द्या जगतामीशा ब्रह्मेशाद्यैर्नमस्कृता ॥ ५ ॥ तामहं प्रतिगच्छेयं नो चेत्स्याद्धर्मदूषणम् ॥ आगच्छन्तं महात्मानं यो मोहान्नोपतिष्ठते ॥ ६ ॥ न तस्य कोऽपि त्राताऽस्ति पापिनो
लोकयोर्द्वयोः ॥ एवं विमृश्य रत्नेशो मूर्तिमान्विनयान्वितः ॥ कृताञ्जलिपुटो गङ्गामाहेदं सरितांपतिः ॥ ७ ॥ ॥ सिन्धुरुवाच ॥ रसातलगतं वारि
पृथिव्यां यन्नभस्तले ॥ तन्मामेवात्र विशतु नाहं वक्ष्यामि किंचन ॥ ८ ॥ मयि रत्नानि पीयूषं पर्वता राक्षसाःसुराः॥ एतानप्यखिलानन्यान्भीमान्सं ॥ २७५ ॥
धारयाम्यहम् ॥ ९ ॥ ममान्तः कमलायुक्तो विष्णुः स्वपिति नित्यदा ॥ ममाशक्यं न किमपि विद्यते सचराचरे ॥ १० ॥ महत्यभ्यागते कुर्यात्प्र
त्युत्थानं न यो मदात् ॥ स धर्मादिपरिभ्रष्टो निरयं तु समाप्नुयात् ॥ ११ ॥ नैतान्मे बिभ्रतः खेदो विनाऽगस्त्यपराभवात् ॥ किं तु त्वं गौरवेणै
षामतिरिक्ता ततस्त्वहम् ॥ १२ ॥ ब्रवीमि देवि गङ्गे वा त्वं साम्यात्संगता भव ॥ नैकरूपामहं शक्तः संगन्तुं बहुधा यदि ॥ १३ ॥ सङ्गमेष्यसि देवि

त्वं संगच्छेऽहं न चान्यथा ॥ गंगे समेष्यसि यदि बहुधा तद्विचारये ॥ १४ ॥ ॥ ब्रह्मोवाच ॥ तमेवंवादिनं सिन्धुमपामीशं तदाऽब्रवीत् ॥ गंगा सा गौतमी देवी कुरु चैतद्वचो मम ॥ १५ ॥ सप्तर्षीणां च या भार्या अरुन्धतिपुरोगमाः ॥ भर्तृभिः सहिताः सर्वा आनय त्वं तदा त्वहम् ॥ १६ ॥ अल्पभूता भविष्यामि ततः स्यां तव संगता ॥ सप्तर्षीणां तथेत्युक्त्वा भार्याभिर्ऋषिभिर्वृतः॥१७॥आनयामास तां देवीं सप्तधा सा व्यभज्यत ॥ सा चेयं गौतमी गंगा सप्तधा सागरं गता ॥१८॥ सप्तर्षीणां तु नाम्नैता सप्त गंगास्ततोऽभवन् ॥ तत्र स्नानं च दानं च श्रवणं पठनं तथा ॥ १९ ॥ स्मरणं चापि यद्भक्त्या सर्वकामप्रदं शुभम् ॥ नास्मादन्यत्परं तीर्थं समुद्राद्भुवनत्रये ॥ पापहानौ भुक्तिमुक्तिप्राप्तौ च मनसो मुदे ॥ २० ॥ इति श्रीब्रह्मपुराण गतगौतमीमाहात्म्ये तीर्थमाहात्म्ये सप्तधा गोदावरीसमुद्रागमनवर्णनं नाम द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥ ॥ ब्रह्मोवाच ॥ ऋषिसत्रमिति ख्यातमृषयः सप्त नारद ॥ निषेदुस्तपसे यत्र यत्र भीमेश्वरः शिवः ॥ १ ॥ तत्रेदं वृत्तमाख्यास्ये देवर्षिपितृबृंहितम् ॥ शृणु यत्नेन वक्ष्यामि सर्वका मप्रदं शुभम् ॥ २ ॥ सप्तधा व्यभजन्गंगामृषयः सप्त नारद ॥ वासिष्ठी दाक्षिणेयी स्याद्वैश्वामित्री तदुत्तरा ॥ ३ ॥ वामदेव्यपरा ज्ञेया गौतमी मध्य तः शुभा ॥ भारद्वाजी स्मृता चान्या आत्रेयी चेत्यथापरा ॥ ४ ॥ जामदग्नी तथा चान्या व्यपदिष्टा तु सप्तधा ॥ तैः सर्वैर्ऋषिभिस्तत्र यष्टुमिष्टैर्म हात्मभिः ॥ ५ ॥ निष्पादितं महासत्रमृषिभिः पारदर्शिभिः ॥ एतस्मिन्नन्तरे तत्र देवानां प्रबलो रिपुः ॥ ६ ॥ विश्वरूप इति ख्यातो मुनीनां सत्रम भ्यगात् ॥ ब्रह्मचर्येण तपसा तानाराध्य यथाविधि ॥ विनयेनाथ पप्रच्छ ऋषीन्सर्वाननुक्रमात् ॥ ७ ॥ ॥ विश्वरूप उवाच ॥ ध्रुवं सर्वं यथाकामं मम स्वास्थ्येन हेतुना ॥ यथा स्याद्बलवान्पुत्रो देवानामपि दुर्धरः ॥ यज्ञैर्वा तपसा वाऽपि मुनयो वक्तुमर्हथ ॥ ८ ॥ ॥ ब्रह्मोवाच ॥ तत्र प्राह महा बुद्धिर्विश्वामित्रो महामनाः ॥ ९ ॥ ॥ विश्वामित्र उवाच ॥ कर्मणा तात लभ्यन्ते फलानि विविधानि च ॥ त्रयाणां कारणानां च कर्म प्रथमकार णम् ॥ १० ॥ ततश्च कारणं कर्ता ततश्चान्यत्प्रकीर्तितम् ॥ उपादानं तथा बीजं न च कर्म विदुर्बुधाः ॥ ११ ॥ कर्मणां कारणत्वं च कारणे पुष्कले सति ॥ भावाभावौ फले दृष्टौ तस्मात्कर्माश्रितं फलम् ॥ १२ ॥ कर्मापि द्विविधं ज्ञेयं क्रियमाणं तथा कृतम् ॥ कर्तव्यं क्रियमाणस्य साधनं यद्यदु च्यते ॥ १३ ॥ तद्भावाः कर्मसिद्धौ च उभयत्रापि कारणम् ॥ यद्यद्भावयते जन्तुः कर्म कुर्वन्विचक्षणः ॥१४॥ तद्भावनानुरूपेण फलनिष्पत्तिरुच्यते करोतिकर्म विधिवद्विना भावनया यदि ॥१५॥ अन्यथा स्यात्फलं सर्वं तस्य भावानुरूपतः ॥ तस्मात्तपो व्रतं दानं जपयज्ञादिकाः क्रियाः ॥१६॥ कर्मणस्त्वनुरूपेण फलं दास्यन्ति भावतः ॥ तस्मांद्भावानुरूपेण कर्म वै दास्यते फलम् ॥ १७ ॥ भावस्तु त्रिविधो ज्ञेयः सात्त्विको राजसस्तथा ॥

तामसस्तु तथा ज्ञेयः फलं कर्मानुसारतः ॥ १८ ॥ भावनानुगुणं चेति विचित्रा कर्मणां स्थितिः ॥ तस्माद्यच्छानुसारेण भाव कुर्याद्विचक्षणः ॥१९॥
पश्चात्कर्मापि कर्तव्यं फलदाताऽपि तद्विधम् ॥ फलं ददाति फलिनां फले यदि प्रवर्तते ॥ २० ॥ कर्मकारो न तत्रास्ति कुर्यात्कर्म स्वभावतः ॥
तदेव चोपादानादि सत्त्वादिगुणभेदतः ॥ २१ ॥ भावात्प्रारभते तद्भद्भावैः फलमवाप्यते ॥ धर्मार्थकाममोक्षाणां कर्म चैव हि कारणम् ॥ २२ ॥
भावस्थितं भवेत्कर्म मुक्तिदं बन्धकारणम् ॥ स्वभावानुगुणं कर्म स्वस्यैवेह परत्र च ॥२३॥ फलानि विविधान्याशु करोति समतानुगम् ॥ एक एव
पदार्थोऽसौ भावेभेदः प्रदृश्यते ॥ २४ ॥ क्रियते भुज्यते वाऽपि तस्माद्भावो विशिष्यते ॥ यथाभावं कर्म कुरु यथेप्सितमवाप्स्यसि ॥ २५ ॥
ब्रह्मोवाच ॥ एतच्छ्रुत्वा ऋषेर्वाक्यं विश्वामित्रस्य धीमतः ॥ बहुकालं तपस्तप्त्वा तामसं भावमाश्रितः ॥ २६ ॥ विश्वरूपः कर्म भीमं चकार
सुरभीषणम् ॥ पश्यत्सु ऋषिमुख्येषु वार्यमाणोऽपि नित्यशः ॥ २७ ॥ आत्मकोपानुसारेण भीमं कर्म तथाऽकरोत् ॥ भीषणे कुण्डखाते तु
भीषणे जातवेदसि ॥ २८ ॥ भीषणं रौद्रपुरुषं ध्यात्वाऽऽत्मानं गुहाशयम् ॥ तपन्तन्तं समालक्ष्य वागुवाचाशरीरिणी ॥२९॥ जटाजूटं विनाऽऽत्मानं
तव पुत्रो भविष्यति ॥ तथाऽऽत्मानं विश्वरूप जुहुयाज्जातवेदसि ॥ ३० ॥ स एवेन्द्रः स वरुणः स च स्यात्सर्वमेव च ॥ त्यक्त्वाऽऽत्मानं जटा
मात्रं हुतवान्वृजिनोद्भवः ॥ ३१ ॥ वृत्र इत्युच्यते वेदे स चापि वृजिनोऽभवत् ॥ भीमस्य महिमानं को जानाति जगदीशितुः ॥ ३२ ॥
सृजत्यशेषमपि यो न च संगेन लिप्यते ॥ विरामेति संकीर्त्य सा वाण्येनं मुनीश्वराः ॥ ३३ ॥ भीमेश्वरं नमस्कृत्य जगमुः स्वं स्वमथाऽऽश्रमम् ॥
विश्वरूपो महाभीमो भीमकर्मा तथाकृतिः ॥ ३४ ॥ भीमभावो भीमतनुं ध्यात्वाऽऽत्मानं जुहाव ह ॥ तस्माद्भीमेश्वरो देवः पुराणे परिपठ्यते ॥
तत्र स्नानं च दानं च मुक्तिदं नात्र संशयः ॥ ३५ ॥ इति पठति शृणोति यश्च भक्त्या विबुधपतिं शिवमत्र भीमरूपम् ॥ नमति विदितमशे
षपापहारिस्मृतिपदशरणञ्च मुक्तिदञ्च ॥ ३६ ॥ गोदावरी तावदशेषपापसमूहहन्त्री परमार्थदात्री ॥ सदेव सर्वत्र विशेषतस्तु यत्राम्बुराशिं समनुप्रविष्टा
॥ ३७ ॥ स्नात्वा तु तस्मिन्सुकृती शरीरी गोदावरीवारिधिसंगमे यः ॥ उद्धृत्य तीव्रान्निरयादशेषात्स पूर्वजान्याति पुरं पुरारेः ॥ ३८ ॥ वेदान्तवेद्यं
यदुपासितव्यं तद्ब्रह्म साक्षात्खलु भीमनाथः ॥ दृष्टे हि तस्मिन्न पुनर्विशन्ति शरीरिणः संस्मृतिमुग्रदुःखाम् ॥ ३९ ॥ इति श्रीब्रह्मपुराणागत

गौतमीमाहात्म्ये तीर्थमाहात्म्ये ऋषिसत्रभीमेश्वरतीर्थवर्णनं नाम त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥ ब्रह्मोवाच ॥ सा संगता पूर्वमपांपतिं तं
गङ्गा सुराणामपि वन्दनीया ॥ देवैश्च सर्वैरनुगम्यमाना संस्तूयमाना मुनिभिर्महद्भिः ॥१॥ वसिष्ठजाबालिसयाज्ञवल्क्यकत्वङ्गिरोदक्षमरीचिवैष्णवाः॥

शातातपः शौनकदेवरातभृग्वग्निवेश्यात्रिमरीचिदक्षाः ॥ २ ॥ सूतपापा मनुगौतमादयः सकौशिकास्तुम्बरुपर्वताद्याः ॥ अगस्त्यमार्कण्डसपिप्पलाद्याः सगालवा योगपरायणाश्च ॥ ३ ॥ सवामदेवांगिरसोऽथ भार्गवाः स्मृतिप्रवीणाः श्रुतिभिर्मनोज्ञाः ॥ सर्वे पुराणार्थविदो बहुज्ञास्ते गौतमीं देवनदीं तु गत्वा ॥ ४ ॥ स्तोष्यन्ति मन्त्रैः श्रुतिभिः श्रुतैर्हृद्यैश्च तुष्टैर्मुदितैर्मनोभिः ॥ तां संगतां वीक्ष्य शिवो हरिश्च आत्मानमादर्शयतां मुनिभ्यः ॥ ५ ॥ तथाऽमरास्तौ पितृभिश्च दृष्टौ स्तुवन्तिं देवौ सकलार्तिहारिणौ ॥ ६ ॥ आदित्या वसवो रुद्रा मरुतो लोकपालकाः ॥ कृताञ्जलिपुटाः सर्वे स्तुवन्ति हरिशंकरौ ॥ ७ ॥ संगमेषु प्रसिद्धेषु नित्यं सप्तसु नारद ॥ समुद्रस्य च गंगाया नित्यं देवौ प्रतिष्ठितौ ॥ ८ ॥ गौतमेश्वर आख्यातो यत्र देवो महेश्वरः ॥ नित्यं संनिहितस्तत्र मधवो रमया सह ॥ ९ ॥ ब्रह्मेश्वर इति ख्यातो मयैव स्थापितः शिवः ॥ लोकानामुपकारार्थमात्मनः कारणान्तरे ॥ १० ॥ चक्रपाणिरिति ख्यातः स्तुतो देवैर्मया सह ॥ तत्र संनिहितो विष्णुर्देवैः सह मरुद्गणैः ॥ ११ ॥ ऐन्द्रतीर्थमिति ख्यातं तदेव हयमूर्धकम्॥हयमूर्धा तत्र विष्णुस्तन्मूर्धने सुरा अपि॥सोमतीर्थमिति ख्यातं यत्र सोमेश्वरः शिवः॥१२॥ इन्द्रस्य सोमश्रवसो देवैश्च ऋषिभिस्तथा ॥ प्रार्थितः सोम एवाऽऽदाविन्द्रायेन्दो परिस्रव ॥ १३ ॥ सप्त दिशो नानासूर्याः सप्त होतार ऋत्विजः ॥ देवा आदित्या ये सप्त तेभिः सोमाभिरक्ष न इन्द्रायेन्दो परिस्रव ॥ १४ ॥ यत्ते राजञ्छृतं हविस्तेन सोमाभिरक्ष नः ॥ अराती वा मा नस्तारीन्मो चं नः किंचनाममदिन्द्रायेन्दो परिस्रव ॥ १५ ॥ ऋषे मन्त्रकृतां स्तोमैः कश्यपोद्वर्धयन्गिरः ॥ सोमं नमस्य राजानं यो यज्ञे वीरुधां पतिरिन्द्रायेन्दो परिस्रव ॥ १६ ॥ कारुरहं ततो भिषगुपलप्रक्षिणी नना ॥ नानाधियो वसूयवोऽनु गा इव तस्थिमेन्द्रायेन्दो परिस्रव ॥ १७ ॥ एवमुक्त्वा च ऋषिभिः सोमं प्राप्य च वज्रिणे ॥ तेभ्यो दत्त्वा ततो यज्ञः पूर्णो जातः शतक्रतोः ॥ १८ ॥ तत्सोमतीर्थमाख्यातमाग्नेयं पुरतस्तु तत् ॥ अग्निरिष्ट्वा महायज्ञैर्मामाराध्य मनीषितम् ॥ १९ ॥ संप्राप्तवान्मत्प्रसादादहं तत्रैव नित्यशः ॥ स्थितो लोकोपकारार्थं तत्र विष्णुः शिवस्तथा ॥ २० ॥ तस्मादाग्नेयमाख्यातमादित्यं तदनन्तरम् ॥ यत्राऽऽदित्यो वेदमयो नित्यमेति ह्युपासितुम् ॥ २१ ॥ रूपान्तरेण मध्याह्ने द्रष्टुं मां शंकरं हरिम् ॥ नमस्कार्यस्तत्र सदा मध्याह्ने सकलो जनः ॥ २२ ॥ रूपेण केन सविता समायातीत्यनिश्चयात् ॥ तस्मादादित्यमाख्यातं बार्हस्पत्यमनन्तरम् ॥ २३ ॥ बृहस्पतिः पूजां तस्मात्तीर्थादवाप ह ॥ ईजे च यज्ञान्विविधान्बार्हस्पत्यं ततो विदुः ॥ २४ ॥ तत्तीर्थस्मरणादेव ग्रहशान्तिर्भविष्यति ॥ तस्मादप्यपरं

तीर्थमिन्द्रगोपे तगोत्तमे ॥ २५ ॥ प्रतिष्ठितं महालिङ्गं कर्स्मिश्चित्कारणान्तरे ॥ हिमालयेन तत्तीर्थमद्रितीर्थं तदुच्यते ॥ २६ ॥ तत्र स्नानं च दानं च सर्वकामप्रदं शुभम् ॥ एवं सा गौतमी गङ्गा ब्रह्मद्रेश्च विनिःसृता ॥ २७ ॥ यावत्सागरगा देवी तत्र तीर्थानि कानिचित् ॥ संक्षेपेण मयोक्तानि रहस्यानि शुभानि च ॥ २८ ॥ वेदे पुराणे ऋषिभिः प्रसिद्धा या गौतमी लोकनमस्कृता च ॥ वक्तुं कथं तामतिसुप्रभावामशेषतो नारद कस्य शक्तिः ॥ २९ ॥ भक्त्या प्रवृत्तस्य यथाकथंचिन्नैवापराधोऽस्ति न संशयोऽत्र ॥ तस्माच्च दिङ्मात्रमतिप्रयासात्संसूचितं लोकहिताय तस्याः ॥ ३० ॥ कस्तस्याः प्रतितीर्थं तु प्रभावं वक्तुमीश्वरः ॥ अपि लक्ष्मीपतिर्विष्णुरलं सोमेश्वरः शिवः ॥ ३१ ॥ क्वचित्कर्स्मिश्च तीर्थानि कालयोगे भवन्ति हि ॥ गुणवन्ति महाप्राज्ञ गौतमी तु सदा नृणाम् ॥ ३२ ॥ सर्वत्र सर्वदा पुण्या को न्वस्या गुणकीर्तनम् ॥ वक्तुं शक्तस्तु तस्तस्यै नम इत्येव युज्यते ॥ ३३ ॥ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये गङ्गासागरसंगमवर्णनं नाम चतुरधिकशततमोऽध्यायः ॥ १०४ ॥ नारद उवाच ॥ त्रिदैवत्यां सुरेशान गङ्गां ब्रूषे सुरेश्वर ॥ ब्राह्मणेनाऽऽहृतां पुण्यां जगतः पावनीं शुभाम् ॥ १ ॥ आदिमध्यावसाने षु ह्युभयोस्तीरयोरपि ॥ ३ ॥ या व्याप्ता विष्णुनेशेन त्वया च सुरसत्तम ॥ पुनः संक्षेपतो ब्रूहि न मे तृप्तिः प्रजायते ॥ २ ॥ ब्रह्मोवाच ॥ कमण्डलु स्थिता पूर्वं ततो विष्णुपदानुगा ॥ महेश्वरजटाजूटे स्थिता त्वं नमस्कृता ॥ ३ ॥ ब्रह्मतेजःप्रभावेण शिवमाराध्य यत्नतः ॥ ततः प्राप्ता गिरिं पुण्यं ततः पूर्वार्णवं प्रति ॥ ४ ॥ आगत्य संगता देवी सर्वतीर्थमयी नृणाम् ॥ ईप्सितानां तथा दात्री प्रभावोऽस्या विशिष्यते ॥ ५ ॥ एतस्या नाधिकं मन्ये किंचित्तीर्थं जगत्त्रये ॥ अस्याश्चैव प्रभावेण भाव्यं यच्च मनःस्थितम् ॥ ६ ॥ अद्याप्यस्या हि माहात्म्यं वक्तुं कैश्चिन्न शक्यते ॥ भक्तितो वक्ष्यते नित्यं या ब्रह्म परमार्थतः ॥ ७ ॥ तस्याः परतरं तीर्थं न स्यादिति मतिर्मम ॥ अन्यतीर्थेन साधर्म्यं न युज्येत कथंचन ॥ ८ ॥ श्रुत्वा मद्वाक्यपीयूषैर्गङ्गाया गुणकीर्तनम् ॥ सर्वेषां न मतिः कस्मात्तोषोपरतिं गता ॥ इति भाति विचित्रं मे मुने खलु जगत्त्रये ॥ ९ ॥ नारद उवाच ॥ धर्मार्थकाममोक्षाणां त्वं वेत्ता चोपदेशकः ॥ छन्दांसि सरहस्यानि पुराणस्मृतयोऽपि च ॥ १० ॥ धर्मशास्त्राणि यच्चान्यत्तव वाक्ये प्रतिष्ठितम् ॥ तीर्थानामथ दानानां यज्ञानां तपसां तथा ॥ ११ ॥ देवतामन्त्रसेवानामधिकं किं वद प्रभो ॥ यद्यस्ति भगवन्भक्त्या तथा भाव्यं न चान्यथा ॥ ॥ १२ ॥ एवं मे संशयं ब्रह्मन्वाक्यात्त्वं छेत्तुमर्हसि ॥ इष्टं मनोगतं ज्ञात्वा तस्माद्विस्मयमागतः ॥ १३ ॥ ॥ ब्रह्मोवाच ॥ शृणु नारद वक्ष्यामि रहस्यं

धर्ममुत्तमम् ॥ चतुर्विधानि तीर्थानि तावन्त्येव युगानि च ॥ १४ ॥ गुणाश्रयश्च पुरुषाश्रयो देवाः सनातनाः ॥ वेदाश्च स्मृतिभिर्युक्ता
श्चत्वारस्ते प्रकीर्तिताः ॥ १५ ॥ पुरुषार्थाश्च चत्वारो वाणी चापि चतुर्विधा ॥ गुणा ह्यपि तु चत्वारः समत्वेनेति नारद ॥ १६ ॥
सर्वत्र धर्मः सामान्यो यतो धर्मः सनातनः ॥ साध्यसाधनभावेन स एवबहुधा मतः ॥ १७ ॥ तस्याऽऽश्रयश्च द्विविधो देशः कालश्च सर्वदा ॥
कालाश्रयश्च यो धर्मो हीयते वर्धते सदा ॥ १८ ॥ युगानामनुरूपेण पादः पादोऽस्य हीयते ॥ धर्मस्येति महाप्राज्ञ देशापेक्षा तथोभयम् ॥ १९ ॥
कालेन चाऽऽश्रितो धर्मो देशे नित्यं प्रतिष्ठितः ॥ युगेषु क्षीयमाणेषु न देशेषु स हीयते ॥ २० ॥ उभयत्र विहीने च धर्मस्य स्यादभावता ॥
तस्मादेशाश्रितो धर्मश्चतुष्पात्सुप्रतिष्ठितः ॥ २१ ॥ स चापि धर्मो देशेषु तीर्थरूपेण तिष्ठति ॥ कृते देशं च कालं च धर्मोऽवेष्टभ्य तिष्ठति ॥
॥ २२ ॥ त्रेतायां पादहीनेन स तु पादः प्रदेशतः ॥ द्वापरे चार्धतः कालेधर्मो देशे समास्थितः ॥ २३ ॥ कलौ पादेन चैकेन धर्मश्चलति
संकटम् ॥ एवंविधं तु यो धर्मं वेत्ति तस्य न हीयते ॥२४॥ युगानामनुभावेनजातिभेदाश्च संस्थिताः॥गुणेभ्यो गुणकर्तृभ्यो विचित्रा धर्मसंस्थितिः॥
॥ २५ ॥ गुणानामनुभावेन उद्भवाभिभवौ तथा ॥ तीर्थानामपि वर्णानां वेदानां स्वर्गमोक्षयोः ॥ २६ ॥ तादृग्रूपप्रवृत्त्या तु तदेव च विशिष्यते ॥
कालोऽभिव्यञ्जकः प्रोक्तो देशोऽभिव्यङ्ग्य उच्यते ॥ २७ ॥ यदा यदा अभिव्यक्ति कालो धत्ते तदा तदा ॥ तदेव व्यञ्जनं ब्रह्मंस्तस्मान्नास्त्यत्र
संशयः ॥ २८ ॥ युगानुरूपा मूर्तिः स्यादेवानां वैदिकी तथा ॥ कर्मणामपि तीर्थानां जातीनामाश्रमस्य तु ॥ २९ ॥ त्रिदैवत्यं सत्ययुगे तीर्थं लो
केषु पूज्यते ॥ द्विदैवत्यं युगेऽन्यस्मिन्द्वापरे चैकदैविकम् ॥ ३० ॥ कलौ न किंचिद्विज्ञेयमथान्यदपि तच्छृणु ॥ दैवं कृतयुगे तीर्थं त्रेतायाम्म
सुरं विदुः ॥ ३१ ॥ आर्षं च द्वापरे प्रोक्तं कलौ मानुषमुच्यते ॥ अथान्यदपि वक्ष्यामि शृणु नारद कारणम् ॥ ३२ ॥ गौतम्यां यत्त्वया
पृष्टं तत्ते वक्ष्यामि विस्तरात् ॥ यदा चेयं हरशिरः प्राप्ता गंगा महामुने ॥ ३३ ॥ तदा प्रभृति सा गंगा शंभोः प्रियतराऽभवत् ॥ तद्देवस्य
मतं ज्ञात्वा गजवक्त्रमुवाच सा ॥ ३४ ॥ उमा लोकत्रयेशाना माता च जगतो हिता ॥ शान्ता श्रुतिरिति ख्याता भुक्तिमुक्तिप्रदायिनी ॥ ३५ ॥
॥ ब्रह्मोवाच ॥ तन्मातुर्वचनं श्रुत्वा गजवक्त्रोऽभ्यभाषत ॥ ३६ ॥ ॥ गजवक्त्र उवाच ॥ किं कृत्यं शार्धि मां मातस्तत्कर्ताऽहमसंशयम् ॥ ३७ ॥
॥ ब्रह्मोवाच ॥ उमा सुतमुवाचेदं महेश्वरजटास्थिता ॥ त्वयाऽवतार्यतां गङ्गा सत्यमीशप्रिया सती ॥ ३८ ॥ पुनश्चेशस्तत्र चित्रमध्यास्ते सर्वदा

सुत ॥ शिवो यत्र सुरास्तत्र तत्र वेदाः सनातनाः ॥ ३९ ॥ तत्रैव ऋषयः सर्वे मनुष्याः पितरस्तथा ॥ तस्मान्निवर्तयेशानं देवदेवं महेश्वरम् ॥४०॥
तस्या निवर्तिते देवे गङ्गायाः सर्व एव हि ॥ निवृत्तास्ते भविष्यन्ति शृणु चेदं वचो मम ॥ निवर्तय ततस्तस्याः सर्वभावेन शंकरम् ॥ ४१ ॥
॥ ब्रह्मोवाच ॥ मातुस्तद्वचनं श्रुत्वा पुनराह गणेश्वरः ॥ ४२ ॥ ॥ गणेश्वर उवाच ॥ नैव शक्यः शिवो देवो मया तस्था निवर्तितुम् ॥ अनिवृत्ते
शिवे तस्या देवा अपि निवर्तितुम् ॥ ४३ ॥ न शक्या जगतां मातरथान्यच्चापि कारणम् ॥ गङ्गाऽवतारिता पूर्वं गौतमेन महात्मना ॥ ४४ ॥
ऋषिणा [illegible]न्येन त्रैलोक्यहितकारिणा ॥ ममोपायेन त्वद्वाक्यात्पूज्येन ब्रह्मतेजसा ॥ ४५ ॥ आराधयित्वा देवेशं तपोभिः स्तुतिभिर्भवम् ॥
तुष्टेन शंकर [illegible]क्तो सौ गौतमस्तदा ॥ ४६ ॥ शंकर उवाच ॥ वरान्वरय पुण्यांश्च प्रियांश्च मनसेप्सितान् ॥ यद्यदिच्छसि तंत्सर्वं दाता तेऽद्य
महामते ॥ ४ [illegible] ब्रह्मोवाच ॥ एवमुक्तः शिवेनासौ गौतमो मयि शृण्वति ॥ इदमेव तदोवाच सजटां देहि शंकर ॥ गङ्गां मे याचते पुण्यां किम
न्येन वरेण मे ४८ ॥ ॥ ब्रह्मोवाच ॥ पुनः प्रोवाच तं शंभुः सर्वलोकोपकारकः ॥ ४९ ॥ शंभुरुवाच ॥ उक्तं न चाऽऽत्मनः किंचित्तस्माद्याचस्व
दुष्करम् ॥ ५० [illegible] ब्रह्मोवाच ॥ गौतमोऽदीनसत्त्वस्तं भवमाह कृताञ्जलिः ॥ ५१ ॥ गौतम उवाच ॥ एतदेव च सर्वेषां दुष्करं तव दर्शनम् ॥
मया तदद्य संप्रा[illegible] कृपया तव शंकर ॥ ५२ ॥ स्मरणादेव ते पद्भां कृतकृत्या मनीषिणः ॥ भवन्ति किं पुनः साक्षात्त्वयि दृष्टे महेश्वरे ॥ ५३ ॥
॥ ब्रह्मोवाच ॥ एवमुक्ते गौतमेन भवो हर्षसमन्वितः ॥ त्रयाणामुपकारार्थं लोकानां याचितं त्वया ॥ ५४ ॥ न चाऽऽत्मनो महाबुद्धे याचेत्याह
शिवो द्विजम् ॥ एवं प्रोक्तः पुनर्विप्रो ध्यात्वा प्राह शिवं तथा ॥ ५५ ॥ विनीतवददीनात्मा शिवभक्तिसमन्वितः ॥ सर्वलोकोपकाराय पुनर्यया
चितवानिदम् ॥ शृण्वत्सु लोकपालेषु जगादेदं स गौतमः ॥ ५६ ॥ ॥ गौतम उवाच ॥ यावत्सागरगा देवी निसृष्टा ब्रह्मणो गिरेः ॥ सर्वत्र सर्वदा
तस्यां स्थातव्यं वृषभध्वज ॥ ५७ ॥ फलेप्सूनां फलं दाता त्वमेव जगतः प्रभो ॥ तीर्थान्यन्यानि देवेश क्वापि क्वापि शुभानि च ॥ ५८ ॥
यत्र ते संनिधिर्नित्यं तदेव शुभदं विदुः ॥ यत्र गङ्गा त्वया दत्ता जटाकुटसंस्थिता ॥ सर्वत्र तव सांनिध्यात्सर्वतीर्थानि शंकर ॥ ५९ ॥
॥ ब्रह्मोवाच ॥ तद्गौतमवचः श्रुत्वा पुनर्हर्षाच्छिवोऽब्रवीत् ॥ ६० ॥ शिव उवाच ॥ यत्र क्वापि च यत्किंचिद्यो वा भक्तिसमन्वितः ॥ यात्रां स्नानमथो
दानं पितॄणां वाऽपि तर्पणम् ॥६१॥ श्रवणं पठनं वाऽपि स्मरणं वापि गौतम ॥ यः करोति नरो भक्त्या गोदावर्यां यतव्रतः ॥६२॥ सप्तद्वीपवती पृथ्वी

सशैलवनकानना ॥ सरत्ना सौषधी रम्या सार्णवा धर्मभूषिता ॥ ६३ ॥ दत्त्वा तां यो भवेद्धर्मः स भवेद्गौतमीस्मृतेः ॥ एवं विधा इला विप्र
गोदानद्याऽभिधीयते ॥ ६४ ॥ चन्द्रसूर्यग्रहे काले मत्सांनिध्ये यतव्रतः ॥ भूभृते विष्णवे भक्त्या सर्वकालं कृता सुधीः ॥ ६५ ॥ गाः सुन्दराः
सवत्साश्च संगमे लोकविश्रुते ॥ यो ददाति द्विजश्रेष्ठ तत्र यत्पुण्यमाप्नुयात् ॥ ६६ ॥ तस्माद्वरं पुण्यमेति स्नानदानादिना नरः ॥ गौतम्यां
विश्ववन्द्यायां महानद्यां तु भक्तितः ॥ ६७ ॥ तस्माद्गोदावरी गङ्गा त्वया नीता भविष्यति ॥ सर्वपापक्षयकरी सर्वाभीष्टप्रदायिनी ॥ ६८ ॥
॥ गणेश्वर उवाच ॥ एतच्छ्रुतं मया मातर्वदतो गौतमं शिवात् ॥ एतस्मात्कारणाच्छंभुर्गङ्गायां नियतः स्थितः ॥ ६९ ॥ को निवर्तयितुं शक्तस्त
मम्ब करुणोदधिम् ॥ अथापि मातरेतत्स्यान्मानुषा विघ्नपाशकैः ॥ ७० ॥ विनिबद्धा न गच्छन्ति गोदामप्यन्तिकस्थिताम् ॥ न नमन्ति शिवं
देवं न स्मरन्ति स्तुवन्ति न ॥ ७१ ॥ तथा मातः करिष्यामि तव संतोषहेतवे ॥ संनिरोद्धुमथो क्लेशास्तव वाक्यं क्षमस्व मे ॥ ७२ ॥ ब्रह्मोवाच ॥
ततः प्रभृति विघ्नेशो मानुषान्प्रति किंचन ॥ विघ्नमाचरते यस्तु तमुपास्य प्रवर्तते ॥ ७३ ॥ अथो विघ्नमनादृत्य गौतमीं याति
भक्तितः ॥ स कृतार्थो भवेल्लोके न कृत्यमवशिष्यते ॥ ७४ ॥ विघ्नान्यनेकानि भवन्ति गेहान्निर्मन्तुकामस्य नराधमस्य ॥
निधाय तत्र पदं प्रयाति गंगां न किं तेन फलं प्रलब्धम् ॥ ७५ ॥ अस्याः प्रभावं को ब्रूयादपि साक्षात्सदाशिवः ॥ संक्षे
पेण मया [illegible]मितिहासपदानुगम् ॥ ७६ ॥ धर्मार्थकाममोक्षाणां साधनं यच्चराचरे ॥ तदत्र विद्यते सर्वमितिहासे सविस्तरे ॥ ७७ ॥
वेदोदितं श्रुत[illegible]ग्रहस्ययुक्तं सत्कारणं समभिधानमिदं सदैव ॥ सम्यक्च दृष्टं जगतां हिताय प्रोक्तं पुराणं बहुधर्मयुक्तम् ॥ ७८ ॥ अस्य श्लोकं
पदं वाऽपि [illegible]तूः शृणुयात्पठेत् ॥ गंगा गंगेति वा वाक्यं स तु पुण्यमवाप्नुयात् ॥ ७९ ॥ कलिकलंकविनाशपटु त्विदं सकलसिद्धिकरं शुभदं
शिवम् ॥ जगति पूज्यमभीष्टफलप्रदं भवति गांगमुदीरितमुत्तमम् ॥ ८० ॥ साधु गौतम भद्रं ते कोऽन्योऽस्ति सदृशस्त्वया ॥ य एना मानयद्गंगां
दण्डकारण्यमादरात् ॥ ८१ ॥ गंगा गंगेति यो ब्रूयाद्योजनानां शतैरपि ॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ ८२ ॥ तिस्रः कोट्यो
ऽर्धकोटी च तीर्थानि भुवनत्रये ॥ तानि स्नातुं समायान्ति गंगायां सिंहगे गुरौ ॥ ८३ ॥ षष्टिवर्षसहस्राणि भागीरथ्यवगाहनम् ॥ सकृद्गोदावरी
स्नानं सिंहयुक्ते बृहस्पतौ ॥ ८४ ॥ इयं तु गौतमी पुत्र यत्र क्वापि शिवाऽऽज्ञया ॥ सर्वेषां सर्वदा नृणां स्नानान्मुक्तिं प्रदास्यति ॥ ८५ ॥ अश्वमेध

सहस्राणि वाजपेयशतानि च ॥ कृत्वा यत्फलमाप्नोति तदस्य श्रवणाद्भवेत् ॥८६॥ यस्यैतत्तिष्ठति गृहे पुराणं ब्रह्मणोदितम् ॥ न भयं विद्यते तस्य कलिकालस्य नारद ॥ ८७ ॥ यस्य कस्यापि नाऽऽख्येयं पुराणमिदमुत्तमम् ॥ श्रद्दधानाय शान्ताय वैष्णवाय महात्मने ॥८८॥ इदं कीर्त्यं भुक्तिमुक्तिदायकं पापनाशकम् ॥ एतच्छ्रवणमात्रेण कृतकृत्यो भवेन्नरः ॥ ८९ ॥ लिखित्वा पुस्तकं यस्तु ब्राह्मणाय प्रयच्छति ॥ सर्वपापैर्विनिर्मुक्तः स गर्भं न पुनर्विशेत् ॥ ९० ॥ ॥ इति श्रीब्रह्मपुराणगतगौतमीमाहात्म्ये तीर्थमाहात्म्ये ब्रह्मनारदसंवादे गंगामाहात्म्यश्रवणादिफलवर्णनं नाम पञ्चाधिकशततमोऽध्यायः ॥ १०५ ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

॥ समाप्तं गौतमीमाहात्म्यसहितं ब्रह्मपुराणम् ॥

महर्षिव्यासगदितं पुराणं ब्राह्ममादिमम् ॥ शोधितं यत्नमास्थाय रंगनाथेन सूरिणा ॥

अयं ग्रन्थो मुम्बय्यां क्षेमराज श्रीकृष्णदासश्रेष्ठिना स्वकीये "श्रीवेङ्कटेश्वर" स्टीम्-यन्त्रागारे मुद्रयित्वा प्रकाशितः ।
चैत्र संवत् १९६३, शके १८२८.

अत्रेयमभ्यर्थना.

अस्माकं मुद्रणालये [illegible] काव्य-नाटक-कोश काव्य-चम्पू-नाटकालं
कार-हेमांत मीमि [illegible]
[illegible]
[illegible]
[

अत्रेयमभ्यर्थना.

अस्माकं मुद्रणालये वेद-वेदान्त-धर्मशास्त्र-प्रयोग-योग-सांख्य-ज्योतिष-पुराणेतिहास--वैद्यक-मंत्र-स्तोत्र-कोश--काव्य-चम्पू--नाटकालंकार-संगीत--नीति--कथाग्रंथाः, बहवः स्त्रीणां चोपयुक्ता ग्रंथाः, बृहज्ज्योतिषार्णवनामा बहुविचित्रचित्रितोऽयमपूर्वग्रन्थः। संस्कृतभाषया, हिन्दीमार्वाडचन्यतरभाषाग्रन्थान्तस्तच्छास्त्राद्यर्थानुवादकाः, चित्राणि, पुस्तकमुद्रणोपयोगिन्यो यावत्यस्सामग्र्यः, स्वस्वलौकिकव्यवहारोपयोगिचित्रचित्रितालिखितपत्रवत्पुस्तकानिचः मुद्रयित्वा प्रकाशन्ते सुलभेन मूल्येन विक्रयाय। येषां यत्राभिरुचिस्तत्तत्पुस्तकाद्युपलभ्यते एवं नव्यतया स्वस्वपुस्तकानि मुमुद्रयिषुभिः सुलभयोग्यमौल्येन सीसकाक्षरैः सुच्छोत्तमोत्तमपत्रेषु मुद्रिततत्पुस्तकानां स्वस्वसमयानुसारेणोपलभ्यते च पत्रिकाद्वारातैः प्रेषणीयोऽस्मि। अधिकमस्मदीयमूचीपुस्तकानां भिन्नभिन्नविषयाणां प्रापणेन "श्रीवेङ्कटेश्वरसमाचार" पत्रिकाप्रापणद्वारा च ज्ञेयमिति शम्।

क्षेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्रालयाध्यक्षः—मुंबई.

KHEMRAJ SHRIKRISHNADAS, 'SHRIVENKATESHWAR'STEAM PRESS,

BOMBAY.